काधिकाशीतियुतंशतंयत्तद्द्वादशेकाकरुतेप्रदिष्टं ७
त्रयोदशेपिंगलिकारुतेतुभविष्यतोवृत्तशतेतथोभे पं
चाशतान्वैचचतुःपदानांवर्गोऽत्रभावीसचतुर्दशोयः ८
त्रयोदशैवेहचषट्पदादिरुताभिधेयंचदशोथवर्गे ॥

॥ टीका ॥

सपंचवृत्तइति पंचवृत्तैःसहवर्तमानेत्यर्थः तथा पूर्वोक्तप्रकारेण इहेति अस्मिन् शास्त्रेखंजनशाकुनाख्ये खंजन विचारसंज्ञिनेदशमेवर्गेषड्विंशतिर्वृत्तानिभावीति ६ एकादशेति । चपुनः यदेकादशंकरापिकारुतंवर्तते तदेकादश वृत्तमेवेति । एकादशसंख्यानिवृत्तानियत्रतथा एकाधिकाशीतिशतंयुक्तंयद्वर्तते अर्थाद्वृत्तानांतद्द्वादशेकाकरुतेप्रदिष्टंकथितंइत्यर्थः ७ त्रयोदशेति । तथा त्रयोदशेपिंगलिकारुतेउभेवृत्तशतेभाविष्यतः यश्चतुर्दशश्चतुष्पदानांवर्गः सोत्रपंचाशतावृत्तैर्भावीति ८ त्रयोदशेति । पंचदशोवर्गेषट्पदादिरुताभिधेषट्पदप्रभृतीनांयद्रुतंतदेवाभिधायस्य तत्तथात्रयोदशैर्वृत्तैर्वेदजानीहि

॥ भाषा ॥

पंचाशश्लोक जामें एसो नवमवर्ग होयगो ओर तेसें या शास्त्रमें खंजन शाकुननाम जाको एसो दशमो वर्ग तामें छब्बीस श्लोक होंयगे ॥६॥ एकादशेति ॥ करापिकारुत नामकरकें ग्यारे हें श्लोक जामें एसो ग्यारमोवर्ग कहेंगे ओर एकसोइक्यासी श्लोक करकेंयुक्त काकरुत जाको नाम एसोबारमो वर्ग कह्यो है ॥७॥ त्रयोदशेति ॥ ओर तेसेंहीदोयसेहें वृत्त कहिये श्लोकजामें एसो पिंगलिकारुतनाम तेरवोंवर्ग होयगो ओर जो चोधवों वर्ग चतुष्पदनको है या के पंचाश श्लोकहोंयगे ॥८॥ त्रयोदशेति ॥ भ्रमरादिकनको जो रुत कहिये शब्द सोई है नाम जाको एसो पंद्रमो वर्गतेरह श्लोकनकरकें होयगो ओर जो

पिपीलिकाशाकुनसंज्ञवर्गोयःषोडशःपंचदशैवतत्स्मिन् ९ द्वात्रिंशतासप्तदशोथवृत्तैःपल्लीरुताख्यो
भविताख्यवर्गः श्वचेष्टितेष्टादशसंख्यवर्गेद्वाविंश
तिर्वृत्तशतद्वयंच १० एकोनविंशश्चशिवारुताख्या
वृत्तैर्नवत्याभविताचवर्गः प्रभाववर्गःपुनरत्रविंशो
भावीचवृत्तैर्दशभिश्चतुर्भिः ११ प्रकीर्तिताविंशति
रेवमस्मिन्वर्गामहाशाकुनसारभूताः ॥

॥ टीका ॥

संख्यामितिशेषः नाधिकैरित्यर्थः यःपिपीलिकाशाकुनसंज्ञवर्गोवर्ततेसषोडशोवर्गस्तस्मिन्शास्त्रेपंचदशैर्वृत्तैर्भावीति ॥९॥ द्वात्रिंशतेति ॥ अथसप्तदशः पल्लीरुताख्योवर्गः द्वात्रिंशतावृत्तैर्भविता अष्टादशसंख्यवर्गेश्वविचेष्टिते वृत्तशतद्वयंचपुनः द्वाविंशतिर्वृत्तानिभावीति ॥१०॥ एकोनविंशतिरिति ॥ एकोनविंशोवर्गःशिवारुताख्योनवत्यावृत्तैर्भविता अत्रपुनः प्रभाववर्गः विंशः दशभिश्चतुर्भिर्वृत्तैरिति चतुर्दशभिर्वृत्तैरित्यर्थः भावीभविष्यतीत्यर्थः ॥११॥ प्रकीर्तिताइति ॥ अस्मिन्शास्त्रेमहाशाकुनसारभूतावर्गाविंशतिः प्रकीर्तिताःकथिताग्रंथकर्त्रेतिशेषः तुपुनः इहास्मिन्शास्त्रेसर्वाग्रंथवृत्तसं-

॥ भाषा ॥

पिपीलिका शाकुन संज्ञा जाकी एसो सोळवों वर्ग है तामें पंद्रह श्लोक होंयगे ९ द्वात्रिंशतेति ॥ पल्लीरुत है नाम जाको एसो सत्रमो वर्ग बत्तीस श्लोकनकरकें होयगो और अठारमो वर्ग श्वाननकी चेष्टा जामें एसो श्वचेष्टितनाम तामें दोयसें बाईस श्लोक होंयगे ॥१०॥ एकोनविंशतिरिति ॥ शिवारुत है नाम जाको एसो उन्नीसमों वर्गनव्वे श्लोकनकरकें होयगो फेर वीसमों प्रभाव वर्ग चोधे श्लोकनकरकें होयगो ॥ ॥११॥ प्रकीर्तिताइति ॥ याशास्त्रमें महाशाकुननके सारभूतवीस वर्ग ग्रंथकर्तानें कहें हैं ॥ फेर या शास्त्रमें संपूर्ण ग्रंथके श्लोकनकी संख्या एक हजार सत्ता-

सहस्रमेकंत्विहवृत्तसंख्या तथासपादानिशतानिपंच १२
शास्त्रसंग्रहतरीमधिरूढः शाकुनांबुनिधिमेवमगाधं
गाहतेशाकुनरत्नविशेषान्नुच्चिनोतिसफलामृतसिक्तान्
१३ इतिश्रीवसंतराजशाकुनेसमस्तकौतुके कथितः
शास्त्रसंग्रहोद्वितीयोवर्गः २ शाकुनगुरुशाकुनार्च्चन
मधुनाब्रूमोमुनिवरदर्शितविधिना यस्माद्विहितंपूजापू
र्वंसिध्यतिकार्यमवश्यंसर्वम् १

॥ टीका ॥

ख्या एकंसहस्रंतथा पंचशतानिसपादानीतिपादचतुर्थांशः ज्ञानसान्निध्यात्तस्यैवचतुर्थांशोगृह्यते तत्सहितानिपंचविंशतिश्लोकसहितानिप्रकीर्तितानीत्यर्थः १२ शास्त्रसंग्रहेति । शास्त्रसंग्रह एवतरीयानपात्रंतदधिरूढः पुमान् एवंशाकुनांबुनिधिमगाधमतलस्पर्शंयोऽवगाहते सत्फलामृतसिक्तान्शाकुनरत्नविशेषान्नुच्चिनोति प्राप्नोतीत्यर्थः १३ वसंतराजइति अत्रद्वितीयेवर्गे मयाशास्त्रसंग्रहः कृतइत्यन्वयः शेषंपूर्ववत् इतिश्रीशत्रुंजयकरमोचनादिसुकृतकारिभिर्महोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायांवसंतराजवृत्तौद्वितीयोवर्गः २ अथतृतीयेवर्गेपूजाप्रोक्तातांदर्शयन्नाह शाकुनगुरुरिति शाकुनस्यशाकुनज्ञानस्ययोगुरुरध्यापकस्तद्दर्शकोवाशाकुनाःपक्षिणस्ते

॥ भाषा ॥

पानसें १५२५ श्लोक हें ॥१२॥ शास्त्रसंग्रहेति ॥ शास्त्रको संग्रह सोई हुयी नौका तापे बेठो हुयो पुरुष हे सोया प्रकारकरकें अगाधजो शाकुनरूपी समुद्र ताय तिरजाय ओरसत् फलरूपीजो अमृत ताकरकें शींचे हुयेजे शाकुन रूपी रत्नविशेष तिने प्राप्त होंयहे ॥१३॥ इतिश्री-वसंतराजशाकुनभाषाटीकायां, शास्त्रसंग्रह द्वितीयोवर्गः ॥ २॥ अब तृतीयवर्गमें पूजा कही हे ताय कहेंहें ॥ शाकुनगुरुरिति ॥ शकुनज्ञानके अध्ययनके करायवेवारे गुरू ओर शकुनजे पक्षी तिनको अर्चन ताय अब हम कहेंहें पूर्वाचार्य जे मुनिवर तिननें दिषाई जो

विमर्शकृच्छाकुनशास्त्रदक्षोविशुद्धबुद्धिःसतताभियुक्तः
यथार्थवादीशुचिरिंगितज्ञोभवेदिहाचार्यपदाधिकारी २

॥ टीका ॥

षामर्चनंपूजनमधुना द्वितीयवर्गकथनानंतरं वयंब्रूमः केनमुनिवरदर्शितविधिनेति मुनिवरैः पूर्वाचार्यैर्दर्शितोयोविधिस्तेनेत्यर्थः यस्मात्कारणात्पूजापूर्वं विहितं निष्पादितंकार्यं पुनःसर्वमेव सिद्ध्यति १ इहाधिकारीकीदृक्स्यादित्यपेक्षायामाह विमर्शकृदिति इहास्मिन्ग्रंथेईदृगाचार्यपदाधिकारीभवतीत्यन्वयः तत्राचार्यतेसेव्यतेज्ञानार्थंशिष्यैरित्याचार्यस्तस्यपदंस्थानं तत्राधिकारः प्रवर्तनंविद्यतेयस्य सतथा कीदृग्विमर्शकृदिति विमर्शंपूर्वापर्यालोचनंकरोतीति विमर्शकृत् क्विपः सर्वापहारे-ह्रस्वात्पितिकृतीतिलुक् पुनःकीदृशः शाकुनशास्त्रदक्षइति शाकुनंयच्छास्त्रंतत्रदक्षश्चतुरः पुनःकीदृग्विशुद्धबुद्धिः विशुद्धानिर्मला शाकुनविचारकरणकुशलेतियावद्बुद्धिः प्रतिभायस्यसः पुनःकीदृक्सतताभियुक्तः सततमहर्निशमभियुक्तः पठनपाठनादिनाकृतपरिश्रमः पुनःकीदृक् यथार्थवादीति यथार्थंयथादृष्टानुसारीवदतीत्येवंशीलः सतथा नतु तन्मनोरंजनाय वैपरीत्यमपिभाषते यदुक्तमन्यत्र सकिंसखासाधुनशास्ति योधिपंहितान्नयः संशृणुतेसकिंप्रभुरिति पुनः कीदृशः शुचिः पवित्रः

॥ भाषा ॥

विधी ताकरकें पहलें पूजा करो ताकरकें फिर संपूर्ण कार्य अवश्य सिद्ध होंय ॥ १ ॥ यामें अधिकारी केसो होय ताय कहें हें ॥ विमर्शकृदिति ॥ या ग्रंथमें गुरुपदको अधिकारी एसो होय अर्थात् गुरु एसो होय पूर्वापरको विचार करवेवालो होय ओर शाकुनशास्त्रमें चतुर होय कहा शाकुन अछी तरियांसुं जानतो होय ओर विशेष करकें शुद्धबुद्धि होय ओर जेसो देख्यो होय जेसो होय तेसोही यथार्थको करवेवालो होयं ओर पवित्र होय आलस्यरहित धर्मयुक्त आचारमें शीलस्वभाव जाको होय ओर पहलें कह्या ये मनुष्यादिकनकी चेष्टा ताय जाने एसो होय सो गुरु होयवेकूं योग्य हे ॥ २ ॥

पोदकी १ भषण २ काक ३ पिंगला ४ जंबुकप्रियतमा ५
चपंचमी एतदत्रमुनिसत्तमैः सदाकीर्त्यते शकुनरत्न
पंचकं ३ सरस्वतीपांडविकां प्रधानां यक्षोऽपि यक्षं
गरुडश्चकाकम् ॥

॥ टीका ॥

देहमालिन्यरहितसदाचरणशीलश्च पुनः कीदृक् इंगितज्ञइति इंगितं पूर्वोक्तं जानातीतिइंगितज्ञः २ अथशकुनेषुमुख्यत्वेनपंचैवप्रतिपादयन्नाह पोदकीति तत्रपोदकी देवी अन्यत्रकाली चिडीति प्रसिद्धिः भषणकाकपिंगलाइति द्वंद्वः भषणःश्वाकाकः करटः प्रसिद्धः पिंगलाउलूकवदना शकुनविशेषः एतेषामितरेतरद्वंद्वः मरुस्थल्यांभैरवीति गौर्जरेचीवरीतिप्रसिद्धिः अन्यत्रखूसटराजगृहादौ पेचकइति पंचमी जंबुकप्रियतमा शृगालीत्यर्थः अत्रास्मिन् ग्रंथे मुनिसत्तमैः प्रधानमुनिभिरेतच्छकुनरत्नपंचकं शकुनेषु रत्नं मुख्यमित्यर्थः जातौजातौ यदुत्कृष्टं तद्रत्नमभिधीयते इतिवचनात्तेषां पंचकं पंचैवपंचकं स्वार्थेकः सदाकीर्त्यते सर्वकालं प्रतिपाद्यते नतुकदाचित् ३ एतेषांशकुनत्वेमुख्यत्वं कुतस्तदर्थमाह सरस्वतीति सरस्वती ब्रह्मपुत्री पोदकीं पांडविकापरनाम्नीं अधितिष्ठति एतस्या इयमधिष्ठात्रीत्यर्थः प्रधानं यक्षः कुबेरः क्षेत्रपालाधिपः यक्षंश्वानमधितिष्ठति गरुडः काकमधितिष्ठति चिडी

॥ भाषा ॥

शकुननमें मुख्यताकरकें पांचही हें तिनें कहेहें ॥पोदकीति॥ पोदकी १ ये कालीचिडी या नामकरकें प्रसिद्ध हे ओर भषण २ ये श्वानको नाम हे ओर काक ३ ये प्रसिद्धही हे ओर पिंगला ४ घुघूको सो मुख जाको शकुनमें हे गुर्जरदेशमें चीवरी नाम करकें प्रसिद्ध हे ओर जगें रात्रीचरी कहेंहें कहूं खूसटराजा कहेहें कहूं पेचक कहेंहें ओर मारवाडमें भैरवी कहेंहें ओर पांचमी जंबुकप्रियतमा ५ शृगाली प्रसिद्ध नाम हे या ग्रंथमें महामुनिनें येपांचशकुननमें रत्ननाम मुख्यकहेंहें ॥३॥ इनकूं शकुननमें मुख्यभावकायतें कहेंहें ताको प्रयोजन

चंडीपुनः पिंगलिकांसदैवाशिवांशिवादूत्यधितिष्ठती ह ४ नदेवताधिष्ठितमंतरेण तिष्ठंतिकेचित्पशुपक्षिणोऽस्मिन् हिंस्यानते शाकुनिकेन घातात्क्रुध्यंति देव्यस्तदधिष्ठिताहि ५

॥ टीका ॥

देवीपुनः पिंगलकां पूर्वोक्तां कालीचिडीं वाचीवरीमधितिष्ठति सदैवसर्वकालं शिवादूती शिवापार्वती नस्याः दूती अनुचरी शिवा श्रृगालीमधितिष्ठति अधिष्ठातॄणां मुख्यत्वेनैतेषां मुख्यत्वमितिभावः ४ अन्यपशुपक्षिणो देवताधिष्ठिताः संतिनवेत्याकांक्षायामाह नदेवतेति अस्मिन्लोके पशुपक्षिणः देवताधिश्रयमंतरेण देवताश्रयणव्यतिरेकेण नतिष्ठंति सर्वेषामधिष्ठात्र्यः संतीतिभावः अतः शाकुनिकेन तेनहिंस्या नमारणीयाः हि यस्मात्कारणात् घातात्तदधिष्ठितास्तदाश्रितादेव्यः क्रुध्यंति कोपंकुर्वन्तीत्यर्थः ५ ॥ छ ॥

॥ भाषा ॥

कहेंहें ॥ सरस्वतीति ॥ ब्रह्माजीकी बेटी ब्रह्मपुत्री जो सरस्वती सो पांडविका जाकोनामेंएसीजो पोदकी तापे स्थितरहेहे याकी आधिष्ठाता देवीहे यातें याकूं सरस्वती और ब्रह्मपुत्री और पांडविका इतने पोदकीके नाम कहेंगे और यक्ष जो कुबेर अथवा क्षेत्रपालकेवी आधिप भैरव सोश्यानपे स्थित रहेंहें और गरुडकाकपे स्थितरहेहे और चंडीजो देवी सो पिंगलिका जो काली चिडी वा चीवरी ताकेऊपर स्थितरहेहे औरशिवाजो पार्वती ताकीदूती अनुचरी सो श्रृगाली पेस्थित रहेहे इन पांचों आधिष्ठाता देवतानकूं मुख्यता हे यातें इनपांचोनकूंवी सबपक्षीनमें मुख्यताहे ॥ ४ ॥ इन पांचोनतें औरजे पशुपक्षी हें उनपें देवता स्थितहें वा नहींहे तापे कहेंहें ॥ नदेवतेति ॥ या लोकमें कोईवी पशुपक्षी देवतानके आश्रयविना नहीं हे संपूर्ण पशुपक्षीके आधिष्ठाता देवताहें यातें शकुनदेखवेवारेकूं कोईवी मारनो योग्यनहीं हे क्योंइनके मारेते इनकेऊपरकी आधिष्ठातादेवी ते कोपकरेंहें ॥ ५ ॥

हैमानिरौप्याण्यथपैष्टिकानितेषांस्वशक्त्यामिथुनानिकृत्वा अभ्यर्चयेत्पंचभिरेवतुष्टैस्तुष्यंतिपुंसांशाकुनांतराणि ६ यंबुध्यतेयोस्तिचयत्रदेशोयत्रानुरागोऽनुभवोऽथवास्यात् सएववाशाकुनकोविदेनभक्तेनशक्त्याशाकुनोर्च्चनीया ७ वृत्तंविदध्याच्चतुरस्रकंवा पृथ्वीतलेमंडलकंविशुद्धे ॥

॥ टीका ॥

मुख्यत्वेहेत्वंतरमाह हैमानीति हेमनिष्पन्नानिरौप्याणिरूप्यानिष्पन्नानिपैष्टकानिमाषचूर्णोपजनितानि मिथुनानि युगलानि स्वशक्त्या स्वविभवानुसारेण कृत्वाविधाय अभ्यर्चयेत्पूजयेत् एभिः पंचभिस्तुष्टैः पुंसांशाकुनांतराणि तुष्यंति ६ यंबुध्यतेति सएवशाकुनः शाकुनकोविदेनकेनाचिच्छकुनज्ञानवता भक्तेन शक्त्या स्वसामर्थ्यानतिक्रमेण अर्चनीयः तद्यं शब्दस्य यच्छब्दसापेक्षत्वादाह यमिति यंशकुनंशाकुनिकः बुध्यते यत्रदेशोयोऽस्ति यत्रच अस्यानुरागः भक्तिः अथवा यत्र अनुभवः पुनः पुनर्विलोकनात् याथार्थ्यप्रतीतिः ७ वृत्तमिति विशुद्धे पृथ्वीतले वृत्तंवर्तुलं चतुरस्रकं वा चतुर्भिः रंगैः समान्वितं वा मण्डलकं विदध्यात्कुर्यादित्यर्थः

॥ भाषा ॥

॥हैमानीति॥ अपनी शक्तीके अनुसार सुवर्णके वा चांदीके वाउडदके चूनके मिथुन नाम जोडा जोडी बनायके फिर पूजन करे पूजन करेसूं प्रसन्न हुये जे पांचों देवता तिन करकें पुरुषनकूं औरवी शकुन प्रसन्न होंय हैं ॥ ६ ॥ यंबुध्यतेति ॥ शकुनी जाशकुनकूं जानतो होय जा देशमें जो शकुन होय जामें याकी भक्ति होय जामें अनुभव होय सोही शकुन शकुनज्ञानमें चतुरभक्त होय ताकरकें अपनी सामर्थमूजम पूजनकरनो योग्यहे फिर शकुनके वारंवार देखवेतें यथार्थप्रतीति होयहै॥ ७॥ वृत्तमिति ॥ पुराणके श्लोकनकरकें परीक्षा प्राप्त हुयी ऐसी गौताको गोवर होय पृथ्वीमें गिर्योनहोय हाय

पौराणिकश्लोकपरीक्षितायासंगृह्यगोर्गोमयमंतरि-
क्षात् ८ अत्यंतजीर्णदेहायावंध्यायाश्चविशेषतः
रोगार्तनवसूतायानगोर्गोमयमाहरेत् ९ तस्मिन्विचि
त्रविततंविदध्यात्पिष्टान्नकेनाऽष्टदलंसरोजं यद्वावि
शिष्टैर्मसृणप्रपिष्टैर्वस्त्वंतरैश्चंदनकुंकुमाद्यैः १०

॥ टीका ॥

किंकृत्वासंगृह्य किंगोमयं छगणंकस्मात् अंतरिक्षाद्भूमिमप्राप्तामित्यर्थः कस्याः गोः धेनोः कथंभूतायाः पौराणिकश्लोकपरीक्षितायाइति पुराणेभवोयः श्लोकः तेनपरीक्षां प्राप्तायाइत्यर्थः ८ तदेवपौराणिकश्लोकंदर्शयन्नाह अत्यंतेति एतादृश्याः गोर्गोमयं न आहरेत् नानयेदित्यर्थः अत्यंतजीर्णदेहायाइति अत्यंतंजीर्णःशिथिलीभूतोदेहः शरीरंयस्याः सातथाचपुनरर्थे वंध्यायाइति सदापत्योत्पत्तिरहितायाः विशेषतइति यस्याः दर्शनंनिषिद्धं तस्यागोमयमपि सर्वथानिषिद्धमिति ज्ञापयितुंविशेषपदोपादानं रोगार्त्तनवप्रसूतायाइति रोगार्त्ता रोगव्याप्ता नवाचासौ प्रसूताचेतिकर्मधारयः पूर्वस्यपुंवद्भावः अत्रनवत्वंप्रसूत्यपेक्षयामंतव्यं तेनवृद्धादौनवा ९ मंडलेकिंकुर्यादित्याह तस्मिन्निति तस्मिन्मंडले पिष्टान्नकेनाष्टदलं अष्टपत्रं सरोजं कमलं विदध्यात्कुर्यात् कीदृशं विचित्रं विविधवर्णोपेतं पुनःकीदृशं

॥ भाषा ॥

को हाथमें ही लेलियो होय एसो गोवर लेकरकें फिर शुद्ध पृथ्वीमें गोलमंडल अथवा चोखूंटो मंडल करे॥ ८॥ सोही पुराणको श्लोक नाय कहेंहें ॥ अत्यंतेति॥ अत्यंत जीर्ण देह जाको होय फिर वंध्या होय संतानरहित होय और जाको दर्सन ही करवेको निषेध हे ताको गोवर सर्वथा निषेध हे और रोग करकें आर्त होय और नवीन व्याही होय एसीगौको गोवर यामें नहीं लानो ॥ ९॥ या मंडलमें करनो सो कहेंहें ॥ तस्मिन्निति ॥ ता मंडलमें चून करकें चित्रविचित्र वर्ण करकें युक्त होय और लंबो चोडो होय एसो-

पीतः सुरेशः कपिलोहुताशः कृष्णोयमः श्यामवपु
श्चरक्षः शुक्लः प्रचेताहरितःसमीरश्चित्रोधनेशोध
वलोमहेशः ११ एवंविधापद्मदलोदरेषु क्रमेणदि-
क्ष्वष्टसु लोकपालाः ॥

॥ टीका ॥

विततंविस्तीर्णं यद्वाकुंकुमचंदनाद्यैरिति कुंकुमंकेसरं काश्मीरं कुंकुमंवह्निशिखेति कोशोक्तेश्चंदनंमलयोद्भवंते आद्येयेषांतेस्तथा कीदृशैर्विशिष्टैः नवीनैः मसृणप्रपिष्टैरिति मसृणंश्लक्ष्णंप्रपिष्टैर्मर्दितैर्वस्त्वंतरैः पदार्थांतरैः सरोजं कुर्यादित्यर्थः १० पीतइति पीतः सुरेशोमघवान्वर्ततेइति अस्य सर्वत्रसंबंधः हुताशः कपिलः पीतरक्तइत्यर्थः यमः कृष्णश्च पुनरर्थे रक्षः श्यामवपुः श्यामंवपुर्यस्यसतथा प्रचेता वरुणः शुक्लः समीरः पवनः हरितोनीलवर्णः धनेशोधनदः चित्रोनेकवर्णः महेशोरुद्रः धवलः श्वेतवर्णः श्वेतोगुणोविद्यते यस्मिन्निति अर्शादित्वादप्रत्ययेविशेषणविशेष्यभावः ११ एवंविधाइति पूर्वोक्तवर्णोपयुक्तालोकपालाः पूर्वादिक्क्रमेण अष्टसुदिक्षु पद्मदलोदरेषुस्थापनीयाइति शेषः ततः आ-

॥ भाषा ॥

अष्टदल कमल करे अथवा कुंकुम जो केसर और मलयागिरिको चंदन ये हें आदिमें जिनके तिनकरकें वा नवीन पिसेहुये और कोई पदार्थ तिन करकें कमल करे॥१०॥ ॥पीतइति॥ पीत वर्ण जाको एसो देवतानको स्वामी इंद्र वर्ते हे और कपिल जो पीतरक्त हे वर्ण जाको एसो अग्नि वर्ते हे और शुक्ल हे वर्ण जाको एसो वरुण और कृष्ण हे वर्ण जाको एसो यमराज और श्याम हे वपु जिनको एसो राक्षस और शुक्ल हे वर्ण जिनको एसो वरुण और हरित जो नीलवर्ण हे जाको एसो पवन और अनेक हे वर्ण जाके एसो धनेश जो कुबेर और श्वेत हे वर्ण जिनको अथवा श्वेतहे गुण जामें एसो महेश जो शिवजी रुद्र ये सबमंडलमें वर्ते हें॥ ११ ॥ एवंविधाइति॥ पूर्व कहे जे

आचार्यवाक्यानुगतेनपुंसामहार्हपूजाविधिनार्चनी
याः १२ अर्चासनालेपनपुष्पधूपनैवेद्यदीपाक्षत
दक्षिणाभिः ॐकारपूर्वैर्नमसाचयुक्तैर्महाप्रभा-
वैर्निजनाममंत्रैः १३

॥ टीका ॥

चार्यवाक्यानुगतेनेति आचार्यस्य शकुनाचार्यस्यवाक्यमुपदेशः तस्मिन् अनुगतेन तदनुयायिनेत्यर्थः पुंसा पुरुषेण अर्चनीयाः पूजनीया इत्यर्थः केनमहार्हपूजाविधिनेति महानर्होयस्याः महार्हासा महार्हा एवंविधाया पूजा तस्याविधिस्तेनेत्यर्थः महार्घ्यपूजाविधिनेति वा पाठः तत्रमहार्घ्यं वस्तुतेनयापूजातत्संबंधीयोविधिस्तेनेत्यर्थः १२ अर्चासनेति अर्चा प्रथमतः सुगंधद्रव्येणपूजा आसनं पट्टकादिस्थापनं आलेपनं चंदनद्रवेण पुष्पाणि कुसुमानि धूपः वह्निसंयोगात् काकतुंडप्रभवो धूमः नैवेद्यं पक्वान्नादि यदग्रेस्थाप्यते दीपः दशाकर्षः अक्षतास्तंडुलाः दक्षिणा पूजानंतरं ब्राह्मणेभ्योदानार्हद्रव्यं ॐकारपूर्वैरिति ॐकारः पूर्वंप्रथमं येषांतानि तथा नमसाचयुक्तैरिति चकारात्प्रांते नमः शब्दयुक्तैरित्यर्थः निजनाममंत्रैरिति यस्यार्चनं तत्र तन्नामग्रहणपूर्वकं पूर्वोक्तैः वस्तुभिः पूजाकार्येतिभावः १३ ॥छ॥

॥ भाषा ॥

वर्णे तिनकरकें सहित लोकपालदेवतानकूं पूर्वादिक्रमकरकें आठें दिशानमें कमलके पत्तानमें स्थापन करे ता पीछें गुरूनके वाक्यके अनुगत महार्ह पूजा विधीकरकें पुरुषकूं पूजन करनो योग्यहे ॥१२॥ अर्चासनेति॥ पहलेंही सुगंधद्रव्य करकें पाद्य अर्घ आचमनीय स्नान पूजा सो अर्चा ओर पट्टाकूं आदिले तापे स्थापन करनो ओर चंदन पुष्प धूप काककी चोंचमें होय धूपकी धूआ उठे ओर दीपक नैवेद्य पक्कान्नादिक वाके अगाडी स्थापन करे अक्षत दक्षिणा इन करकें ओर प्रणवहे आदिमें जाके ओर

तेनैवरूपेणततः क्रमेणपूजांविदध्याज्जलजस्यम
ध्ये धनुर्द्धरीवायसपिंगलानांकौलेयकस्यापित-
तःशिवायाः १४ गुरूपदेशात्समवाप्यमंत्रंशतंज
पेत्तस्यकृतावधानः होमोदशांशेनचमंत्रजापान्त
तोविधेयोमधुनासमिद्भिः १५

॥ टीका ॥

तेनैवेति तेनैवपूर्वोक्तप्रकारेणजलजस्येति पिष्टान्नकृतकमलस्यमध्ये क्रमेणपूजांविदध्यात्कस्याः धनुर्द्धरीवायसपिंगलायाः धनुर्द्धरीपोदकी वायसःप्रसिद्धः पिंगलापूर्वप्रतिपादिना नचात्रसमाहारःद्वंद्वः तदेकत्वेच नपुंसकलिंगतास्यात् अतः धनुर्द्धरीवायसाभ्यांयुक्तापिंगलेति मध्यपदलोपी तत्पुरुषः पुनः कस्येति कौलेयकस्य शुनइत्यर्थः ततःकस्याःशिवायाः शृगाल्याः अस्थिभुक्भषणः सारमेयः कौलेयकः शुनइतिहैमः १४ गुरूपदेशादिति गुरूणामुपदेशः गुरूपदेशः तस्मान्मंत्रंप्राप्यशतंजपेत् कीदृशः कृतावधानइति कृतं अवधानंचित्तैकाग्र्यं येन सतथा कस्येति पूर्वोक्तपंचानामित्यर्थः जात्यपेक्षयाचैकवचनं ततः मंत्रजापादनंतरं मधुना क्षौद्रेणच पुनः समिद्भिःपालाशैः दशांशेनचेतियावान्मंत्रजापः

॥ भाषा ॥

नम अंतमें जाके ओर जाको अर्चन होय ताको नाम बीचमें ले ॐ इंद्रायनमः ॥ ॐ वरुणायनमः ॥ एसें मंत्रनकरकें पूजा करनो योग्य हे ॥ १३ ॥ तेनैवेति ॥ पहलें कह्यो जो प्रकार ताकरकें चूनको कियो जो कमल ताके मध्यमें धनुर्द्धरी जो पोदकी ओरकाक ओर पूर्व कह्याए जो पिंगला चीवरी नाम कर प्रसिद्ध ओर कौलेयक जो श्वान ओर शृगाली इनको क्रम करकें पूजन करे ॥ १४ ॥ गुरूपदेशादिति ॥ गुरूनके उपदेशतें पांचोनके मंत्र प्राप्त होय करकें फिर कीनो हे एकाग्रचित्त जाने एसो मनुष्य सो मंत्रजपे जाप किये पीछें सहत ओर समिधा इन-

ध्यानंविदध्यादथवक्ष्यमाणरूपेणदुर्गायुगलादिकानां तुष्यंतियेनार्च्चनजाप्यहोमध्यानैकतानस्यनरस्यदेवाः १६ ज्ञानमुद्रयैकमंकितंकरंपुस्तकेनचिन्हितंतथापरम् बिभ्रतींहिमेंदुकुन्ददीधितिंपंकजासनांस्मरेत्सरस्वतीम् १७

॥ टीका ॥

तद्दशमभागेनेत्यर्थः होमोविधेयः कर्त्तव्यः १५ ध्यानमिति अथेति मंत्रजपानंतरं वक्ष्यमाण रूपेण अग्रे कथ्यमान प्रकारेण दुर्गायुगलादिकानांध्यानं विदध्यात् येनार्च्चनजाप्य होम ध्यानेषु एकतानस्य एकाग्रचित्तस्य नरस्य देवास्तुष्यन्ति संतुष्टि भाजो भवन्ति १६ ज्ञानमुद्रेति एवंविधांसरस्वतीं स्मरेत् ध्यायेत् किंकुर्वतीं बिभ्रतींकरं कीदृशं ज्ञानमुद्रया अंकितं चिन्हितं ज्ञानमुद्रात्वेवं अंगुष्ठानामिके सक्ते हृदये विनियोजिते ज्ञानमुद्रेयमाख्याता देवानामिव दुर्लभा तथापरंद्वितीयं करं पुस्तकेन चिन्हितं कीदृशीं हिमेंदु कुंददीधितिं हिमं तुहिनं इंदुश्चंद्रः कुंदं पुष्पविशेषः तद्वत्दीधितिः यस्याः सा तथा पंकजासनामिति पंकजमेवासनमुपवेशन स्थानं यस्याः सा तथेतिपोतकीं प्रपूज्येत्यर्थः १७

॥ भाषा ॥

करकें जितनो मंत्रनको जाप होय ताको दशांश होमकरनो योग्यहै ॥१५॥ ध्यानमिति ॥ मंत्रको जप किये पीछे आगें कहेंगे ता प्रकार करकें दुर्गा युगलकूं आदिलेके पांचोनको ध्यान करे जा ध्यानकरकें अर्चन जप होम ध्यान इनमें एकाग्रचित्त जाको ता मनुष्यके ऊपर देवता प्रसन्न होयहें ॥१६॥ ज्ञानमुद्रेति ॥ ज्ञानमुद्राकरकें चिन्हित अंगूठा अनामिका मिलाय हृदयमें युक्त करे यांकूं ज्ञानमुद्रा कहेंहें एक हस्त ज्ञानमुद्रासहित धारण करे और दूसरो हस्त पुस्तककरकें युक्त धारण करे और चंद्रमा और कुंदको पुष्पता किसी है कांति जाकी और तैसेंही कमलको है आसन

गदायुधःसर्वनिधानभर्त्तामहोदरःकुंडलवान्किरीटी श्वानंसमभ्यर्च्यविचित्रवर्णोध्येयःक्षणंवैश्रवणोनरेण १८ चंचूपुटग्रस्तमहाभुजंगंभुजंगरत्नाभरणाभिरामम् हिरण्यरोचिःखचितांतरिक्षंतार्क्ष्यंस्मरेद्वायसमर्चयित्वा १९

॥ टीका ॥

गदायुधेति श्वानमभ्यर्च्यनरेणवैश्रवणः कुबेरःक्षणंध्येयः ध्यानविषयी कार्य्यः कीदृक्वैश्रवणः गदायुधइति गदाप्रहरणाविशेष आयुधंयस्य सतथा पुनः कीदृक् सर्वनिधानभर्त्तेति भूम्यंतर्निहितंधनंनिधानं तेषांसर्वेषां भर्त्तास्वामी पुनः कीदृशः महोदरइति महदुदरंयस्येति सतथा पुनः कीदृक्कुंडलवान्कर्णाभरणयुक्तः पुनःकीदृक्कीरीटीकिरीटंमुकुटंमुकुटोवर्त्तते यस्यसतथा पुनःकीदृक् विचित्रवर्णइति विचित्रोविविधरूपोवर्णो यस्य स तथा आजानुकनक गौरइत्यर्थः १८ चंच्विति वायसमर्चयित्वा तार्क्ष्यंगरुडंस्मरेत् कीदृशं चंचूपुटग्रस्तमहाभुजंगमिति चंचुपुटेनग्रस्तोग्रहीतो महाभुजंगोयेनसतथा पुनः कीदृशं भुजंगरत्नाभरणाभिराममिति भुजंगरत्नानि मुख्यभुजंगाः तान्येवआभरणानि तैरभिरामंमनोहरं यद्वा भुजंगरत्नानि भुजंगम-

॥ भाषा ॥

जाको एसी जो सरस्वती पोदकी ताय ध्यान करे ॥१७॥ गदायुधेति ॥ श्वानको पूजन करकें फिर गदा है आयुध जाके और फिर संपूर्ण पृथ्वीमें भीतर धर्‍यो हुयो धन तिनको स्वामी और फेर महान् है उदर जाको और कुंडलयुक्त किरीट मुकुट जाकै तैसें ही नाना प्रकारको है वर्ण जाको एसो वैश्रवण जो कुबेर सो मनुष्यन करकें क्षणमात्र ध्यान करनो योग्य है ॥१८॥ चंच्विति ॥ वायस जो काक ताको पूजन करकें फिर चोंच करकें ग्रास कियो है महाभुजंग सर्प जानें और भुजंग रत्न जे मुख्य भुजंग तेही आभरण तिनकरकें मनोहर अथवा भुजंगरत्न जे

शवाधिरूढांनृकपालहस्तांशूलायुधांभूतिसितांग
यष्टिम् उलूकचिन्हांनरमुंडमालांनिर्मांसदेहांरुधिरंपिबन्तीम् २०
असृग्वसाचर्चितकृष्णकायांकरीन्द्रपंचाननचर्मवस्त्राम् ॥

॥ टीका ॥

णयस्तेषां आभरणानीति पूर्ववत् पुनः कीदृशं हिरण्यरोचिः व्यथितांतरिक्षमिति हिरण्यं सुवर्णं तस्य रोचिरिव रोचिः कांतिस्तया व्यथितं वर्णपरावर्तने नअंतरिक्षंगगनंयेनसनथा १९ शवाधिरूढामिति पिंगलिकांप्रपूज्य चंडींस्मरेत् किदृशीं शवाधिरूढामिति शवंमृतकं तत्राधिरूढांस्थितां पुनः कीदृशीं नृकपालहस्तामिति नृणांकपालानि हस्तेयस्याः सा तथा पुनः कीदृशीं शूलायुधामिति शूलमेवायुधंयस्याः सा तथा पुनः कीदृशींविरूपां भूतिसितांगयष्टिमिति भूतिर्भस्मतया सिता श्वेता अंगयष्टिर्यस्याःसा तथा पुनः कीदृशीं उलूकचिन्हामिति उलूकानां घूकानां चिन्हं लक्ष्म यस्याः सा तथा तदाकृतिमदाभरणायुक्तामित्यर्थः पुनर्विशिनष्टि नरमुण्डमालामिति मुंडानिमस्तकानि तान्येवमालायस्याःसा तथा पुनः कीदृशीं निर्मांसदेहामिति निर्गतं मांसं यस्याः सा तथा अतिकृशत्वादित्यर्थः किंकुर्वंतीं पिबंतीं किं रुधिरंपरेषामितिशेषः पुनः कीदृशीं असृग्वसाचर्चितकृष्णकायमिति

॥ भाषा ॥

सर्पमणि तिनके आभरण तिनकरकें अभिराम कहिये सुंदर और फिर हिरण्य जो सुवर्ण ताकी कांतिकरके व्याप्त कियो है आकाश जाने एसे तार्क्ष्य जो गरुडजी ताय स्मरण करे ॥१९॥ शवाधिरूढामिति ॥ पिंगलिकाको पूजनकरकें फिर चंडीकूं - स्मरण करे अब चंडीको स्वरूप कहेंहें चंडी केसी है शव जो मुरदा तापे स्थित - और मनुष्यनके कपाल ते हें हाथमें जाके और फिर शूल जो त्रिशूल सोहे आयुध जाके और भस्मकरकें श्वेत हे अंग जाको तेसेंही फिर उलूक जे घुघ्घू ताको हे चिन्ह

विभीतकस्थामतिभीमरूपांचंडींस्मरेत्पिंगलिकां सपूज्य २१ अधोमुखीघोररवातिरौद्राज्वालाकरालंवदनंवहन्तीम् स्तनंधयैःसप्तभिरभ्युपेताशिवांशिवादूत्यनुचिन्तनीया २२

॥ टीका ॥

असृग्रुधिरंवसानाडी ताभ्यांचर्चितः कृष्णकायोयस्याःसा तथा पुनः कथंभूतां करीन्द्रपंचाननचर्म्मवस्त्रामिति करींद्रो हस्तिपुंगवःपंचाननः सिंहः तयोश्चर्म तदेववस्त्रंयस्याःसा तथापुनः किंरूपां विभीतकस्थामिति विभीतके कलिद्रुमेतिष्ठतीति विभीतकस्थातां पुनः कीदृशीं अतिभीमरूपामिति अतिशयेन भीमंभीषणंरूपंयस्याः सातथा २१ युग्मं अधोमुखीति शिवामभ्यर्च्येतिशेषः शिवादूती अनुचिंतनीयेत्यन्वयः कीदृशी अधोमुखीति अधः मुखंयस्यास्सा स्वांगाद्वेतीप् पुनःकीदृशी घोररवेति घोरः भयोत्पादकः रवः शब्दोयस्याःसापुनः किं कुर्वती वहन्ती किंवदनं कीदृशं ज्वालाकरालमिति ज्वालयां करालं विकृताकारं पुनः कीदृशी सप्तभिः स्तनंधयैः अभ्युपेता सप्तसंख्याकैः पुत्रैः अभ्युपेता समान्विता बालःपाकःशिशुर्डिंभःपोतःशावःस्तनंधयइतिहेमः २२

॥ भाषा ॥

जाके एसी ओर नरमुंडनकी हे माला जाके ओर नहीं हे मांस जाके ओर रुधिरकूं पान कर रही ओर रुधिर नाडी इनकरकें चर्चित हे श्याम देह जाको ओर करींद्र जो श्रेष्ठ हाथी ओर पंचानन जो सिंह इनको चर्म सोई हे वस्त्रजाके ओर तेसें ही फिर विभीतक जो बिल्हाको वृक्ष तामें स्थित एसी ओर अतिशय करकें भयंकर रहे रूप जाको एसी जो चंडी ताय स्मरण करे ॥ २०।२१ ॥ अधोमुखीति ॥ शिवा जो शृगाली ताय पूजनकरकें फिर नीचो मुख जाको भयंकर शब्द जाको ओर ज्वालाअग्निकी मुखमें उठरहीजाके ओर सातपुत्रनकरकें संयुक्त एसी शिवादूतीकूं चिंतमन करे ॥२२॥

यः शाकुनज्ञानमुनिर्विशेषादभ्यर्च्चनीयः शाकुनेक्ष
णाय तंपूजयेत्तत्रभवत्यभीष्टमाचार्यवर्येपरि-
तोषितेहि २३ कृतांजलिर्भूमिनिविष्टजानुमूर्द्धा
प्रणम्यत्रिदशाधिपादीन् यथावदभ्यर्चनतोषि-
तायपूजां समस्तांगुरवेप्रदद्यात् २४ भोजयेदथ
गुडाज्यपायसैः श्रद्धयाकतिपयाः कुमारिकाः ॥

॥ टीका ॥

य इति यः शाकुनज्ञानमुनिः सविशेषादभ्यर्चनीयोभवति कस्मै अतः शकुनेक्षणाय शकुनविलोकनार्थं तत्रेति तस्मिन्स्थले तंशकुनाचार्यंपूजयेत् हि यस्मात्कारणादाचार्यवर्येपरितोषितेसति अभीष्टं वांछितंभवति २३ कृतांजलिरिति समस्तांपूजांगुरवेदद्यात् कीदृग्कृतांजलिरिति कृतोंजलिर्येन सतथा पुनः कीदृग् भूमिनिविष्टजानुरिति भूमौनिविष्टेजानुनीयस्यसतथा-किंकृत्वाप्रणम्यनमस्कृत्यकान्त्रिदशाधिपादीन्लोकपालान्इंद्रादीन्दिक्पालान्केनमूर्द्धाशिरसेत्यर्थः कथंभूतायगुरवे यथावदभ्यर्चनतोषितायेति यथावत्यथाशास्त्रोपदिष्टंयदभ्यर्चनंपूजनंतेनतोषितस्तुष्टिंप्राप्तः तस्मैसतथा कीदृशींपूजांसमस्तामितिसमग्रां २४ भोजयेदिति अथेतिपूजानंतरं कतिप-

॥ भाषा ॥

शकुनके देखवेके लियें पहलें शाकुनज्ञानमुनिविशेषकर पूजवेके योग्यहें ताही समयमें शाकुनज्ञानके आचार्य अपने गुरु उनको पूजन करे आचार्यके प्रसन्न हुयेसुं वांछित फल होंयहें ॥२३॥ कृतांजलिरिति ॥ हाथजोड पृथ्वीमें जानु टेक मस्तक नमाय स्वर्गादिकनके स्वामी लोकपालदेवता तिनें नमस्कार करकें फिर शास्त्रमें कह्यो पूजनता करकें प्रसन्न हुये गुरू तिनके अर्थ समग्रपूजा निवेदन करे ॥२४॥ ॥भोजयेदिति॥ पूजाके अनंतर खांड सक्कर घृतसहित पायस जो क्षीर इनपदार्थन करकें श्रद्धापूर्वक कन्या कुमारी भोजन करावे फिर शकुनके उपदेश-

आत्मनापिविदधीतभोजनंतद्गुरुस्वजनबंधुभिः समं २५ ततोरजन्यांसमुदीर्यमंत्रंध्यात्वाथसर्वान्विधिनोदितेन विचार्यकार्यंमनसासमस्तंशयीतभूमौ विजनेव्रतस्थः २६ ततःप्रयत्नादधिवासितस्य यस्मिन्निवासःशकुनस्ययस्य प्रातःप्रदेशंसमुपेत्य तस्यचेष्टाभिरूहेतसुधीः स्वकार्यम् २७

॥ टीका ॥

याः कियंत्यः कुमारिकाः गुडाज्यपायसैरिति भोजयेत् भोजनंकारयेत् गुडः इक्षुविकारः आज्यंसर्प्पिः ताभ्यांयुक्तानिपयांसितैः करणभूतैः कयाश्रद्धयेतिशुद्धाध्यवसायेनेत्यर्थः आत्मनापितद्भोजनंविदधीत कथंसह कैः गुरुस्वजनबंधुभिरिति गुरुः शकुनज्ञानोपदेशकः स्वजनाः संबंधिनः बांधवो भ्रातरः एतेषांद्वंद्वः तैरित्यर्थः २५ ततइति रजन्यांविजने रहसि भूमौशयीत शयनंकुर्वीत कीदृशः व्रतस्थः ब्रह्मचारी किंकृत्वाउदीर्यउच्चार्य्य पूर्वोक्तं मंत्रंअथशब्दश्चार्थः पुनः उदितेन कथितेन विधिना सर्वान्लोकपालादीन् ध्यात्वा,पुनः किंकृत्वा मनसासमस्तंकार्यंविचार्य २६ ततइति ततः शयनोत्थानानंतरं प्रयत्नादधिवासितस्य निमंत्रितस्य शकुनस्य यस्य यस्मिन्वृक्षेनिवासः स्यात्प्रातः तान्प्रदेशान् गृहात्समुपेत्य तस्य शकुन-

॥ भाषा ॥

कर्ता गुरु और भैया बंधुसहित आपभोजन करे ॥२५॥ ततइति ॥ फिर रात्रीमें शयन करतीसमें पहलें कह आये जो मंत्र ताय उच्चारण करकें कह्यो जो विधान ताकरकें संपूर्ण देवतानको ध्यान करकें समस्त अपनोकार्य ताय विचार करकें फिर निर्जन भूमीमें शयन करे ॥२६॥ ततः इति ॥ सोयकें उठे पीछें प्रातःकाल यत्नतें गंधमाल्यादिक करकें पूजन कियो जो शकुन ताको जा वृक्षमें निवास होय ता वृक्षके समीप आयकरकें विवेकी शकुन चेष्टानकरकें अपनें-

यद्वाशुचिः शाकुनशास्त्रमेतदभ्यर्च्ययत्नादधिवा
स्यसम्यक् प्रयोजनंस्वंप्रतिपाद्यचास्मैहविष्य-
भोजीविजनेशयीत २८ प्रातः प्रपूज्याथनिवेद्य
कार्यंविमुच्यविश्लेषितपत्रपंक्तौ बालस्यपार्श्वादथ
वाकुमार्याः प्रक्षेपयेदत्रपुमान्निषीकां २९

॥ टीका ॥

स्वचेष्टाभिः स्वकीयकार्यमूहेत्विचारयेत्सुधीः पंडितः गंधमाल्यादिनायस्तुसंस्कारः सोधिवासित इतिहेमः २७ यद्वेति पक्षांतरसूचनार्थोवाशब्दः विजनेशयीतेत्यन्वयः सुधीरितिशेषः कीदृक्हविष्यभोजीति हविष्यंधर्मशास्त्रोक्तंव्रीह्यादि तद्भुनक्तीत्येवंशीलः सतथापुनः कीदृक्शुचिः पवित्रः किंकृत्वा अभ्यर्च्यकिंशाकुनशास्त्रंकीदृशंतत्प्रत्यक्षोपलभ्यमानंपुनः किंकृत्वासम्यक् अधिवास्यनिमंत्र्यपुनःकिंकृत्वास्वंप्रयोजनं आत्मीयंकार्यंप्रतिपाद्यतदग्रेकथयित्वेत्यर्थः २८ प्रातइति तत्रपुमान्विलोकयेत् किंकृत्वा प्रपूज्यकिं तत्पुस्तकमितिशेषः कदाप्रातः प्रत्यूषे अथेतिपूजानंतरंपुनः किंकृत्वानिवेद्यप्रतिपाद्यकिंकार्यं पुनः किंकृत्वाविमोच्य किंइषीकिं शलाकां इषीकातूलिकेषिकेतिहेमः कस्माद्बालस्यपार्श्वादथेतिपक्षांतरद्योतनार्थः कुमार्याःपार्श्वाद्वाकस्यांविश्लेषित पत्रपंक्तौविश्लेषितापृथक्कृतायाशाकुनशास्त्रपत्राणांपंक्तिः श्रेणिस्तस्यांक्वचित्प्रक्षेपयेदित्यपिपाठः २९

॥ भाषा ॥

कार्यकूं विचारे ॥२७॥ यद्वेति ॥ यामें दूसरो पक्ष हैं हविष्यान्न जो मूंगभात सो तो भोजन करे फिररात्रिमें पवित्र होय करकें ये जो शाकुन शास्त्र हे ताको पूजन करकें अपनो प्रयोजन याके अगाडी कहकें कोई मनुष्य वहां होय नहीं फिर सोय जाय ॥२८॥ प्रातइति ॥ फिरप्रातःकाल उठकरकें पुस्तककी पूजा करै तापीछें अपनो कार्य कहे मेरो फलानो कार्य हे एसें कहकें फिर बालकके या कन्याके हाथमें शला-

दृश्येतयः कश्चिदखंड तादिश्लोकस्ततस्तत्रविमृश्य
माने शुभाशुभोवाखलु यादृगर्थस्तादृग्स्वका
र्येऽपिविभावनीयः ३० अर्चनंविदधतांयथोदि
तंप्रीतये शाकुनदेवतानृणां तेननजल्पतिनसावरप्र
दापूर्वकर्मफलपाकमन्यथा ३१ इतिश्रीवस
न्तराजशाकुने अर्चनविधिस्तृतीयोवर्गः ३

॥ टीका ॥

दृश्येनेत्यादि यःकश्चिदखंडितादि श्लोकः तत्रदृश्येनततः इति तस्माद्धे
तोः तस्मिन् विमृश्यमाने खलु निश्चयेन शुभाशुभोवायादृगर्थः स्यात्स्वका
र्यस्य तादृग्निर्णयोविभावनीयः विचारणीयः ३० अर्चनमिति य
थोचितमर्चनं पूजनं विदधतांकुर्वतां नृणां शाकुनदेवताप्रीतये भवति तेन
कारणेन सा पूर्वकर्म्मफलपाकमन्यथावैपरीत्येन नजल्पति कीदृशी वर
प्रदावांछितदात्री ३१ वसंतराजेति मयार्चनेविधिः रचनाविशेषः
विचारितः कस्मिन् वसन्तराजाभिधाने शास्त्रे शेषंपूर्ववत् ३२

इति शत्रुंजयकरमोचनादिसुकृतकारिमहोपाध्यायश्रीभानुचंद्रविर-
चितायां वसंतराजटीकायां तृतीयोवर्गः ३ ॥ छ॥

॥ भाषा ॥

का देके वा शलाका सुं पुस्तक खुलाय करकें शलाका जा पत्रपंक्तीमें स्थित होय तहां
अवलोकन करनो ॥ २९ ॥ दृश्येनेति ॥ तापत्रपंक्तीमें जो श्लोक खंडित वा पूर्ण दीखे तो
उतने मेंही निश्चय कर सुभ वा असुभ विचार करे जेसो याको अर्थ होय तेसोही अपनो
कार्यको निर्णय चिंतमन करनो योग्यहै ॥ ३० ॥ अर्चनमिति ॥ यथायोग्य पूजन के क-
रवेवाले मनुष्यनके ऊपर शाकुनदेवता प्रसन्न होंयहैं ताकारण करकें शकुनाधिष्ठात्री
देवी वांछितवरके देवेवारी सो पूर्वकर्मके फलकों उदय विपरीत नहीं कहै जेसो होय तेसोही
कहैहै ॥ ३१ ॥ इतिश्रीवसंतराजशाकुन भाषाटीकायां अर्चनविधिनाम तृतीयोवर्गः ॥३॥

संप्रतिमिश्रितशाकुनविचारश्चारुतरःसकलागमसारः क्रियतेसाविहशास्त्रेयेनस्यादधिकारीहृदयगतेन १ सार्थेप्रधानंशिबिरेनरेशंस्वमात्मकार्येनगरेचदेवम् .विद्यावयोजात्यधिकांश्चसाम्येनिर्दिश्यपश्येच्छकुनान्यभिज्ञः २

॥ टीका ॥

संप्रतीति संप्रतिमिश्रकशाकुनविचारः क्रियते मयेतिशेषः कीदृग्चारुतरः अतिशयेनसुभइत्यर्थः पुनःकीदृग्शकुनागमसारइति शकुनज्ञानेषु शकुनशास्त्रेषु सारः प्रधानः पुनःकीदृग् असावितिविप्रकृष्टः येन विचारेण हृदयगतेन चेतसिधृतेन पुमानिह शास्त्रे अधिकारीस्यात् एतच्छास्त्रप्रवर्त्तकः स्यादित्यर्थः १सार्थेति अभिज्ञः पंडितः सार्थेजनसमूहेप्रधानंमुख्यजनंनिर्दिश्य उद्दिश्य शकुनानि पश्येन् शिबिरे स्कंधावारस्थितो नरेशमाश्रित्य तानिशकुनानि पश्येदिति सर्वत्रान्वयः वरूथिनीचमूश्चक्रं स्कंधावारोऽस्यतुश्रितिःशिबिरमितिहैमः आत्मकार्येस्वंनगरेचदेवं तन्नायकं उद्दिश्य साम्ये तुल्यत्वेच विद्यावयोजात्यधिकानिति विद्याशास्त्राभ्यासः वयः बाल्य कौमारादिः जांतिः क्षत्रियादिः एताभिः येप्यधिकास्तानुद्दिश्य पश्येदित्यर्थः २

॥ भाषा ॥

संप्रतीति-॥ ये मिलवांशकुननको विचार करूहूं केसो हे येविचार बोहोत अतिसुभहे और शकुनके शास्त्रनमें मुख्य हे और या विचारकूं हृदयमें राखे तो या शास्त्रमें अधिकारी होय अर्थात् शास्त्रको प्रवर्त करवेवालो होय ॥१॥ सार्थेति॥ शकुनकोजानवेवारो विवेकी सार्थजो जात्रीनको समूह तामें जो मुख्य प्रधान होय ताको उद्देश करकें शकुनकूं देखे और शिबिर जो राजसेनादिक तिनमें राजाको उद्देश करकें शकुन देखे और अपनो ही शकुन होय तामें अपनोही उद्देश करकें शकुन करे और नगरमें जो नगरको नायक होय ताको उद्देश करकें शकुन देखे साम्य क-

एकत्रसार्थेव्रजतांबहूनांयोयादृशंपश्यतिदैवयोगा
त् श्यामादिकानांशकुनंसतादृक्फलंनरोविंद
तिनिर्विकल्पम् ३ तुल्येपिजातेशकुनेनराणामा
लोक्यतेयोऽत्रफलस्यभेदः सप्राणसंचारकृतो
विशेषस्तत्प्राणगत्याशकुनोगवेष्यः ४

॥ टीका ॥

एकत्रेति एकस्मिन् सार्थे बहूनां व्रजतां दैवयोगात् शुभाऽशुभदृष्टयोगात् यः यादृशं श्यामादिकानां शकुनं पश्यति नरस्तादृक् फलं विन्दति प्राप्नोति निर्विकल्पमिति निर्गतो विकल्पः संशयो लक्षणो यत्र तत्तथा निश्चयेनेत्यर्थः ३ तुल्येपीति तुल्येपिसदृशेपि शकुनेजातेयोत्रफलस्यभेदः जनानामालोक्यते लक्षणोविशेषः प्राणसंचारकृतइति नासाग्रहृन्नाभिषु वर्तमानोवायुः प्राणस्तस्य संचारः इडापिंगलयोः परिभ्रमणं तेनकृतोजनितस्तस्मात्कारणात्प्राणगत्याशकुनोगवेष्यः विलोकनीयः प्राणवायोर्गतिगमनंतया रिक्तपूर्णनाडिकानुसारेणशकुनस्यफलंविचार्यमित्यर्थः ४

॥ भाषा ॥

हिये समान होंय तो उनमें जो शास्त्रमें अधिक होय अवस्थामें अधिक होय जातिमें अधिक होय ताको उद्देश करकें शकुन देषै ॥ २ ॥ एकत्रेति ॥ एकसार्थक जो जात्रीनको समूह तामें बहोनसे आदमी गमनके करवेवारे उनमें दैवयोगसुं जो जेसो श्यामादिकनको शकुन देखे वोही मनुष्य निःसंदेह निश्चय करते सोही फल प्राप्त होय ॥ ३ ॥ तुल्येपीति ॥ और जो शकुन सब समूहकूं समान हुयो तो यामें फलको भेद देखनो चहिये केसें इडा पिंगलाको वहनो क इडा चले है क पिंगलाचले है वा खाली है क पूर्ण है एसें नाडीके अनुसार करकें फलको विचार करनो योग्य है ॥ ४ ॥

भवेदिडायांपरिपूरितायांसर्वोपिवामः शकुनः प्रशस्तः
स्यात्पिंगलायांपरिपूरितायांसर्वोपसव्यःशकुनःप्रशस्तः ५
जातेविरुद्धेशकुनेऽध्वनीनोव्यावृत्यकृत्वाकरपादशौचम्
आचम्यचक्षीरतरोरधस्तात्तिष्ठन्प्रपश्येच्छकुनांतराणि ६
आद्येनिष्टेशाकुनेऽष्टौविदध्यात्प्राणायामान्द्विगुणांस्तु-
द्वितीये

॥ टीका ॥

भवेदिति इडायांचंद्रनाड्यांपरिपूरितायां वहमानायांवामः वामभागाग्रवर्ती सर्वोपि शकुनः प्रशस्तोभवेत् पिंगलायां सूर्यनाड्यांपरिपूरितायां अपसव्यः दक्षिणभागाग्रवर्तीसर्वःप्रशस्तः रिक्तायांतुच्छफलः पूर्णायांविरुद्धोपिनिष्फलः रिक्तायामनभीष्टमहतेत्वनर्थायेतिग्रंथांतरादवसेयं ५· जातइति अध्वनीनः पांथः तेपुनः शकुनांतराणि प्रपश्येत् किंकृत्वा व्यावृत्यपश्चादागत्यकस्मिन् सति विरुद्धे शकुनेजातेसतिपुनःकिंकृत्वाकृत्वाकरपादशौचंकरपादयोः हस्तचरणयोःक्षालनंपुनः किंकृत्वा आचम्य आचमनंजलस्यविधायकिंकुर्वन्तिष्ठन्नत्र अधस्तात् कस्यक्षीरतरोः ६· आद्येनिष्टेति आद्येऽनिष्टे विरुद्धे शकुने अष्टौप्राणाया-

॥ भाषा ॥

भवेदिति ॥ इडा जो चंद्रनाडी पूर्णवहरही होय तो वामभागमें जितने शकुन होंय ते सबही शकुन शुभ जाननें और पिंगला जो सूर्यनाडी पूर्णवहरही होय तो दक्षिणभागके संपूर्ण शकुन शुभ जाननें और जो दोनो नाडी खाली होंयतो तुच्छफल जाननो और जो दोनोही नाडी वहरही होंय तोवि निष्फल जाननो ॥ ५ ॥ जातइति मार्गकोचलवेवारो मनुष्य है जो कोई शकुनदेखे और वो शकुन विरुद्ध होय तो पीछो वगदकरकें हाथपाम धोयकरकें फिरजलसूं आचमन करकें फिर जा वृक्षमें सूं दूध निकलतो होय वा वृक्षके नीचें स्थित होय ॥ ६ ॥ आद्येनिष्टेति ॥ जो मनुष्य अपने स्थानसूं चले और वाकुं पहलेंही शकुन अनिष्ट होय तो आठ प्राणायाम-

यात्रांमुक्त्वाभवनंस्वंप्रवासीप्रत्यागच्छेत्प्रतिकूले तृतीये ७ क्रोशांतरेयद्यकदर्शनाभिजातंतदातच्छकुनंफलाय क्रोशात्सरंनिष्फलमाहुरन्येकेचिच्चिरं स्वल्पफलंवदंति ८ रक्षामविघ्नंधनभृत्यवृद्धिंसिद्धिंतथारोग्यमनिष्टनाशाम्

॥ टीका ॥

मान्विदध्यात् प्राणायामोनाम श्वासरोधनंयदाह प्राणायामःप्राणयमः श्वासप्रश्वासरोधनमितिहैमः द्वितीयेविरुद्धे तु पुनः द्विगुणान् षोडशप्राणायामान् प्रकुर्यादितिशेषः तृतीयेविरुद्धे प्रवासीयात्रां संचलनश्रमंमुक्त्वा स्वंभवनंप्रत्यागच्छेत् व्यावृत्ययायादित्यर्थः यदाह श्रीपतिःआद्येविरुद्धेशकुनेप्रतीक्ष्य प्राणान्नृपःपंचषट्चयायात् अष्टौद्वितीयेद्विगुणांस्तृतीयेव्यावृत्यनूनंगृहमभ्युपेयादिति रत्नमालायां ७ क्रोशांतरइति यदि अकदर्शनाभिरन्तु हिरणाया क्रोशांतरे क्रोशमध्ये जातं तत् शकुनंफलाय अन्ये आचार्याः क्रोशात्परं निष्फलमाहुः केचित्शकुनेभ्योहिफलावश्यंभावंमन्यमानाः चिरकालेन स्वल्पंफलमित्याहुः ८ रक्षेति येनकारणेन संमानितः शकुनए-

॥ भाषा ॥

करकें फिरचले ओर दूसरेंवि अनिष्ट शकुन होय तो फिर दूने प्राणायाम करे ओर जो फिर तीसरें वी विरुद्ध शकुन होय तो यात्रा छोडकरकें अपनें घरकूं पीछो आय जाय ॥७॥ क्रोशांतरइति ॥ जो मार्गमें कोशभरके मध्यमें हिरणादिक करकें शकुन होय तो वो शकुन फलके अर्थहे ओर आचार्य येकहेंहें एक कोशतेंपरें जोये शकुन होंय तो निष्फल हें ओर कोई आचार्य शकुननेंही आवश्यक फल होंयहें येमानेहें ते येकहेंहें कोशभरसुं अगाडी दूरवी चलकें जो शकुन होय तो चिरकालमें ओर अल्पफलवान् कार्य होय ॥८॥ रक्षामिति ॥ जा मनुष्यकरकें सन्मान करेगयो शकुन इतनी वातनकूं करेहे कोनसी देहकी रक्षा ओर निर्विघ्नना-

सन्मानितोयच्छतियेनयस्मान्नोलंघ्ययायाच्छकुनंविरुद्धं ९ आद्येप्रयत्नंशकुनेविदद्यात्सिद्धिस्तथातत्रयतोनराणां कृतेप्रवासेशकुनोविरुद्धोयस्मिन्भवेत्तत्रदिनेनगच्छेत् १० समीपभूतैरचिरेणसिद्धिश्चिरेणदूरे शाकुनैः प्रजातैः ॥

॥ टीका ॥

तान् यच्छति ददाति एतान्कानित्याह रक्षामिति शरीरस्येतिशेषः अत्राविघ्नामिति अंतरायापगमः धनभृत्यवृद्धिमिति धनंद्रव्यंभृत्यास्सेवाकृतः तेषांवृद्धिः वर्द्धनंसिद्धिः निष्पत्तिः स्वसमीहितकार्यस्येतिशेषः तथारोग्यं नीरोगता अनिष्टनाशमिति अनिष्टस्य अनाभिलषितस्य नाशः तस्मात्कारणाद्विरुद्धं शकुनंनोल्लंघ्ययायात् ९ आद्येति गृहनिर्गमनानंतरमेव शुभेजाते शकुनेगमनायप्रयत्नंकुर्यादित्यर्थः यतः यस्मात्कारणात्तथासतिश्शुभेशकुनेसतीत्यर्थः तत्रेतितस्मिन् प्रयाणे सिद्धिः स्यात् तथाकृतेप्रवासेगमनेविरुद्धः शकुनः यस्मिन्दिनेभवेत् तत्रेतितस्मिन्दिनेनगच्छेत् आकुध्यकार्येतुवारत्रयंविलोकनीयइति पूर्वमेवप्रतिपादितं १० समीपेति समीपभूतैः ग्रामनिर्गमनानंतरंग्रामसमीपे तत्कालोत्पन्नैः शकुनैः अचिरेणस्तोककालेनसिद्धिः दूरेशकुनैः प्रजातैः

॥ भाषा ॥

ओर धनं ओर सेवाके करवेवाले इनकी वृद्धि ओर सिद्धि अपनी समान हितकारी ओर आरोग्यता अनिष्टको नाश इतनी वातें करें हें यातें विरुद्ध जो शकुन ताकूं उल्लंघनकरकें नही गमन करे ॥९॥ आद्येति ॥ घरसुं निकसे पीछें जो शकुन होय तो शीघ्र ही गमनकरजाय जो शुभ शकुन होय तो वा यात्रामें तत्काल सिद्धी होय निश्चय ओर गमन करे पै शकुन विरुद्ध होय तो वा दिना गमन न करे पूर्व कह्यो जेसें तीन पोत अवलोकनकरनो योग्य हे सोरीती पहलें कही हे ॥१०॥ समीपेति ॥ जा मनुष्यकूं ग्रामतें निकसतें ही तत्काल हुये जे शकुन तिनकरकें कार्यकी शीघ्रही सिद्धी होय

स्वस्थानसंस्थैर्बलिभिःस्वकालेजातैःफलंसम्यगसम्यगऽन्यैः ११ प्रावेशिकःस्यात्प्रथमंततस्तुप्रस्थानशंसीयदितन्नराणाम् सुखेनसिद्धिःकथिताप्रवासेव्यत्यासभावान्नगरप्रवेशे १२ भंगेरणेकर्मणिचप्रवेशेस्वक्षुग्रहेनष्टविलोकनेच ॥

॥ टीका ॥

ग्रामाद्दूरभूतैः शकुनैः चिरेणाचिरकालेनासिद्धिस्तत्रस्वस्थानसंस्थैरिति स्वयंयत्स्थानंक्षेत्रंतत्रस्थितैर्बलिभिः बलयुक्तैः स्वकालेजातैरिति येषांयः कालः तत्रोद्भूतैश्शकुनैः सम्यग्शोभनंफलंस्यात् ततोन्यैः विपरीतैः असम्यग् अशोभनंफलमिति ११ प्रावेशिकइति प्रवासेगमनेयदि प्रथमं प्रावेशिकः ग्रामप्रवेशोचितः शकुनः स्यात् तदुपरियदि प्रस्थानसंशीतिप्रस्थानसमयोचितः शकुनः स्यात्तदानराणांसर्वत्रसुखेन अनायासेनसिद्धिःकथिता सुनिश्चिरितिशेषः नगरप्रवेशेव्यत्यासभावादिति प्रथमंप्रस्थानशंसीततःप्रावेशिकः स्यात्तदापूर्ववत्कार्यसिद्धिःकथिता १२ भंगेइति एतेषुकार्यविशेषेषुशकु-

॥ भाषा ॥

और जो दूर गये पै शकुन होंय तोविलंब करकें कार्यसिद्धि जाननो अपने स्थानमें स्थित होय बलयुक्त होय समयमें हुये शकुननकरकें शोभन फल होय और इनतें विपरीतशकुननकरकें शुभ फल नहीं होय ॥११॥ प्रावेशिकइति ॥ गमनमें जो प्रथम ग्राम प्रवेशकेउचित शकुन होय और फिर दूसरें गमनसमयके उचित शकुन होय तो मनुष्यनकूं मुनीननें श्रमकरे विनाई सब सिद्धी होंय ये कह्यो है और नगरमें प्रवेश होती समयमें विपरीत होय अर्थात् पहलें गमन समयके उचित शकुन होंय और ता पीछें प्रवेश समयके उचित शकुन होय तो पूर्व किसीनाई विना श्रम करेंही कार्यसिद्धी कही है ॥१२॥ भंगेइति ॥ पराजयमें संग्राममें अत्यंत क्रूर कर्ममें प्रवेशमें और नवीनमंडपमें और राजा प्रसन्न होयके द्रव्य देवे ताके ग्रहणसमयमें और गई वस्तुको-

व्याधौसरिद्दुर्गभयादिकेषुशस्तःप्रयाणाद्विपरीतभावः
१३ वामापसव्यौशकुनौप्रशस्तौयातौपुरःपृष्ठगतावशस्तौः यातुर्विनाशप्रतिपादनार्थौक्रियाप्रदीप्तौपरिघाभिधानौ. १४ नित्यंनभस्यंभसिभूमिभागेग्रामेष्वटव्यांदिवसेनिशायाम्

॥ टीका ॥

नानांप्रयाणागमनाद्विपरीतभावः शस्तः अयंभावः गमनेप्रास्थानिकाः विलोक्यंते यदिभवंति प्रावेशिकास्तदाशुभमिति केषु भंगेपराजयेरणे संग्रामेकर्मणि अत्यंतक्रूरे प्रवेशेशुल्कग्रहे शुल्कंमंडपिकायांराजदेयंद्रव्यंतद्ग्रहणकालेनष्टविलोकनेगतवस्तुनोविलोकनेव्याधौआमयेनद्युत्तरणेभयादौशंकादौ आदिशब्दाद्दुर्गशत्रुसंकटादयो गृह्यंते १३ वामेति यातुःपुंसः वामापसव्याविति वामदक्षिणभागस्थौशकुनौप्रशस्तौशुभावित्यर्थः पुरःपृष्ठगतावशस्तावशुभावित्यर्थः क्रियाप्रदीप्तौपरिघाभिधानावग्रेवक्ष्यमाणौयातुः विनाशप्रतिपादनमेवअर्थः प्रयोजनंययोस्तौ तथाविनाशकरौकथितौ १४ नित्यमिति तेपतत्रिणः पक्षिणोलोकतएवजनप्रवादादेव लक्ष्याः लक्षणीया ज्ञातव्या इतियावत् ते के ये नित्यंनभसि अंतरिक्षे अंभसिपानीये भूमिभागेग्रामेषु अटव्यामरण्ये दिवसेवासरे निशायां रजन्यां अहर्निशमहोरात्रंवा चरन्ति

॥ भाषा ॥

ढूडनो ता समयमें रोगमें ओर नदीके उत्तरवेमें ओर दुर्ग शत्रुसंकटादिक भयादिक इनकार्यनमें शकुननकूं प्रयाणतेभी विपरीत भावप्रशस्त हे इनमें शकुन शुभही हे ॥१३॥ वामेति ॥ गमनकरवेवारे पुरुषकूं वांए जेमने भागमें जे शकुन ते शुभ हें ओर आगें पीछेंके शकुन अशुभ हें ओरक्रियाप्रदीप्त परिघनाम ये अगाडी कहेंगे ये दोनो गमन करवेवालेकूं नाशके करवेवाले शकुन कहे हें ॥१४॥ नित्यमिति ॥ जे पक्षी आकाशमें जलमें पृथ्वीमें ग्रामनमें वनमें दिनमें रात्रिमें निरंतर रात्रि दिन वि-

अहर्निशंचापिपतत्रिणोयेचरंतितेलोकतएवलक्ष्याः १५ नपुंसकस्त्रीपुरुषाविहंगायथोत्तरंस्युर्बलिनःसमस्ताः तेषांचभेदत्रयलक्षणाय श्लोकाविमौशाकुनिकाःपठंति १६ पीनोन्नतविकृष्टांसाःपृथुग्रीवाःसुवक्षसः स्वल्पगंभीरविरुताःपुमांसःस्थिरविक्रमाः १७

॥ टीका ॥

गच्छंति १५ नपुंसकेति नपुंसकस्त्रीपुरुषाः नपुंसकाश्चस्त्रियश्चपुरुषाश्च नपुंसकस्त्रीपुरुषाः इतीतरेतरद्वंद्वः विहंगाःपक्षिणः यथोत्तरंबलिनःस्युः समस्ताः समग्राः नपुंसकेभ्यः स्त्रीणांबलाधिक्यंततःपुरुषाणामिति तात्पर्यं तेषां पक्षिणां नपुंसकस्त्रीपुरुषभेदत्रयलक्षणाय ज्ञापनाय इमौ वक्ष्यमाणौश्लोकौ शाकुनिकाः शाकुनवेत्तारःपठन्ति १६ पीनोन्नतइति एवंविधाःपतत्रिणःपक्षिणः पुमांसः पुरुषाः परिकीर्तिताबुधैरितिशेषः कीदृशाःपीनोन्नतविकृष्टांशाइति पीनौ पुष्टौउन्नतौ उच्चैस्तरौविकृष्टौदृढौ अंसौबाहुमूलौयेषां ते तथापुनः कीदृशाः पृथुग्रीवाइति पृथवः विस्तीर्णाग्रीवाकृकाटिकायेषांते तथापुनः कीदृशाः सुवक्षसइतिसुष्टुशोभनंवक्षः येषांते तथापुनः कीदृशाः स्वल्पगंभीरविरुताइति स्वल्पंस्तोकंगंभीरंमंद्रंविरुतंशब्दोयेषांते तथा १७

॥ भाषा ॥

चरोही करेंहें उनपक्षीनकूं मनुष्यनतें जाननो योग्य हे ॥१५॥ नपुंसकेति ॥ नपुंसकसंज्ञक ओर स्त्रीसंज्ञक ओर पुरुषसंज्ञक ये तीनप्रकारके पक्षी हें नपुंसकनतें स्त्रीसंज्ञक श्रेष्ट हें ओर स्त्रीसंज्ञकनसूं पुरुषसंज्ञक श्रेष्ट हें इनपक्षीनके ये नपुंसक स्त्रीपुरुष तीनो भेदनके जितायवेके लियें आगें कहेंगे जो श्लोक तिनें शाकुन वेत्ता कहें हें १६ पीनोन्नतइति ॥ पुष्ट ओर ऊंचे ओर दृढ एसे जिनके कंधा होंय ओर पुष्टजाके - कंठ होय ओर सुंदरजाको वक्षस्थल होय ओर वोहोत अल्प ओर गंभीर मंदमंद जि-

तनुग्रीवाः कृशास्कंधाः सूक्ष्मास्यपदविक्रमाः प्र
सन्नमृदुभाषिण्यः स्त्रियोतोन्यन्नपुंसकम् १८ -
जातिस्वरस्थानबलप्रमोदैर्जवेनसत्वेनतथानुकूल्यात्

॥ टीका ॥

तनुग्रीवाइति एवंविधलक्षणलक्षिताः स्त्रियः स्युः कीदृश्यः तनुग्रीवाइति तनुस्तुच्छाकृकाटिकाकंधरा यासांताः कृशास्कंधाइति कृशः दुर्बलः स्कंधोयस्याः सा तथा सूक्ष्मास्यपदविक्रमाइति सूक्ष्मंउपचयरहितमास्यंमुखंयासांतास्तथा नविद्यते पदेषु विक्रमः पराक्रमोयासांताः पश्चात्कर्मधारयः प्रसन्नमृदुभाषिण्यइति प्रसन्नंमृदुभाषितुंशीलंयासांताः तथा अतः अस्मात् एतयोःस्त्रीपुरुषयोरन्यन्नपुंसकंभवतीतिभावार्थः १८ जातीति प्राणभृतां शकुनानांबलाबलंपरीक्ष्यंविचारणीयमित्यर्थः कैः जातिस्वरस्थानबलप्रमोदैरिति अत्र जातिश्चस्वरश्चस्थानंचबलंचप्रमोदश्चजातिस्वरस्थानबलप्रमोदास्तैः इतरेतरद्वंद्वः जात्यायथावर्णेषुक्षत्रियजातीयापेक्षया क्षत्रि

॥ भाषा ॥

नको शब्द होय एसेपक्षीनकी पुरुषसंज्ञाविवेकीनें कही हें ॥१७॥ तनुग्रीवाइति ॥ तुच्छकृश जिनकी ग्रीवा होय ओर कृश जिनके कंधा होंय ओर सूक्ष्मजिनको मुरव होय ओर पामनमें पराक्रम जिनके न होंय वा होलेहोलें पाम धरे ओर प्रसन्न ओर कोमलवाणी जिनकी होय एसे लक्षण जिनमें होंय वे पक्षी स्त्री संज्ञक जानने ओर तेसेंही इनदोनो लक्षण करकें रहित होंय इनमेसें कोईवी लक्षण जिनमें नहोंय वे पक्षी नपुंसक जानने ॥१८॥ जातीति ॥ प्राणधारी शकुनपक्षीनको बल ओर अबल विचारनो योग्यहे कायकरकें जातिकरकें जेसें वर्णनमें क्षत्रिय जातीकी अपेक्षा करकें ब्राह्मण बलवान् हें ओर वैश्य निर्बल हें एसे ही वैश्यजातीकी अपेक्षा करकें शूद्र जाती निर्बल हे ओरक्षत्रियजाति बलवान् हें या प्रकार ओर जगेंवी जाननो ओर स्वरकरकें मंद्र मध्यतारभेद करकें मंद्रस्वरकी अपेक्षा करकें तारस्वर निर्बल हे ओरस्थानकरकें अ-

दिक्कालतिथ्यादिकहंसचारैर्बलाबलंप्राणभृतांपरिक्ष्यं १९ ग्राम्योबहिर्ग्रामगतश्चवाह्योदिवाचरोनिश्यदिवाचरोन्हि वृथाथवास्वस्थितिकालहीनाश्चिरंभवन्भूपतिदेशभीत्यै २०

॥ टीका ॥

योबलवान्एवमन्यत्रापि स्वरेणमंद्रमध्यतारभेदेन तत्रमंद्रापेक्षयातारस्वरोनिर्बलः शूद्रजातीयोनिर्बलः ब्राह्मणोबलवान्वैश्योनिर्बलः वैश्य जातीयापेक्षयास्थानेनस्वस्थानापेक्षयापरस्थानस्थोनिर्बलः बलेनरात्रिबलोदिवानिर्बलः दिवाबलोरात्रौनिर्बलः जवेनशीघ्रगतिस्तेनयथामंदगतिर्निर्बलःसत्वेनपराक्रमेणसर्वेभ्यः शरभोबलीयान् आनुकूल्यादितिशुभेषुकार्येषुसुशुभः बलीयान् अशुभेषु अशुभः यथाक्रमंतयोस्तत्रानुकूल्यात्दिक्कालतिथ्यादिकहंसचारैरिति अत्रापीतरेतरद्वंद्वः दिक्चकालश्चतिथ्यादिकंचहंसचारश्चदिक्कालतिथ्यादिकहंसचारैरितिदिशांबलंत्वग्रेवक्ष्यमाणंकालेनरात्रिचारिणांरात्रावेवबलंदिवाचारिणांदिवसएवबलंतिथ्याप्रतिपदादिकयापूर्णारिक्तादिधर्मेणबलाबलंव्यक्तंहंसचारेणबलाबलंपूर्वोक्तमेव १९ ग्राम्योबहिरिति ग्रामेभवोग्रा-

॥ भाषा ॥

पने स्थानमें स्थित होय सो बलवान् और पराये स्थानमें स्थित होय सो निर्बल और बलकरकें रात्रिमें बलवान् हे सो दिवसमें निर्बल हे और दिवसमें बलवान् हे सो रात्रीमें निर्बल हे और सत्वकरकें संपूर्णजीवनतें सरभपक्षी बलवान् हे और सब निर्बल हें और अनुकूलके भावतें शुभकार्यनमें शुभबलवान् हे और अशुभकार्यनमें अशुभबलवान् हे और दिशाबल देखलेनो और कालकरकें रात्रिमें विचरो करें हें तिनपक्षीनको रात्रिहीमें बल हे और दिवसमें विचरें हें तिनको दिनमेंही बलरहेहे और तिथीकरकें पडवाकूं आदिले तिथी तिनको पूर्णारिक्तादि कर्मकरकें देखलेनो बल अबल और हंसचार करकें बलअबल पहलें कह्यो काकको वेसेंही जान लेनो ॥१९॥ ग्राम्योवहिरिति ॥ ग्रामको रहवेवा-

कूटपूरकमयूरपुटिन्यः सिंहनादगजवंजुलकाश्च
छिक्करः सकृकवाकुरितीमान्पूर्वतोधिकबलान्कथयंति

॥ टीका ॥ २१

म्यः बहिर्गतः सन् वृथास्यात् तथाबाह्योबहिर्भावः ग्रामगतोवृथादिवाचरः निशिवृथा अदिवाचरोरात्रिचरःअन्हिवृथा अथवेतिपक्षांतरद्योतनार्थः स्वस्थितिकालहीनाइतियस्ययास्थितिः क्षेत्रंयस्ययः कालः ताभ्यांहीनोरहितः शकुनः चिरंचिरकालंयावत्भूपतिदेशभीत्यैभूपतिश्चदेशश्चतयोर्भयाय भवेत् एतेनशकुनस्यवृथात्वंनिरस्तं २० कूटपूरकेति इमान्पूर्वतः पूर्वस्यां दिशि अधिकबलान् अधिकंबलंयेषांतान् तथाकथयंति प्रतिपादयंति बुधाइतिशेषः कानिमानित्यपेक्षायामाह कूटपूरकेत्यादि कूटपूरकः कडवीवा कडछींइतिप्रसिद्धः मयूरः प्रसिद्धः पुटिन्यः इति अन्यत्रदेशप्रसिद्धाः दुरलीवा कोडीयालइति जलजंतुः सिंहनादः सिंहध्वनिः गजोहस्तीवंजुलकः पक्षिविशेषः मध्यदेशेपीतरापापांतराइतिप्रसिद्धिः छिक्करइतिहरिणविशेषः सकृकवाकुरिति कृकवाकुःकुक्कुटः तेनसहितः एतान् २१

॥ भाषा ॥

लोहे ओर वहा रगयो वाको शकुनवृथा ओर ग्रामके वहारवनको रहवेवालो है ओर ग्राममें आयगयो होय तो वाको शकुन वृथा है ओर दिनमें विचरवेवालो है वो रात्रिमें वृथा है ओर रात्रीमें विचरवेवालोहे वो दिनमें वृथा है अथवा येही जो अपनी अपनी स्थितिकरकें हीन होय जाको जो काल है वा कालकरकें रहित होय तो चिरकालपर्यंत राजानें भय करावे देशानें भय करावे या कहवेमें इन शकुननके स्थापनो मिटगयो ॥ २० ॥ कूटपूरकेति ॥ कूटपूरकः कडछीति प्रसिद्धः मयूरः मोर नामकर प्रसिद्ध है ओर पुटिन्यः ये ओरदेशमें कोडियाल या नामकर प्रसिद्ध है ये जलको जंतु है ओर सिंहध्वनिः ओर हस्ती ओर वंजुलक पक्षी मध्यमें पीतरा या नामकर प्रसिद्ध है ओर छिक्कर ये हरिणनाम प्रसिद्ध है ओर कृकवाकुः -

हारीतकाकर्क्षकपोतकोका घूकस्तथापिंगलिकाश्शृगालौ
क्रूररवाक्रोशनरोदनानि भवंतिनित्यं बलवं
त्यवाच्यां २२ उत्क्रोशगोक्रौंचविडालहंसाः कपिंज
लोलोमसिकाशशश्च वादित्रगीतोत्सवनृत्यहा
सा बलंप्रतीच्यामधिकंवहन्ति २३

॥ टीका ॥

हारीनेति अवाच्यांदक्षिणस्यांनित्यमेतानि बलवंतिभवंति एतानिकानि इत्यपेक्षायामाह हारीतेत्यादि हारीतश्चकाकश्चऋक्षश्चकपोतश्चकोकश्च हारीतकाकर्क्षकपोतकोकाः इतरेतरद्वंद्वस्तत्र हारितः हारिल तिलगुरु इतिलोके प्रसिद्धः काकः चिरजीवीऋक्षः ऋच्छइति लोकेप्रसिद्धः कपोतः दोलाख्यः गुर्जरे प्रसिद्धः अन्यत्रपिंडुकीतियावनीभाषया फाक्तेतिकोकाः चक्रवाकाः घूकः काकारिः पिंगलिकापूर्वोक्ताश्शृगालः गोमायुः क्रूररवाः क्रूरशब्दाः क्रोशनं आक्रोशनंरोदनानि प्रसिद्धानि २२ उत्क्रोशेत्यादि एतेप्रतीच्यांपश्चिमायां अधिकं बलंवहंति पूर्वाप्राचीदक्षिणाऽवाचीप्रतीचीतुपश्चिमेतिहेमः एतेके इत्यपेक्षायामाह उत्क्रोशेति उत्क्रोशगोक्रौंचविडाल हंसाः उत्क्रोशश्चगौश्चक्रौंचश्चविडालश्चहंसश्चउत्क्रोशगोक्रौंचविडालहंसाः

॥ भाषा ॥

कुक्कुडा ता करकें सहित इनें विवेकी पूर्वदिशामें बहोत् बलवान् कहेंहें ॥ २१ ॥ हारीनेति॥ हारीतये हारिल ओर तिलगुरु या नामकरकें प्रसिद्ध हें ओर काक ओर ऋक्ष नामरीछकोहे ओर कपोतः गुर्जरदेशमें तो दोलानामकरकें विख्यात हे ओर देशमें - पिंडुकी नामकरकें विख्यात हें यावनी भाषामें फाक्ता नामकर विख्यात हे ओर कोका नाम चक्रवाककोहे ओर घूकनाम घुघ्घूको हे ओर पिंगलिका पहलें कह आयेहे ओर शृगालनामश्यारियाकूं कहेंहें ओरक्रूरशब्द ओर आक्रोशन पुकारनो ओररोदन नाम रोमनो ये सबदंक्षिणदिशामें निरंतरबलवान्होंयहे ॥२२॥ उत्क्रोशेति॥ कुररी

सरोजचाषैकशफास्तथाखुर्मृगास्तथा कोकिलशाह्लुकोच पुण्याहघंटारवशंखशब्दादिश्युत्तरस्यांबलमुद्वहंति २४

॥ टीका ॥

इतरेतरद्वंद्वः तत्रउत्क्रोशः कुररः उत्क्रोशकुररौसमावित्यमरः उच्चै फूत्कृतिःगौः क्रौंचःबकोवाकुररीपक्षिविशेषःकुञ्चवाकुंजडीइतिप्रसिद्धः बिडालोमार्जारः हंसःप्रसिद्धः कपिंजलोगपोशः चातको वातित्तरः लोमसिकालूंकडीतिगुर्जरे अन्यत्र लुंवडीतिप्रसिद्धाः शशः शशकः मरुदेशेषढोइतिप्रसिद्धः यावन्यांखरगोसः वादित्रगीतोत्सवनृत्यहासाः वादित्रंचगीतंचउत्सवश्चनृत्यंचहासश्चइतरेतरद्वंद्वः वादित्रंप्रसिद्धंगीतंगानंउत्सवोमहःनृत्यंनर्तनंहासःहास्यं २३ सरोजेति एतेउत्तरस्यांदिशिबलंउद्वहंतिप्राप्नुवंति एतेकेइत्यपेक्षायामाह सरोजेत्यादि सरोजचाषैकशफाः सरोजंचचाषश्चएकशफश्चसरोजचाषैकशफाःइतरेतरद्वंद्वः सरोजंकमलंचाषोनीलचारुइतिगुर्जरेवेडरेचेतिप्राच्यां अन्यत्रनीलइति एकशफस्तुरंगादिः आखुः मूषकः मृगःप्रसिद्धः कोकिलोवनप्रियःसह्लुकःपक्षिविशेषः शादेलाख्यः इतिप्रसिद्धः तथापुण्याहघंटारवशंखशब्दास्तत्रपुण्याहमितिवेदध्वनिः घंटारवः घंटाशब्दः शंख निनादः शंखध्वनिः २४

॥ भाषा ॥

पक्षी ओरगौ ओरबगुला ओर विलाव ओर हंस ओर चातक तित्तर ओर गुर्जरदेशमें लुंकडी कहे हें अन्यदेशमें लुंवडी कहेहें कोईजगें लोंगती कहेहें ओर शशक खर्गोस मरुदेशमेंषढोयानामकरप्रसिद्ध ओर वा जेनको वजनो ओरगीत गानउत्सवनृत्य हास्य ये सबपश्चिमदिशामें अधिकबलके देवेवारेहें ॥२३॥ सरोजेति ॥ कमल ओर चाष नाम नील वर्णी होयहे लंबी चोंचहोयहे माथेपेचूड चोटी होयहे मछी खायहे कहूं वाकूं वेडरेच कहेंहें कहूं खुटक वढे या कहेंहें नीली वडी चिडे या होय है ओर एक खुर के

एकोनिवृत्तावितरःप्रवृत्तौयात्राविरुद्धंशकुनद्वयंतत्
ग्राह्योनयोर्योबलवान्भवेद्वाप्रदीप्तशांतादिनिरूपणेन २५
दग्धादिमुक्तादिननाथमुक्ताविवस्वदाप्ताभवतिप्रदीप्ता
साधूमितायांसविताप्रयाताशेषादिगंताःकिलपंचशांताः२६

॥ टीका ॥

एकइति एकः शकुनः निवृत्तौ निवृत्तिनिमित्तं जातः इतरः प्रवृत्तौ प्रवृत्तिनिमित्तमिति यात्राविरुद्धं तत् शकुनद्वयं ज्ञेयं अनयोर्मध्ये कश्चित् ग्राह्यो नवेत्याकांक्षायामाह ग्राह्यइति अनयोर्निवृत्तिप्रवृत्तिशकुनयोर्मध्ये प्रदीप्तशांतादिनिरूपणेनेति प्रदीप्ता अग्रेवक्ष्यमाणादिशः शांतास्तद्विपरीताः दिशः आदिशब्दाज्जात्यादिग्रहणं एतेषां निरूपणेन विचारणेन यः शकुनः बलवान् भवेत्सग्राह्यः २५ दग्धेति दिननाथेनमुक्तात्यक्ता यादिक् सादग्धाउक्ता विवस्वता रविणाप्राप्तायासाप्रदीप्ताभवति यां दिशं सविता सूर्यः प्रयाता यास्यति वा साधूमिता शेषाः पंचदिगंता दिशांविभागाः शांताः प्रोक्ताइत्यन्वयः २६

॥ भाषा ॥

अश्वादिक और मूसा और मृग और कोकिल और शल्लुक नाम शदेला पक्षी और पुण्याहवाचन वेदध्वनि और घंटाकोशब्द शंखध्वनि ये सब उत्तरदिशामें बल अधिक करवेवाले हें ॥ २४॥ एकइति ॥ एकशकुन तो निवृत्ति निमित्त होय दूसरो प्रवृत्ति निमित्त शकुन होय ये दोनो शकुन यात्रा विरुद्ध जाननें योग्य हें तो इनदोनोनमेंसूं कोई ग्रहण करनो या नहीं करनो ताये कहें हें इन दोनमें अगाडी कहेंगे जो प्रदीप्तशांत जाती स्वरादिकनको विचार करकें जो बलवान् होय सो ग्रहण करे॥ ॥२५॥ दग्धेति ॥ सूर्यनें जा दिशाकूं छोड दीनी वो दिशा दग्धा संज्ञा कहें हें और जामें सूर्य प्राप्त होंय वो दिशा प्रदीप्ता संज्ञा कहेंहें और जा दिशाकूं सूर्य जायगे वो दिशा धूमिना संज्ञा कहेंहें बाकी पांच दिशा रही तिनकी शांता संज्ञा हे ॥ २६॥

दग्धादिगैशीज्वलितादिगैंद्रीधूमान्विताचानलदिक्प्रभाते प्रत्येकमेवंप्रहराष्टकेनभुंक्तेदिशोष्टोसविताक्रमेण २७ दग्धेषुदग्धंज्वलतिज्वलत्सु फलंज्वलिष्यत्यथधूमितेषु दिशांविभागेषुविभज्यजातेकार्योद्यतानांशकुनेसदैव २८ ऋक्षेणकालेनसमीरणेन तिथ्यादिनेशेनचदैवदीप्तः ॥

॥ टीका ॥

दग्धेति प्रभातेसूर्योदये ऐशीईशस्येयंऐशी ऐशानीदिग् दग्धा चलिता दिग्ऐंद्री इंद्रस्येयमैंद्रीपूर्वादिक् अनलदिक् आग्नेयीधूमान्विता संधुक्षिता प्रत्येकंप्रतिप्रहरं एवंदग्धादिप्रकारेणसवितासूर्यः प्रहराष्टकेन सदैवसर्वकालमष्टौदिशः क्रमेणभुंक्ते २७ दग्धेष्विति कार्योद्यतानांपुंसांदिशांविभागेषुविभज्य विभागेन शकुनेजातेक्रमेण अनुक्रमेणदग्धेषुदिग्विभागेषु दग्धंफलंभवति ज्वलत्सुदिग्विभागेषुफलंज्वलति धूमितेषुदिग्विभागेषुफलंज्वलयिष्यति सदैवसर्वकालम् २८ ऋक्षेणेति ऋक्षंनक्षत्रंतेन कालः समयलक्षणः तेन समीरणो वायुः हंसचारइत्यर्थः तेन तिथ्याप्रतिपदादिकया दिनेशेनसूर्येण एतेषांप्रातिकूल्येनपंचप्रकारेणदैवदीप्तः शकुनो भवति

॥ भाषा ॥

दग्धेति जव सूर्योदय होयहै वा समयमें ईशानदिशाकी दग्धा संज्ञा है और पूर्वदिशाकी प्रदीप्ता वा ज्वलिता संज्ञा है और अग्निदिशाकी धूमिता संज्ञा है ये एक एक प्रहर ऐसें रहेहें सो ऐसेंही सूर्य सर्वकाल आठप्रहरकरकें आठो दिशानकूं भोगेहै ॥२७॥ दग्धेष्विति ॥ अपनें कार्यमेंउद्युक्त होय रहे तिनमनुष्यनकूं दग्धादिशानमें विभाग करकें शकुन होय तो क्रमकरकें दग्ध फल होय और प्रदीप्त प्रज्वलित दिशामें शकुन होय तो फलवी ज्वलित होय और धूमितदिशामें शकुन होय तो फलवी ज्वलित होय ॥२८॥ ऋक्षेणेति ॥ नक्षत्र १ और काल २ और पवन ३ और पडवाकूं आदिले तिथि ४ और-

क्रियाप्रदीप्तः पुनराशयेनस्थानेनगत्यारुतचेष्टिताभ्यां २९ एवंप्रशांतोपिदशप्रकारोनिरूपणीयः शकुनोनरेण फलानिजातैः शकुनैःप्रदीप्तैः स्युर्यानितानिप्रतिपादयामः ३० तिथ्यासमीरेणतथासवित्रानक्षत्रचेष्टागतिभिश्चदीप्ताः धनस्यसैन्यस्यबलांगयोश्चकर्मेष्टयोश्चक्रमतोभयाय ३१

॥ टीका ॥

आशयः अध्यवसायस्तेनस्थानमुपवेशनस्थलंतेनगतिः ऋज्वीप्रभृतयः तया रुतंपक्षिप्रलपितंचेष्टितंशरीरक्रियाताभ्यां एतेषां प्रातिकूल्येन पंचप्रकारेणपुनः क्रियाप्रदीप्तः शकुनोभवति एवंप्रदीप्तशकुनस्यदशप्रकाराः प्रोक्ताइतिभावः २९ एवमिति एवममुनाप्रकारेणनरेणप्रशांतोऽपि शकुनोदशप्रकारोनिरूपणीयः यथाप्रातिकूल्यान् दशप्रकारोदीप्तःशकुनः तथानुकूल्याद्दशप्रकारः शांतः शकुनः इतितात्पर्यार्थः प्रदीप्तैःशकुनैः जातैर्यानिफलानिस्युः तानिवयंप्रतिपादयामः ३० तिथ्येति तिथिप्रभृतिषट्प्रकारेणदीप्तः धनप्रभृतिषण्णांक्रमतोभयायस्युः तत्र बलं आत्मशक्तिः अंगंकोशप्रभृतिकर्मकृत्यमिष्टंसमीहितंवस्तु ३१

॥ भाषा ॥

सूर्यऽये सब प्रतिकूल होंय तब देवदीप्तशकुन होयहे और आशाय और स्थान और गती और शब्दप्रलाप और चेष्टा शरीरकी क्रिया ये सब प्रतिकूल होंय तब क्रियाप्रदीप्त शकुन होयहे ॥२९॥ एवमिति ॥ जेंसें प्रतिकूलपनेतें ये दश प्रकारको प्रदीप्त कहेहें याप्रकारकरकें मनुष्यननें दशप्रकारको प्रशांत शकुनवी अनुकूल भावकर वर्णन कियोहे और प्रदीप्तशकुननकरकें जे फल होंयहें तिनें हम कहेंहें ॥३०॥ तिथ्येति ॥ तिथी और पवन और सूर्य और नक्षत्र और चेष्टा और गति इनकरकें छे प्रकारको प्रदीप्तशकुन सो धनकूं और सेनाकूं और -

जातेप्रदीप्तेशकुनेनराणांस्याद्भस्मितायांदिशिवित्त
हानिः आलिंगितायांदिशिजीवनाशः संतापशो
कोदिशिधूमितायां ३२ संध्याद्वयेशस्त्रभयंप्रदीप्ता
वाताद्भयंमेघनिनादमुक्ता उपक्रमेवारिधराग-
मस्यदीप्ताजलात्संजनयंतिभीतिम् ३३

॥ टीका ॥

जातइति नराणांभस्मितायांदग्धायांदिशि प्रदीप्तेशकुने जाते वित्तहानिर्भवति आलिंगितायां प्रदीप्तायांदिशि शकुनेजाते जीवनाशः स्यात् धूमितायांदिशि प्रदीप्ते शकुनेजाते संतापशोकौस्यातामित्यर्थः ३२ संध्येति संध्याद्वयेप्रदीप्ताः शकुनाः शस्त्रभयं जनयंति वदंति तत्रायंविशेषः संध्यायांपश्चिमायांदिशिसमुद्भूताःशकुनाः शस्त्रभयंकुर्युः नतुपूर्वदिशिसमुद्भूताइति तदुक्तमन्यत्रपाश्चिममूलेदीप्ताः पश्चिमसंध्यासमुत्थिताः शकुनाः शस्त्राग्निचौरभूपप्रभृतिभयोत्पादकाः सद्य इतिप्राच्यांतु संध्यायांसमुद्भवाः शकुनास्तुदुष्टवार्तायैभवंति तदुक्तमन्यत्र प्राच्येमूलेदीप्तान् शकुनानाकस्मिकान् समाकर्ण्यब्रूयान्नमंमेनेहिमत्तोमहतस्तुवार्तायैभवंतिइतिमेघनिनादद्दीप्तावाताद्भयंजनयंति वारिधरागमस्योपक्रमेव-

॥ भाषा ॥

अपनी सामर्थ्यशक्तीकूं और सात जे अंगराजानके मंत्री राज्यकोशादिक और कर्म और इष्ट कहिये वांछितवस्तु इनछयोनकूं भयके अर्थ होयहे ॥ ३१ ॥ जातइति ॥ दग्धादिशामें प्रदीप्त शकुन होयतो मनुष्यनकूं वित्तकी हानि होय और प्रदीप्ता दिशामें प्रदीप्त शकुन होय तो जीव नांश होय और धूमिता दिशामें प्रदीप्त शकुन होय तो संताप शोक होंय ॥ ३२॥ संध्येति ॥ पश्चिमदिशामें प्रदीप्त शकुन होंय तो शस्त्रभय होय और पश्चिमकी मूलमें प्रदीप्त दिशा होय और पश्चिमादिशामें शकुन प्रदीप्त होंय तो शस्त्र अग्नि चोर राजा इनकूं आदिले भयके -

वधः कपालेमरणंचितायांशुष्केऽशुभंकंटकितेकलि
श्च दुःखंभवेद्भस्मनिचाप्रसिद्धिः सारेतराश्मास्थिति
भिःप्रदीप्तैः ३४ स्वरःप्रदीप्तःकलहंब्रवीतिप्रदेश
दीप्तः शकुन स्तुयुद्धम् ब्रवीतियात्रांनिजदेश
मुज्झन्स्वदेशशायीकथयत्यऽयात्राम् ३५

॥ टीका ॥

र्षाकाले मेघनिनाददीप्ताः जलात्भीतिंसंजनयंति ३३ वधइति कपाले वधोभवति चितायांमरणंशुष्केऽशुभंकंटकिते कंटकोपगतेद्रुमेकलिःस्यात् भस्मनिदुःखंभवेत् अप्रसिद्धिः अकीर्तिर्भवेत्कैः सारेतराश्मस्थितिभिः प्रदीप्तैरिति सारादितरत्यदश्मप्रस्तरः तत्रस्थितैर्दीप्तैः शकुनैरित्यर्थः ३४ स्वरइति स्वरःप्रदीप्तःकलहंविग्रहंब्रवीतिकथयति प्रदेशदीप्तः अशुभस्थानस्थितः शकुनः युद्धंसंग्रामंब्रवीति निजदेशंस्वस्थानं उज्झन्त्यजन् यात्रामन्यत्रगमनंब्रवीति स्वदेशशायीस्वस्थानंप्रतिगच्छन् अयात्रामन्यत्रगमनाभावंकथयंति ३५

॥ भाषा ॥

करवेवारे तत्काल होंयहें ओर पूर्वदिशामें उत्पन्न हुये शाकुन दुष्टवार्तानकूं प्रकट करें हे ओर पूर्वदीशाकी मूलमें दीप्त हुये शाकुन तिनें अकस्मात् सुनकरकें ये शाकुन मेरे हें एसें न कहें ओर मेघनादकरकें रहित होय दीप्ता दिशा होयतो वाततें भय प्रगट करेहे ओर वर्षाकालमें मेघनादकर युक्त होय ओर दीप्ता होय तो जलतें भीती प्रगट करेहे ॥३३॥ बधइति ॥ कपाल जो दीखजाय शाकुनमें तो वध होय ओर चिता दीखे तो मरण होय ओर शुष्क पदार्थ दीखे तो अशुभ होय ओर कांटेनको वृक्ष मिले तो कलह होय ओर भस्म मिले तो दुःख होय ओर पाषाणकी पटियापेबेठेहुये वा पाषाण लावते मिलें ओर प्रदीप्त होंय तो अकीर्ति होय ॥३४॥ स्वरइति॥ प्रदीप्तस्वर होय तो कलह करावे ओर प्रदेशादीप्त शाकुन होय अर्थात् अशुभस्थान-

एवंप्रकाराःशकुनानराणांशांताःपुनर्जाप्यफलाप्रभवंति संभक्षयंतोऽशनमिष्टसिद्धिंकुर्वंत्यसिद्धिंपुनरुद्गिरंतः ३६ तृणंफलंखादतियःससौम्योरौद्रःपुरीषामिषखादकोयः शान्तःप्रदीप्तंविदधातिकार्यमन्नाशनःस्यादुभयप्रकारः ३७

॥ टीका ॥

एवंप्रकाराइति एवंप्रकाराः पूर्वोक्तप्रकाराः जनानांयेशकुनाः शांताउक्ताः तएवपुनः जाप्यफलाइति जाप्यंफलंयेषांतेतथा अधमफलाः प्रदीप्ताः इत्यर्थः शांताएवस्थानादिमाहात्म्यान्‌दीप्ताभवंतीत्यर्थः यथा जलस्यवन्हिसंयोगादौष्ण्यंजायते एतेनस्वारसिकंशकुनानांदीप्तत्वंनास्तीतिसूचितं अथ चेष्टाविशेषात्फलविशेषंदर्शयन्नाह तइतितेशकुना अशनंभक्ष्यंभक्षयंतः इष्टसिद्धिंकुर्वन्ति पुनः उद्गिरंतः वमनंकुर्वन्तः असिद्धिंकुर्वन्ति ३६ तृणमिति तृणंफलंवायःशकुनः खादतिसशकुनः सौम्यः शांतः यःपुरीषामिषखादकः पुरीषंच आमिषंचपुरीषामिषेतयोः खादकः विष्टामांसभक्षकः सरौद्रः तत्रशांतः शांतकार्येसुभः रौद्रः रौद्रकार्येसुभः अन्नाशनः अंन्यं

॥ भाषा ॥

में स्थित शकुन होय तो संग्राम करावे स्वदेशकूं त्याग कर यात्रा करावे अपनेंस्थानकूं पीछो आवतीसमें ये शकुन होंय तो घर आये पीछे यात्रा नहीं करावे ॥३५॥ एवंप्रकाराइति ॥ याप्रकार मनुष्यनकूं जे शांत शकुन कहेहें तेही फिर शांतशकुनही स्थानादिकनके महात्म्यसुं अधम फलके देवेवारे प्रदीप्त होय जाय हें जैसें जलकूं अग्निके संयोगसूं उष्णता होयहे तेंसेंही जाननो और ते शकुन अन्नभक्षण करते हुये होंयतो मनोरथकी सिद्धी करे और फिर वमन करतो मिलेतो कार्यकी असिद्धीकरै ॥३६॥ तृणमिति ॥ जो शकुन तृण वा फल खावतो होय तो सौम्य जाननो और जो पुरीष मांस खावतो होय तो रौद्र जाननो शांत तो शांत कार्यमें सुभ हे और रौद्र

प्रासादभूभृत्सुरमन्दिराणिस्तंबेरमस्तंभतुरंगशालाः
अशून्यगेहेचगजाश्वगोष्टक्षीरद्रुमाट्टालकतोरणानि
३८ एवंप्रकाराणिमनोहराणिस्थानानितुंगानिशु
भावहानि नीचेषुमध्याच्छुभदानिदानीं देशप्रभे
दान्प्रतिपादयामः ३९

॥ टीका ॥

धान्यमश्नाति भुंक्तेइति अन्नाशनःशकुनः पुनः प्रशान्तः प्रदीप्तंकार्यंविदधातियतोयमुभयप्रकारः शांतदीप्तभेदेनद्विविधः स्यात् इत्यर्थः ३७ प्रासादेति प्रासादभूमिश्चैत्यसाधित्यका सुरमन्दराणि हरिहरगृहाणि स्तंबेरमस्तंभतुरंगशालेति स्तंबेरमाः हस्तिनः स्तेषांस्तंभः आलानः तुरंगानांवाजीनां शालाः बन्धनस्थानं वाजिशालातुमंदुरेत्यमरः अशून्यंगेहं जनाकुलगृहमित्यर्थः गजाश्वगोष्टक्षीरद्रुमाट्टालकतोरणानीति तत्रगजाश्वोप्रतीतौगोष्टं गवामुपविशनस्थलं क्षीरद्रुमाः न्यग्रोधप्रभृतयः अट्टालकंगृहोपरिगृहंतोरणंमंगलनिमित्तंयत्गृहद्वारे बध्यते ३८ एवमिति - पूर्वोक्तप्रकाराणि मनोहराणि तुंगानि उच्चैस्तराणिस्थानानि तानिशुभावहानिशुभफलदानृणीत्यर्थः इदानींनीचेषुवस्तुषुमध्यान्यान् शुभदान् देशप्र-

॥ भाषा ॥

रौद्र कार्यमें शुभ हे और अन्नकूं भोजन करतो शांतशकुन दीप्तकार्यकूं करे हे ये शांतदीप्तभेदकरकें दोय प्रकारको हे ॥ ३७ ॥ प्रासादइति ॥ प्रासादभूमी विष्णुमंदिर और शिवमंदिर और हाथी बंधवेके स्थान हाथी सहित होंय और घोडानकी शाला घोडा सहित होंय और मनुष्यनकरभरे हुये घर होंय और गो शाला और वडकूं आदिले दूधके वृक्ष और अदालीनाम घरके ऊपरघर तोरणनाम मंगलकार्यमें द्वारमें बांधें सो ॥ ३८ ॥ एवमिति ॥ ये सब मनोहरहोंय बडे ऊंचे स्थान होंय तो शुभफलके देवेवारेहें अब नीचे वस्तूनमें मध्यनें जो शुभके देवेवारे देशप्रदेश तिनें हम कहें हें ३९

शुचिः सतोयाविशदामनोज्ञा सगोमयासस्यवती-
चभूमिः छायामयीशाद्वलमेवमाद्य भवंतिनीचे
षुशुभाः प्रदेशाः ४० करंकशूलीचितिशृंगयू-
पाः शवः खरः सैरिभःसूकरोष्ट्राः वल्मीकशु-
ष्कोत्पटितद्रुमाद्या नोच्चेषुदेशेषुभवंतिशस्ताः ४१

॥ टीका ॥

देशान्वयंप्रतिपादयामः ३९ शुचिरिति एवमाद्याः प्रदेशाः नीचेषुशुभाः भवंति ते के इत्यपेक्षायामाह शुचिरिति शुचिः पवित्राभूमिः तथासतोयासहजलेन वर्तमानाविशदामालिन्यरहिता मनोज्ञा मनोहारिणी सगोमयाच्छगणयुक्ता सस्यवती धान्योत्पत्तिमती छायामयी वृक्षबाहुल्यादिति भावः शाद्वलंबालतृणोपयुक्तं स्थलं शाद्वलः शादहरितेइतिहेमः ४० करंकशूलाविति उच्चेषुदेशेषु एतेशस्ताः शोभना नभवंति ते के इत्यपेक्षायामाह करंकइति करंकं मृतशुष्कशरीरं शरीरास्थिकरंकः स्यान् कंकालमस्थिपंजरइतिहैमः शूलिः चौराणांवधार्थबहिर्न्यस्तंकाष्ठंचितिः चिताशृंगंविषाणंयूपाः यज्ञस्तंभाः करंकश्चशूलाचचितिश्चशृंगंचयूपश्चकरंकशूलाचितिशृंगयूपाः इतरेतरद्वंद्वः शवः जीवेनोज्झितंवपुः मृतकं खरः गदर्भस्सैरिभोमहिषः शूकरः प्रसिद्धः उष्ट्रःकरभः सैरिभश्चशूकरश्चउष्ट्र-

॥ भाषा ॥

शुचिरिति ॥ पवित्रभूमि होय जल जहां भर रहे होंय निर्मल होय मनकूं हरवेवाली होय जाकूं देखनें हीं मन प्रसन्न होय जाय गोबरसहित होय धान्यकी जामें उत्पत्ती होती होय वृक्षावलीनकी छाया होय छोटी छोटी हरी हरी तृणयुक्त स्थल होय इनकूं आदिले देशप्रदेश नीचे स्थलनमें शुभ देवेवारे हें ॥ ४० ॥ करंकशूलाविति ॥ ऊंचे देशनमें ये अछे नहीं हे कोनकोन कोईमरे को सूको शरीर और शूली और चिता और सींग और यज्ञस्तंभ और मुरदा और गधा और महिष-

अंगारभस्मोपलवल्कपंकगर्तागुहाकेशतुषास्थिविष्टाः
घृणाकराःखर्परकोटराद्यान्ननीचदेशाःशुभदाभवंति
४२ सप्ताहमासायनहायनांतेग्रामंपुरंदेशमथान्यधीशं

॥ टीका ॥

श्वसैरिभस्सूकरोष्ट्रा इतरेतरद्वंद्वः तथावल्मीक शुष्कोत्पाटितद्रुमाद्याः वल्मीकंउपदेशिकागृहं शुष्काः नीरसाः उत्पाटिताः वायुनोत्पाट्यभूमौन्यस्ताः येद्रुमाः वृक्षाः तत्प्रमुखावल्मीकः कृमिपर्वतः वल्मीकूटंवामलूरोनाकुःशक्रशिरश्चसइतिहैमः ४१ अंगारइति एतेनीचदेशाःशुभानभवंति केतेइत्यपेक्षायामाह अंगारइति अंगारःज्वलितकाष्टांशः भस्मरक्षा उपलः प्रस्तरः पाषाणः वल्कंवृक्षत्वक् पंकः कर्दमः गर्तारवातप्रदेशः गुहादरीकेशाः अलकः तुषधान्यत्वक् आस्थिप्रतीतंविष्टामलः घृणाकराः बीभत्सोत्पादकाः खर्प्परकोटराद्याइति खर्परंचीवरंइतिलोकेमृत्भांडशकलं खर्परस्तस्करे धूर्तेभिक्षुपात्रकपालयोइतिश्रीधरः कपालखर्परौ घटादीनांखंडेप्युपचारात् यदाह कपालंशिरसोऽस्थिस्यात् घटादेशकले व्रजे इतिमहेश्वरः कर्परेइतिपाठे कर्परंमस्तकस्यार्द्धास्थिवाचकं यदाह कर्परोजातुनिःप्रोक्त कपालेपिचकर्प्परइतिविश्वः कोटरः कोतरइतिप्रसिद्धं इत्येवमादयः कर्परकोटरौ आद्यौमुख्यौयेषुते तथोक्ताः वा खर्परं आस्थिविशेषः कोटराः प्रतीताः ४२ सप्ताहेति एकत्रदेशेयदाप्रदीप्तः शाकुनः रटति त्यजति तदाक्रमेणपरि-

॥ भाषा ॥

शूकर ओर ऊंट ओर सर्पकीवंमें ओर सूके पवन करकें उखडे पृथ्वीमें पडे हुये वृक्ष ये शुभदायिक नही हें ॥४१॥ अंगारइति ॥ जलतीलकडि या पडी होय ओर राखपडीहोय वा पाषाण होय वा वल्कल ओरकीच ओर खात पटकवेके गर्त ओर गुफा ओर बाल ओर धान्यकी तुष ओर हाड ओर विष्टा इनकूं आदिले ये नीच देशहें सो शुभके देवेवारे नहीं हें ॥४२॥ सप्ताहेति ॥ एकत्रदेशमें जो प्रदीप्त शाकुन होय तो क्रमकरकें

एकत्रदेशेरटतिप्रदीप्तोनिहंत्यवश्यंशकुनःक्रमेण
४३ सर्वेपिदुर्भिक्षकृतोभवंतिस्वजातिमांसानिसमा
हरंतः मार्जारमाखुपृथुरोमसर्प्पौमीनंचपंचप्रवि
हायसत्वान् ४४

॥ टीका ॥

पाट्याशकुनः अवश्यं निश्चयेन सप्तदिनांते ग्रामं निहन्ति मासान्तेपुरं पक्षौपूर्वापरौ शुक्ल कृष्णौ मासस्तु ताबुभावित्यमरः द्वौद्वौमार्गादिमासौ स्यादृतुस्तैरयनंत्रिभिरित्यमरः अयनांतेदेशं हायनांते वर्षांते अवन्यधीशंनिहंतीति सर्वत्रसंबंधः संवत्सरोवत्सरोब्दो हायनोस्त्रीशरत्समाइत्यमरकोशः ४३ सर्वेपीति स्वजातिमांसानिसमाहरंतइति स्वस्यापेक्षया ये स्वजातीयाः तेषां मांसानिसमाहरंतोभक्षयंतः दुर्भिक्षकृतइति - दुर्भिक्षं जलदाभावेन धान्यमहर्घता तत्कृतःदुर्भिक्षकारका तत्प्रका शका भवंतीत्यर्थः किंकृत्वा विहाय कान् पंचसत्वान् प्राणिनः तान् कान् मार्जारओतुं आखुंमूषकं पृथुरोमसर्प्पाविति पृथुरोमाच सर्पश्चेत्यनयोर्द्वंद्वः तत्र पृथुरोमोमत्स्यविशेषः सर्प्पोभुजंगमः मीनो मत्स्य एते सर्वदा स्वजातिभक्षका अत एतेषां हानंयुक्तमेव ४४

॥ भाषा ॥

वो शकुन निश्चयही सात दिनके अंतमें ग्रामकूं नाश करे और मासके अंतमें पुरकूं नाश करे और आपकूं अंतमें देशकूं और वर्षके अंतमें राजाकूं नाश करे है ॥४३॥ सर्वेपीति ॥ बिल्लीमूसा और वड़ेनसे रोम जाके मछी जातमें पृथुरोम कहेंहें सो और सर्प और मीन ये पांचो अपने जातकेनको मांस सदा भक्षन करेहें यातें इनकूं छोडकरकें इनविना और जो अपने जातिकेनको मांस भक्षन करें तो वे दुर्भिक्षके करवेवारे जाननो आवश्यक दुर्भिक्ष अकाल पडेगो ॥४४

॥ देशास्येति ॥ मनुष्य और खर इनकूं छोडकरकें क्यों ये दोनो तो परयोनीसूं -

देशस्थभंगंपरयोनियानात्कुर्वन्तिसत्वान्नृखरौविहाय
सर्वयथावस्थितविश्वरूपादन्यत्तदुत्पाततयावदंति ४५
नीडप्रसक्तोरतमांसलुब्धोभीतःप्रमत्तःक्षुधितोरुगार्त्तः
तथानवाऽलोचनमंतरेणग्राह्योननद्यंतरितस्तथापः ४६
अश्वोष्ट्रमार्जारखरौवराहाःशशोमृगोवाशिशिरेव्यलीकाः

॥ टीका ॥

देशस्येति परयोनियानात्परजातीयस्त्रीसंगात्सत्वाः प्राणिनः देशस्यभंगं कुर्वंति किं कृत्वाविहाय त्यक्त्वा कौ नृखरौमनुष्यगर्दभौ नाचखरश्चनृखरौइतरेतरद्वंद्वः मनुष्यखरयोः परयोनिगमनस्यसर्वदासत्वात्नदोषः यथावस्थितविश्वरूपादन्यत्सर्वतदुत्पातमुदा हरंतिकथयंतीत्यर्थः ४५ नीडइति नीडःकुलायः तत्रप्रसक्तः निद्राप्रसक्तइत्यर्थः कुलायोनीडमस्त्रियामित्यमरः रते मैथुनेमांसेचलुब्धो आसक्तः रतंचमांसंचरतमांसेतयोर्लुब्धः रतमांसलुब्धः पूर्वद्वंद्वः पश्चात्तत्पुरुषः भीतःभयाक्रांतःप्रमत्तः आलस्यवान् क्षुधितः बुभुक्षितः रुगार्त्तः रोगाक्रांतः एतादृक्शकुनोनचग्राह्यः तथाआलोकनमंतरेणनग्राह्यः अनुमानादयमेवभविष्यतीतिग्रहणप्रतिषेधः तथानद्यंतरितोनद्या अंतरितः अंतरंप्रापितः नग्राह्यः ४६ अश्वोष्ट्रइति शिशिरेऋतौएतेशकुनाः व्यलीकाःव्यर्थाज्ञेयाइतिशेषः केतेइत्याह अश्वइति -

॥ भाषा ॥

गमन सदा करें हें यातें इनको तो दोष कहाइनाविना ओर प्राणी परजातिकी स्त्रीको संग करेतो वो आवश्यक देशभंग करेहें ॥४५॥ नीडइति ॥ जो निद्रामें आसक्त होय ओर मैथुनमें मांसमें लुभायमान होय ओरभययुक्त होय आलस्यवान् होय मतवालो होय ओर भूको होय रोगयुक्त होय एसे शकुन नही ग्रहण करनो तेसें हीं आंधरो होय तोवी नहीग्रहणकरनो अनुमानतें ये होयही जायगो एसेंवी नही ग्रहणकरनो ओर तेसें ही नद्यंतरित जल अर्थात्नदीकरकें अंतरप्राप्तहुयोजल नहीं ग्रहणकरनो ॥४६॥

हेमंतकालेमहिषर्क्षसिंहविलेशयद्वीपिशिशुप्लुवंगाः
४७ स्यातांवृथाकाकपिकौवसंतेवृथावराहश्चवृकोनभस्ये
स्युः श्रावणेवारणचातकाद्या अब्जादयःक्रौंचनिभा घनान्ते ४८

॥ टीका ॥

अश्वोष्ट्रमार्जारखरोवराहाः अश्वश्चउष्ट्रश्चमार्जारश्च खरश्च वराहश्चेतरेतरद्वंद्वः अश्वः ययुः उष्ट्रः मरुस्थलीप्रसिद्धः मार्जारः ओतुः खरोगर्दभः वराहाः शूकराः शशः मृदुलोमकः प्रतीतः मृगोहरिणः एते हेमंतकाले महिषर्क्षसिंहबिलेशयद्वीपिशिशुप्लुवंगाः व्यलीका भवंति इत्यन्वयः तत्रमहिषःकासरः ऋक्षः ऋच्छः सिंहः पंचास्यः बिलेशयाः बिलवासिनः सर्पाद्याःद्वीपी चित्रकस्तस्यशिशुर्वनेचरविशेषोवाप्लुवंगः कपिः ४७ स्यातांवृथेति काकपिकौ वसंतेऋतौ वृथास्यातां तत्रकाकः प्रसिद्धः पिकः कोकिलः मत्तत्वे नशकुनानर्हत्वादित्यर्थः तथा नभस्येभाद्रपदे वराहः शूकरः वृकः वरगडइति लोकेप्रसिद्धः भिढहाइतिप्राच्यांप्रसिद्धः वृथास्यात् हेतुः पूर्वोक्तएव श्रावणेवारणचातकाद्याः वृथास्युः तत्रवारणोहस्ती चातकोबप्पीहः आदिशब्दादन्येषामपिग्रहणं घनान्ते शरदि अब्जादयः पदार्थाः क्रौंचनिभाः क्रौंचसदृशाः पक्षिणः वृथास्युः ४८

॥ भाषा ॥

अश्वोष्ट्रइति ॥ अश्व ऊंट बिल्ली खर शूकर शश नाम खगोंस हरिण ये शकुन शिशिरऋतूमें व्यर्थ हें और महिष ऋछ सिंह बिलेनमें रहेंहें सर्पादिक ते द्वीपीनाम चित्रक ताको बालक अथवा कोई वनचर वानर ये शकुन हेमंतकालमें व्यर्थ हें ॥ ४७॥ स्यातांवृथेति॥ काक कोकिल ये वसंतऋतूमें वृथा हें और शूकर वृकनाम वरगडकोहे वा भिटहाकहें वा कहूं ल्यारी कहेंहें ये भाद्रपदमें वृथाहें और हाथी चातककूं आदिले श्रावणमें वृथा हें और कमलकूं आदिले पदार्थक्रौंचकी सदृस पक्षी ये शारदऋतूमें वृथाहें ॥४८॥

आर्तभीतरवजर्ज्जरदीनाभिन्नकंठलघुभैरवरूक्षाः निंदनीयनिनदाःशुभशब्दाः शांतपूर्णमुदितप्रकृतास्तु ४९ यद्यदंगमिह दक्षिणचेष्टोदक्षिणंस्पृशति कार्यविधाने तस्यतस्यशकुनः सुखकारीदुःखकृद्भवतितद्विपरीतः ५०

॥ टीका ॥

आर्तइति रुगार्ताभीतरवाः जर्जराः परिपक्ववयसः दीनानिः सत्वाः भिन्नकंठाः घर्घरध्वनयः लघवः तुच्छाः भैरवाः रौद्राः रूक्षाः कांतिवर्जिताः निंदनीयनिनदाः निंद्यशब्दाः प्रकृताः सुशकुनावलोकनप्रक्रियासुवर्ज्याःतथाशुभशब्दाः मनोहारिवाचः शांताः फलतृणाशनाः पूर्णाः मध्यवयसः मुदिताः संतुष्टमानसाः एवंविधाग्राह्याइतितात्पर्यार्थः ४९ यद्यदंगमिति यदितिषष्ठ्यर्थे अव्ययंते न यस्ययस्य अंगंदक्षिणंशकुनः स्पृशति कीदृग्दक्षिणचेष्टइतिदक्षिणचेष्टायस्यसतथा कार्यविधानइति कार्यस्यविधानंविलोकनं तस्मिन्नित्यर्थः तस्यतस्य अंगस्य पुरुषस्य शकुनः शुभकारीस्यात् तद्विपरीतः वामचेष्टः वामांगं गच्छन् वा स्पृशन् दुःखकृन्भवति ५०

॥ भाषा ॥

आर्तइति ॥ रोगार्त होय भयवान् शब्द जाको होय वृद्ध सो होय दीन होय कंठ जाके घर्घरबोलतें होय लघु होय रौद्र होय कांतिहीन होय निंदित जाको शब्द होय ये शकुनके अवलोकनक्रियानमें वर्जित हैं तैसें ही मनोहर जिनकी वाणी हैं शांत शकुन हैं और फलतृणनको आहार करें हैं पूर्ण मध्य अवस्था जिनकी प्रसन्न मन जिनके ऐसे शकुन ग्रहन करनो योग्य हैं ॥४९॥ यद्यदंगमिति सुंदर जाकी चेष्टा ऐसो शकुन जाजा दक्षिण अंगकूं स्पर्श करै कार्यविधानमें ताता अंगको पुरुषकूं शकुन शुभकारी होयहै वाम जाकी चेष्टा ऐसो शकुन वामांगकूं गमनकरत दुखकूं करवेवालो होयहै ॥ ५०॥

श्यामाशिवापिंगलिकान्यपुष्टापल्लीरवाश्शूकरिकात
थेह छुछूंदरीचापिशुभायवामापुंनामधेयाः शा-
कुनाश्चसर्वे ५१ श्रीकंठछिक्काररुरुप्लवंगाः
श्रीकर्णचाषौभषकोमयूरः श्येनः समंपिप्पि-
कयाप्रशस्ताः स्त्रीनामधेया अपिदक्षिणेन ५२

॥ टीका ॥

अथ यियासोर्येवामपक्षेशकुनास्तेंशुभास्तानाह श्यामेति श्यामा पोदकी शिवाशृगाली पिंगलिका चीचरी पूर्वोक्ता अन्यपुष्टाकोकिला पल्ली गृहगोधा तस्यारवाः शब्दाः शूकरिका प्रसिद्धा छुछुंदरीगंधमूषिका एतावामाः शुभाय भवंति तथा येपुंनामधेयाः पुरुषसंज्ञकास्तेपिवामाः शुभदा भवंतीतितात्पर्यार्थः ५१ यियासोर्येदक्षिणेभागेशकुनाः तेशुभास्तानाह श्रीकंठइति श्रीकंठःषंजरीटः छिक्करोमृगविशेषः छिक्कारोचित्तलस्मृतइतिजयः रुरुर्मृगभेदः प्लवंगः कपिः श्रीकर्णःपक्षिविशेषः वनचटकइत्यन्येचाषः पूर्वोक्तः भषकः पक्षिविशेषोगृह्यते नश्वानस्यवामैवगतिरिष्टा तदुक्तं इदंमेसिद्धिदंकार्यंभावितास्तुनकोत्तम इत्युक्ते दक्षिणाचेष्टावामगतिर्मतेति मयूरः शिखीश्येनः शशादनः पिप्पिकयापक्षिविशेषेणसमंसहार्थेतृतीया एते दक्षिणेन प्रशस्ताः अत्रपिप्पिकाशब्देनकोंडिआलः यः जलोपरिकंपायमानस्तिष्ठतियेस्त्रीनामधेयास्त्रीनामानःसारिका चटकाईलिकास्तेपिदक्षिणेनेत्यर्थः

॥ भाषा ॥

श्यामेति ॥ पोदकी शृगाली पिंगलिका कोकिला पल्ली जो छपकली ताको शब्द शूकरी चकचूंदर ये स्त्रीसंज्ञकनाम शकुन वां ये शुभके देवेवारे हें और पुरुषनामवी जे काक कपोतका रंडच वंजुलतित्तिर हंसादिक ये सब वां ये शुभके देवेवारे हें ॥५१॥ श्रीकंठइति ॥ श्रीकंठनाम खंजरीट और छिक्कर नाम मृगविशेष और रुरु नाम मृगविशेष और वानर और श्रीकर्णनाम पक्षिविशेष हे और वनचटकवी कोई याकूं कहेंहें और-

क्ष्वेडारवास्फोटितगीतवाद्येपुण्याहशंखाध्ययनांबु
कुंभाः वामेनपुंवत्कथयंतिभद्रंस्त्रीवच्छुभादक्षिण
तश्चवाचः ५३ खंजनाजनकुलाशिखिचाषोकीर्त्त-
नेक्षणरुतैर्ददतीष्टम् ॥

॥ टीका ॥

दक्षिणभागेप्रशस्ताः ५२ क्ष्वेडारवेति क्ष्वेडारवाः चेटिकाप्रभृतयः स्वभुजताडनमित्यन्येस्फोटितहस्तास्फोटनंचडु इत्यन्येगीतवाद्यानिप्रसिद्धानि पुण्याहइत्याशीर्वादः शंखः अर्थात्शंखध्वनिः अध्ययनंवेदध्वनिरित्यर्थः अंबुकुंभः जलभृतकुंभः एतेवामेनभद्रंकथयंति किंवत्पुंवत् तथावाचः दक्षिणतः शुभाभवंति किंवत्स्त्रीवत् यथादक्षिणे स्त्रीशुभातथा शुभवाचोपिदक्षिणेशुभदाइत्यर्थः ५३ खंजनेति खंजनः खंजरीटः अजः छागः नकुलः प्रसिद्धः शिखीमयूरः चाषः किकीदिविः एतेषामन्यतमः कीर्तनेक्षणरुतैरिति कीर्तनंनामोच्चारणं ईक्षणमवलोकनं रुतंशब्दः पश्चादितरेतरद्वंद्वः इष्टंदिशानि नतुदृष्टरुताभ्यांविलोकितशब्दाभ्यांशुभंददातीत्यर्थः

॥ भाषा ॥

चाष ओर श्वानकी बांई गतीश्रेष्ठ हे ओर मयूर ओर शिखरा ओर कोडियाल जलके ऊपर कंपायमान स्थित रहेंहें ये सब ओर स्त्री संज्ञक जेहें तेबी दक्षिणनाम जेमने प्रसिद्ध हें ॥५२॥ क्ष्वेडारवेति॥ क्ष्वेडारवनामसेटीकादिक कोई याकूं स्वभुजताडन कहेंहें ओर स्फोटितनाम हाथकों स्फोटन करों करेहे कोई चडु कहेहें ओर गीतवाजे पुण्याहवाचन आशीर्वाद शंखध्वनि वेदाध्ययन जलको भरोकूं भये वामकरकें पुरुष किसीनाई शुभ हे ओर स्त्रीजेसें दक्षिणमें शुभ हे तेसें ही वाणीबी दक्षिणमें शुभ देवेवारी हे ॥ ५३ ॥ खंजनेति ॥ खंजन वा खंजरीट ओर छाग वा बकरिया ओर न्योला ओर मयूर ओर चाष किकीदिवी इनतें ओर नामोच्चारण अवलोकनशब्द इनकरकें इष्ट जो वांछित ताय देवेवारे हें ओर जाहक सेहलनामकरकें प्रसिद्ध हे सर्पशा-

जाहकाहिशशशूकरगोधाः कीर्त्तिनेननतुदृष्टरुताभ्यां ५४ अच्छभल्लकपिदर्शनशब्दैःसिद्धिदौनपरिकीर्तनमिष्टं दक्षिणेनगमनंविषमाणांशोभनंनकुलपक्षिमृगाणां ५५ पुरह्लिकाच्छिक्करकूटपूराःप्रदक्षिणेनाह्नि भवंति शस्ताः दिनावसानेनकुलं चचाषंवामेनयायेभृगुराहशस्तम् ५६

॥ टीका ॥

जाहकः सेहलइतिप्रसिद्धः अहिः सर्प्पः शशः शशकः शूकरः वराहः गोधागोहेति प्रसिद्धः एषामन्यतमः कीर्तनेन केवलनामोच्चारणेनइष्टंदिशति नतुदृष्टरुताभ्यांशुभंदिशतीत्यर्थः ५४ अच्छेति अच्छःऋच्छः उलूकइत्यन्येभल्लोमृगविशेषः कपिःवानरः एतेषांदर्शनशब्दौसिद्धिदौपरंकीर्त्तनंनेष्टं तथा नकुलपक्षिमृगाणां विषमाणांविषमसंख्याकानामेवदक्षिणेनगमनं शोभनं अत्रपक्षिशब्देनचाषोगृह्यते ५५ पुरह्लिकेति पुरह्लिकाः पिदडीतिप्रसिद्धिभाजः छिक्करोमृगविशेषः कूटपूराः पूर्वोक्ताः एतेऽह्नि दिवसेप्रदक्षिणेनगताःशस्ताः भवंति भृगुराचार्यस्तुदिनावसाने दिवसस्यविरामेनकुलंचपुनश्चाषंवामेनयानेशस्तंशोभनं आह कथयामासेत्यर्थः ५६

॥ भाषा ॥

शशानाम खर्गोस शूकर गोह ये केवल नामोच्चारणही करकें इष्ट जो वांछित ताय देवेंहे दीखवेकरकें शब्दकरकें शुभ नहीं देवेंहें ॥ ५४ ॥ अच्छेति॥ ऋच्छ और भल्ल वानर इनके दर्शन और शब्द ये दोनो सिद्धीके देवेवारेहें और केवल नामलेनो इष्ट नहींहे तेसे हीन कुलपक्षि नाम चाष मृग ये विषम संख्या होंय तो इनको दक्षिण गमन शुभ हे ॥ ५५ ॥ पुराह्लिकेति॥ पुरह्लिका नामपिदडी और छिक्कर नाम मृग खर्गोस और कूटपूर नाम कडछीये दिवसमें दक्षिण माऊं शुभ होंयहें ॥ और भृगुजीनाम आचार्यहें सो नकुल नाम न्योला और चाष नीलवा वेडरेच ये वाम माऊं कूं शुभकहेंहें ॥ ५६॥

सर्वागमैर्दंष्ट्रिबिलाधिवासावामेनयांतोगदिताःप्रशस्ताः सर्वेऽबलानांनरवैपरीत्यादुक्तंसमस्तंशकुनंप्रशस्तं ५७ प्राच्यांप्रशस्तौहयशुक्लवर्णौशस्तौतथाक्रव्यशवाववाच्यां शस्तेचकन्यादधिनीप्रतीच्याम्शस्तावुदीच्यांद्विजसाधुगावः ५८ प्रवर्त्तकोयोगमनस्यपूर्वंसएवपश्चात्प्रतिषेधकश्चेत्

॥ टीका ॥

सर्वागमैरिति दंष्ट्रिणः दंष्ट्रायुक्ताः बिलाधिवासाः बिलवासिनः सर्वागमैः सर्वशास्त्रैः वामेनयांताः प्रशस्ताः शोभनागदिताः कथिताः सर्वेइतिसमग्रा इत्यर्थः अबलानां नरवैपरीत्यात्समस्तंशकुनंशोभनमुक्तंपुंसांतारैवगतिः शोभनास्त्रीणांवामैवगतिः शोभनेतिनिर्णयः ५७ प्राच्यामिति पूर्वस्यांदिशि हयशुक्लवर्णाविति हयोऽश्वः शुक्लवर्णोपेतंवस्तुच एतौप्रशस्तौशोभनावित्यर्थः तथा अवाच्यांदक्षिणस्यांक्रव्यशवाविति क्रव्यंमांसं शवः जीवेनोज्झितंवपुस्तथेतिपूर्वोक्तवत् प्रशस्तावित्यर्थः प्रतीच्यांपश्चिमायां कन्यादधिनीप्रसिद्धे प्रशस्तेशोभने कन्याचदधिचकन्यादधिनी उदीच्यामुत्तरस्यांदिशि द्विजसाधुगावः शस्ताःशोभनाः द्विजश्चसाधुश्चगौचद्विजसाधुगावः इतरेतरद्वंद्वः ५८ प्रवर्तकइति यः गमनस्यपूर्वं प्रवर्त्तकः सएवश-

॥ भाषा ॥

सर्वागमैरिति ॥ डाढा करयुक्त होंय ओर बिलेमें निवासके करवेवाले होंय ये वांये होय करकें गमनकरें तो शुभ कहें हें संपूर्णशास्त्रनमें ओर स्त्रीनकूं मनुष्यनतें विपरीतभावतें सब शकुन प्रशस्त कहें हें स्त्रीनकूं वामशकुन शुभहें ॥५७॥ प्राच्यामिति ॥ पूर्वदिशामें घोडा ओर शुक्लवर्णकूं लियें कोईवस्तु ये दोनो शुभ हें तेसेंही दक्षिण दिशामें मांस ओर शव कहिये मुरदा येदोनो शुभ हें ओर तेसें हीपश्चिमदिशामें कन्या ओरदहीये दोनो शुभ हें ओर उत्तर दिशामें ब्राम्हण ओर साधु ओर गौ येतीनें शुभ हें ॥५८॥ प्रवर्तकइति ॥ जोशकु-

मृत्युंरिपुभ्योसमरंरुजंचगंतुस्तथान्यांश्चकरोत्यन
र्थान् ५९ स्वजातिभिःस्यात्समकालजातैःसव्या
पसव्यैःशकुनैःसदैव सर्वार्थसिद्धिर्नियतंयतस्ता
नाहुर्बुधास्तोरणनामधेयान ६० चाषभासबक
वंजुलकाकाश्चक्रवाकशिखिखंजनगृध्राः पोद-
कीकपिकपिंजलकीराः श्येनवार्त्तिकखरादिवसादाः ६१

॥ टीका ॥

कुनः पश्चात्प्रतिषेधकोनिषेधकश्चेत्स्यात् तदागंतुर्नरस्यरिपुभ्योमृत्युंड-मरंविड्वरंरुजंरोगमन्यांश्चानर्थान्करोति ५९ सजातिभिरिति सव्यापसव्यैः वामदक्षिणगैः स्वजातिभिरेकजातीयैः समकालजातैः एककालोत्पन्नैः शकुनैः सर्वदैवसर्वकालंनियतंनिश्चितंसर्वार्थसिद्धिःस्याद्यतःयस्मात्कारणाद्बुधाःविद्वांसस्तान्शकुनान् तोरणनामधेयानाहुः तोरणीया इति नामधेयं येषांते तथोक्तास्तान् ६० चाषेति चाषः पूर्वोक्तः भासः कावरिःपक्षिविशेषः भासस्तुगोकुक्कुटइत्यजयः घूकोवेति केचिद्बकः प्रसिद्धः वंजुलः पक्षिविशेषः सूत्रधार इत्यन्येका काःप्रसिद्धाः चक्रवाकः कोकःशिखी मयूरः खंजनः खंजरीटः गृध्रः दूरदृक् गीधइतिलोकेप्रसिद्धः

॥ भाषा ॥

न गमनके पहलें प्रवर्त्तको करवे वारो होय श्रोर वोही शकुन पींछें निषेधको करवेवारो होय तो गमनको करवेवारो जो मनुष्य ताकूं वैरीनतें मृत्यु होय श्रोर संग्राम श्रोर रोग श्रोर जे अनर्थ तिन्हे करेहें ॥ ५९ ॥ स्वजातिभिरिति ॥ एक जातिके होंय वांए दक्षिण होंय एककालमें होय एसे शकुननकरकें सर्वकालमें सर्वसिद्धी होंय याहीतें विवेकी इनें तोरणनामधेय कहेहें ॥ ६० ॥ चाषेति ॥ चाष भास नामका वरीपक्षी वगला वंजुलपक्षी नाम सूत्रधार काक चक्रवाकनाम कोकमयूर खंजन नाम खंजरीट गीध पोदकी वानर कपिंजल सूआशिखरा वार्त्तिकपक्षी बटेरया

पिंगलाथबलिभोजनवैरीछिप्पिकाचसहचर्मचटेन
लोमशीशशकवल्गुलिकाश्चप्राणिनःप्रविचरंतिरजन्यां
६२ मानुषाश्चनकुलाश्चविडालाश्छागगोमृग
मृगारिशृगालाः द्वीपिसर्प्पपिकसारसहंसाः शूकराश्च
निशिचान्हिचरंति ६३ भवेदनल्पःप्रथमंततो
ल्पः स्वरोऽनुकूलोऽपि नरस्ययस्य

॥ टीका ॥

पोदकी देवी कपिः वानरः कपिंजलोगपेशः कीरः शुकः श्येनः सिंचारकइति प्रसिद्धः वार्तिकः पक्षिभेदः वटेरइतिप्रसिद्धः खरः गर्दभः एते दिवसाटा दिवसचारिणोभवंतीत्यर्थः ६१ पिंगलेति पिंगलापेचकः बलिभोजनवैरी घूकः छिप्पिका मरुस्थल्यां छापोइति प्रसिद्धः यच्छब्दश्रवणाज्जनानांरुधिरप्रकोपोभवति चर्मचटेन चामाचेडिकानुइति प्रसिद्धेनसहेतिसार्द्धं लोमशीलूंकडीशशकःप्रसिद्धः वल्गुलिकामुखविष्टा वागुलिइति लोकेप्रसिद्धा एतेप्राणिनोनिशि विचरंति रात्रिचारिणइत्यर्थः ६२ मानुषाश्चेति मानुषानराः नकुलाः सर्प्पघ्नाः प्रसिद्धाः बिडालामार्जाराः छाग अजः गौः प्रसिद्धा मृगोहरिणः मृगारिःसिंहः शृगालोगोमायुरेनेषामितरेतरद्वंद्वः द्वीपिः चित्रकः सर्प्पः भुजंगः पिकः कोकिलः सारसः प्रसिद्धः हंसश्चक्रांगः शूकरोवाराहः एते निशि रात्रौ अन्हि दिवसे चरंति अहोरात्रिचारिणः ६३ भवेदिति यस्यनरस्य प्रथममनुकूलः शाकुनः अनल्प-

॥ भाषा ॥

नामकर प्रसिद्ध हें गर्दभ ये सब दिवसचारी हें अर्थात् दिनमें विचरवे वारे हें ॥६१॥ पिंगलेति॥ पिंगलानाम पेचक घूघू छिपकली चर्मचट नाम चामाचेडी वा कानुइति प्रसिद्धः लोमशीनाम लुंकडी शशक नाम खरगोंस वल्गुलिकानाम मुखविष्टा वागुल या नामकर प्रसिद्ध हे ये सब रात्रिमें विचरें हें ॥६२॥ मानुषाश्चेति॥ मनुष्य नकुल न्योला विलाव बकरिया गो मृग सिंह शृगाल हस्ती सर्प कोकिल सारस हंस शूकर ये सब रात्रीमेंवी ओर दिनमेंवी विचरें हें ॥६३॥ भवेदिति॥

मुष्णंतिनूनंपथितस्करास्तंयत्नेनतस्माच्छकुनंपरीक्ष्यं ६४ वामाः क्वचिद्दक्षिणतः क्वचिच्चदेशेशिवाकाककरापिकाणां शब्दाःप्रशस्ताःशकुनंतु तस्मात्लोकप्रसिद्ध्यापिपरीक्षणीयं ६५ सदाध्वगैर्योजनमात्रशेषेकल्याणकामैर्नगरप्रवेशे ॥

॥ टीका ॥

स्वरोभवेत्ततोऽल्पस्वरोभवेत् यथाखरः प्रथमंमहत्स्वरेणरौति प्रांतेक्षीणस्वरोभवति कश्चित्प्रथमंसूक्ष्मस्वरेणरौति तदनुमहत्स्वरेणरौति तदर्थंवचनं नूनंनिश्चितंजनं तस्करामुष्णांति तस्माद्यत्नेनयत्नपूर्वकं शकुनंगवेषणीयंनिरीक्ष्यमित्यर्थः ६४ वामेति शिवाक्वचिद्देशेवामेप्रशस्ता क्वचिद्दक्षिणतः शुभेतिकरापिकाणांशब्दाः क्वचिद्देशेदक्षिणतः क्वचिद्वामेवामभागेप्रशस्ताः तस्मात् लोकप्रसिद्धापिशकुनंपरीक्षणीयं निरीक्षणीयमिति करापिकामहरीति लोकेप्रसिद्धा ६५ सदाइति नगरप्रवेशेयोजनमात्रशेषेक्रोशाव-

॥ भाषा ॥

जा मनुष्यकूं प्रथम अनुकूल शाकुन होय और अनल्पस्वर अर्थात् थोडे स्वरजामें न होय और ता पीछें अल्पस्वर होय जेसें खर प्रथम तो उंचे स्वरकरकें रुदन करेहे तापीछें अंतमें क्षीणस्वर होय और कोईकोई गर्दभ पहलें सूक्ष्मस्वरकरकें रुदन करेहे ता पीछें महान् ऊंचे स्वरकरकें रुदन करेहे तो निश्चयही मार्गमें चोर तापुरुषकूं ठगलें तातें यत्नपूर्वककरकें शकुन देखवेकूं योग्यहे ॥६४॥ वामेति ॥ शिवा कोई देशमें वांई शुभ हे और कोईदेशमें जेमनी शुभहे और करापिकानको शब्द कहूं वां ये शुभहे कहूं जेमने शुभ हें तातें लोकमें जो प्रसिद्ध शकुन हें तेवी देखवेकूं योग्यहे करापिका नाम महरी या नाम करकें प्रसिद्ध हे ॥६५॥ सदाध्वगैरिति ॥ च्यार कोश नगर रहे अथवा एक कोश ग्राम बाकी रहे तब इन दोनोनके प्रवेशमें अपने कल्याणकी वांछा करे उनपुरुषनकूं गीत बाजे हास्य ये वर्जनो योग्यहे॥६६॥

ग्रामप्रवेशेऽपिचगीतहास्येक्रोशावशेषेपरिवर्जनीये
६६ सव्यापसव्याभिमुखीतथान्यापराङ्मुखीचो
र्द्धमधोमुखीच सव्यापसव्यार्धविवर्तने द्वे अष्टौपु
रोष्टौगतयश्चपृष्टे ६७ जातोदयोदीप्तककुब्विभागे
प्रशांतदिग्जेन कृतानुनादः

॥ टीका ॥

शेषेग्रामप्रवेशे तयोः प्रवेशेचकल्याणंश्रेयः वांछद्भिः पथिकैः गीतहास्ये गानहसनेपरिवर्जनीयेत्याज्यइत्यर्थः कदासर्वदा सर्वकालं ६६ सव्यापसव्येति सव्यावामादक्षिणतोयावामंयाति अपसव्यादक्षिणायावामतोदक्षिणंयाति अभिमुखीति या संमुखमभ्येति पराङ्मुखीति अग्रतउत्थाय पराङ्मुखंयाति ऊर्द्धमिति या अग्रतः ऊर्ध्वंगच्छति अधोमुखीति या उपरिष्टादधोमुखी पतति सव्यापसव्यार्द्धविवर्त्तने द्वे इति सव्यंवाममपसव्यंदक्षिणंतयोरर्द्धमर्द्ध मार्गस्तस्मान्निवर्तनेनवर्तनेन द्वेगतीभवतः इत्थं शकुनानामष्टौगतयः पुरः अग्रेअष्टौगतयः पृष्ठेच तथाचाग्रपृष्ठिभ्यांषोडश गतयोनिगदिताः ६७ जातोदयइति दीप्तककुब्विभागेजातोदयेशकुनेसति प्रशांतदिग्जेन कृता-

॥ भाषा ॥

सव्यापसव्येति ॥ सव्या नाम वामा दक्षिणभागतें बांये माहूंकूं जाय और अपसव्या नाम दक्षिणा तो बाये माऊं तें दक्षिणभाग माऊंकूं जाय और जो सन्मुख आवे ताकूं अभिमुखी कहें हें अगाडीसूं उठकरकें पीछे कूं जाय तासूं पराङ्मुखी कहें हें ओर अगाडीतें उठकरकें उर्द्ध नाम ऊपरकूं गमन करे याकूं उर्द्धमुखी कहेहें और ऊपरतें नीचो मुखकरके पडे ताकूं अधोमुखी कहेंहें और बांयो जेमनो इनके अंतर द्वारमार्गस्तन वेष्टन करकें अर्द्ध होय या प्रकार शकुननकी आठप्रकारकी गति हे और आगें पृष्टि अगाडी पिछाडी करकें षोडशगतीहें ॥ ६७ ॥

॥जातोदयइति॥ दीप्तदिशामें शकुन उदय होय ता पीच्छें शांतदिशाकरकें कियोहें

अनर्थशंकांशकुनोविधायनिःसंशयंनिष्फलतांप्रयाति ६८ प्रशांतदिग्जोविहितानुनादोयदाभवेद्दीप्तदिगुत्थितेन श्रेयस्तदानींशकुनःप्रदश्र्यप्रयातिवैफल्यमवश्यमेव ६९ पंचषाणिशकुनानिदेहिनामुत्तरोत्तरकृतोदयानिचेत् पूर्वपूर्वमभिबाध्यनिश्चितंतद्ददातिशकुनोंतिमःफलं ७० भूरयःखगमृगाःसमाकुलास्तुल्यकालविहितारवास्तुये

॥ टीका ॥

नुनादइति प्रशांतदिक्षुजातः प्रशांतदिग्जस्तच्छकुनेन कृतोऽनुनादोयेनसतथा एवंविधोभवेत् तदाशकुनः अनर्थशंकां विधाय निःसंशयंनिश्चितंनिःफलंप्रयाति ६८ प्रशांतइति दीप्तदिगुत्थितेनशकुनेनविहितानुनादः प्रशांतदिग्जोयदा शकुनोभवति तदानींश्रेयःप्रदश्र्यः शकुनः अवश्यमेववैफल्यं प्रयाति ६९ पंचषाणीति उत्तरोत्तरकृतोदयानि उत्तरंउत्तरं अग्रेकृतो-विहितःउदयोयैस्तानिपंचषाणिपंचचषट्चपंचषाणि शकुनानि देहिनांमनुष्याणांचेद्भवंति पूर्वपूर्वमाभिबाध्यनिश्चितमंतिमः शकुनः फलंददाति ७० भूरयइति येखगमृगाः खगाःपक्षिणः मृगाः वन्यसत्वाः खगाश्चमृगाश्चेतिद्वंद्वः तुल्यकालविहितारवाः समकालेकृत शब्दाः समाकुलाः

॥ भाषा ॥

शब्द जानें एसो शकुन अनर्थकी शंका करेहै निश्चय निष्फलता प्राप्त होय ॥ ६८ ॥ प्रशांतइति ॥ दीप्तदिशामें नाद होय ओरशांतदिशामें शकुन होय तब कल्याण होय वो शकुन अवश्यही विशेष फल प्राप्त होय ॥ ६९ ॥ पंचषाणीति ॥ जा पुरुषकूं उत्तरोत्तर पांच छे शकुन होय तब पहलें पहलें हुये जो शकुन तिनें बाधकरकें निश्चय अंतिम कहिये पिछलो जो शकुन सो फल देवेहै ॥ ७० ॥ भूरयइति ॥ जे खगमृग ये एककालमें शब्द करें ओर समूह होय तो ते शकुन परदेशजायवेवारे-

तेभवंतिपरदेशायायिनांदेहिनांमरणकारिणोध्रुवं ७१
मिश्रकसप्ततिनावमिमांयोनिर्मलधीरधिरोहतिधीरः
शाकुनसागरपारयियासोर्व्याकुलताभवतीहनतस्य
७२ इतिश्रीवसंतराजशाकुनेविचारितंमिश्रप्रकर
णंचतुर्थोवर्गः ४ यत्नतःकृतमयत्ननिर्मितंमंगलं
यदुभयात्मकंभवेत्

॥ टीका ॥

संघीभूताः स्युः तेपरदेशयायिनांदेहिनांध्रुवंमरणकारिणोभवंति ७१ मिश्रकेति इमांमिश्रकसप्ततिनावं मिश्रकस्यसप्ततिश्लोकसंख्याकांनरीं यः निर्मलधीः विशुद्धबुद्धिः सद्यः अधिरोहति अध्यासते तस्यपुरुषस्य शाकुनसागरपारयियासोरितिशाकुनंतद्रूपोयः सागरः समुद्रः तस्यपारंयियासोर्गन्तुकामस्यइहात्रलोकशकुनशास्त्रेव्याकुलताव्यग्रतानभवतीत्यर्थः ७२ वसंतराज इति मयाविमिश्रिकंविचारितंविचारपथंनीतंअन्यानिविशेषणानिपूर्ववत् इतिशत्रुंजयकरमोचनादिसुकृतकारिभिः महोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायांवसन्तराजटीकायांविमिश्रकश्चतुर्थोवर्गः ४ ॥छ॥

यत्नतइति अधुनातत्समस्तंउपदिश्यते कथ्यते तत्किं यन्मंगलशुभयात्मकंउभयंभवेदेकंयत्नतःकृतंपुरुषप्रेरणाया जनितमेकमयत्ननिर्मितंपुरुष

॥ भाषा ॥

नकूं निश्चयही मरणके करवेवाले हें ॥ ७१ ॥ मिश्रकइति ॥ निर्मल जाकी बुद्धी एसो जो धीरपुरुष या मिश्रक नामकर जो सत्तर श्लोक रूपी नाव तामें चढे शाकुन रूप जो सागर समुद्र ताके पार होयवेकूं इच्छाकर रह्यो तापुरुषकूं व्याकुलता नहीं होय ॥ ७२ ॥ इतिश्रीवसंतराज शाकुनभाषाटीकायां विमिश्रकश्चतुर्थोवर्गः ४

॥ यत्नतइति ॥ गमनकरवेवालेकूं एक मंगल यत्न करकें कियो होय कोई पुरुषकी प्रेरणाकरकें शुभयुक्त पदार्थ लेकें सन्मुख आनो ये और विनायत्नकरेविना अकस्मात्

अप्रयत्नविहितंचमंगलंतत्समस्तमुपदिश्यतेऽधुना
१ कीर्तनात्श्रवणतोविलोकनात्स्पर्शनात्समधि
कंयथोत्तरं मंगलायदधिचंदनादिकंस्यात्प्रवास
भवनप्रवेशयोः २ दध्याज्यदूर्वाक्षतपूर्णकुंभाःसि
द्धान्नसिद्धार्थकचंदनानि आदर्शशंखामिषमीनमृ
त्स्नागोरोचनागोमयगोमधूनि ३

॥ टीका ॥

प्रेरणांविनैवस्वभावतः समुपस्थितं समागतं अमंगलंतुअप्रयत्नविहितमेव नह्यमंगलेकस्यचित्प्रयत्नोभवतीति १ कीर्त्तनादिति यन्मंगलंयथोत्तरं समधिकंस्यात् जायतेकस्मात्कीर्तनात्स्वयंनामग्रहणात्श्रवणतः परेभ्यःश्रवणात्वीक्षणात्स्वयंदृष्ट्वावलोकनात् तत् दधिचंदनादिकं प्रवासगमनप्रवेशयोरिति प्रवासगमनंपरदेशगमनमित्यर्थः अन्यथापौनरुक्त्यंस्यात् प्रवेशः ग्रामादौप्रवेशनं प्रवासभवनप्रवेशयोरितिपाठे गृहप्रवेशनं अनयोर्द्वन्द्वः दधिप्रसिद्धंचंदनादिकंचंदनप्रभृतिस्पर्शात् मंगलायविघ्नध्वंसायस्यात् २ दध्याज्येति दधिक्षीरजमाज्यंसार्प्पिः दूर्वादूब इतिलोकेप्रसिद्धा अक्षताः तंडुलाः पूर्णकुंभाः पानीयेनपूर्णाः घटाः सिद्धान्नंसिद्धमन्नंसिद्धार्थकः

॥ भाषा ॥

शुभ शकुन सन्मुख आनो और यत्न करकें कियो मंगल हुयो और वाई समें अकस्मात् विना यत्न करेवी मंगल होय ये उभयात्मक मंगल और अमंगलमें तो काहुको यत्न नहीं होयवो विना यत्न करे विना होय है सो ये सब अब पंचमवर्गमें कहेंहें ।।१।। कीर्त्तनादिति।। अपने मुखसूं ही नामले अथवा दूसरो उच्चारण करे आपसुनेंही यातें और आप सन्मुख आते देखै यातेंवी परदेशगमन समयमें अथवा गृहप्रवेश ग्रामप्रवेश समयमें दही चंदनादिक मंगलके लिये हें अर्थात् स्पर्शसूं विघ्ननिवारणके लिये हें ।।२।। दध्याज्येति।। दही१ घृत२ दूध३ चांवल४ जलकोभर्योकुंभ५ सिद्धहुयो अन्न६ सर्षप-

गीर्वाणवीणाफलभद्रपीठपुष्पांजनालंकरणायुधानि तांबूलयानासनवर्द्धमानाध्वजातपत्रव्यजनांबराणि ४ अंभोजभृंगारसमृद्धवन्हिर्गजाजवाद्यंकुशचामराणि रत्नानिचामीकरताम्ररूप्यंबद्धेकयादौषधयः सुराच ५

॥ टीका ॥

सर्षपः चंदनंमलयजं आदर्शः मुकुरः शंखः जलजः आमिषंमांसं मीनो मत्स्यः मृत्स्नामृत्तिकागोरोचनंगवामुदरात्समुद्भूतंपीतवर्णंगोमयं छगणं गोः प्रसिद्धामधुमधुमक्षिकामुखनिष्ठ्यूतं ३ गीर्वाणः देवप्रतिमावीणावल्लकी फलंप्रसिद्धंभद्रपीठंसिंहासनंपुष्पंकुसुमं अंजनंनेत्रांजनं अलंकरणं अलंकारः आयुधंशास्त्रंपश्चादितरेतरद्वंद्वः तांबूलेति तांबूलंप्रसिद्धं यानंवाहनं आसनंचतुष्किकादिवर्द्धमानः सरावसंपुटः ध्वजोवैजयंती आतपत्रं छत्रं व्यजनंप्रसिद्धं अंबराण्यंशुकान्यत्रेतरेतरः समासः ४ अंभोजेति अंभोजंकमलं भृंगारः कलशः झारीति प्रसिद्धा समृद्धवन्हिः दीप्तवह्निः गजोहस्ती अजः छागः वाद्यंभेर्यादि अंकुशंसृणिः प्रतीतंचामरं बालव्यजनं रत्नंप्रसिद्धं चामीकरंसुवर्णंरौप्यंरजतंताम्रंप्रसिद्धं बद्धैकपशुः बद्धश्चासौ एकपशुश्चेतिविग्रहः पशूनांवृंदं एकः पशुर्वा ओषध्यःफलपाकांतासुरा

॥ भाषा ॥

सिरस्यों ७ चंदन ८ काच ९ शंख १० मांस ११ मत्स्य १२ मृत्तिका १३ गोरोचन १४ गोबर १५ गौ १६ सहत १७ ॥ ३ ॥ गीर्वाणेति ॥ देवतानकी प्रतिमा १८ वीणा १९ फल २० सिंहासन २१ पुष्प २२ नेत्रनको अंजनका जल वा सुरमा २३ अलंकार भूषण २४ शास्त्र २५ तांबूल २६ वाहन २७ आसन २८ पालकी म्यानो २८ सरावसंपुट २९ ध्वजा ३० छत्र ३१ व्यंजन पंखा ३२ वस्त्र ३३ ॥ ४ ॥ अंभोजेति ॥ कमल ३४ कलशझारी ३५ दीप्तहुई अग्नी ३६ गज ३७ बकरिया ३८ भेरीकूं आदिलेकें बाजे ३९ अंकुश ४०

वनस्पतिर्नूतनशाकमेवमांगल्यपंचाशदियंप्रसिद्धा
शुभेषुकार्येष्वशुभेषुचैवकार्योद्यतानांशुभदः सदैव
६ एतानिदृष्ट्वाशुभदर्शनानिकुर्वीतहृष्टः पथिदक्षिणेन सकृद्विलोक्यत्यऽशुभावहानि त्यक्तानिवामेन
शुभाभवंति ७ गांधारषड्जावृषभस्तथान्यस्त्वरेषु
गंभीरमनोहराये वादित्रवेदध्वनिनृत्यगीतमित्या
दिशस्तंकिलयन्नरोद्रम् ८

॥ टीका ॥

मद्यं ५ वनस्पतिरिति वनस्पतिः प्रसिद्धा नूतनशाकंफलविशेषः एवंपूर्वोक्त प्रकारेणमांगल्यपंचाशदिति मांगल्यस्य मंगलभूतस्यवस्तुनः इयंपंचाशत् प्रसिद्धालोकेप्रसिद्धिंप्राप्तेत्यर्थः कार्योद्यतानांपुंसांशुभेषुकार्येषुतथाअशुभेषुकार्येषु सदैवसर्वकालंशुभदा ६ एतानीति एतानिपूर्वोक्तानिशुभदर्शनानिशुभंदर्शनंयेषांतानितथादृष्ट्वाहृष्टः प्रमुदितः पुरुषइतिशेषः पथिमार्गेदक्षिणेनकुर्यादशुभावहानिसकृदेकवारंविलोक्यवामेनत्यक्तानिशुभाभवंति ७ गांधारइति तंत्रीकंठोत्थितेषु सप्तसुस्वरेषुगांधारस्तृतीयः

॥ भाषा ॥

चमर ४१ रत्न ४२ सुवर्ण ४३ चांदी ४४ तामो ४५ बंधेहुयेपशूनकोसमूह वा एकपशु पामजाको एक बंधो होय ४६ फलजामेंपकगयेहोंय एसी औषधी ४७ मदिरा ४८ ॥५॥ वनस्पतिरिति ॥ वनस्पतिवृक्ष ४९ नवीनशाकफल ५० ये पंचाशमंगल वस्तु लोकमें प्रसिद्ध हैं कार्यमें उद्युक्त होय रहे जिनपुरुषनकूं शुभकार्यनमें तेंसेंही अशुभकार्यनमें ये सर्वकालमें शुभके देवेवारे हैं ॥६॥ एतानीति॥ शुभ हैं दर्शन जिनके एसे येक है जेपदार्थ तिनें मार्गमें देखकरकें प्रसन्न होयकें इनकूं जेमने भागमें लेकें गमन करै और जो अशुभपदार्थ हैं उनें एकपोत देखकरके उनें वाम भागमें त्याग करकें गमन करै फिर देखे नहीं तो शुभके देवेवारे होंय ॥७॥ गांधारइति ॥ सातों स्वरनमें तीसरोस्वर गांधार और प्रथमस्वर षड्ज-

आदायरिक्तंकलशंजलार्थीयदिव्रजेत्कोपिसहाध्वगेन
पूर्णंसमादायनिवर्त्ततेसौ यथाकृतार्थः पथिकस्तथैव ९
अंगारभस्मेंधनरज्जुपंकंपिण्याककर्पासतुषास्थिकेशाः
कृष्णायसावल्कलकृष्णाधान्यपाषाणविष्टाभुजगौषधानि १०

॥ टीका ॥

स्वरः षड्जः प्रथमः ऋषभः द्वितीयःस्वरः तथान्येषु एतद्व्यतिरिक्तेषु स्वरेषु ये मनोरमाः मनोरंजकाःवादित्रं तूर्यं वेदध्वनिः वेदोच्चारः गीतंगानं नृत्यंनर्त्तनमित्यादि एतत् प्रभृतियन्नरौद्रं नभयजनकं तत्शस्तंमन्तव्यमित्यर्थः ८ आदायेति यदिकोपिजलार्थीरिक्तंकलशमादाय अध्वगेन सह व्रजेत् गच्छेत् यथापूर्णंकलशंसमादाय असौजलार्थी निवर्त्तते तथापथिकः कृतार्थः कृतकार्यः स्वगृहमभ्येतीत्यर्थः ९ अथपुरतो यानियानिनशुभानितानितान्याह अंगारेति अंगारः दग्धकाष्ठांशः भस्मरक्षाइंधनं अन्नपाकार्थंकाष्ठ रज्जुः प्रसिद्धा पंकः कर्द्दमः पिण्याकः पीडयमानतिलांशशेषः कर्पासः प्रसिद्धः तुषःधान्यत्वक् अस्थिप्रसिद्धं केशाः अलकाः कृष्णंवस्तु अयोलोहं वल्कलंवृक्षत्वक् कृष्णाधान्यंमाषादिपाषाणः प्रस्तरः विष्टामलः भुजंगःसर्पः औषधंप्रतीतं सर्वेषामेवे-

॥ भाषा ॥

और द्वितीय स्वर ऋषभ और इनतें न्यारे स्वर हें तिनमें जेमनकूं प्रसन्न करवेवारे होंय ते और वीजे वेदध्वनि गीतनृत्य इनकूं आदिले जो भयकूं प्रगट न करे ते शुभ जाननो ॥ ८॥ आदायेति ॥ जो कोई जलको अर्थी खाली कलश लेकें वाममार्गीके संगगमन करे फिर जल कलशमें भरके पीछो आवे तो गमन करवे वारो पथि कवी कृतार्थ होयकें अपने घर आवे ॥ ९॥ अंगारेति॥ विनाधूमको अंगार १ राख २ इंधन लकडीऊपला ३ रज्जूमूंड ४ कीच ५ तिलकुटा ६ कर्पास ७ तुष ८ अस्थि ९

तैलंगुडश्चर्मवसाविभिन्नंरिक्तंच भांडंलवणंतृणं
च तक्रार्गलाशृंखलवृष्टिवाताः कार्येक्वचिन्त्रिंश
दियंनशस्ता ११ स्वपादजान्वोस्खलनंदशा-
नांसंगःक्वचिद्घातपलायनंच द्वाराभिघातध्वज
वस्त्रपाताः प्रस्थानविघ्नंकथयंतियातुः १२

॥ टीका ॥

तरेतरद्वंद्वः १० तैलमिति तैलंप्रसिद्धं गुडः इक्षुविकृतिः चर्मत्वक् वाऽजिनं वसा स्नायुविशेषः वा मांसरसः विभिन्नं भग्नंरिक्तं वा भांडं भाजनं लवणं समुद्रादिप्रभवं तृणं शुष्कघासेकदेशःतक्रं प्रसिद्धं अर्गला काष्ठविशेषः शृंखलः लोहमयः प्रतीतः वृष्टिः वर्षा वातः वायुविशेषः इयंत्रिंशत् क्वचित्कार्येषुनशस्ता सर्वत्र अशोभनेत्यर्थः क्वचिद्वृष्टिघाताइत्यपिपाठः ११ स्वपादेति स्वपादंजान्वोः स्खलनंतथा दशानां वस्त्रप्रांतानांसंगः क्वचिद्विलगनंघातेनयुक्तं पलायनद्वाराभिघातः गच्छतः द्वारस्थकाष्ठादिनाघातः ध्वजवस्त्रपाताः ध्वजवस्त्रयोः पातः पतनं नूनंनिश्चितं एतेपूर्वोक्ताः प्रस्थानविघ्नं प्रस्थानेचलनेविघ्नमंतरायंकथयंति प्रतिपादयंति स्वपादपानस्खलनमित्यपिपाठः १२

॥ भाषा ॥

खुले हुये केश १० काली वस्तु ११ लोह १२ वल्कल १३ वृक्षकी त्वचा छाल १४ काले तिल उडदादि १५ पाषाण १६ विष्टा १७ सर्प्प १८ औषध १९ ॥१०॥ तैलमिति ॥ तैल २० गुड २१ चाम त्वचा मज्जा २२ खाली वा फूटो पात्र २३ लवण२४ तृणसूकी घास २५ छाछ २६ काष्ठ२७ लोहेकी सांकल २८ वर्षा २९ वायु ३० ये तीस वस्तु सब कार्यनमें शुभ नहीं हें सदा अशुभ हैं ॥११॥ स्वपादेति ॥ अपनो पाम जानू इनको स्खलन होनो और वस्त्रके पल्लेनको संग कहा लग जाय काऊमें इलझ जाय और कोई भाजो जातो होय या जलदी ही जातो होय वा के-

मार्जारयुद्धारवदर्शनानिकलिः कुटुंबस्यपरस्परेण
चित्तस्यकालुष्यकरंचसर्वंगंतुः प्रयाणप्रतिषेधना
य १३ दृष्टेशवेरोदनशब्दहीनेमहार्थसिद्धिःकथितोद्यमेषु
गृहप्रवेशेतुशवः शवत्वंरुजंसुदीर्घामथ
वाददाति १४ गंडूषमावर्तयतांनराणामंतर्जलंचे
त्प्रविशत्यकस्मात् भवेत्तदाभीप्सितभोज्यला
भोयः कौतुकीतेननिरूप्यमेतत् १५

॥ टीका ॥

मार्जारेति मार्जारयुद्धारवदर्शनानीति मार्जारयोर्युद्धमारवः शब्दः दर्शनं
विलोकनं तानि तथा कुटुंबस्यपरस्परेण कलिः क्लेशः यदन्यच्चित्तस्यमन
सः कालुष्यकरंतत्सर्वंगंतुः प्रयाणप्रतिषेधनाय भवतीतितात्पर्यार्थः १३
दृष्टइति रोदनशब्दहीने शवे दृष्टे सति उद्यमेषु महार्थसिद्धिः कथिता बुधै
रितिशेषः प्रवेशेतु शवः शवत्वमथवा सुदीर्घांरुजंददाति १४ गंडूषमिति
गंडूषमावर्तयतांनराणां चेदकस्मादंतर्जलं प्रविशति तदा अ-

॥ भाषा ॥

हाथको प्रहार लगजाय वा पामकी ठोकर लगजाय अथवा वस्त्र कोई फटकार लग जाय
और ध्वजापताकाको पतन होनो और वस्त्रको पतन होनो और चलती समयमें द्वारमें
कोई काष्ठादिक करकें घात होनो ये सब निश्चयही चलती समयमें होंयतो विघ्नकहें हें ॥
॥१२॥ मार्जारेति ॥ मांर्जार जे बिलाव तिनको युद्ध और इनको दर्शन और कुटुंब
को परस्पर कलह होनो औरबीजोमन कुंमलिनताके करवेवालेहेंये सब गमन करवेवाले
पुरुषकूं प्रयाणके निषेधके लियें जाननो ॥१३॥ दृष्टइति ॥ संगमें कोई रोतो
न होय एसो शव कहा मरो मुरदा दीखे तो सर्व उद्यमनमें महान् अर्थसिद्धि विवेकीननें
कहीहे और गृहप्रवेश समयमें तो शव दीखे तो मृत्यु अथवा दीर्घ रोग देवे ॥
॥१४॥ गंडूषमिति ॥ गंडूष जो कुरला कर रह्यो होय मनुष्य ताके अकस्मात् भी-

उज्झितंझटितिदंतधावनंसंमुखंपततियत्रवासरे
भोजनंभवतितत्रवांछितंव्यासभाषितमिदंहिनानृतं १६
इतिश्रीवसंतराजशाकुनेशुभाशुभ० ५ वर्गः

अथाभिदध्मोद्विपदेषुतावत्प्रधानभावाच्छकुनंन
राणां नैमित्तिकोयत्परिभाव्य भाव्यंफलंशस्ता
शोभनयोर्ब्रवीति १

॥ टीका ॥

ईप्सितभोज्यलाभः स्यात् यः कौतुकीस्यात् तेनैतत् निरीक्ष्यं विलोकनीयं १५ उज्झितमिति उज्झितं त्यक्तं दंतधावनंयत्रवासरे झटिति शीघ्रं संमुखंपतनमिति तत्रवासरे वांछितंभोजनंभवति हियस्मादिदंव्यासभाषितं नानृतं सत्यमित्यर्थः १६ वसंतराजइति मया शुभाऽशुभे विचारितेकस्मिन्वसन्तराजशाकुनेग्रंथे अन्यानिविशेषणानि पूर्ववद्व्याख्येयानि इतिशत्रुंजयकरमोचनादिसुकृतकारिभिर्महोपाध्याय श्रीभानुचंद्रगणिभिर्विरचितायां वसंतराजटीकायांपंचमोवर्गः ५ अथाभिदध्मइति द्विपदेषु तावत्प्रधानभावात् प्राधान्येन नराणांशाकुनं वयमभिदध्मः नैमित्तिकशाकुनिकोयत्सम्यक्परिभाव्यसम्यक्ज्ञात्वा शस्ताऽशोभनयोः शाकुनयोः फलंब्रवीति १

॥ भाषा ॥

नर जलप्रवेश करजायं तो वांछित भोजन पदार्थ लाभ होय जो कै नमानें उनकूं याप्रकार देखलेनो योग्य है ॥१५॥ उज्झितमिति ॥ जादिना दांतुन करनेमें दातुन हातमें सूं छूटके सन्मुख जायपडे तादिना बांछित भोजन होंय निश्चय ये व्यासजीको वचन है झूंटो नहीं है सत्य है ॥१६॥ इतिश्रीवसंतराजशाकुनभाषाटीकायां शुभाशुभप्रकरणंनाम पंचमोवर्गः ॥५॥ अथाभिदध्मइति ॥ पंचमवर्गके कहे पीछें अब छटे वर्गमें दोयपामनके द्विपदजीवनमें मनुष्य मुख्य है सो प्रथम मनुष्यनको शाकुन कहे

नरोभिरूपः सितवस्त्रमाल्योवाचंप्रशस्तांमधुरां
चजल्पन् एवंविधायोषिदपिप्रयाणेप्रवेशकाले
चकरोतिसिद्धिम् २ वमन्विकेशाहतमानगर्वा
छिन्नांगनग्नांत्यजतैलदिग्धाः रजस्वलागर्भवती
रुगार्तामलान्वितोन्मत्तजटाधराश्च ३

॥ टीका ॥

नरइति एवंविधोनरः प्रयाणेगमनेप्रवेशकालेच सिद्धिंकरोति कीदृग् अभिरूपः योग्यरूपः सितवस्त्रमाल्यइति सितेवस्त्रमाल्येयस्यसतथा किंकुर्वन् प्रशस्तांशोभनांमधुरांच वाचंजल्पन् एवंविधा योषिदपि तथाविधफलकर्त्रीत्यर्थः २ वमन्निति एतेसर्वसमीहितेषुसकलवांछितार्थेषुदुःखावहाः तानेवप्रतिपादयन्नाह वमन्विकेशाहतमानगर्वाइति वमंतउद्गिरन्तः विकेशाः गतकेशाः हतौमानगर्वौयेषांते तथा पश्चात्कर्मधारयः छिन्नांगनग्नांत्यजतैलदिग्धाइति छिन्नमंगंयेषांते तथा नग्नाः वस्त्ररहिताः अंत्यजाः शूद्रास्तैलदिग्धास्तैलस्विन्नाः पश्चादितरेतरद्वंद्वः रजस्वलाइति स्त्रीधर्ममुपागता गर्भवतीतिगर्भयुक्ता रुगार्ताइतिरोगयुक्ता मलान्वितोन्मत्तजटाधराश्चेति मलेन अन्विताः सहिताः उन्मत्ता मद्यपानादिनाक्षीबाजटाधारिणः अत्रकर्मधारयः द्वंद्वोवा ३

॥ भाषा ॥

हें मनुष्यनको निमित्त करकें शुभ अशुभनको फल कहे हें ॥१॥ नरइति ॥ सुंदररूपवान् होय श्वेतवस्त्र श्वेतमाला धारण करें होय सुंदरवाणी बोलतो होय एसो मनुष्य सन्मुख वा दक्षिण आतो होय तो गमनमें और प्रवेशमें सिद्धि करेहे अथवास्त्री वी एसी दीखे तो पुरुषको सो फल करे ॥२॥ वमन्निति ॥ सर्व कार्यनमें दुःखके देवेवारे तिनें कहें हें वमनकरतो होय केशविनामूंड मुडाये हुयो होय काऊ करकें मानगर्व जाके दूर हुये होंय एसो होय अंगजिनके छिन्न होंय नग्न होंय शूद्र होय तेल

दीनद्विषत्कृष्णविमुक्तकेशाः क्रमेलकस्थाः खरसैरिभस्थाः संन्यासिकः क्रंदनपुंसकाद्यादुःखावहाः सर्वसमीहितेषु ४ युग्मं पृथ्वीपतिर्ब्राह्मणहर्षयुक्तो वेश्याकुमारीसुहृदः सुवेषाः नार्योनराश्चाश्ववृषाधिरूढाः शुभायदृष्टाः सकलोद्यमेषु ५

॥ टीका ॥

दीनद्विषदिति दीनाः दीनवदनाः द्विषंतः कलहंकुर्वन्तः कृष्णाः कृष्णवर्णाः विमुक्तकेशाइति विमुक्ताः केशाः यैस्ते तथा असंयमितकेशाइत्यर्थः क्रमेलकस्थाइति उष्ट्राधिरूढाः खरसैरिभस्थाइति खरोगर्दभः सैरिभोमहिषस्तत्रस्थाः संन्यासिसाक्रंदनपुंसकाद्याइति संन्यासिनः कुटीचराः आक्रंदेन रोदनाधिक्येनसहिताः साक्रंदाः नपुंसकाद्याः नपुंसकप्रभृतयः पश्चाद्द्वंद्वः ४ युग्मं पृथ्वीपतिरिति सकलोद्यमेषुसर्वकार्येषु एतेदृष्टाः शुभाय भवंति तानेवाह पृथ्वीपतिरिति पृथ्वीपति नृपतिः ब्राह्मणोविप्रः कीदृग्हर्षयुक्तः प्रमोदभाक् वेश्यावारांगना कुमारी अपरिणीतास्त्री सुहृदः सज्जनाः सुवेषाः शुभनेपथ्यधारिण्यो

॥ भाषा ॥

करकें लिप्त जाको अंग होय रजस्वला स्त्री होय गर्भणी होय रोगार्त्त होय मलयुक्त होय मद्यपानादिक करकें उन्मत्त होय जटाधारी होय ॥ ३ ॥ दीनद्विषदिति ॥ दीनजाको मुख होय कलह कररहे होंय कृष्णवर्ण जिनके होंय खुले केश जिनके होंय ऊंटकें बेठो होय खरपे बेगो होय महिषपे बेठो होय संन्यासी होय अधिक रोवतो होय नपुंसक होय अर्थात् हीं जडागत राडे नाचवे वारे ये सब नपुंसकही हें येसब संपूर्ण कार्यनके बीचमें दुःखके देवेवारे हें ॥ ४ ॥ युग्मं ॥ पृथ्वीपतिरिति ॥ राजा होय हर्षयुक्त ब्राह्मण होय वेश्या होय कुमारी कन्या होय सज्जनपुरुष होय

कृष्णांबराकृष्णाविलेपनाढ्याकृष्णांस्रजंमूर्द्धनि धारयंती दृष्टासकोपायदिकृष्णवर्णानारीनरैस्तद्विपदोभवंति ६ श्वेतांबराश्वेतविलेपनाढ्यामाल्यंसितंमूर्द्धनिधारयंती ॥

॥ टीका ॥

नार्यः स्त्रियः नराश्च अश्ववृषाधिरूढाः अश्वोवाहः वृषोधवलः तयोरधिरूढाः स्थिताः नराइत्यर्थः तदुक्तमन्यत्र कन्यागोपूर्णकुंभंदधिमधुकुसुमंपावकंदीप्यमानंयानंवागोयुक्तं करिनृपतिरथंशंखवीणाध्वनिंवा नुक्षिमाचैवभूमिर्जलचरमिथुनंसिद्धमन्नंधृतंवा वेश्यास्त्रीमद्यमांसंहितमपिवचनंमंगलंभास्थितानामिति ५ कृष्णांबरेति नरैर्मानवैः एवंविधानारीयदि संमुखमभ्येति वा आगच्छंती दृष्टाविलोकिताभवति तदाविपदोभवंति कीदृशीकृष्णांबराकृष्णं अंबरंवस्त्रंयस्याः सा तथा कृष्णविलेपनाढ्या इति कृष्णंविलेपनंतेन आढ्यादिग्धा किंकुर्वन्ती कृष्णांस्रजंमूर्द्धनिधारयंती कृष्णाइति अशुभाचरणैः कृष्णाऽशुचिरित्यर्थः सकोपाइति कोपयुक्ताकृष्णवर्णाइति स्वाभाविककृष्णशरीरवर्णेत्यर्थः एवंविधैःनरैश्चताः विपदोभवंतीत्यर्थः ६ श्वेतांबराइति नरैः पुरुषैः एवंविधानारीदृष्टावि-

॥ भाषा ॥

सुंदर जिनके वेष ऐसे स्त्री पुरुष होंय घोडापे बैठे होंय बैलपे बैठे होय ये दोनों श्लोकमें जे कहेहैं ते सब संपूर्ण कार्यनमें ये दीखजांय तो शुभ करवेवारे हैं ॥५॥ कृष्णांबरेति ॥ काले वस्त्र पहरें होय काले विलेपनजाके लग रहे होंय कालीमाला मस्तकमें धारण करे होय कोपसहित होय जो कृष्णवर्णकी जाको होय ऐसीस्त्री जो सन्मुख आवे तो दीखजाय तो मनुष्यनकूं विपदकष्ट निश्चय होय ऐसो पुरुषवी सन्मुख आतो दीखजाय तोवी कष्टहोय ॥६॥ श्वेतांबराइति ॥ श्वेतवस्त्रधारण करें होंय श्वेतही विलेपन करें होय प्रसन्नयुक्त होय श्वेतमाला मस्तकपे धारण

हृष्टाप्रकृष्टायदिगौरवर्णानारीनरैःस्यात्तदभीष्टसिद्धिः ७ धृतातपत्रःशुचिशुक्लवासाःपुष्पार्चितश्चंदनचर्चितांगः निश्रावयुक्तःकृतभोजनोवाविप्रः पठन्यच्छतिसर्वसिद्धिम् ८ अभ्युपगच्छति यस्ययियासोः स्त्रीपुरुषोऽथवाफलहस्तः

॥ टीका ॥

लोकिना संमुखमायांतीतिशेषः तदा अभीष्टसिद्धिःस्यात् कीदृशीश्वेतांबराश्वेतवस्त्रपरिधानाश्वेतविलेपनाढ्यादिपूर्ववत् प्रहृष्टेति हर्षोपेता एवंविधैर्नरैश्चाऽभीष्टसिद्धिःस्यादित्यर्थः ७ धृतातपत्रइति एवंविधो विप्रः सर्वसिद्धिं यच्छति कीदृग्धृतातपत्र इति धृतं आतपत्रं छत्रंयेन सतथा पुनःकीदृग्शुचिः पवित्रः पुनःकीदृक् शुक्लवासाः श्वेतवस्त्रधारी पुनः कीदृक् पुष्पार्चित्तइति पुष्पादिभिरलंकृतः पुनःकीदृक् चंदनचर्चितांग इति चंदनेनचर्चितं अंगंयस्य सतथा पुनः किंविशिष्टः निश्रावयुक्तइति निश्रावः भोजनार्थं तत्परिमितमात्रमन्नप्रदानं तेनयुक्तः सहितः वाऽथवा कृतभोजनइति कृतं भोजनंयेनसतथा किंकुर्वन्पठन् ८ अभ्युपगच्छतीति यस्ययियासोः गन्तुकामस्य पुरुषस्य स्त्रीपुरुषः स्त्रिया-

॥ भाषा ॥

करे गौर वर्ण जाको होय एसी स्त्री दीखे ओर सन्मुख आती होय तो मनुष्यनकूं अभीष्टसिद्धि होय ओ ॥७॥ धृतातपत्रइति ॥ छत्र धारण करे होय पवित्र होय श्वेतवस्त्र धारण करे होय पुष्प करकें अलंकृत होय चंदन करकें चर्चित अंग जाको भोजनके अर्थ परीमात्र अन्नके दान करकें युक्त होय भोजन जाने कियो होय ओर पाठ करतो होय एसो ब्राह्मण होयतो सर्वसिद्धी देवे हे ॥८॥ अभ्युपगच्छतीति ॥ गमन करो चांहे ता पुरुषके स्त्रीसहित पुरुष सन्मुख आवे अथवा फल हाथमें लियें होय केवल पुरुष होय वा स्त्री केवल होय तो वा पुरुषकूं शीघ्रही

सर्वसमीहितासिद्धिरवश्यंतस्यनरस्यभवत्याचिरेण
९ इतिवसंतराजशाकुनेनरेंगितेआलोकनप्रकर
णम्प्रथमं १ अभीष्टदुष्टार्थफलंनराणामुक्तं
समालोकनमत्रसम्यक् आलोकयामोऽथसुनि-
श्चितार्थामुपश्रुतिंकार्यविनिश्चयाय १०

॥ टीका ॥

युक्तः पुरुषः स्त्रीपुरुषः अभ्युपगच्छति सन्मुखमायाति अथवा फलहस्तः केवलः पुमान्स्त्री वा संमुखं आयाति तस्यनरस्य आचिरेणसर्वसमीहितासिद्धिः सकलवांच्छितनिष्पत्तिरवश्यंभवति ग्रंथांतरेतु तपस्विनामादौ दर्शनंगच्छतांमहत्फलप्रदंभवति यदुक्तं श्वपास्तुरगोराजामयूरः कुंजरोवृषः प्रस्थानेवाप्रवेशेवासर्वेसिद्धिकरामताः १ पद्मिनीराजहंसाश्चनिर्ग्रंथाश्चतपोधनाः यंदेशमुपसर्पंतितस्मिन्देशेसुभंभवेत् २ यदुक्तमर्जुनंप्रतिपुरुषोत्तमेनपुराणादौ आरोहस्वरथंपार्थगांडीवंचकरेकुरु निर्जितांमेदिनींमन्ये निर्ग्रंथोयदि संमुखइति अत्रपूर्वमेव संन्यासिनाममंगलत्वेनप्रतिपादनात् निर्ग्रंथशब्देनजैनमतानुसारिणो मुमुक्षवोगृह्यंते ९ वसंतराजेति अस्मिन्वसंतराजाख्येशाकुनशास्त्रे नरेंगिते आलोकनं प्रथमंप्रकरणं व्याख्यातं ॥१॥ अभीष्टेति. अभीष्टःमनोहारीदुष्टस्तद्विपरीतः अर्थः प्रयोजनंयस्यैतादृशं फलंनराणामुक्तंप्रतिपादितं अत्र ग्रंथे सम्यक् तदालोकनफलंच अधुनाकार्यविनिश्चयाय-उपश्रुतिंलोके असोई इतिप्रसिद्धां आलोचयामः कथयाम इत्यर्थः देव-

॥ भाषा ॥

सर्ववांछितफल सिद्धी अवश्य होय ॥९॥ इतिश्रीवसंतराजशाकुने नरेंगिते आलोकनंनाम प्रथमंप्रकरणंव्याख्यातं ॥१॥ अभीष्टेति ॥ मनुष्यनके वांछितफल और विपरीत फल आलोकनफल कहे अब कार्यके निश्चय करवेके लियें लोकमें असो-

गच्छेतिपृष्ठेपुरतस्तथैहिवागीदृशीकेनचिदुच्यमा
ना सर्वाशिषस्स्यातिशयेनताभ्यश्चित्तस्यतुष्टिर्वि
जयायपुंसां ११ सिद्ध्यैविरावाजहिछिंधिभिंधि
चेत्यादयःशत्रुवधोद्यतानां क्वयासिमागच्छत
थैवमाद्याःप्रयोजनारंभनिवारणार्थाः १२

॥ टीका ॥

प्रश्नउपश्रुतिरितिहैमः कीदृशींसुनिश्चितार्थामिति सुनिश्चितोनिर्णीतः अर्थोयस्याः सातथातां १० गच्छेति पृष्ठेपृष्ठभागेगच्छइतिपुरतःअग्रभागेएहि आगच्छ ईदृशीवाग्केनचिदुच्यमानाकथ्यमानापुंसांपुरुषाणां चित्तस्यमनसः तुष्ट्यर्थं जयायेति तुष्टिरेव अर्थः प्रयोजनंयस्यतादृशोयोजयः तस्मै अन्यथा चतुर्थीद्विवचनंस्यात् तथा अतिशयेन तेभ्योनरेभ्यः सर्वाशिषः सर्वाश्चता आशीर्वचनानि तुष्ट्यर्थंजयायस्युरित्यर्थः तत्रतुष्टिर्हर्षः अर्थोधनंजयः शत्रुपराभवः ११ सिद्ध्यायितिशत्रुवधोद्यतानांपुंसां जहिछिंधिभिंधिचेत्यादयोविरावाःसिद्ध्यै स्युः तथा क्वयासिमागच्छएवमाद्याः विरावाः प्रयोजनारंभनिवारणार्थाइति प्रयोजनंकार्यंतस्य आरंभः प्रारंभः तस्यनिवारणंनिषेधः तदेवअर्थःप्रयोज

॥ भाषा ॥

ई या नाम करकें प्रसिद्ध एसी उपश्रुति कहेंहैं ॥१०॥ गच्छेति ॥ गमनकर्त्ता पुरुषके पीठ पीछें गच्छ नाम गमन करो एसी वाणी कहीजाय ओरवाके अगाडी एही नाम आओ एसी वाणी काऊ पुरुष करकें कहवेमें आवे तो वा पुरुषकूं संपूर्ण आशिष मनकी तुष्टीके अर्थ जयके अर्थ होंय हें ॥११॥ सिद्ध्यैइति ॥ कार्यमें उद्युक्त होय रहे हें उनकूं मार्गमें कोई शत्रूके वधमें उद्युक्त होय रहेहोंय उनके जही नाम मारोमारो या छिंधि छेदन करो छेदन करो या भिंधी भेदन करो भेदनकरो एसे शब्द होंय तो कार्यसिद्धीके अर्थ जाननो ओर क्वयासि नाम

स्थैर्यंस्थिरार्थाद्गमनंतदर्थात्कार्यान्निवृत्तिंविनिवर्त
नार्थात् लाभंजयंभंगममंगलंवाऽबुध्येततत्तत्
प्रतिपादकार्थात् १३ लोकेप्रसुप्तेविजनेचमार्गेति
स्रस्तरुण्यः सहिताः कुमार्या स्रक्दीपनैवेद्यवि
लेपनाद्यैर्गणाधिनाथंविधिनार्चयेयुः १४

॥ टीका ॥

नं येषांते तथा १२ स्थैर्यमिति स्थिरार्थाद्वाक्यात्स्थैर्यंभवति तदर्थादिति गमनार्थाद्वाक्याद्गमनं भवति विनिवर्तनार्थाद्वाक्यान्निवृत्तिर्भवति एवंलाभंजयंभद्रम मंगलंचतत्तत्प्रतिपादनार्थात् अबुध्येत तत्तदुपश्रुति वाक्यार्थविचारणादित्यर्थः १३ प्रकारांतरेणाह लोकेप्रसुप्तइति - तिस्रस्तरुण्यः गणाधिनाथंगणेशं विधिना अर्चयेयुः कीदृश्यः तरुण्यः कुमार्या कन्यया सहिताः युक्ताः कस्मिन्सति लोके प्रसुप्तेसति निद्रांगतेसति चपुनः कस्मिन्सति विजने लोकप्रचाररहिते मार्गेसति कैरर्चयेयुरित्याह स्रग्दीपनैवेद्यविलेपनाद्यैरिति पूर्वंव्याख्यातं १४

॥ भाषा ॥

कहां जाय है मागच्छ मत जाय इनकूं आदिले एसे शब्द होंय तो कार्यके प्रारंभकी निवृत्तीके लिये जाननो ॥१२॥ स्थैर्यमिति ॥ उपश्रुतीके विचारमें स्थिर अर्थसूं स्थिरभाव जाननो और गमन अर्थसूं गमन जाननो और निवर्तन अर्थसूं कार्यकी निवृत्ति जाननो जेसो उपश्रुतीके विचारतें अर्थ होय तेसो तेसो या प्रकार लाभ जय मंगल जाननो ॥१३॥ अब और प्रकार करकें कहें हें ॥ लोकेप्रसुप्तइति ॥ सर्व जन सोय जांय मार्गमेंबी मनुष्य गमन करने न होंय तब तीन स्त्री कुमारी कन्यानकरकें सहित विधिपूर्वक चंदन पुष्प धूप दीप नैवेद्यादिक करकें गणेशजीको पूजन करे ॥१४॥ ॥७॥ ॥७॥

ततोऽन्नमानंकुडवादिकंयत्तदक्षतैस्ताःपरिपूरयेयुः
ॐचंडिकायैनमइत्यनेनमंत्रेणसंमंत्र्यचसप्तवारान्१५
संमार्जनीकांडकृतावबेष्टेविनायकंतत्रनिवेशयेयुः
ततोव्रजेयुर्गणनायकंतंस्त्रियोगृहीत्वारजकालयांतं१६
अग्रेचतस्याक्षतमुष्टिमात्रंपरिक्षिपेयुःशुचिभूमिभागे

॥ टीका ॥

ततोन्नमानमिति ततः तदनंतरं अन्नमानंयत् कुडवादिकं वर्तते तत्र कुडवः चत्वारिंशत् टंकप्रमाणः आदिशब्दात प्रस्थादिपरिग्रहस्तन्मानं ताः स्त्रियः अक्षतैः पूरयेयुः किंकृत्वा ॐ चंडिकायैनमः इत्यनेनमंत्रेणासप्तवारं संमंत्र्य अक्षतानितिशेषः १५ संमार्जनीति तत्रकुडवेविनायकं निवेशयेयुः कीदृशेतस्मिन् संमार्जनीकांडकृतावबेष्टइति सन्मार्जनीकांडेनतृणेनकृत अववेष्टः आवेष्टनं यस्यसतथा ततः तत्करणानंतरं तंविनायकं गृहीत्वा स्त्रियोयोषितः रजकाऽऽलयांतं व्रजेयुः अत्रांत शब्दः समीपवाची १६ अग्रेचेति शुचिभूमिभागे पवित्रभूप्रदेशे तस्यगणेशस्य अग्रे अक्षतमुष्टिमात्रंपरिक्षिपेयुः स्त्रियइतिशेषः ततः प्रयोजनं कार्यं भाविमनसि विभाव्यविचिंत्य तद्रजकोदितानि रजक भाषितानि तूष्णीं यथास्यात् तथा आकर्णयेरन् श्रुतिगोचरी

॥ भाषा ॥

ततोन्नमानमिति ॥ पूजन करै पीछें चालीस टंक अथवा प्रस्थमात्र प्रमाणको कूंडो लेकर पीछें ओं चंडिकायैनमः या मंत्रकरके सातवेर अक्षतनकूं अभिमंत्रनकरकें उन अक्षतनकरकें वे स्त्री कूंडेकूंभर लेवें ॥१५॥ संमार्जनीति ॥ वाकूंडेमें गणेशजीकूं वे ठाय देवे वा कूंडेकूं बुहारीसू तृणसूं आवेष्टन कर फिर गणेशजीकूं लेकरकें वे स्त्री रजकके घरके समीप जांय ॥१६॥ अग्रेचेति ॥ रजकके घरके अगाडी पवित्र सुंदर पृथ्वीमें गणेशजीके आगें स्त्री एक मुठी चांवल

वदंतिवामंरुदितंप्रशस्तमदृश्यदेहोयदिरोदितःस्यात्
निंदंत्यवामंपाथिसर्वकामान्श्रुतंविधत्तेरुदितंरजन्यां २४
मृत्युःसुतानांरुदितेनपृष्ठेलाभोभवेत्तस्यनिवर्तनेन
मृत्युस्तथाग्रेरुदितेनगंतुःसिद्धिंविधत्तेरुदितंरिपूणां २५

॥ टीका ॥

इहास्मिन् लोके जनानांसुबोधंशाकुनंउपश्रुतेरन्यत्सत्यंकिंचिन्नास्ति २३ केचित्त्वर्कदिने व्यवसायिनांगृहे सोमे भट्टानां गृहे भूसुते राजपुत्राणांगृहे बुधे वणिजांगृहे गुरौविप्रसदने शुक्रे म्लेच्छगृहे शनौशूद्राणांसदने गत्वोपश्रुतिर्विलोक्येत्याहुः वदंतीति वामंरुदितं प्रशस्तंवदंति यदि रोदितारुदनकर्त्ता अदृष्टदेहः स्याज्जंतुः दृग्गोचरोनभवेदित्यर्थः अवामं दक्षिणंरुदितंनिंदंति पाथि रजन्यांश्रुतंरुदितंसर्वकामान्विधत्ते २४ मृत्युरिति सुतानांपृष्ठेरुदितेनमृत्युः स्यात् तत्रनिवर्त्तनेन लाभोभवेत् तथाऽग्रे रुदितेन मृत्युः स्यात् रिपूणांवैरिणां रुदितं सिद्धिं विधत्ते २५

॥ भाषा ॥

वचन युगांतरमें वी असत्य नहीं होय यालोकमें जननकूं सुबोधपूर्वक शाकुन उपश्रुतीतें अन्यत् कहिये और सत्य कछूवी नहीं है ॥२३॥ रविदिनमें चांडालगृहे चंद्रवारकूं नाऊके घर मंगलवारकूं धोवीके घर बुधवारकूं वैश्यके घर गुरुवारकूं ब्राह्मणके घर शुक्रवारकूं म्लेच्छके घर शनिवारकूं शूद्रनके घर वा दासीके घर इनमें जायकें उपश्रुतीशाकुन देखनो यामें विशेष जाननो होय तब बृहज्ज्योतिषार्णवके प्रश्नस्कंधमें देखलेनो ॥२३॥ वदंतीति ॥ वामभागमें रुदन सुनें और रुदन कर्त्ताको देह तो दीखे नहीं शब्द सुनवेमें आवे तो शुभ कहनो और जो जेमने भागमें रुदन सुने तो कार्यकूं नाश करे और मार्गमें रात्रीमें रुदन श्रवण करे तो संपूर्णकाम मनोरथ प्राप्त होय ॥२४॥ मृत्युरिति ॥ पीठ पिछाडी रुदन होय तो पुत्रनकी मृत्यु होय निवर्तन हुयेनें अर्थात् पीछो वगद आवे तो लाभ होय

उग्रंभवेद्रोदनमग्रभागेभयंभवेद्वन्हिविभागभूते नैर्ऋत्यकोणेरणमार्गरोधोवायव्यकोणेरुदितंसमृद्ध्यै २६ पृष्ठाग्रयोर्दक्षिणवामयोश्चसिद्धिःसदातोरणरोदनेन शुभोप्यऽसम्यग्यदिरोदनार्थोज्ञातोविभाव्यःसपुनस्तथापि २७ इतिश्रीवसंतराजशाकुनेनरेंगितेउपश्रुतिप्रकरणम् द्वितीयम् २ अथक्षुताख्यंशकुनंक्रमेणमहाप्रभावं प्रतिपादयामः

॥ टीका ॥

उग्रमिति रोदनमग्रभागे उग्रंभवेत् किंचित् चिंताविधायकं दुष्टमित्यर्थः वन्हिविभागभूते अग्निदिग्युद्भवे रुदिते भयंस्यात् नैर्ऋत्यकोणे रुदिते रणमार्गरोधः स्यात् रणंचमार्गरोधश्चेति द्वंद्वः वायव्यकोणे रुदितंसमृद्ध्यै स्यात् २६ पृष्ठाग्रयोरिति पृष्ठाग्रयोः दक्षिणवामयोश्चेति तोरणरोदनेषु सदासिद्धिः स्यात् यदिशुभः असम्यग्वा रोदनार्थो ज्ञातः स्यात्तदासः रोदनार्थः पुनस्तथाविभाव्यः २७ इतिवसंतराजशाकुने नरेंगिते उपश्रुतिप्रकरणंद्वितीयं ॥२॥ अथेति उपश्रुतिकथनानंतरं महाप्रभावंक्षुताख्यं छि-

॥ भाषा ॥

और अगाडी रुदन होयतो गमन कर्ताकी मृत्यु होय और जो वैरीनके रुदन होय तो सिद्धी करे ॥२५॥ उग्रमिति ॥ और अग्रभागमें रोदन होय तो उग्र होय कछूक चिंताको करवेवारो होय और आग्निकोणमें रुदन होय तो भय होय और नैऋत्यकोणमें रुदन होय तो रणमार्गको रोध होय और वायव्यकोणमें रुदन होय तो समृद्धीके अर्थ होय हे ॥२६॥ पृष्ठाग्रयोरिति ॥ तोरणभागमें रुदन होतो होय सो अगाडी पिछाडी जेमनो वांयो सदा सिद्धीको देवेवालो हे और जो रुदनको अर्थ जानले शुभ हे के असुभ हे तो फिर तैसोही विचारकरलेनो योग्य हे ॥२७॥ इतिश्री वसंतराजशाकुने नरेंगिते उपश्रुतिप्रकरणं द्वितीयं ॥२॥ अथेति ॥ उपश्रुती कहे के अनंतर महान् प्रभावरूप छिक्का नाम शाकुन कहेहें

त्रस्यंतियस्माच्छकुनाःसमस्ता मृगाधिनाथादिववन्य
सत्वाः २८ सर्वस्यसर्वत्रचसर्वकालंक्षुतंनकार्येक
चिदेवशस्तं जातेक्षुतेतेननकिंचिदेवकुर्यात्क्षुतं
प्राणहरंगवांतु २९ निषिद्धमग्रेऽक्षणिदक्षिणेचध
नक्षयंदक्षिणकर्णदेशे तत्पृष्ठभागेकुरुतेऽरिवृ
द्धिंक्षुतंकृकाट्यांशुभमादधाति ३० भोगाय
वामश्रवणस्यपृष्ठेकर्णेचवामेकथितंजयाय

॥ टीका ॥

क्षुताभिधंशकुनंपरिभावयामः वयंविचारयामः यस्मात्क्षुताख्यशकुनात्सम
स्ताः शकुनास्त्रस्यंति भयंप्राप्नुवंति इव यथा मृगाधिनाथाद्वन्यसत्वाः वनो
द्भवाःप्राणिनस्त्रस्यंति २८ सर्वस्येति सर्वजनस्यसर्वत्रसर्वस्मिन्देशेसर्वका
लंसर्वस्मिन्कालेक्वचित्कार्येक्षुतंनशस्तंक्षुतेजातेसतितेनकारणेनकिंचिदेव
कार्यंनकुर्यात्तु पुनः गवांक्षुतंगोक्षुतंक्षुतंप्राणहरंभवति २९ निषेधमिति अ
ग्रेजातंक्षुतंकार्यस्यानिषेधंकुरुतेतथादक्षिणेअक्षणिनेत्रेचदक्षिणकर्णदेशेधन
क्षयंकुरुतेतत्पृष्ठभागेदक्षिणवामकर्णपृष्ठभागेअरिवृद्धिंकुरुतेकृकाट्यांपृष्ठ
भागेशुभं आदधाति ३० भोगश्चेति वामश्रवणस्यपृष्ठेतत्क्षुतंभोगाय

॥ भाषा ॥

जा छिकानें समस्त शकुन त्रासकूं प्राप्त होंय हे जेसें सिंहादिकनसूं ओर वनके जीवत्रास पामे
हें तेसें ॥२८॥ सर्वस्येति ॥ सर्वजननकूं सर्वदेशमें सर्वकालमें कोईकार्यमें छींक शुभ नहींहे
छींकहोय जब कोई कार्य नहींकरनो योग्यहे ओर गौनकी छींकतो प्राणकी हरवेवारीहे ॥२९॥
निषिद्धमिति ॥ अगाडी छींक होंय तो कार्यकूं निषेधकरे ओर दक्षिण नेत्रपे वी होय तो
निषेधजाननो ओर दक्षिणकर्णके पास छींक होय तो धनकोक्षय करे ओरदक्षिणकर्ण
के पृष्ठभागमें छींक होय तो वेरीकी वृद्धीकरे ओर कृकाटिका जो कंठको पृष्ठभाग तामें छीं
क होय तो शुभकरे ॥३०॥ भोगश्चेति ॥ वांये कर्णपे छींक होय तो जय होय वांये कर्णके

सर्वार्थलाभायचवामनेत्रेजातंक्षुतंस्यात्क्रमतोष्टधैवं ३१
क्रमान्निषेधंगमनस्यविघ्नंकलिंसमृद्धिंक्षुधमुग्ररोगम् करोतिरोगक्षयमर्थलाभंदीप्तादिदिक्षु क्षुतमुद्गतंसत् ३२
प्रागन्यपुंसःपरतोपरस्मात्पुनःपुनर्वाततएवजातं वृद्धाच्छिशोर्वाकफतोहठाद्वाजातंक्षुतंकोपिवदंत्यऽसत्वं ३३

॥ टीका ॥

भवति वामेचकर्णे जयायकथितं सर्वार्थलाभायचवामनेत्रेक्षुतंस्यात् अष्टसुदिक्क क्षुतंजातं क्रमादष्टधाएवंफलंस्यात् ३१ क्रमादिति दीप्तादिदिक्षु उद्गतंक्षुतं क्रमात् गमनस्य निषेधंकुरुते विघ्नमंतरायंकलिंक्लेशंसमृद्धिं क्षुधमुग्ररोगंरोगंस्वल्पमिति पूर्वस्माद्विशेषः क्षयमर्थलाभंचकरोतीति सर्वत्रसंबध्यते ३२ प्रागेति प्रथममन्यपुंसः ततःपरस्मात् ततोपिपरस्मात् ततएवपुंसः पुनःपुनर्वाजातंवृद्धात् छिशोर्वा कफतः हठाद्वा क्षुतंसमुद्भूतं केपिप्रेक्षावंतः असत्वं वदंति प्रभावहीनंकथयंतीत्यर्थः ३३ ॥छ॥

॥ भाषा ॥

पृष्ठभागमें होय तो भोगभोगे और वा ये नेत्रके अगाडी होय तो सर्वार्थ लाभ होय ये क्रमतें आठप्रकारकी छिक्काको फल कह्यो ॥ ३१ ॥ क्रमादिति ॥ दग्धा प्रदीप्ता धूमिता इनदिशामें छिक्का होय तो गमनको निषेध करेहै और विघ्न कलह उग्ररोग अल्परोग क्षय ये होय और शांतादिशानमें छिक्का होय तो समृद्धि क्षुधा अर्थ लाभ ये करे ॥ ३२ ॥ प्रागन्येति ॥ प्रथम अन्यपुरुषकी छींक होय ता पीछें औरनें छींको ता पीछे और छींके तातें परे और छीक होय और वा वारंवार छींके वा वृद्धकी होय अथवा बालककी होय वा कफतें होय वा कोई हठनें छींके तो कोई आचार्य इनकूं असत्व नाम प्रभाव हीन कहें हें ॥ ३३ ॥

आद्यंतयोर्नस्वपनेप्रशस्तंक्षुतंप्रशंसंतिन भोजनादौ भवेत्कथंचित्यदिभोजनांतेभवेत्तदान्याह्निभोज्यलोभः ३४ आदौक्षुतंचेच्छकुनेस्ततः किं पश्चात्क्षुतंचेच्छकुनैस्ततः किं जातानजातान्शकुनान्निहंतिक्षुतंक्षणेनात्रनसंशयोस्ति ३५ प्रयोजनेयत्रकृतेपिजातंक्षुतंक्षणात्तद्विनिहंत्यवश्यं

॥ टीका ॥

आद्यंतयोरिति स्वपनेशयने आद्यंतयोः आदावंतेच छिक्कान प्रशस्ता भोजनादौक्षुतं न प्रशंसंति कथंचिद्यदि भोजनांते क्षुतंभवेत् तदा तदन्येह्नि तिस्माद्यदन्यदहः तस्मिन् भोज्यलाभःस्यात् ३४ आदाविति आदौ प्रथमंक्षुतंचेत् शकुनैः ततः किंस्यात् पश्चात् शकुनानंतरंक्षुतंचेत् ततोपि शकुनैः किंस्यात् तथैव तेषांप्रतिषेधनात् यतः जातान्जातान् शकुनान् क्षुतं निहंति अत्रसंशयोनकार्य इत्यर्थः ३५ प्रयोजनइति कृतेपिप्रयोजने कृतकार्योद्देशेयत्रक्षुतंजातं तदाक्षणात् क्षणमात्रेण तत्कार्यमवश्यंविनिहंति कार्योत्सुकेनापिपुंसाक्षुतेजातेमनाक् प्रतीक्ष्यंविचक्षणेन तस्मात्

॥ भाषा ॥

॥ आद्यंतयोरिति ॥ सोयवेके आदिमें और सोयवेके अंतमें छिक्का शुभ नहीं हे और भोजनके आदिमें छींक शुभ नहीं और जो कदाचित् भोजनके अंतमें छींक होय तो वा के दूसरे दिन भोज्यपदार्थको लाभ होय॥ ३४॥ आदाविति॥ जो शकुनके आदिमें छींक होय फिर शकुन होय तो कुछ नहीं और शकुन हुये पीछें छींक होय तो वी शकुन करकें कुछ नहीं होय छींक होयवेसूं शकुनके फल मिटजाय हें यामें संदेह नहीं करनो योग्य हे ॥ ३५॥ प्रयोजनइति॥ कोई कार्यको उद्देश करे वा समयमें छींक होय तो कार्य नष्ट होय जाय कार्यवान् पुरुषके छींक होंय तो ठहर जाय फिरजाय और छींक हुये पे कार्यकी जलदीसूं

कार्योत्सुकेनापिमनागपीदंतस्मादपेक्ष्यंनविचक्षणेन ३६ इतिश्रीवसंतराजशाकुनेनरेंगितेक्षुतप्रकरणंतृतीयम् ३

॥ टीका ॥

कार्योत्सुक्यात् नउपेक्ष्यं नउपेक्षाविषयीकार्यमित्यर्थः ३६ मतांतरेतु पथिप्रस्थितस्य अभिमुखी छिक्कानरस्यमरणप्रदाभवति दक्षिणापि न शुभदावामापृष्ठिभागोद्भवाचशुभदा ग्रामप्रवेशेतु वामाअशुभदा दक्षिणाशुभापृष्ठोद्भवापराजयकरी संमुखालाभप्रदागृहोपविष्टस्य किंचित्कार्यंकर्तुकामस्य पुंसः दिग्विभागजनितं फलंयथा पूर्वायांध्रुवंलाभः अग्नौ हानिः दक्षिणस्यांमरणंनैर्ऋत्यामुद्वेगः पश्चिमायांसर्वसंपत्वायव्यांशुभवार्ताश्रवणंउत्तरस्यांधनलाभः स्यात् ईशान्यांश्रीर्विजयश्च तथा ब्रह्मस्थानेपिग्रंथांतरेप्येवं पूर्वेछिक्काभवेन्मृत्यु रा ग्नेय्यांशोकएवच हानिश्चदक्षिणेभागेनैर्ऋत्यांप्रियसंगमः १ पश्चिमेमिष्टमाहारंवायव्यांश्रियसंपदः उत्तरेकलहंविंद्यादीशान्यांचधनागमं २ आकाशेसर्वसंहारं पाताळेसर्वसंपदः दशक्षुतानिचैतानि आत्मक्षुतंमहद्भयं ३ नवरत्नाभरणभृतः क्षुतंतुनादृग्विधस्य लाभायस्नानांते दीक्षायां दिशि -

ई० १ हर्ष २ नाश ३ व्याधि ४ मित्रसंगम	पू० १ लाभ २ धनलाभ ३ मित्रलाभ ४ अग्निभय	आ० १ लाभ २ मित्रदर्शनं ३ शुभवाता ४ अग्निभय
उ० १ शत्रुभय २ रिपुसंग ३ लाभ ४ भोजन.	अष्टसु दिक्षप्रति प्रहरं छिक्कायाः शुभाऽशुभसूच कं यंत्रम्	१ लाभ २ मृत्युभय. द० ३ नाश ४ कलि
वा० १ स्त्रीलाभ २ लाभ ३ मित्रलाभ ४ दूरगमन	प० १ दूरगमन २ हर्ष ३ कलह ४ चौर	नै० १ लाभ २ मित्रभेट ३ शुभवार्ता ४ लाभ.

॥ भाषा ॥

चलो कहा होय है एसो नहीं करनो उचित है ॥३६॥ ॥ मतांतर कहें हें ॥ प्रयाण करवेवारे पुरुषकूं मार्गमें सन्मुख छींक होय तो मनुष्यकूं मरण देवेवाली

॥ टीका ॥

दुष्टस्थानहेतुः स्यात् ४ रोगिप्रछायांवैद्यस्याकारणायगच्छतांक्षुतंरोगिमृत्युदं भवति वैद्यस्य आगच्छतः क्षुतंरोगंक्षणात्त्हंति तदुक्तमन्यत्रवैद्यस्याकारणायगच्छतांरोगिमृत्युदंवैद्यस्यागच्छतोरोगंक्षुतंहंतिक्षणादपि १ इतिवसंतराजशाकुनेनरेंगितेक्षुतप्रकरणंतृतीयं ॥३॥

॥ भाषा ॥

ई० १ हर्ष २ नाश ३ व्याधि ४ मित्रसंगम	पू०. १ लाभ २ धनलाभ ३ मित्रलाभ ४ अग्निभय	१ लाभ अ० २ मित्रलाभ ३ शुभवार्ता ४ अग्निभय
१ शत्रुभय उ० २ रिपुसंग ३ लाभ ४ भोजन	आठोंदिशानमेंप्रहरप्रहरके छिकाकोशुभ अशुभको जितायवे चक्रम्	१ लाभ २ मृत्युभय द० ३ नाश ४ कलि
१ स्त्रीलाभ वा० २ लाभ ३ मित्रलाभ ४ दूरगमन.	१ दूरगमन. प० २ हर्ष ३ कलह ४ चौर	१ लाभ २ मित्रभेट नै० ३ शुभवार्ता ४ लाभ.

हे ओर जेमनीवी शुभकी दंयेचारी नहीं हे ओरबांई पीठ पीछकी शुभ दंयचारी हें ओर ग्रामप्रवेशमें तो वामा अशुभ देवेवारी ओरदक्षिणा शुभ देवेवारी ओरपीठ पीछली पराजय करे ओरसन्मुखकी छींक लाभ देवे ओर घरमें बेठो होय ओर काम करिवेकी इच्छा जाकी होय ता पुरुषकूं दिशानकोफल जाननो पूर्वमें छींक होय तो निश्चय लाभ होय ओर अग्निकोणमें हानि होय ओर दक्षिणमें मरण होय नैऋत्यमें उद्वेग होय ओर पश्चिममें सर्व संपत्त होय वायव्यमें शुभ वात सुने ओर उत्तरमें होय तो धन लाभ होय ओर ईशानमें छींक होय तो श्रीविजय होय प्रस्थानसमयमेंवी दिशानको फल ओर ग्रंथमें कह्यो है ॥ पूर्वदिशामें छींक होय तो मृत्यु होय ओर अग्निकोणमें शोक होय दक्षिणमें हानि होय नैऋत्यमें प्रियसंगम होय पश्चिममें मिष्ट आहार होय वायव्यमें श्रियसंपदा होय उत्तरमें कलह होय ईशानमें धनको आगमन होय आकाशनाम ऊपर छींक होय तो सर्व संहार करे पातालमें नीचें होय तो सर्व संपदा होय ये दश छींक हें ओरगमनसमयमें आपकूं ही छींक आवे तो महत् भय जाननो ओर नवीन वस्त्र आभरण धारण करती समयमें छींक होय तो तेसोही लाभ होय ओर जो स्थानके अंतमें दीसा दिशामें छींक होय तो दुष्ट स्थान फिर करावे ओर रोगीके पूछती समयमें छींक होय तो

ब्रूमोधुनांगस्फुरणस्यसम्यक् प्रत्येकमध्यक्षफ-
लप्रभावं सर्वस्ययत्रावगतेस्वदेहादुत्पद्यतेकर्म
विपाकसंवित् ३७ मूर्द्धिस्फुरत्याशुपृथिव्यवा
प्तिःस्थानप्रवृद्धिश्चललाटदेशे भ्रूघ्राणमध्येप्रि
यसंगमः स्यान्नसाक्षिमध्येचसहायलाभः ३८

॥ टीका ॥

ब्रूमोधुनेति अधुनाअंगस्फुरणस्य अध्यक्षफलप्रभावमिति अध्यक्षः प्रत्यक्षोपलभ्यमानोहि फलस्यप्रभावोमाहात्म्यं यस्यतंवयंब्रूमः कथं सम्यक् यथास्यात्तथेति क्रियाविशेषणं प्रत्येकमिति फलस्यविशेषणं एकं एकंप्रतिप्रत्येकं विशेषाकारेणेत्यर्थः यस्मिन्नवगते ज्ञाते स्वदेहात् सर्वत्रकर्मविपाकसंवित्कार्यविपाकस्यज्ञानमुत्पद्यते३७ मूर्द्धीति मूर्द्धिमस्तकेस्फुरतिसति आशुशीघ्रंपृथिव्यवाप्तिः भूमिप्राप्तिः स्यात् ललाटदेशे स्फुरति स्थानप्रवृद्धिः भ्रूघ्राणमध्ये स्फुरति प्रियसंगमः स्यात् नासाक्षि-


ज. ला. स्त.
दु. क्ष. भ.
द.
वा.
ज. ला. सु.
दु. क्ष. भ.
हा. भ. स्त.
ज. सु. भो.

॥ भाषा ॥

वैद्यके नही करवेके अर्थजाननो ओर वैद्यकूं बुलायवेजांय जिनकूं होय नो रोगीकूं मृत्युदेवे थारो होय ओर घरआये वैद्यकूं छींक होयतो रोग नाश होय तत्क्षण ॥ इतिवसंतराज शाकुनेनरेंगिते छिक्काप्रकरणम् तृतीयम्॥ ३ ॥ ॥ ब्रूमोधुनेति ॥ ॥ अब एक एक अंगके स्फुरणको प्रत्यक्ष फल प्रभाव कहेहें जाके हुयेसूं अपने देहतें सर्वकूं कर्मविपाकको वा कार्यफलको ज्ञान होय हे ॥ ३७ ॥ मूर्द्धीति ॥ मस्तक फडके तो शीघ्र पृथ्वी प्राप्ती होय ओर ललाट फडके तो स्थानवृद्धी होय ओर भ्रकुटी नासिकाके मध्य

दृगंतमध्येस्फुरणेर्थसंपत्सोत्कंठितः स्यात्स्फुरे-
णेदृगादौ जयोदृशोधः स्फुरणेरणेस्यात्प्रियश्रु
तिः प्रस्फुरितेचकर्णे ३९ योषित्समृद्धिःस्फुरिते
चगंडे घ्राणेचसौरभ्यमुदौभवेतां भोज्येष्टसंगाव
धरोष्ठयोश्चस्कंधेगलेभोगविवृद्धिलाभौ ४०

॥ टीका ॥

मध्येस्फुरतिसति सहायलाभः स्यात् ३८ दृगंतइति दृगंतमध्ययोः स्फुरणे अर्थसंपत्स्यात् दृगादौस्फुरणेसोत्कंठितास्यात् दृशोधः स्फुरणंरणे जयः स्यात् ग्रंथांतरेत्वेवं वामस्याधः स्फुरणमसकृत्संगभंगायहेतोस्तस्यैवोर्द्ध्वंहरतिनितरांमानसंदुःखजालम् नेत्रप्रांतेभवतिचधनंवित्तनाशंचकोणेसर्वेश्विंस्यंधिपरितमथोदक्षिणाक्षिप्रचारे १ सर्वत्रतदुपन्यासेत्वेवंसामान्यतः कर्णेप्रस्फुरिते जयःश्रुतिःस्यात् ३९ योषिदिति ॥ गंडेस्फुरितेयोषित्समृद्धिः स्यात् गंडः कपोलः गलात्परः कपोलश्चपरोगंडः कपोलतः इतिहेमः क्वचिद्योषित्समृद्धिः स्फुरितेकपोलेइत्यपिपाठः तत्रगलात्कपोलइत्यर्थः घ्राणेतुसौरभ्यमुदौभवेतां अधरोष्ठयोश्चयथाक्रमंस्फुरणेभोज्येष्टसंगौस्यातां भोज्यश्चइष्टसंगश्चभोज्येष्टसंगौ इतरेतरद्वंद्वः ओष्ठाधरौतुरदनच्छदौदशनवाससीइत्यमरः स्कंधेगलेचस्फुरणेभोग

॥ भाषा ॥

में फडकन होय तो प्रियसंगम होय और नासिका और नेत्र इनके मध्यमें फडके तो सहायीको लाभ होय ॥३८॥ दृगंतइति॥ नेत्रके अंतमध्यमें फडकन होय तो अर्थ संपदा होय नेत्रनके आदिमें फडके तो उत्कंठासहित होय और नेत्रनके नीचें फडकन होय तो संग्राममें जय होय और कर्ण फडके तो जयको श्रवण होय ॥३९ ॥योषिदिति॥ कपोल फडके तो स्त्रीकी समृद्धी होय और नासिका फडके तो सुगंधवान् पदार्थ मिलें अधरओष्ठनके फडकनसूं भोज्य और इष्ट संग होय और कंधा

स्पंदोभुजस्येष्टसमागमायस्पंदःकरस्यद्रविणाप्तिहेतुः स्पंदश्चपृष्ठस्यपराजयायस्पंदोजयायोरसिमानवानाम् ४१ पार्श्वप्रकंपेभवतिप्रमोदःस्तनप्रकंपेविषयस्यलाभः कटिप्रकंपेतुबलप्रमोदौनाभिप्रकंपेनिजदेशनाशः ४२ धनर्द्धिरंत्रप्रभवेप्रकंपेदुःखंधनांतंहृदयस्यचान्तः

॥ टीका ॥

विवृद्धिलाभौयथाक्रमंस्यातां ४० स्पंदइति भुजस्यस्पंदःस्फुरणंइष्टसमागमायस्यात् कराग्रेस्पंदः द्रविणाप्तिहेतुर्भवति स्वपृष्ठेस्पंदःपराजयाय भवति मानवानामुरसिहृदयेस्पंदः जयायभवति ४१ पार्श्वप्रकंपइति पार्श्वप्रकंपे अर्थात् स्फुरणेप्रमोदः स्यात् बाहुमूलेउभेकक्षौपार्श्वमस्त्री तयोरधः इत्यमरः स्तनप्रकंपेस्फुरणेविषयस्यलाभःस्यात् कटिप्रकंपे बलप्रमोदौबलंशक्तिःप्रमोदोहर्षः स्यातां नाभिप्रकंपेनिजदेशनाशः स्यात् ४२ धनर्द्धिरिति अंत्रप्रभवे प्रकंपे धनर्द्धिःस्यात्च पुनः हृदयस्यांते प्रकंपेधनांतंदुःखंस्यात् स्फिक्पायुकंपेच वाहनाप्तिर्भवति - स्फिकौकटिप्रोथौपायुर्गुदंतयोः स्फुरणे वाहनाप्तिर्भवतीत्यर्थः वरांगकंपे वरयोषिदाप्तिर्भवति वरांगं स्त्रीपुंचिन्हं वरांगंस्त्रीपुंसचिन्हं च-

॥ भाषा ॥

फडकेतो भोगवृद्धि होय और गलो फडके तो लाभ होय ॥४०॥ स्पंदइति॥ भुजाको फडकनो इष्टसमागमके अर्थ है हस्तको अग्रभाग फडके तो धनप्राप्ती होय अपनी पीठ फडके तो पराजयके अर्थ होय वक्षस्थलमें फडकन होयतो मनुष्यनके जयके अर्थ है ॥४१॥ पार्श्वप्रकंपइति॥ पशवाडेनमें फडकन हुयेसूं प्रमोद होय स्तन फडके तो विषयको लाभ होय कमर फडके तो बल शक्ति प्रमोद हर्ष होय नाभिफडके तो निजदेशको नाशहोय॥४२॥ धनर्द्धिरिति॥ आंतें फडके तो-

स्फिक्पायुकंपेऽपिचवाहनाप्तिर्वरांगकंपेवरयोषिदाप्तिः ४३ मुष्केसकंपेतनयस्यजन्मबस्तौसकंपेयुवतिप्रवृद्धिः दोषःप्रकंपेपुनरूरुपृष्ठेउरोः पुरःस्यात्सुसहायलाभः ४४ स्याज्जानुकंपेरचिरेणसंधिर्जंघाप्रकंपेऽपिचलाभनाशः स्थानाप्तिरूर्द्ध्वचरणस्यकंपेयात्रासलाभांघ्रितलप्रकंपे ४५ पुंसांसदादक्षिणदेहभागेस्त्रीणांचवामावयवेषुलाभः स्पंदाःफलानिप्रदिशंत्यवश्यंनिहंतिचोक्तांगविपर्ययेण ४६

॥ टीका ॥

रांगंतुच्युतिर्वुलिरितिहैमः ४३ मुष्कइति मुष्केवृषणे मुष्कोंडकोशोवृषण इत्यमरः प्रकंपेतनयस्यजन्मभवति मुष्कशब्देनांडोबस्तिः मूत्रपुटंनाभेरधोभागं बस्तिः मूत्राशयेपिचेतिहैमः तत्प्रकंपेयुवतिप्रवृद्धिःस्यात् दोषः प्रकंपेबाहुस्फुरणेपुनः उरुपृष्ठेस्फुरणेचउरोःपुरस्ताच्चसुसहायलाभःस्यात् ४४ स्यादिति जानुकंपे अरिणाप्रधानशत्रुणा अचिरेणसंधिर्भवतिजंघाप्रकंपेलाभनाशः ऊर्द्ध्वचरणस्यकंपेस्थानाप्तिर्भवति चरणतलस्फुरणेयात्रांसलाभांवदंति ४५ पुंसामिति पुंसांपुरुषाणां सदासर्वकालं

॥ भाषा ॥

धनकी ऋद्धी होय कूख और गुदा ये फडके तो वाहनकी प्राप्ति होय वरांगफडके तो स्त्रीकूं पुरुषकी प्राप्ती और पुरुषकूं स्त्रीप्राप्ती होय वरांगनाम स्त्रीपुरुषके चिन्हको हे ॥४३॥ ॥मुष्कइति॥ अंडकोश फडके तो पुत्रजन्म होय और नाभिको अधोभाग फडके तो स्त्रीकी प्रवृद्धी करे भुजाको और ऊरुके पृष्ठभागको और उरूके अग्रभागको फडकनो ये तीनो सहायीको लाभ करेंहें ॥४४॥ स्यादिति॥ जानु फडके तो शीघ्रही वैरीकरकें संधी होय और जंघा फडके तो लाभको नाश होय और चरणको ऊपरलो भाग फडके तो स्थानप्राप्ति होय चरणके नीचें नलुआ फडके तो लाभ सहित यात्रा होय ॥४५॥ पुंसामिति ॥पुरुषनके जे-

मशकंतिलकंपिटकंवापिव्रणमथचिन्हंकिमपिकदापि स्फुरतिपदान्यधितिष्ठतियावत्स्यात्पूर्वोक्तंफलमपितावत् ४७ बिंदवउज्ज्वलवर्णाय·स्यस्युर्यावन्नखवरेषुनरस्य ॥

॥ टीका ॥

दक्षिणदेहभागेस्त्रीणांतुवामावयवेषुजातः स्पंदः अवश्यंफलानिप्रदिशति प्रदत्तेउक्तांगविपर्ययेणजातस्पंदः फलानिहंति पुरुषाणांवामेभागेस्त्रीणांदक्षिणेभागेचेत्यर्थः ४६ मशकमिति मशकं मसइतिप्रसिद्धः तिलकमिति तिलधान्यानुकृतिःशरीरेकृष्णबिंदुविशेषः पिटकमिति विस्तृतंवपुषिरक्तंकृष्णंवा चिन्हं लसणमिति लोके व्रणंप्रसिद्धं - किमपि चिन्हं पूर्वोक्ताद्विपरीतं एतन्मध्यात्कदाचिदेकं स्फुरतियावत् कालंसपुमान् तेषुपदेषु अधितिष्ठति तावत्कालं पूर्वोक्तं फलमपितस्य स्यात् केचित्तु अन्यथाव्याख्यानयंति पूर्वोक्तेषुमध्यादेकं यदिशरीरेस्फुरति प्रकटीभवति तद्यावत्कालं पदान्यंगविशेषाणि अधितिष्ठंति तावत्कालं तस्यफलंभवतीत्यर्थः मशकादीनां कालांतरेणाभावदर्शनादेतद्वचनं ४७ बिंदवइति नखवरेषु नखेषु यस्य यावदुज्ज्वलवर्णाबिन्दवः स्युः तस्यतावद्दुःखं न स्यात् कीदृशास्य प्रतिदिनजातसुखातिशयस्येति प्रतिदिनंजातः सुखातिशयः सुखाधिक्यंयस्यस

॥ भाषा ॥

मने अंगमें और स्त्रीनके वांये अंगमें फडकवेको फल लाभ अवश्य होय और पुरुषनके वांये अंगमें स्त्रीनके जेमने अंगमें फडकवेके फल पहलें कहें तें विपरीत करकें कार्यनाश करेंहें ॥४६॥ मशकमिति ॥ मुस्सो तिल लसण व्रण और कोई चिन्ह होंय इनमेंसूं एकची प्रगट होय जितनें काल अंगमें स्थित होय तब तांई ताको फल पूर्वकहे जे होंय ये चिन्ह कालांतरमें मिटची जायो करेहें ॥४७॥ बिंदवइति ॥ जाकेनख-

दुःखंतावन्नश्यतितस्यप्रतिदिनजातसुखातिशयस्य ४८ त्यक्तदक्षिणापथेसदागतावुत्तरापथेनपंकजाकरं स्वेच्छयाप्रसर्प्पति प्रसर्प्पतः सिद्ध्यतिक्षणादपेक्षितंध्रुवं ४९ लोकः शाकुनमिदमतिशास्त्रंशक्तोभ्यसितुंयदिनसमस्तं तज्जानातु नरेंगितमात्रंयेनभवेन्नृषुकार्येषुपात्रं ५० इत्यंगस्फुरणम्.

॥ टीका ॥

तथाकेचित्तु आगंतुकानां बिंदूनामेव सुखजनकत्वं प्रतिपादयंति तदुक्तमन्यत्र आगंतवः प्रशस्ताः स्युरिति भोजनृपोभ्यधादिति ४८ त्यक्तदक्षिणापथइति सदागतौवायौउत्तरापथेनपंकजाकरं पंकजसमूहं स्वेच्छयाप्रसर्पतिसति प्रसर्पतोगच्छतोनरस्यापेक्षितंवांछितंध्रुवंक्षणात्सिद्ध्यति कीदृशेवायौ त्यक्तदक्षिणापथइति त्यक्तः उज्झितः दक्षिणापथोदक्षिणमार्गोयेनसतथा क्वचिदुपेक्षितपाठस्तत्रोपेक्षितं उपेक्षाविषयीकृतमित्यर्थः ४९ लोकइति लोकोजनः अतिशास्त्रंशाकुनंसमस्तमभ्यसितुंयदिनशक्तः तत्तस्मान्नरेंगितमात्रंजानातु येनकार्येषुनृषुपात्रंस्यात् ५० इतिवसंतराजशाकुनेनरेंगितस्फुरितंचतुर्थप्रकरणं ॥४॥

॥ भाषा ॥

नमें उज्वलवर्णके श्वेत बिंदू जबतक होय ता प्राणीकूं तब तांई दुःख नहीं होय दिन दिनप्रति सुखकी अधिकता होय ॥४८॥ त्यक्तदक्षिणापथइति ॥ दक्षिणमार्गकूं छोडकें वायु उत्तर मार्गकरकें कमलके समूह प्रतिगमन करे तो गमन कर्त्ता मनुष्यकूं वांछित निश्चयही तत्क्षण सिद्धी होय ॥४९॥ लोकइति ॥ जो मनुष्य समग्र शाकुन शास्त्र अभ्यास करवेकूं समर्थ न होय तो नरेंगितमात्र जो छटो वर्ग ताय नानले तो याकरकें सर्वकार्यनमें और मनुष्यनमें पात्र होय ॥५०॥ इतिनरेंगि-

आद्येप्रकरणेप्रोक्तंवृत्तैर्नवभिरीक्षणं उपश्रुतौद्वितीयेच
वृत्तान्यष्टादशैवतु १ क्षुतमुक्तंतृतीयेतुवृत्तैर्नवभिरेव
च चतुर्दशभिराख्यातंतुर्येंगस्फुरितंतथा २ एवं
प्रकरणान्यत्रचत्वार्येवनरेंगिते सामस्त्येनचवृत्तानां
पंचाशत्परिकीर्तिताः ३ इतिव०शा०नरें०ष०व० ६

॥ टीका ॥

एतेषांचतुर्णांप्रकरणानांकस्मिन्वर्गेअन्तर्भावः इत्याकांक्षायांनरेंगिते वर्गेपूर्वोक्तानामंतर्भावंसूचयन्वृत्तानांव्यस्तांसमस्तांसंख्यांप्रतिपादयन्नाह आद्यइति आद्येप्रथमेप्रकरणेनवभिर्वृत्तैरीक्षणंप्रोक्तं द्वितीयेप्रकरणे अष्टादशैर्वृत्तैरुपश्रुतिः तुपुनरर्थे १ क्षुतमिति तृतीयेप्रकरणेनवभिर्वृत्तैरेवक्षुतमुक्तं तुर्येचतुर्थेप्रकरणेचतुर्दशभिर्वृत्तैरंगस्फुरितमाख्यातंकथितं २ एवमिति पूर्वोक्तप्रकारेण चत्वार्येवप्रकरणान्यत्रनरेंगितेभवन्ति सामस्त्येनसमग्रसंख्यायांवृत्तानांपंचाशत्परिकीर्तिताः ३ वसन्तराजेति वसंतराजाभिधानेग्रंथेनरेंगितंविचारितं विशदीकृतं शेषाणिग्रंथविशेषाणि पूर्ववत् इतिशत्रुंजयकरमोचनादिसत्कृतकारिभिर्महोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायां वसंतराजटीकायांनरेंगितेषष्ठोवर्गः ॥६॥ श्रीरामोजयति॥

॥ भाषा ॥

ते अंगस्फुरणंचतुर्थप्रकरणम् ॥४॥ ॥ प्रथमप्रकरणमें नो श्लोकनकरकें आलोकन कह्यो और द्वितीयप्रकरणमें अठारे श्लोकनकरकें उपश्रुति कहीहे फिर तृतीयप्रकरणमें नो श्लोकनकरकें छिक्काप्रकरण कह्यो और चोथे प्रकरणमें चौधे श्लोकन करकें अंग स्फुरण कह्यो ये च्यार प्रकरण नरेंगित वर्गमें हें समग्र संख्या पचाश श्लोक कहे हें ॥ इतिश्रीवसंतराजशाकुनभाषाटीकायां नरेंगितंनाम षष्ठोवर्गः समाप्तः ॥६॥ श्रीसीतारामचन्द्रः सुप्रसन्नोऽस्तु ॥७॥

वंदेशाकुनदेवीदंतवज्ञानंशुभास्पदम् कालत्रय
समुद्भूतंसंशयोच्छेदकारकम् १ यतोखिलैः
शाकुनशास्त्रविज्ञैः श्यामोदितासर्वविहंगमानाम्

॥ टीका ॥

अथ शाकुनदेवतायाः प्रथमंस्तुतिमाह वंदेशाकुनदेवीति हेशाकुनदेवि इदंतवज्ञानं वंदे कीदृक् ज्ञानं शुभास्पदं शुभस्यश्रेयसः आस्पदंगृहं पुनः कीदृक् कालत्रयंसमुद्भूतसंशयोच्छेदकारकं भूतभाविष्यद्वर्तमानलक्षणंकालत्रयंतत्रसमुद्भूतउत्पन्नोयः संशयः संदेहस्तस्योच्छेदोध्वंसः तस्यकारकंकर्तृकं १ यतोखिलैरिति तेन कारणेन प्रथमंतस्याः श्यामायाः शाकुनानि यत्नात्वयमभिदध्मः कथयामः यतः कारणात् अखिलैः समग्रैः शास्त्रविज्ञैः सर्वविहंगमानांश्यामाप्रधानभूता प्रकृष्टाउदिता प्रतिपादिता इह त्रिविधं शाकुनंभवति क्षेत्रिकं आगंतुकं जांघिकं चेतितत्र यच्छकुनंक्षेत्रे तोरणकल्पनया अधिवासनाद्यंकृत्वेक्ष्यते तत्क्षेत्रिकं कथ्यते यत् स्थानस्थानांपुरुषाणां अकस्मात् दिग्विभागतोभवति तदाऽऽगंतुकंवदंति तथा यद्गच्छतोजनस्य सव्यापसव्यसंमुखपृष्ठेषुग्राम्यवन्यसत्वानांशाकुनंजायते तत्जांघिकं कथयंति तदुक्तमन्यत्र नरशर्माणिग्रंथे

॥ भाषा ॥

अब शाकुनदेवीकूं प्रथम स्तुती कहेंहें ॥ हे शाकुन देवी कल्याणको स्थान और भूतभविष्यद्वर्तमान इन तीनों कालनमें उत्पन्न हुयो संदेहकूं दूर करवेवालो जो तुमारो ज्ञान तायमें नमस्कार करूं हूं ॥१॥ यतोखिलैरिति ॥ समग्रशाकुन शास्त्रके वेत्तानें सर्वपक्षीनके मध्यमें श्यामा मुख्य श्रेष्ठ कही है ता कारणकर प्रथमतः श्यामाके शाकुन यत्नतें कहें हैं ॥१॥ यहां तीन प्रकारके शाकुन हें क्षेत्रिक १ आगंतुक २ जांघिक ३ इनमें जो शाकुन क्षेत्रमें जाय तोरणरचना

प्रधानभूता प्रथमं प्रयत्नात्तेनाभिदध्मः शाकुना-
नितस्याः १ तत्रतावदधिवासने विधिः कथ्यते
यदधिवासने कृते तोषमेति शाकुनाधिदेवता
तेनसा भवति सत्यवादिनी २

॥ टीका ॥

त्रिविधमिह भवति शाकुनं क्षेत्रिकमागंतुकं जांघिचान्यत् क्षेत्रे स्थाने वर्त्मनि शुभाशुभागंतुफलं पिशुनं १ शाकुनक्षेत्रे तोरणाकल्पनया प्रश्नं नियतफलकालं कृत्वाधिवासनाद्यं यदीक्ष्यते क्षेत्रिकं तत्स्यात् २ स्थानस्थानां शाकुनं यदकस्माद्दिग्विभागतो भवति शांतप्रदीप्तभेदाद्व्यक्तफलं प्रथितमागंतुकं ३ सव्यापसव्य संमुखपृष्ठेषु ग्राम्यवन्यसत्वानां शाकुनं स्वरगतिचेष्टाभावैः पथिजांघिकं नाम ४ क्षेत्रिकोएवशाकुने अधिवासनादिकं क्रियते नान्यत्र तथाप्यत्रसामान्योक्तावप्ययंविशेषोग्रंथांतरादवसेयः १ तत्रेति तत्र श्यामायाः देव्याः शाकुनावलोकनविधौ तावत् प्रथममधिवासनमिति अधिवासनंनाम शाकुनावलोकनादर्वाक् पूजापूर्वकं शकुनानां निमंत्रणं तस्मिन् विधिः प्रकारः कथ्यते प्रतिपाद्यते यस्मात्कारणादधिवासने कृते शाकुनाधिदेवता शकुनाधिष्ठात्री तोषं संतोषमेति तेनसादेवता सत्यवादिनी भवति २

॥ भाषा ॥

कर फिर अधिवासनादिक करकें देखेंवाकूं क्षेत्रिक कहेंहें जो स्थानमें बैठे मनुष्यनकूं अकस्मात् दिशाके विभागतें शाकुन होय वाकूं आगंतुक कहेंहें और जो गमनकरवे वारे मनुष्यकूं बांये जेमने सन्मुख पीठ पीछे ग्रामके वनके जीवनको शकुन होय ताकूं जांघिक कहें हें क्षेत्रिकही शकुनमें अधिवासनादिक करें हें और मेंनहीं करेहें ॥१॥ तत्रेति ॥ ता श्यामाके शाकुन देखवेमें प्रथम अधिवासन कहेंहैं अधिवासननाम कायको हे शाकुनके अवलोकनतें पहलें पूजा पूर्वक शाकु

निर्जनामृगगवाश्ववर्जिता सर्वतश्चनिरुपद्रवा सदा नातिभूरितरुपोतकीयुगादृश्यतेशाकुनदर्शनेऽवनिः ३ एकपक्षियुगमग्निदूषितंछिन्नकंटकविशुष्कपादपं ॥

॥ टीका ॥

निर्जनेति शाकुनदर्शनेएवंविधाऽवनिर्भूमिः प्रशस्यते कीदृशी निर्जना जनसंचाररहिता पुनः कीदृशी मृगगवाश्ववर्जिताइति मृगैर्गोभिः अश्वैश्चवर्ज्जिता पुनः कीदृक् सर्वतश्चनिरुपद्रवेति सदासर्वकालं सर्वतःसर्वस्मिन्क्षेत्रे निरुपद्रवाउपद्रवरहिता पुनः किंविशिष्टा नातिभूरितरुपोतकीयुगाइति नविद्यंते अतिभूरितरवः पोतकीयुगानि यस्यांसा तथा अत्रनस्यनिषेधार्थकत्वादल्पादेशाभावः अरण्यानिस्थानंफलनमिति नैकद्रुमवनमितिवत् ३ एकपक्षियुगमिति इहास्मिन्शाकुनावलोकने सर्वदासर्वकालं ईदृशंभूमिभागंनरस्त्यजेत् कीदृशं एकपक्षियुगमिति एकस्यैव एकजातीयस्यपक्षिणः युगानियुगलानि यत्रतत्तथा यद्वा एकमेवपक्षियुगलंयत्रतत्तथेत्यर्थः पुनः कीदृशं अग्निदूषितमि-

॥ भाषा ॥

ननको निमंत्रण नाम नोतनो सो आधिवासन नामें विधि कहें हैं जा आधिवासन करे नें शाकुनकी आधिष्ठाना देवी प्रसन्न होय करकें सत्यवादिनी होय है ॥२॥ ॥निर्जनेति॥ शाकुनदेखवेमें एसी पृथ्वी होय मनुष्यनको डोलनो फिरनो जाजगें न होय और मृग गौ अश्व इनकरकें रहित होय सर्वदा सर्वकालमें उपद्रव कोईवी वहां नहोय और बोहोत वृक्ष नहोंय और पोदकीको युगल जोडा जाजगे नहोय एसी पृथ्वी शाकुनमें लीनी हें सो योग्य हैं ॥३॥ एकपक्षियुगमिति ॥ या शाकुनके अवलोकनमें सर्वकाल एसीभूमीकूं मनुष्य त्याग करे एकजातीके पक्षीको युगलनाम जोडा जहां होय और अग्निकरकें दूषित जलीचली होय और

दुष्टसत्वममनोरमंनरोभूमिभागमिहसर्वदात्यजेत् ४
स्निग्धपुष्पफलपल्लवद्रुमा शिष्टलोकसुखसंचरास
मा सर्वतश्चसुतरांमनोरमासाक्षमाशकुनदर्शनेक्ष
मा ५ निवर्तनानीहचचक्रवर्तिप्रयोजनेपंचदशोदितानि

॥ टीका ॥

ति अग्निनावन्हिना दूषितं भस्माच्छेषीकृतं पुनः कीदृशं छिन्नकंटकिनशुष्कपादपं छिन्नाः कर्तिताः कंटकिनाः कंटकाकुलाः शुष्काः पादपाः वृक्षाः यत्रतत्तथा पुनः कीदृशं दुष्टसत्वमिति दुष्टामांसाशनाः सत्वाः प्राणिनोयत्र तत्तथा पुनः कीदृक् अमनोरममिति नमनोरमंमनसोनाह्लादकमित्यर्थः ४ स्निग्धइति शकुनदर्शनेशकुनावलोकने साक्षमावसुधाक्षमासमर्था कीदृशी स्निग्धपुष्पफल पल्लवद्रुमाइति स्निग्धाःसचिक्कणानवीनत्वात् पुष्पफलपल्लवाः प्रतीता येषु एवंविधाद्रुमावृक्षाः यस्यांसातथापुनः कीदृशी शिष्टलोकसुखसंचराइतिशिष्टाःमनः कालुष्यरहिताः येजनाः तेषां सुखेनानायासेनसंचरोसंचरणं यस्यांसा तथा पुनः कीदृशीसमाइति अविषमादेवखातादिरहिता सुतरामतिशयेन सर्वतः सर्वस्मिन् प्रदेशे मनोरमामनोहारिणीत्यर्थः ५ निवर्तनानीति इहचक्रवर्तिप्रयोजने चक्रवर्तिकार्योद्देशे पंचदशनिवर्तनानि

॥ भाषा ॥

कटेहुये अथवा कांटेनके वा सूके हुये एसे वृक्ष जहां होय और दुष्टमांसके आहारकर्ता प्राणी जहां होय और मनकूं आल्हादन करे भययुक्त होय एसी पृथ्वी जहां होय तहां शकुन देखनो नहीं ॥ ४ ॥ स्निग्धइति ॥ सचिक्कण नवीन पुष्पफलपल्लव जिनमें एसे वृक्ष जा जगें होय शुद्धमनके सज्जन मनुष्यनको सुखपूर्वक विचरनो जहां होय और समान होय और सर्वदेशमें मनकूं प्रसन्न करवेवाली होय एसी पृथ्वी शकुनके देखवेमें योग्य है ॥ ५ ॥ निवर्तनानीति ॥ यापृथ्वी

सामन्तपृथ्वीभृदमात्यकार्येष्वाऽऽहुर्नवत्रीणिजनान्तराणि ६ चतुर्गुणैःस्याद्दशभिःक्रमैस्तुनिवर्तनंतत्रसमेप्रदेशे शिलेष्टिकापादपमृत्तिकाभिःकार्याणिचत्वार्यथतोरणानि ७

॥ टीका ॥

उदितानिकथितानि सामंतपृथ्वीभृदमात्यकार्येष्विति स्वदेशनिकटवर्ति भूभृत्सामंतः पृथ्वीभृत् राजा अमात्यः सचिवः सामंतश्चपृथ्वीभृच्च अमात्यश्चेति पूर्वमितरेतरद्वंद्वः ततः कर्मधारयः एतेषांकार्येषुनव निवर्तनानि कथितानि जनांतराणामितरजनानांत्रीणिनिवर्तनानि ६ चतुर्गुणैरिति चतुर्गुणैर्दशभिः क्रमैः समेप्रदेशेनिवर्तनंस्यात् अत्रक्रमशब्देन एकंपादमुत्क्षिप्य यावद्भूमिप्रदेशमुच्यते तावान्भूमिप्रदेशः क्रमउच्यते अत्रक्रमशब्देन किंचिदधिकं हस्तमात्रंविवक्षितं अन्यत्रपरिमाणादौ क्रमशब्देनवंशार्द्धमुच्यते यदुक्तमन्यत्र वंशार्द्धसंख्यैश्चक्रमोभियुक्त इति अन्यत्रक्षेत्रपरिमाणादौ दशहस्तपरिमाणोवंशः विंशतिवंशैर्निवर्तनमिति तदुक्तमन्यत्र स्याद्योजनंक्रोशचतुष्टयेनतथाकराणांदशकेनवंशः निवर्तनंविंशतिवंशसंख्यैःक्षेत्र

॥ भाषा ॥

में चक्रवर्ती राजानके कार्यमें पंद्रह निवर्तन कहेहें ओर अपनें देशके निकटवर्ती ग्रामनको आधिपती होय सो सामंत ओर राजा ओर मंत्री इनके कार्यमें नो निवर्तन कहेहें ओर मनुष्यनके कार्यमें तीन निवर्तन कहें हें ॥ ६ ॥ चतुर्गुणैरिति ॥ समानपृथ्वीमें चालीसक्रम नाम पेंड करकें एक निवर्तन होय हे क्रमनाम कछू आधिक एक हाथ यामें तो कह्यो हे ओर शास्त्रमें क्रमनाम पांच हाथको हे ओर दश हाथको वंश होय हे ओरवीश वंशको एक निर्वन होयहे यारीत करकें दोयसे हाथको निवर्तन होयहे जा शकुनमें जितनें निवर्तन कहें हें पूर्व-

भूमित्रयंतत्रनिवेशनीयंचतुश्चतुर्मासविभागयुक्त्या
वर्षंविधेयाश्चततश्चतुर्द्धातिस्रोप्यऽवन्यः
सुधियाक्रमेण ८ एवंनरोद्वादशधाविभज्य
कुर्याच्चतुर्विंशतिधाततस्ताः

॥ टीका ॥

चतुर्भिश्चभुजैर्निबद्धमिति तत्रनिवर्तने चतुरस्रंमंडलंकुर्यात् तत्रचतुर्दिक्षु चत्वारितोरणानि चत्वारिद्वाराणि कार्याणिकैः शिलेष्टिकापादपमृत्तिकाभिरिति पूर्वस्यांशिलाभिः दक्षिणस्यामिष्टिकाभिः इंटइतिप्रसिद्धाभिः पश्चिमायांपादपैरुत्तरस्यांमृत्तिकाभिः ७ भूमित्रयमिति चतुश्चतुर्मासविभागयुक्त्येति चतुर्णांचतुर्णांमासानांयोविभागः तस्ययुक्तिः रचना तया तत्रनिवर्तनस्थले भूमित्रयं निवेशनीयं ततस्तिस्रोवन्यश्चतुर्द्धाविभज्य वर्षंविधेयंसुधियापंडितेन क्रमेणेति केचित्तु चतुश्चतुर्मासविभागेन तत्रनिवर्तनस्थले वर्षंनिवेशनीयंततः सुधियापंडितेन क्रमेणयस्मिन्देशेयतोवर्षप्रारंभस्तदादिक्रमेणातिस्रोप्यवन्यश्चतुर्द्धोविधेयाः विभजनीयाइत्यर्थः ८ एवमिति नरोमनुष्यः एवमिति पू-

॥ भाषा ॥

जितनेही निवर्तनके परिमाणमें चतुरस्र मंडल करे तामें च्यार द्वारे या रीतसूं करे पूर्वमें शिलानकरकें ओरदक्षिणमें ईंटकरकें ओर पश्चिममें वृक्षनकरकें ओर उत्तरमें मृत्तिकाकरकें एसें च्यारों दिशानमें द्वारे च्यार बनावे ॥ ७ ॥ भूमित्रयमिति ॥ च्यारच्यार महिनानके विभागकी रचनाकरकें ता निवर्तनस्थलमें तीन भूमि करनी इन तीनभूमीनके च्यार विभाग करकें वर्ष करनो बुद्धिमान्पुरुष करकें जादेशमें जहांतें वर्षको प्रारंभ होय तासूं आदिलेकें क्रमकरकें वर्ष करनों ॥ ८ ॥ एवमिति ॥ ता पीछें पूर्वप्रकारसूं ता पृथ्वीके द्वादश विभाग करकें मास निर्णय करै ओर तापीछें चोवीसको भाग देकरकें पक्ष निर्णय करे फिर

पुनर्यथेष्टंप्रविभज्यकार्ययावद्दिनंकालविनिर्णयाय ९ यत्रप्रदेशेशकुनोनुकूलः फलायविज्ञैःकथितःसकालः यत्रप्रदेशेप्रतिकूलवर्त्तीभवेत्सकालःफलनाशनाय १० यदादिनर्क्षग्रहलग्नशुद्धिस्ताराबलंचन्द्रमसोबलंच ॥

॥ टीका ॥

वोक्तप्रकारेणताश्चतुर्विभक्ता अवन्यः द्वादशधाविभज्यमासनिर्णयं कुर्यात्ततस्ताश्चतुर्विंशतिधाविभज्य पक्षनिर्णयंकुर्यात् पुनर्यथेच्छंस्वेच्छयाप्रविभज्य यावद्दिनमिति यावद्दिनपर्यन्तं निर्णयोभवति तावत्कालविनिर्णयायकार्यमग्रे प्रयोजनाभावात् नकर्तव्यमित्यर्थः ९ यत्रेति यत्रदेशेशकुनो अनुकूलः सकालः विज्ञैःफलाय कथितः यत्रप्रदेशे प्रातिकूलवर्तीशकुनः सकालः फलनाशाय भवति १० यदेति यदा दिनर्क्षग्रहलग्नशुद्धिर्भवति तत्रदिनंदिवसः ऋक्षंनक्षत्रं ग्रहाश्चन्द्राऽर्यमादयः प्रतीताः लग्नं मेषप्रभृतिस्तेषांशुद्धिः स्यात् पुनः ताराबलं यदाभवति तारास्वरूपंचैवं जन्मर्क्षंगण येदादौ चंद्रऋक्षावधिं पुनः नवभिस्तुहरेद्भागंशेषास्ताराविनिर्दिशेत् तत्रोत्तमावेदषण्मुखास्त्यांकाप्रमिताः मध्यमाश्चन्द्रलोचनवसुप्रमिताः जघन्याः वह्निसागरकामबाणप्रमिताः यदापुनः चंद्रमसोबलंभवति तद्बलंत्वेवंस्वजन्म

॥ भाषा ॥

अपनी इच्छापूर्वक विभाग देकरकें जितने दिन पर्यंत निर्णय करनो होय तितनेंही काल निर्णयके अर्थ करनो योग्यहे ॥ ९ ॥ यत्रेति ॥ जा देशामें शाकुन अनुकूल होय वो काल विज्ञपुरुषनकरकें फलके अर्थ कह्यो है और जा प्रदेशामें प्रतिकूल शाकुन होय वो काल फलके नाशके अर्थ होय ॥ १० ॥ यदेति ॥ ज्योतिष शास्त्रसूं विचारकरकें जब दिन नक्षत्र ग्रह लग्ननकी शुद्धि होय -

पुंसांतदाभीप्सितकार्यसिद्धै प्रत्यक्षरूपंशकुनंनिरीक्ष्यं ११ क्षीणचंद्रतिथिदुःसहानिलंदूषितंधरणिकंपनादिना पूर्ववज्जलदसंकुलांबरंवर्जयेत् शकुनदर्शनेदिनम् १२

॥ टीका ॥

राश्यपेक्षया द्वादशराशिस्थचंद्रफलं यथा जन्मस्थः कुरुतेपुष्टिं द्वितीये नास्तिनिर्वृतिः तृतीयेराजसन्मानंचतुर्थेकलहागमः १ पंचमेचपतिभ्रंशः षष्ठेप्यर्थसमागमः सप्तमेचातिपूजास्यादष्टमेप्राणसंशयः २ नवमेक्लेशबाहुल्यंदशमेकार्यसिद्धयः एकादशेजयोनित्यंद्वादशेमरणंध्रुवम् ३ शुक्लपक्षेद्वितीयश्चपंचमोनवमः शुभइति ताराचंद्रादौ तथाकालचंद्रोपित्याज्यः तत्स्वरूपंत्वेवं क्रमाच्चंद्र१ बाणा५ क९ चक्षू२ रसा६श्च दशा१०ग्न्य३श्व७ वेदाष्ट ८ रुद्राश्च ११ मासाः १२ करोत्यर्निमन्नास्थितोमानवानामयंकीर्तितः कालचंद्रो मुनींद्रैरिति स्थितंयदेताहक्सामग्रीपूर्णाभवति तदापुंसां आभीप्सितकार्यसिद्धौप्रत्यक्षरूपमिति प्रत्यक्षंदृश्यमानंरूपंयस्य तत्तथाशकुनंनिरीक्ष्यंविलोकनीयं ११ क्षीणचंद्रेति एवंविधंदिनं शकुनदर्शनेवर्जयेत् कीदृशं क्षीणचंद्रतिथिदुःसहानिलमिति क्षीणः चंद्रोयस्यामेवंविधातिथिः दुःसहोनिलोवायुर्यस्मिन्तत्तथापुनः कीदृक्दूषितंदोषदुष्टं केनधरणिकंपनादिना आदिशब्दादुल्कापातादिनेत्यर्थः पुनः कीदृक्जलदसंकुलांबरमिति जलदेनमेघे-

॥ भाषा ॥

और ताराबल जब होय और चंद्रबल होय तादिना वांछित कार्यकी सिद्धीके अर्थ प्रत्यक्षरूप शकुन तेसेही देखवो योग्यहै ॥११॥ क्षीणचंद्रेति ॥ क्षीणचंद्रमा क्षीणतिथी होय दुःसहपवन जा दिन होय पृथ्वी कंपनवज्रपात विजली पातादिक करकें दूषित होय और मेघकरकें आकुल आकाश जादिन होय एसो

स्नातः प्रशांतः कृतदेवकार्यः शुक्लांबरः कल्पितमं
गलाशीः मौनीसमंशाकुनिकेनयायाद्यामेंतिमे
पश्चिमतोरणांतम् १३ शिलातले तत्रविधायहे
म्नारौप्येणापिष्टैरथवासुपिष्टैः निवेशनीयः क
पिलोमहर्षिः श्यामायुगंचाष्टदलेसरोजे १४

॥ टीका ॥

नसंकुलं कलुषीकृतमंबरंवियत्यस्मिन् नत्तथा पूर्ववदितिक्षीणचंद्रादिवत् अमावास्यावत् १२ स्नातइति शाकुनिकेनसमं अंतिमेयामेतोरणपश्चिमांतेयायात्गच्छेत् कीदृशः स्नातइति प्रथमंकृतस्नानःप्रशांतइति क्रोधराहित्येन शीतलतां प्राप्तः कृतदेवकार्यइति कृतंदेवकार्यंपूजाप्रभृतियेनसतथा शुक्लांशुकइति शुक्लं श्वेतं अंशुकमंबरंयस्यसः वस्त्रमाच्छादनंवासश्चैलंवसनमंशुकमित्यमरस्तथा कल्पितमंगलाशीरिति कल्पितारचितामंगलार्थमाशिषोयस्यसतथा मौनीतिमौनवान्पुरुषइतिशेषः १३ शिलातलइति तत्राशिलातले शिलापीठे हेम्नासुवर्णेन रूप्येणरजतेन अथवासुपिष्टैः गोधूमादिचूर्णैः कपिलमुनिमूर्तिंविधायतत्रकपिलमुनिरिति मूर्तिमतोरभेदोपचारात्ज्ञेयंनिवेशनीयः स्थाप्यः श्यामायुगंचनिवेश्यंस्थापनीयंकस्मिन्पूर्वोक्तरीत्याशिलोपरिविहिते अष्टदलेसरोजेकमले १४

॥ भाषा ॥

दिन शाकुनके देखवेमें वर्जितकरनो ॥१२॥ स्नातइति ॥ स्नानकरकें शांतरूपशील स्वभाववान् होय संध्योपासन पूजा सेवा कर श्वेतवस्त्र धारणकरकें मंगलके अर्थ आशिषकर मौनधार जाको शाकुन होय ताकूं संगलेकें दिनके पिछले प्रहरमें तोरणके पश्चिमद्वारेके समीपजाय ॥१३॥ शिलातलइति ॥ शिलाके ऊपर अष्टदलकमलकरकें ताकमलमें सुवर्णकी अथवा चांदीकी अथवा चूनकी कपिलमु-

ततोऽनुलिंपेत्सहलोकपालैः क्रमेणसर्वानपिचंदनेन आच्छाद्यशुक्लाहतवस्त्रयुग्मैः शुक्लेनसूत्रेणाविवेष्टयेत्तान् १५ बल्यर्घपुष्पाक्षतधूपदीपैरभ्यर्चयेद्दक्षिणयाचसर्वान् होमोदशांशेनचमंत्रजापात्ततोविधेयोमधुनासामिद्भिः १६

॥ टीका ॥

ततइति ततः स्थापनानंतरं सर्वानपिचंदनेन अनुलिंपेत् कैः लोकपालैः सह पुनः किंकुर्यात् शुक्लाहतवस्त्रयुग्मैरिति शुक्लानिश्वेतानि अहतानि अखंडितानिसदशानिवायानि वस्त्रयुग्मानितैस्तैराच्छाद्य तान्पूर्वोक्तान् शुक्लेनसूत्रेणाविवेष्टयेत् १५ बल्यर्घइति सर्वान् तानभ्यर्चयेत्पूजयेत् कैः बल्यर्घपुष्पाक्षतधूपदीपैरिति बलिः भक्ष्यवस्तुनः पुरोटौकनं अर्घः जलभृतपात्रस्यपुरः स्थापनं पुष्पाणिप्रसिद्धानि अक्षताः तंडुलाः धूपः पूर्वंप्रतिपादितः दीपः प्रसिद्धः दक्षिणयाचेति दक्षिणा होमानंतरं ब्राह्मणेभ्यो दानार्हं द्रव्यंतथा ततः अभ्यर्चनानंतरंमंत्रजापात् मधुना क्षौद्रेणसमिद्भिः होमोविधेयः केनदशांशेनदशमभागेनेत्यर्थः १६

॥ टीका ॥

निकी मूर्ती बनायकरकें स्थापन करे और श्यामाको युगल नाय स्थापन करे ॥ १४ ॥ ॥ततइति ॥ ॥ स्थापन किये पीछें लोकपाल देवतानकरकें सहित चंदनकर लेपन करे फिर अखंडित श्वेतवस्त्रनके युग्मलेके आच्छादनकरकें फिर सबकूं श्वेतसूत्रकर वेष्टन करे ॥ १५ ॥ बल्यर्घइति ॥ फिर उनकों अर्घ पुष्प अक्षत धूपदीप बलि भक्ष्य और दक्षिणा इनकरकें पूजन करे तापीछें जायतें दशांशासहत और समिधाकरकें हवन करनो ॥ १६ ॥

मंत्रप्रतिष्ठार्चनजाप्यहोमेष्वावाहनेचैवनियोजनीयः पृष्ठेदिनेशंप्रविधायकुर्यात्सूर्वोदितंसर्वमुदारचेताः१७ मंत्रः ॐ नमो भगवति पोतकि कृष्णशकुनिश्वेतपक्षिणि पांडवोपकारिणि पांथोभयतरप्रचारिणि वृक्षगुल्मलतावासिनि सर्वांगसुंदरि सर्वकार्यार्थसाधिनि देवि दिव्यमूर्तिधरे सत्यवादिनि आगच्छ २ ममचिंतितंकार्यंसत्यंब्रूहि २ ॐ ह्रींफट्स्वाहा ॐ ह्रींप्रजापतयेस्वाहा अयंमंत्रः

॥ टीका ॥

मंत्रइति एषः मंत्रः प्रतिष्ठार्चनजाप्यहोमेषु आव्हानेचनियोजनीयः तत्रप्रतिष्ठा सर्वेषांसम्यक् प्रकारेण स्थापनं अभ्यर्चनंचंदनादिनानुलिंपनं जाप्योजपः होमः पूर्वोक्तस्तेषु आवाहनं पूर्वोक्तानामाव्हानंतस्मिन्नर्थाद्विसर्जनेपि एतत्सर्वंपूर्वोदितंपृष्ठेपृष्ठभागे दिनेशंसूर्यंविधायकृत्वाकुर्यात् कीदृक् उदारचेताइति उदारं असंकुचितंचेतश्चित्तंयस्य सतथा पृष्ठेरविंविधायेति प्रतिपादनात् रजन्यामेवसर्वंकुर्यादित्यर्थोलभ्यते अथवा दिवसस्यचतुर्थप्रहर घटिका चतुष्कमारभ्य रात्रिघटिकाचतुष्टयंयावत्पश्चिमादिशः प्रदीप्तवान् तावत्सूर्यस्य पृष्ठविधानत्वं युक्तमित्यर्थः मंत्रश्चायं ॐ नमोभगवतिपोतकि कृष्णशकुनिश्वेतपक्षिणि पांडवोपकारिणि पांथोभयतरप्रचारिणि वृक्षगुल्मलतावासिनि सर्वांगसुंदरिसर्वकार्यार्थसाधनि देवि दिव्यमूर्तिधरेसत्यवादिन्यागच्छ२

॥ भाषा ॥

॥ मंत्रइति ॥ मूलमें उपर कह्यो जो मंत्र तासूं प्रतिष्ठा देवतानको स्थापन - ओर चंदनादिककरकें लेपन करनो जय होम आवाहन या एकही मंत्रसूं सब करनो निर्जनवनमें सूर्यपश्चिममें जाय जबसुं करे अर्थात् रात्रीमें संपूर्ण करे

ज्ञानमुद्रयैकमंकितंकरंपुस्तकेनचिन्हितंतथापरं बिभ्रतींहिमेंदुकुंददीधितिं पंकजासनांस्मरेत्सरस्वतीम् १८ ततोगृहीत्वाखटिकांस्वकार्यंशिलातलेतत्रशुभे वि लिख्य सिद्ध्यात्विदंमेभगवत्यविघ्नादुक्तेति देव्यैविनिवेदनीयं १९ ततो ऽर्चयित्वाऽखिलतोरणानिविवेष्टयेत्पांडुरवस्त्रसूत्रैः उदीरयेन्मंत्रमथार्जुनस्यनामानिनामानिचकृष्णिकायाः २०

॥ टीका ॥

मम चिंतितंकार्यंसत्यंब्रूहि २ ॐ ह्रीं फट् स्वाहा ॐ ह्रींप्रजापतये स्वाहा १७ ज्ञानमुद्रयेति पूर्वमेवव्याख्यातम् १८ ततइति ततः तदनंतरं इति देव्यैविनिवेदनीयं किंकृत्वाइत्युक्त्वाइतीति किं हे भगवति ममेदं कार्यमविघ्नात्सिद्ध्यतु किंकृत्वा खटिकांगृहीत्वा तत्रतस्मिन् शुभे शिलातले स्वकार्यं विलिख्य लिखित्वा १९ ततइति - ततः स्वकार्यनिवेदनानंतरं अखिलतोरणानि अर्चयित्वापांडुरवस्त्रसूत्रैः श्वेतवसनसूत्रैः विवेष्टयेत् ततः मंत्रमुदीरयेत् उच्चारयेत् अर्जुनस्य नामानि कृष्णिकायाश्च पोदक्यानामान्युच्चारयेदित्यर्थः २०

॥ भाषा ॥

एक हाथमें ज्ञानमुद्रा दूसरे हाथमें पुस्तक धारण करे चंद्रमा और कुंदके पुष्पकीसी कांति धारण करें और कमलासनमें स्थित एसी सरस्वती ता य स्मरण करे॥१८ ॥ततइति॥ खडियासूं शिलाके तलें अपनो कार्य लिख करकें उनके अगाडी हे भगवती मेरो कार्य निर्विघ्न पूर्वक सिद्ध होय एसें कहकरकें देवीके अर्थ अपनो कार्य निवेदन करे॥१९॥ ततइति॥ तापीछें सवतोरणनको अर्चनकरकें श्वेतवस्त्र सूत्रकर वेष्टनकरे फिर पूर्वकह्यो जोमंत्र और अर्जुनके कृष्णिकाके नाम तिनें उच्चारण करे ॥ २०॥ ॥छ॥

अर्जुनः फाल्गुनः पार्थः किरीटीश्वेतवाहनः बीभत्सुर्विजयीकृष्णः सव्यसाचीधनंजयः २१ इत्यर्जुननामानि अथपोदकीनामानि श्यामावराहीशकुनी कुमारी दुर्गाचदेवीचटकातथोमा त्वंपोदकीपांडविकात्वमेवत्वंकृष्णिकात्वंसितपक्षिणीच २२ त्वंब्रह्मपुत्रीशकुनैकदेवी धनुर्द्धरीपांथसमूहमाता प्रत्यक्षरूपाभगवत्यमोघेनमोस्तुतुभ्यंकुरुमेर्थसिद्धिं २३ युग्मं ग्राम्येणतुल्यश्चटकेननीलोयोसौपुमान्पांडुरपुंड्रपक्षः ॥

॥ टीका ॥

अथार्जुननामान्याह अर्जुनःफाल्गुनःपार्थःकिरीटीश्वेतवाहनः बीभत्सुर्विजयीकृष्णः सव्यसाचीधनंजयः २१ गवार्थोन्यर्जुननामानि अथ पोदकीनामानि श्यामाइति श्यामावराहीशकुनी कुमारीदुर्गाचदेवीचटिकातथोमा त्वंपोतकीपांडविकात्वमेवत्वंकृष्णिकात्वंसितपक्षिणीच २२ त्वंब्रह्मपुत्रीशकुनैकदेवीधनुर्द्धरीपांथसमूह माता प्रत्यक्षरूपा भगवत्यमोघेनमोस्तु तुभ्यंकुरुमेर्थसिद्धिं २३ युगलंगतार्थं ग्राम्येणेति ग्राम्येणचटकेनतुल्यवर्णोननीलः यः सपुमान् कीदृक् पांडुरैपुंड्र

॥ भाषा ॥

अर्जुनेति॥ अर्जुनःफाल्गुनः पार्थः किरीटीश्वेतवाहनः बीभत्सुर्विजयीकृष्णः सव्यसाचीधनंजयः ॥ येदशनाम अर्जुनके हैं ॥२१॥ श्यामेति ॥ श्यामावराहीशकुनीकुमारी दुर्गा देवी चटिका उमा तुमही पोदकी तुमही पांडविका तुमही कृष्णिका हों तुमही श्वेतपक्षिणी हो ॥२२॥ ग्राम्येणेति॥ तुमही ब्रह्मपुत्री हो तुमही शकुनकी एकदेवी हो तुम धनुर्द्धरीपांथसमूहकी माता हो तुमप्रत्यक्षरूपा हो हे भगवती हे अमोघे तुमारे अर्थ नमस्कारहो तुम मेरी अर्थसिद्धि करो ॥२३॥ ग्राम्येणेति ॥ ग्राममें चिडी होय इन-

लघ्वीततोधूमनिभाचनारीतत्पोदकीयुग्ममुदाहरंति २४ विलोकितेपक्षिणितत्रतस्मैससमंत्रकोर्घः शिरसानिवेद्यः दृश्येतचेत्पांडविकानतास्मिन्नर्घस्त्तदातोरणएवदेयः २५ भक्त्याततःशाकुनिकंप्रपूज्यतांपक्षिपूजांविनिवेद्यतस्मै ध्यात्वास्वकार्यंहृदयेनसर्वंगच्छेत्स्वगेहंविहितप्रणामः २६

॥ टीका ॥

पक्षौयस्यसतथा पुंड्रं तिलकस्यस्थानं गृह्यते यद्वा पुंड्रौपुष्टावित्यर्थः ततोलघ्वीधूमनिभा धूमसदृशावर्णा नारीतत्पोतकीयुग्ममुदाहरंति कथयंतीत्यर्थः २४ विलोकितेति तत्रतस्मिन्प्रदेशे विलोकिते दृष्टेपक्षिणि तस्मैशकुनायसमंत्रकोऽर्घः मंत्रेणसहवर्तमानः मंत्रोच्चारणपूर्वकं अर्घः शिरसाप्रणम्येतिशेषः निवेद्यः निवेदनीयः चेद्यदि तस्मिन्प्रदेशेपांडविकापोदकीनदृश्येत तर्हि अर्घस्तोरणेएवदेयः प्रदातव्यइत्यर्थः २५ भक्त्येति ततस्तदनंतरं पुनः सः स्वगेहंगच्छेत् कीदृग्विहितप्रणामइति विहितः कृतः प्रणामोयेनसतथा किं कृत्वाप्रपूज्यपूजांविधायकं पूर्वोक्तभक्त्याशाकुनिकं शकुनाचार्यं पुनः किं कृत्वा तांपक्षिपूजां तस्मैगुरवेनिवेद्य पुनः किं कृत्वा स्वकार्यंनिकाममत्यर्थं हृदयेन मनसि ध्यात्वा

॥ भाषा ॥

की तुल्य होय नीलवर्ण जाको होय और श्वेतवर्णके और पुष्ट एसे जाके पंख होंय जो एसो होय सो तो पुरुष जाननो और जो छोटी होय धूमको सोवर्ण जाको होय वो स्त्री जाननी इनकूं पोदकीको युग्म कहें हें ॥२४॥ विलोकितेइति ॥ ये पक्षी जो दीखे तब ता पक्षीके अर्थ मंत्र बोलकर मस्तक नमाय अर्घ निवेदन करे वाईसमें तोरणमेंही अर्घ देनो योग्यहे ॥२५॥ भक्त्येति ॥ तापीछें भक्तीकरकें शकुनके आचार्यकी पूजा करकें वो जो पक्षीकी पूजा गुरुनकूं निवेदन करकें

मंत्रोर्जुनाख्याः शकुनेस्तथाख्याः सर्वत्रपूजादि
विधौप्रयोज्याः पूजांविदध्याद्भवनेवनेचहोमो
दशांशेनजपाद्विदध्यात् २७ भोजयेदथगुडा-
ज्यपायसैः श्रद्धयाकतिपयाः कुमारिकाः आ
त्मनापिविदधीतभोजनंतद्गुरुस्वजनबंधुभिःसमं
२८ ततोरजन्यांसमुदीर्यमन्त्रंध्यात्वाचदेवींवि-
धिनोदितेन विचार्यकार्यंमनसासमस्तंशयीत
भूमौविजनेव्रतस्थः २९

॥ टीका ॥

विसृज्य २६ मंत्रइति मंत्रःपूर्वोक्तः अर्जुनाख्याःअर्जुननामानि तथा शकुनेःपांडविकायाः आख्याः सर्वत्रपूजाविधौप्रयोज्याःपूजांभवनेगृहेविदध्यात्वनेचजपात्दशांशेनतद्दशमभागेनहोमःविदध्यात् २७ भोजयेदिति अथेतिगृहपूजानंतरंकतिपयाःकुमारिकाः श्रद्धयाभोजयेत्कैः गुडाज्यपायसैरिति गुडः प्रसिद्धः आज्यंसर्पिः पायसं दुग्धं वा परमान्नंतैरित्यर्थः आत्मनापिस्वयमपितद्भोजनंविदधीतकथंसमंसहकैस्तद्गुरुस्वजनबंधुभिरिति सचासौगुरुश्चेतितद्गुरुःशकुनाचार्यःस्वजनाः प्रतीताः बांधवः भ्रातरःतैः सार्द्धमित्यर्थः २८ ततइति पूर्वमेवव्याख्यातं २९

॥ भाषा ॥

अपने हृदयमें कार्यविचारकें गुरूनकूं नमस्कारकर फिर अपनेघरकूं गमनकरे॥२६॥ मंत्रइति॥ घरमें वावनमें पूर्व कह्योजो मंत्र ओर अर्जुनकेनाम ओर श्यामाके नाम ये सर्व पूजाविधीमें उच्चारणकरे ओरजपतें दशांसहवनकरे॥२७॥ भोजयेदिति॥ पूजा करे पीछें श्रद्धाकर गुड घृत पायस इनकरकें कितनी कुमारी कन्या जिमावे फिर गुरुस्वजनभैया बंधु इनसहीत आप भोजन करे ॥२८॥ ॥ ततइति॥ इतनो करे पीछें व्रती रात्रीमें मंत्रउच्चारण कर विधिपूर्वक देवीको ध्यान करे मनमें सर्व कार्यविचारकरकें वनमें वा घरमें पृथ्वीमें शयन करे॥२९॥

अथप्रभातेऽभ्युदितेदिनेशेसहायवान्निर्मलशुक्लवासाः भूयःसमंशाकुनिकेनयायादनाकुलस्तोरणभूमिभागं ३० श्यामांपुरस्तादवलोक्यतस्मिन्नुदीर्यमंत्रंकुसुमाक्षताभ्यां विधायपूजांप्रविधायपृष्ठे दिनाधिनाथंशकुनानिपश्येत् ३१ तिरोहितेतत्रचतोरणांते निरूप्यभद्राण्यशुभानितद्वत्श्यामायुगस्यांगविचेष्टितानि कल्प्यंफलंतादृशमात्मकार्ये ॥ ३२

॥ टीका ॥

अथेति अथानंतरं भूयःपुनरपिशाकुनिकेनशकुनाचार्येणसमंतोरणभूमिभागंयायात् कस्मिन्प्रभाते अभ्युदितेउदयंप्राप्तेदिनेशेसूर्येसतिसहायवानिति स्वल्पपरिच्छदयुक्तः पुनः कीदृशः निर्मलशुक्लवासाइति निर्मलंशुक्लंवासोयस्यसतथापुनःकीदृशः अनाकुलःस्थिरचित्तः ३० श्यामामिति तस्मिन्तोरणेश्यामांपुरस्तादग्रेऽवलोक्यमंत्रमुदीर्यकुसुमाक्षताभ्यांपुष्पतंडुलाभ्यांपूजाम् विधाय दिनाधिनाथंपृष्ठे पृष्ठभागे प्रविधायकृत्वाशकुनानिपूर्वोक्तानिपश्येद्विलोकयेत् ३१ तिरोहितइति तिरोहितेवृक्षाच्छादिते तत्रेतितास्मिन्तोरणांतेश्यामायुगस्य स्त्रीपुंलक्षणपोद्दकीयुगलस्यांगविचेष्टितानिभद्राण्यशुभानि अशुभानि

॥ भाषा ॥

॥ अथेति ॥ प्रभातसमयमें सूर्यको उदय होय तब सहायी मनुष्य दोतीनलेकें शुक्लवस्त्र पहरकें शकुनाचार्यकूं संगलेकें तोरणभागके वहां जाय ॥३०॥ श्यामामिति ॥ ता तोरणमें अगाडीश्यामाकूं देखकरकें मंत्रबोलकरकें पुष्पअक्षतनकर पूजाकरकें फिर सूर्यकूं पश्चिमदिशामेंकरकें पूर्व कहे जे शकुन तिन्हें विलोकन करे ॥३१॥ ॥तिरोहितइति ॥ वृक्षकर आच्छादन होय रह्यो ऐसो जो तोरणको समीप तहां -

प्रश्नेप्रशांतेननिरीक्षितेचेत्पक्षीभवेत्तत्करणीयनाशः
प्रश्नेप्रदीप्तेननिरीक्षितेचेत्पक्षीभवेत्तत्करणीयसि
द्धिः ३३ इतिपोदकीरुते अधिवासनप्रकरणंप्र
थमं १ शांतदीप्तककुभादिविशेषः कथ्यतेऽ
साकिलायमशेषः हृद्गतेभवति यत्रमनुष्यः सर्व
थाशकुनसंविदध्व्यः ३४

॥ टीका ॥

तद्विपरीतानिनिरूप्य ज्ञात्वा तद्वत् श्यामायुगस्यांगविचेष्टितवत् पुरुषेण आत्मनः कार्ये तादृशंफलंकल्प्यंकल्पनीयं क्वचित्तोरणेनेतिपाठोदृश्यते तत्रतोरणेनकृत्वा तिरोहितइत्यर्थः कर्तव्यः ३२ प्रश्नइति प्रदीप्तेउग्रकार्यप्रश्नेसतिपक्षीचेत्ननिरीक्ष्यते तदा तत्करणीयसिद्धिर्भवेत् प्रशांते धर्मसंबंधिनि प्रश्ने पक्षीचेन्ननिरीक्ष्यते तदा तत्करणीयनाशो भवेत् ३३ इतिश्रीशत्रुंजयकरमोचनादि सुकृतकारि महोपाध्यायश्रीभानुचंद्रगणिभिः विरचितायांवसंतराजटीकायांपोतकीरुतेअधिवासनप्रकरणंप्रथमं १ शांतदीप्तेति अथास्माभिःकिलइति सत्ये अयं अशेषः समस्तः शांतदीप्तककुभादिविशेषः कथ्यते प्रकटीक्रियते यत्रयस्मिन् इयंशांतादिक् इयंप्रदीप्तादिक् इत्यादिकोयोविशेषः त

॥ भाषा ॥

श्यामा सुगकी चेष्टा शुभ असुभ विपरीत जानकरकें फेरपुरुष ना श्यामासुगके अंगकी चेष्टाकी सीनाई अपनें कार्यमें फल जाननों ॥ ३२॥ प्रश्नइति ॥ धर्मसंबंधी प्रश्न होय और जो पक्षीनदीखे तो कार्यको नाश होय और जोउग्र कार्यको प्रश्नहोय पक्षी जो न दीखे तो कार्यकी सिद्धी होय ॥ ३३ ॥ इतिश्री वसंतराजशाकुनभाषाटीकायांपोदकीरुते आधिवासनप्रकरणंप्रथमं ॥ १ ॥ शांतदीप्तेति ॥ शांता दीप्तादिक आठदिशा अब कहें हें जो मनुष्य इनकूं मनमें जानतो रहे तो सर्वथा

दग्धादिगैशीज्वलितादिगैंद्री संधुक्षिताचाऽनिल-
दिक्क्रमेण रात्र्यंतयामार्द्धमभिप्रवृत्य स्या
द्यावदर्द्धप्रहरोदिनस्य ३५ ईदृशांविषुवतोर्भ
वेद्वयोर्दक्षिणायनदिनेतुशांकरी ॥

॥ टीका ॥

स्मिन्दृढकृते मनसि धृतेमनुष्योमानवः सर्वथाशकुनसंविच्छकुनज्ञानंतस्या अधृष्यः शार्पितुंतिरस्कर्तुमशक्योभवतीत्यर्थः ३४ दग्धादिगेशीति श्लोकद्वयंपूर्वमेवव्याख्यातं तथाप्यत्रव्याख्यायते ३५ ईदृशमिति रात्र्यंतयामार्द्धादारभ्य यावत्प्रभातेघटिकाचतुष्टयं तावद्दग्धादिगैशी ज्वलितादिगैंद्री संधुक्षिता अनलदिग्भवति ततः द्वितीयप्रहरे पूर्वदिग्दग्धा अग्निकूणि दीप्तादक्षिणादिग्धूमिता तृतीयप्रहरे अग्निदिग्दग्धा दक्षिणदिग्दीप्ता नैर्ऋतिर्द्धूमिता अन्याः पंचशांताः ततश्चतुर्थप्रहरे दक्षिणदिग्दग्धा नैर्ऋतिकूणिदीप्तापश्चिमदिग्धूमिता अन्याः पंचशांताः पंचमप्रहरेनैर्ऋतिर्दग्धापश्चिमदिग्दीप्तावायव्यकूणिर्धूमिता अन्याः पंचशांताः षष्ठेयामेपश्चिमदिग्दग्धा वायव्य

॥ भाषा ॥

शाकुनवेत्तानमें योग्य होय ॥३४॥ दग्धादिगैशीति॥ च्यार घडीके तडकेसुं लेकर दिनको अर्द्ध प्रहर होय तावत् ईशान दिशा दग्धा ओर ऐंद्री दिशा ज्वलिता ओर आग्निदिशा संधुक्षिता ॥३५॥ इदृशमिति॥ रात्रीके अंतयामको अर्द्धप्रहरतें लेकर जबतक प्रभातकी च्यार घडी तब तांई ईशानदिशा दग्धा ओर इंद्रकी पूर्व दिशा ज्वलिता ओर अग्निदिशा संधुक्षिता होयहै ता पीछें दूसरे प्रहरमें पूर्व दिशा दग्धा ओर अग्निकोण दीप्ता दक्षिण दिशा धूमिता ओर तृतीय प्रहरमें अग्निकोण दग्धा दक्षिणदिशा दीप्ता नैर्ऋति दिशा धूमिता ओर जे पांचो दिशातें शांता हैं ओर तापीछें चतुर्थ प्रहरमें दक्षिण दिशा दग्धा नैर्ऋति दिशा दीप्ता

पावकीज्वलतिचोत्तरायणेभस्मधूमसहितेतुपार्श्वयोः ३६

॥ टीका ॥

कूणिर्दीप्ता उत्तरदिग्धूमिता अन्याः पंचशांताः सप्तमे प्रहरे वायव्यकूणिर्दग्धा उत्तरदिग्दीप्ता ईशानकुणिर्धूमिता अन्याः पंचशांताः अष्टमे प्रहरे उत्तरदिग्दग्धा ईशानकूणिर्दीप्ता पूर्वदिग्धूमिता अन्याः पंचशांताः पुनः प्रभातेपूर्वोक्तमेवईदृशांदग्धादिस्वरूपंविषुवतोर्द्वयोर्मेषतुलयोर्भवेत् समरात्रिंदिवेकालेविषुवद्विषुवंचनदित्युक्तेस्तत्रैव तत्संभवात्तुपुनः दक्षिणायनदिने कर्काद्यदिनेशांकरीईशानदिक् ज्वलति तथा उत्तरायणदिने मकराद्यदिनेपावकीवान्हिदिग्ज्वलति तत्पार्श्वयोर्भस्मधूमसहितेभवतः अयमर्थः यदाशांकरी ज्वलिता तदाउत्तराभास्मिता पूर्वाधूमिता यदापावकी ज्वलिता तदा पूर्वाभास्मिता दक्षिणा धूमितास्यात् ३६

॥ टीका ॥

पश्चिम दिशा धूमिता और पांचो दिशा शांता और पंचम प्रहरमें नैर्ऋति दिशा दग्धा पश्चिम दिशा दीप्ता वायव्यकोण धूमिता और पांचो दिशा शांता छठे प्रहरमें पश्चिम दिशादग्धा वायव्यदिशादीप्ता उत्तरदिशा धूमिता और पांचो दिशा शांताहें और सातमें प्रहरमें वायव्य कूणा दग्धा उत्तरदिशा दीप्ता ईशान दिशा धूमिता और पांचो दिशा शांता आठमे प्रहरमें उत्तर दिशा दग्धा ईशानकूण दीप्ता पूर्व दिशा धूमिता और पांचो दिशा शांतामेष तुलके सूर्य होंय तब दक्षिणायन उत्तरायण काल होंयहें दक्षिणायनदिनमें ईशान दिशाज्वलति और उत्तरायण दिनमें अग्नि दिशा ज्वलति इनके पस वाडेनकी दिशा भस्मा धूमवती अर्थात् जब शांकरी जो ईशान दिशा ज्वलिता होय तब उत्तरदिशा भस्मिता और पूर्व दिशा धूमिता और जब अग्निदिशा ज्वलिता होय तब पूर्वदिशा भास्मिता और दक्षिण दिशा धूमिता होय या प्रकार जाननो ॥३६॥

अर्द्धेदिनस्यप्रहरेवशिष्टेयावन्निशायाःप्रहरार्द्धमा
द्यम् स्यात्पश्चिमाशारविणात्रगूढागम्योज्झितें
धूमितभस्मवत्यौ ३७ प्रत्येकमेवंसततंसुमेरोः
प्रदक्षिणाभ्यागमनेनसर्पन् दिवारजन्योःप्रहरा
ष्टकेनभुंक्तेदिशोष्टौसविताक्रमेण ३८ दग्धादि
गुप्ता दिननाथमुक्ताविवस्वदाप्ताभवतिप्रदीप्ता सा
धूमितायांसविताप्रयाताशेषादिगंताःखलुपंचशांताः ३९
दग्धप्रदीप्तोद्धतधूमशांतदिशांयदा सांस्थितमन्तराले

॥ टीका ॥

तदेवदर्शयतिअर्द्धइतिगतार्थं ३७ प्रत्येकमिति एवंपूर्वोक्तप्रकारेणप्रत्येकंदिग्विभागंप्रहरमात्रावस्थायित्वेनसवितासूर्यः क्रमेणपरिपाट्या अष्टौदिशः भुंक्तेकेनदिवारजन्योःप्रहराष्टकेनकिंकुर्वन्सर्पन्गच्छन्सुमेरोः प्रदक्षिणाभ्यागमनेनेति प्रदक्षिणया अभ्यागमनंपर्यटनंतेनसुमेरोः प्रदक्षिणांकुर्वन्नित्यर्थः ३८ दग्धेति पूर्वव्याख्याते ३९ दग्धइति -

॥ भाषा ॥

अर्द्धइति ॥ दिनके प्रहरको अर्धवाकी रहे और जव तांई रात्रिके आद्यप्रहरको अर्द्ध तव तांई पश्चिमा दिशा सूर्यकरकें व्याप्त होय और जो सूर्य जाकूं छोडीया ये और जा दिशाकूं अगाडी जांयगे ये दोनो दिशा धूमिता भस्मवती कहें हें ॥ ३७॥ प्रत्येकमिति ॥ एक एक दिशानमें एक एक प्रहर स्थित होयकर सूर्य क्रमकरकें सुमेरुपर्वतकूं दक्षिणावर्त करत रात्रिदिनके आठप्रहरकरकें आठों दिशानकूं भोगेहें ॥ ॥३८॥ दग्धेति ॥ सूर्य जा दिशाकूं छोडदें हें बाकी दग्धा संज्ञा हे और सूर्य जा दिशामें प्राप्त होंय वो दिशा प्रदीप्ता कहें हें और सूर्य जा दिशामें अगाडी जापो चाहें हें वो दिशा धूमिता और पांचो दिशाकी शांता संज्ञा हे ॥३९॥ दग्धइति ॥ दग्धा प्रदीप्ता धूमा शांता इन दिशानके मध्यमें स्थित जो दोनो दिशानको शेष

शेषंतदाशायुगलंविमिश्रमाहुर्यथासन्नफलंफलज्ञाः ४० यस्यांस्थितोर्कस्तदुपक्रमेणादिग्ज्वालिनीधूमवतीनदन्या छायाजलाकर्दमिताधरित्रीभस्मान्वितांगारवतीनथेति ४१ उक्तानिनामानिदिशामिमानिफलान्यथासां प्रतिपादयामः दिशिज्वलंत्यांमरणंरणेस्यात् संधुक्षितायांसकलार्थनाशः ४२

॥ टीका ॥

आसांदग्धप्रदीप्तोद्गतधूमशांतदिशां यदंतराले आशायुगलं तत्फलज्ञाः विमिश्रमाहुः कीदृग्यथासन्नफलमिति यथायेनप्रकारेणयदासन्नंपूर्वोक्तदिशां तत्सदृशंफलंयस्यसतथा ४० यस्यामिति यस्यामर्कः स्थितः उदयंप्राप्तस्तदुपक्रमेणतत्परिपाट्याइमा दिशोज्ञेयाः यस्यांरविःस्थितः सादिग्ज्वालिनी तदनंतरंधूमवतीततोन्याछायाततः अन्यथाजला ततः कर्दमिताततोधरित्री ततोभस्मान्वितातथा अंगारवती ४१ उक्तानीति दिशामिमानिनामानि उक्तानि कथितानि अथासांफलानि

ई॰ अंगारवती	पू॰ ज्वालिनी	आ॰ धूमवती
उ॰ भस्मान्विता	इदं प्रभाते यन्त्रम्	छाया द॰
धरित्री वा॰	कर्दमिता प॰	जला नै॰

॥ भाषा ॥

रह्यो दिशानको युगल ताकूं फल जानवेवाले विमिश्रनाम पूर्व दिशानकी सदृशफल जाको नाम सो विमिश्र कहें हें ॥ ४० ॥ यस्यामिति ॥ जा दिशामें सूर्यस्थित होय वो दिशा ज्वालिनी तातें अगाडी धूमवती तातें अगली छाया तातें अगली जला तातें अगली कर्दमिता तातें अगली धरित्री तातें अगली भस्मान्विता तातें अगली अंगारवती ॥ ४१ ॥ ॥उक्तानीति ॥ दिशानके नाम कहे अब दिशानके फल कहें हें ज्वालिनी दिशामें शकु-

छायाजलाकर्दमितासुदिक्षुजयोधरित्र्यांकथितोर्थलाभः स्यात्भस्मितांगारितयोर्दिशस्तुजीवप्रणाशः शकुनोदयेन ४३ अन्यत्रसंक्रांतिचतुष्टयात्तुभेदः स्वबुद्ध्याककुभांविभाव्यः चलोरविः शश्वदुपेतियातितस्मादसौसोमयमाधिवासे ४४ दिक्कालचेष्टागतिभावशब्दस्थानैःशुभैःसप्तविधःप्रशान्तः

॥ टीका ॥

वयंप्रतिपादयामः कथयामः ज्वलंत्यांदिशिशकुनोदयेन रणेमरणंस्यात् संधुक्षितायांशकुनोदयेन सकलार्थनाशःस्यात् ४२ छायेति छायाजलाकर्दमितासु दिक्षु शकुनोदयेनजयःस्यात् धरित्र्यामर्थलाभःकथितः भस्मितांगारितयोर्दिशोः शकुनोदयेनजीव प्रणाशःस्यात् ४३ अन्यत्रेति संक्रांतिचतुष्टयात्पूर्वोक्तादन्यत्र अष्टसुसंक्रांतिषु ककुभांदिशां भोगः रवेरितिशेषः स्वबुद्ध्याविभाव्य विचार्य यस्माच्चलोरविः शश्वत् निरंतरं सोमयमाधिवासे सोमश्चंद्रोयमः कृतांतः अनयोर्द्वंद्वः एतयोरधिवसनं अधिवासोययोस्ते तथोक्ते दिशोउत्तरदक्षिणेउपेति आगच्छति यातिततोऽन्यत्रदिक्षुयातीतिभावः ४४ अथदशप्रकारेषुशांतदीप्तेषुसप्तानामेवात्रसोपयोगित्वात् तानेवाह दिक्कालेति दिक्कालचेष्टागतिभा-

॥ भाषा ॥

नको उदय होय तो रणमें मरै ओर संधुक्षितादिशामें शकुन होयतो सकल अर्थको नाश होय ॥ ४२॥ छायेति॥ छाया जला कर्दमिता इनदिशानमें शकुन होय तो जय होय ओर धरित्रीमें होयतो अर्थ लाभ होय ओरभस्मिता अंगारिता इनकी दिशानमें शकुनको उदय होयतो जीवको नाश होय ॥ ४३ ॥ अन्यत्रेति॥ पूर्व कह्या ये च्यार संक्रांति इनतें ओरजो आठ संक्रांति तिनमें दिशानको भेद सूर्यसूं हे सो अपनीबुद्धीसूं विच्यारकरकें सूर्य चलहे सो निरंतरउत्तर दक्षिणमें प्राप्त होय हे तातें ओर दिशानमें फिर एतेंही जाननो ॥४४॥

॥ दिक्कालेति ॥

भवेत्पुनस्तैरशुभैः समस्तैः सप्तप्रकारः शकुनः प्रदीप्तः ४५ अभस्मिताद्याः ककुभः प्रशस्ताविष्ट्यादिदोषैरहितश्चकालः अवामचेष्टागतिरप्यऽवामा भवेत्प्रसन्नोमधुरोविरावः ४६ स्थानमनोहारि तदेतदेवंसप्तप्रकारंकथयंतिशांतं सप्तप्रभेदंपुनरेतदेववदन्तिदीप्तंविपरीतभावात् ४७

॥ टीका ॥

वशब्दस्थानैः शुभैः सप्तविधः प्रशांतः स्यात्पुनस्तैरशुभैः समस्तैः सप्तविधः शकुनः प्रदीप्तोभवेत् ४५ अभस्मिताद्याइति भस्मितादिवर्जिताः ककुभः पंचदिशः सर्वकालंसदैव प्रशस्ताः शांताइत्यर्थः विष्ट्यादिदोषैः रहितश्चकालः प्रशांतइत्यर्थः विष्टिस्वरूपंत्वेवंकृष्णेच त्रिदशारात्रौ दिवा सप्तचतुर्दशी एकैकतिथिरन्ध्यातु शुक्ले विष्टिः प्रकीर्तिताइति आरंभसिद्धौ अवामचेष्टा दक्षिणाचेष्टाप्रशांता गतिरप्यवामा दक्षिणाप्रशांता भावोध्यवसायः प्रसन्नः प्रशांतः विरावो ध्वनिः मधुरः अक्रूरः प्रशांतः ४६ स्थानमिति मनोहारिस्थानं शांतंतदेवंपूर्वोक्तप्रकारेण सप्तविधं शांतंकथयंति पुनः एतदेव पूर्वोक्तं सप्तप्रकारं विपरीतभावाद्दीप्तंकथयंति ४७

॥ भाषा ॥

दिशा काल चेष्टा गति भाव शब्दस्थान ये शुभ होंय तो इन करकें सात प्रकारको प्रशांत होंयहें ओर पुनः ते अशुभ होंयतो इन करकें सात प्रकारको शकुन प्रदीप्त होयहे ॥४५॥ अभस्मिताद्याइति ॥ भस्मितादिक करकें वर्जित पांचो दिशा तिनकीशांतासंज्ञाहे ओर भद्रादिक दोष करकें रहित काल सो प्रशांत हे ओर दक्षिणा चेष्टागती ये दोनों शांता हें ओर मधुरशब्द होय तो प्रशांत शकुन जाननो ॥४६॥ ॥स्थानमिति॥ मनकूं हरे एसो सुंदरस्थान सोची शांतहे या प्रकारकर सात प्रकारकोशांत कहेंहें फिर विपरीतभावनें याही सात प्रकारकरकें दीप्त कहेहें ॥४७॥ ॥

एषांचमध्यात्ककुभादिकानांजातेषुशांतेष्वधिकाधि
केषु शुभंनराणामधिकाधिकंस्यात्तद्वत्प्रदीप्तेष्व
शुभंप्रदिष्टं ४८ एवंविधंशांतमथप्रदीप्तंजाना
तियः शाकुनिकः सएव शान्तप्रदीप्तस्यचयो
विशेषंनवेत्तिनोवेत्तिसकिंचिदेव ४९ इति
पोदकीरुते शान्तप्रकरणंद्वितीयम् २

॥ टीका ॥

एषामिति एषांसप्तानांककुभादिकानां मध्यादधिकाधिकेषु शांतेषु जातेषु तदा नराणामधिकंशुभंस्यात् सप्तसुशांतेषुकागणनात्तद्वत्प्रदीप्तेषु अधिकाधिकेषु जातेष्वशुभमाधिकं प्रदीष्टं कथयंति ४८ एवंविधमिति एवंविधंपूर्वप्रतिपादितंशांतं अथच प्रदीप्तंयोजानाति सएव शाकुनिकः शाकुनज्ञाता यः शांतप्रदीप्तस्यविशेषंनवेत्ति स नकिंचिदेववेत्ति किमपिनजानातीत्यर्थः ४९ इतिश्रीमहोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायांवसंतराजटीकायां पोदकीरुते द्वितीयं शांतप्रदीप्तंप्रकरणम् २ ॥ छ॥ ॥ छ॥

॥ भाषा ॥

समीहितं वांछितं तन्निश्चितं सिद्ध्यति सिद्धिंप्राप्नोति १३७ पूजादिन
इति यदि पूजादिने अधिवासनदिनेवामागतिः स्यात् शकुनेक्षणेपि

॥ भाषा ॥

वशीभूत करे ओर जो कहूं तीसरीवी वामा होय तो वा ईसमें धनजीवको नाश करे ॥१३५
॥तारेति॥ पूजन कर रह्यो होय वाकूं दिनमेंही तारा दीखजाय फिर शकुनदेखती विरि
यां वामा होयदिनमेंही तो ब्रह्मपुत्री जो पोदकी सो मनुष्यनकूं शुभ दिखाय करकें फिर
सर्व कार्य शीघ्रही नाश करैहै ॥१३६॥ प्रदक्षिणेति ॥ जो पूजा करती समयमें जेमने
माऊं दीखे ओर फिर शकुनदेखती समयमें वी जेमनी दीखे तो मनुष्यनके चित्तमें जो
वांछित्त होयसो निश्चयही सिद्ध होय ॥१३७॥ पूजादिनइति॥ जो पूजाके दिन-

चिकीर्षितंवस्तुतदासमस्तंब्रवीत्यसौसिद्धिसुखवादपास्तं १३८ तारागतिर्यद्यधिवासनेस्यान्निवर्तमानस्यचयातिवामा मनोरथाःशाकुनिकस्यतस्य प्रयांतिसिद्धिंसकलास्तदानीं १३९ भूत्वानुलोमायदियातिवामाकार्यंतदासिद्धमपिप्रणश्येत् भूत्वोद्धतादक्षिणगामिनीचेद्विनाश्यकार्यंतदुपादधाति १४० एकाद्वितीयाशाकुनी तृतीयानिवर्तमानस्यनरस्ययस्य ॥

॥ टीका ॥

वामेवचेत्स्यात् तदाचिकीर्षितंकर्तुमिष्टंसमस्तंवस्तुसिद्धिसुखवादपास्तं निरस्तमसौब्रवीति कथयति १३८ तारेति यद्यधिवासने तारागतिःस्यात् पुनः निवर्तमानस्यवामायाति तदानींतस्य शाकुनिकस्यमनोरथाःसकलाःसिद्धिंप्रयांति १३९ भूत्वेति अनुलोमातारा भूतायदि वामायाति तदाकार्यंसिद्धमपिप्रणश्येत् उद्धतावामाभूत्वादक्षिणगामिनीचेद्भवति तदा कार्यंविनाश्यपुनस्तदेव कार्यमुपादधाति १४० एकेति शाकुनी देवी एकाद्वितीया तृतीया यस्यनिवर्तमा

॥ भाषा ॥

तारा वामगति होय ओर शकुन देखती समयमें जो वाम होय तो कार्यकी सिद्धी नही होय ॥ १३८ ॥ तारेति ॥ जो पूजासमयमें तारागति दक्षिणा होय फिर पूजासूं निवटे पीछें वामा हो जाय तो शकुनीके संपूर्ण मनोरथ सिद्धीकूं प्राप्त होंय ॥ १३९ ॥ भूत्वेति ॥ तारा अनुलोमा होय करकें जो वाम आय जाय तो सिद्धहुयो कार्यनाशकूं प्राप्त होयजाय ओर जो तारा वामहोय करकें फिर जेमनेमाऊं चली जाय तो कार्यकूं विनाश करकें फिर कार्यकूं करे ॥ १४० ॥ एकेति ॥ पूजासूं निरत्त हुये पीच्छें वाकूं जो तारा पहली दूसरी तीसरी वामविभागमें प्राप्त होय

अदक्षिणास्याद्दुररीकृतानिसिद्ध्यंतिकार्याण्यखिलानि
तस्य १४१ श्यामात्रयंगच्छतियस्यतारंचेष्टा
प्रदेशस्वरशांतरूपं निवृत्तिकालेऽभ्युपयातिवामं प्रा
प्नोत्यसावक्षयभूपतित्वं १४२ तारात्रयंस्यात्प्रथ
मंनिवृत्तौतारासमृद्ध्यैविपदेचपश्चात् वामात्रयंपू
र्वमथोनिवृत्तौवामापुरस्ताद्विपदेसमृद्ध्यै १४३

॥ टीका ॥

नस्यनरस्य अदक्षिणास्याद्वामविभागे याति नस्यनरस्य उररीकृता
नि अंगीकृतानि अखिलानिसमस्तानिकार्याणि सिद्ध्यंति १४१ श्या
मेति यस्यनरस्य चेष्टाप्रदेशस्वरशांतरूपमिति चेष्टाशरीरव्यापारः
प्रदेशः स्थानंस्वरः शब्दः एतेशांतायत्रैतादृशंरूपंस्वरूपंयस्य एवंवि
धंश्यामात्रयंतारंदक्षिणप्रदेशंगच्छति निवृत्तिकालेपुनः श्यामात्रयंवा
ममभ्युपयाति असौ अक्षयंभूपतित्वंप्राप्नोति १४२ तारेति प्रथ
मं प्रवृत्तौप्रवर्तनकाले तारात्रयंस्यान्निवृत्तौचैकताराभवति तदा प्र
थमंतारात्रयंसमृद्ध्यैभवति पश्चात्ताराविपदेभवति अथवानिवृत्तौनिव
र्तनकाले वामात्रयंपूर्वंभवति पश्चान्निवृत्तौवामाभवति सा वामा त्रयं

॥ भाषा ॥

तो वा पुरुषके समस्तकार्य सिद्ध होंय ॥१४१॥ श्यामेति। चेष्टा स्थान शब्द ये
जामें शांत होंय एसो स्वरूप जाको एसी श्यामाको त्रय पहली दूसरी तीसरी सो
दक्षिण भागमें होय फिर पूजा सूं निवृत्त कालमें वामभागमें आय जाय तो वो
प्राणी अक्षय पृथ्वीपति होय ॥१४२॥ तारेति॥ प्रथम पूजाकालमें तो तीनो
तारा होंय और पूजासुं निवृत्त हुये पीछें एक तारा होय तो पहली तारा समृद्धीके
अर्थ हे और पिछली तारा आपदाके अर्थ हे और तेसेंही पहली तीनो
तारा वांमा होंय फीछें पूजासूं निवृत्तिकालमें वामा होय तो पहली, वामा आप-

ताराथवामापुनरेवतारावामापुनर्मिश्रफलंब्रवीति अंतेभवेद्याबहुधापिभूत्वानिर्वाहमाहुःकिलतत्फलस्य १४४ अग्रेसरीस्त्रीमिथुनस्यमध्यात्तत्पृष्ठयायीपुरुषोयदिस्यात् सर्वंफलंसिध्यतितद्युवत्यां स्यात्किंचिदूनंनरपृष्ठगायां १४५ निरीक्षितादौयुवतिर्वरिष्ठास्यात्पूर्वदृष्टःपुरुषस्तदूनः ॥

॥ टीका ॥

पुरस्ताद्विपदेभवति पश्चात्समृद्धोस्यादित्यर्थः १४३ तारेति यदा प्रथमंतारा अथच पुनर्वामाभवेत् पुनरेवतारापुनर्वामा तदामिश्रफलं ब्रवीति तथाबहुधापिभूत्वाया अंतेभवेत् सा किलइतिसत्ये तत्फलस्यनिर्वाहमाह यद्यंतेवामास्यात् तदाफलस्यनिर्वाहः यद्यंतेनिवृत्तो तारातदाफलप्राप्तेरनिर्वाहः १४४ अग्रइति यदिमिथुनस्यस्त्रीपुरुषस्यमध्यादग्रेसरीस्त्रीस्यात् तत्पृष्ठयायी तस्याःस्त्रियः पृष्ठगामी पुरुषःस्यात्तदा सर्वंफलंसिध्यति तद्युवत्यां नरपृष्ठगायां सत्यां किंचिदूनंफलंस्यात् भवति १४५ निरीक्षितादाविति आदौनिरीक्षिता

॥ भाषा ॥

दाके अर्थ होय पीछेकी वामा समृद्धीके अर्थ है ॥१४३॥ तारेति ॥ प्रथम तारा नामदक्षिणा फिर वामा फिर तारा नाम दक्षिणा फिर वामा होय तो मिश्रित फल जाननो जो अंतमें वामा होय तो फलको निर्वाह जाननो ओर जो अंतमें पूजा निवृत्तीमें दक्षिणा होय तो फलप्राप्तीको निर्वाहबी न जाननो ॥१४४॥ अग्रइति ॥ जो पोदकीको मिथुन कहिये जोडा होय ओर वा जोडामेंसूं अगाडी स्त्री होय पिछाडी पुरुष होय तो सर्व कार्य सिद्ध होंय ओर पुरुष अगाडी होय ओर स्त्री पुरुषके पिछाडी होय तो कछूक न्यून फल होय ॥१४५॥ निरीक्षितादाविति ॥ जो प्रथम स्त्रीदीखे तो श्रेष्ट ओर जो प्रथम पुरुष दीखे तो वा स्त्रीसूं कछूक न्यून

वामांगतिंप्रत्यधिकाविहंगीप्रदक्षिणांप्रत्यधिकोविहं
गः १४६ प्रदक्षिणश्चेद्गमनेविहंगो निवर्तनेवामग
तिर्विहंगी अत्युत्तमास्यात्तदभीष्टसिद्धिः स्या-
न्मध्यमाजल्पतिवैपरीत्यात् १४७ ताराभवत्या
दिमतोरणांते वामाततश्चेन्नगुणोनदोषः तारोद्धृ
ते द्वेअपितेविहायतस्मान्मनुष्यैरपरागवेष्या १४८

॥ टीका ॥

युवतिः वरिष्ठास्यात् पूर्वदृष्टःपुरुषः तदूनोभवति तस्याः किंचिदूनंफलं
ददातीत्यर्थः यतः वामांगतिंप्रत्यधिकाविहंगी वर्तते प्रदक्षिणांगतिं प्र
त्यधिकोविहंगोवर्तते १४६ प्रदक्षिणेति चेद्गमने शकुनावलोकने
प्रदक्षिणस्तारः विहंगमः स्यात् पुनर्निवर्तने विहंगी वामागतिर्भवति
तदाभीष्टसिद्धिरत्युत्तमास्याज्जल्पति पुनःवैपरीत्यादभीष्टसिद्धिर्मध्य-
मास्यादिति जल्पति कथयति वैपरीत्यं तु प्रथमम् तारा विहंगी स्या
त् ततो निवृत्तौवामः विहंगःस्यादिति १४७ तारेति आदिमतोरणां
तेतारा भवति ततश्चेद्वामाभवति तदानगुणः नदोषः तारोद्धृते दक्षिण

॥ भाषा ॥

फल देवेहे ओर जो स्त्रीकी वामभागसें गति अधिक होय ओर पुरुषकी गती जे
मने भागमें अधिक वर्तती होय तो पूर्व कह्यो फल योग्य जाननो ॥१४६॥ प्रदक्षिणे
ति॥ जो गमनसमयमें शकुन देखनी समयमें पुरुषपक्षी दक्षिणावर्त होय ओर फिर
निवर्त होती समयमें स्त्री विहंगी वांई होय तो वांछित सिद्धी अति उत्तम होय ओर
जो विपरीत करकें होय अर्थात् गमनमें तो प्रथम विहंगी स्त्री होय जेमनी ओर
वहांसें निवृत्त होती समयमें पुरुषपक्षी वांयो होय तो मध्यमा जाननो ॥१४७॥
॥तारेति॥ जो प्रथम तोरणके अंतमें तारा दक्षिणावर्ती होय ता पीछें वामा हो
यवाको गुणभी नही ओर दोषभी नही तातें मनुष्य उन दोनोनकूं छोडकरकें -

आलोक्यतेक्वापिनतोरणांतेश्यामानिवृत्तौयदिचो
ग्रतारा तत्स्यादनर्थैकफलानराणांवामात्वभीष्टा
र्थफलंददाति १४९ निम्नतोव्रजतियासमुन्नतं
पोदकीभवतिसामहाफला व्यत्ययाल्लघुफला
समात्समंयातियासमफलाभवेत्तुसा १५० भया
पहावामरवावराहीप्रदक्षिणाभूरिफलंददाति ॥

॥ टीका ॥

वामेत्ते द्वे विहाय त्यक्त्वा तस्मान्मनुष्यैरपरागवेष्या गवेषणीया विलोकनीयास्यात् १४९ आलोक्यतइति क्वापितोरणांतेश्यामादेवीनालोक्यते यदिनिवृत्तौचेत्तारास्यात् तदाअनर्थैकफलेति अनर्थः कष्टं तदेकं फलं यस्याः सा तथा केषांनराणां तुपुनरर्थे वामा यदि एति तदा अभीष्टार्थफलं ददाति १४९ निम्नतइति यापोदकी निम्नतः नीचप्रदेशात् समुन्नतंउच्चप्रदेशं व्रजति सामहाफलाभवति व्यत्ययाद्याति वैपरीत्यात्समुन्नतात्स्थानान्निम्नंगच्छतीत्यर्थः सा लघुफला तुच्छफला भवति तुपुनः यासमात्समंस्थानंयातिसासमफलाभवेत् १५० जांघिकशकुनमाश्रित्याह भयेति भयात्तुः वराहीदेवी वामरवा वाम

॥ भाषा ॥

ओर तारा शकुनकूं ढूंडनो योग्यहै ॥१४८॥ आलोक्यतइति ॥ शकुनदेखती समयमें कहूंवी तोरण भागमें पोदकी नहीदीखे ओर निवृत्त होती समेंवी नदीखे तो अनर्थ कष्ट होय फिर वामा होय तोवी अभीष्ट अर्थ फल देवे ॥१४९॥ निम्नतइति॥ जो पोतकी नीचे स्थलसूं ऊंचेपे गमन करे वो महा फलके देवेवाली है ओर जो ऊंचेपे तें नीचे ये गमन करे तो तुच्छफलकी देवेवाली जाननी फेर जो समस्थान तें समस्थानकूं जाय तोसमफल होय ॥१५०॥ भयेति गमनकरवेवाले पुरुषकूं पोदकी वांईं बोले तो भयकूं दूर करे ओर जय करे ओर वो दक्षिण भागमें -

भयप्रदादक्षिणतःसशब्दाकुर्यान्मृतिंवामगतिःप्र
यातुः १५१ सव्यापसव्येयुगपल्लयंत्योश्यामेप्रश
स्तेखलुतोरणाख्ये वामास्थितादक्षिणकायचे-
ष्टावृद्ध्यैफलस्यद्रुममाश्रयंती १५२ ताराव्रजित्वा
शकुनैकदेवीस्थितिंविधत्तेयदिकुप्रदेशे स्यात्क्षे
ममात्रंगमनोद्यतानांफलंतुकिंचिन्नभवत्यभीष्टं १५३

॥ टीका ॥

शब्दाभयापहाभयहर्त्रीस्यात् साचेत्प्रदक्षिणातारावराहीभूरिफलंददाति
पुनर्दक्षिणतःसशब्दाभयप्रदाभवति साचेद्वामगतिस्तदाप्रयातुर्मरणंकु
र्यात् १५१ सव्यापसव्यइति यदिसव्यापसव्येसव्यंवामं अपसव्यंदक्षि
णंसव्यंचापसव्यंच सव्यापसव्येयुगपत्समकालंलयंत्योश्यामेखलु
निश्चयेनतदाप्रशस्तेशोभनेभवतः यतः तेतोरणाख्येभवतः यदिवाम
स्थितादक्षिणकायचेष्टास्यात् द्रुममाश्रयंतीश्यामाफलस्यवृद्ध्यैस्यात्
१५२ तारेति शकुनैकदेवीताराव्रजित्वायदिकुप्रदेशोस्थितिंविधत्तेकरो
ति तदागमनोद्यतानांक्षेममात्रंस्यादभीष्टंफलंनकिंचिच्चभवति १५३

॥ भाषा ॥

होय तो बोहोत फल देवे फिर दक्षिणमाऊं नें शब्द करे तो भयकी देवेवारी होय -
ओर वोही वामगति होय तो गमनकर्ताकूं मरण करै ॥१५१॥ सव्यापसव्येति ॥
जेमने माऊं ओर वांई माऊं बी संग बोलती होय तो बोहोत शुभ जाननी जो तोर
णमें बोलती होय तो ओर वामभागमें स्थित होय जेमने अंगमें चेष्टा करती हो
य ओर वृक्ष पे बैठी होय तो कार्य फलकी वृद्धी करे ॥१५२॥ तारेति ॥ शकुनकी
एकही देवी तारा जो गमनकरकें कुत्सितजगें कहा निंदितस्थानमें जाय बेठे तो गमन
कर्तापुरुषको कल्याणमात्र तो होय परंतु वांछितफल कछूबी नही होय ॥१५३॥

भक्ष्यसुखीयदिवामविभागंयातिरटत्यधिरोहतिवृक्षं
तद्विपदासहवांछितमर्थंपांडविकावितरत्यचिरेण १५४
उन्नतदक्षिणपक्षविभागा भक्ष्यसुखीकृतपार्थिवशब्दा
शांतदिशंभगवत्यनुलोमागच्छतिगच्छतितन्नृपतित्वं १५५
तारोपविष्टापिशुभप्रदेशेगवेषयंती लभतेनभक्ष्यम्
किंचित्तदोनंविदधातिलाभंसंप्राप्तभक्ष्याकुरुतेतुपूर्णं १५६

॥ टीका ॥

भक्ष्यसुखीति भक्ष्यसुखीयदि वामविभागंयाति रटतिशब्दंकुरुतेवृक्षमधिरोहति तदाअचिरेणकालेनपांडविकाविपदासहवांछितमर्थंवितरति ददाति १५४ उन्नतइति अनुलोमातारा भगवतीचेत् शांतदिशंगच्छति तदानृपतित्वंयच्छतीत्यर्थः कीदृशीउन्नतदक्षिणपक्षविभागाइतिउन्नतः उच्चैः कृतः दक्षिणपक्षविभागोययासा तथा कीदृशी भक्ष्यसुखी भक्ष्यंसुखेयस्याः सातथा पुनः कीदृशीकृतपार्थिवशब्दाइति कृतःपार्थिवः शब्दोययासा तथेति १५५ तारेति शुभप्रदेशे तारोपविष्टापीतिपूर्वंताराभूत्वा शुभप्रदेशे कृतास्थितिरित्यर्थः भक्ष्यंगवेषयंती किंचिन्नलभते तदोनंलाभंफलंविदधाति संप्राप्तभक्ष्या पुनः पूर्णंफलं कुरुते १५६

॥ भाषा ॥

॥ भक्षसुखीति ॥ भक्षण जाके सुखमें होय एसी पांडविका वामभागमें जाय शब्द करे वृक्षपे चढजाय तो शीघ्रकालमें विपदासहित वांछित अर्थ देवे ॥ १५४ ॥ ॥ उन्नतइति ॥ जो जेमने पंखकूं ऊंचे करें हुयें भक्षण जाके मुखमें होय पार्थिवशब्द करत शांतदिशाकूं पोदकी गमन करे तो नृपती भाव करे ॥१५५॥ तारेति ॥ जो तारा प्रथम दक्षिणा होयकर उत्तमस्थानदेशमें जाय बेठे और भक्षकूं ढूंड रही होय और भक्षणकूं नमिले कछूवी तोन्यूनफल देवे और जो भक्षवाकूं मिलजाय तो

भक्ष्यंजिघृक्षौ शकुने पतंगः पलायतेपूर्वमथाभियोगात् स्याद्गोचरश्चेत् सतदाप्रदिष्टःकष्टादभीष्टस्यफलस्यलाभः १५७ भक्ष्यंजिघृक्षुर्यदिचांतराले भक्ष्यांतरंविंदतिकृष्णपक्षी अवांतरेतत्रफलांतरंस्यात्फलद्वयंभक्ष्ययुगस्यलाभे १५८ कृष्णाकृमिंवांछतियंगृहीतुंपलायतेऽसौलभतेततोऽन्यं स्यादिष्टलाभादपरार्थलाभोभक्ष्यानवाप्तौतुफलाऽनवाप्तिः १५९

॥ टीका ॥

भक्ष्यमिति भक्ष्यंजिघृक्षौ गृहीतुमिच्छुः जिघृक्षुस्तस्मिन् शकुने विहंगेसति पूर्वमेवपतंगः भक्ष्याभिमुखीभूतोकीटःपलायते नश्यति अथाभियोगात्प्रयत्नतः दृग्गोचरश्चेत्सस्यात् तदाकष्टादभीष्टस्यफलस्यलाभः प्रदिष्टः १५७ भक्ष्यमिति यदिचभक्ष्यंजिघृक्षुरंतरालेमध्ये कृष्णपक्षी श्यामाभक्ष्यांतरंविंदति प्राप्नोति तत्रेति प्रस्तुतकार्यस्य अवांतरेमध्ये फलांतरंस्यात् भक्ष्ययुगस्यलाभेफलद्वयंस्यादित्यर्थः १५८ कृष्णेति कृष्णावराहीयंकृमिंगृहीतुंवांछति असौचेत्पलायते नश्यते ततोन्यंकृमिंलभते तदेष्टलाभादपरोऽन्योर्थलाभः स्यात् तुपुनः

॥ भाषा ॥

फिर पूर्ण वांछित फल करे ॥१५६॥ भक्षमिति॥ प्रथम तो भक्षपदार्थकूं ग्रहणकरवेकी इच्छा करतो होय फिर पतंग पक्षी भक्ष्यके सन्मुख भाजजाय और फिर आंखनके अगाडी दीखजाय तो कष्टतें वांछित फलको लाभ होय ॥१५७॥ भक्ष्यमिति॥ जो पोदकी कोई भक्षवस्तुकूं ग्रहण करती होय और बीचमें दूसरो भक्ष प्राप्त होय जाय तो मनुष्यकूं वी कार्यके बीचमें औरबी दूसरो फल मिलजाय वा पक्षीकूं दो फल भक्षकी प्राप्तीके हुयेसूं फलबी दोय मिले ॥१५८॥ कृष्णेति॥ कृष्णाजो पोदकी जाकीडाकूं ग्रहण करवेकी इच्छा करे वो कीडा तो भाग जाय-

गवेषयंत्याशलभादिभक्ष्यंगतिःकुमार्याइहयादृशी स्यात् तथाविधैवप्रविभावनीयाविपश्चितानिश्चितमात्मकार्ये १६० मौनेनवावामकृतस्वरावातारागतायच्छतिवित्तकीर्ती वामप्रदेशेत्वपसव्यशब्दा स्यान्मौनिनीवाकथितार्थसिद्ध्यै १६१ वांछत्येकावामभागंप्रयातुंताराचान्यायातिलाभस्तदाऽल्पः

॥ टीका ॥

भक्ष्यानवाप्तौ भक्ष्यस्याऽप्राप्तौ फलानवाप्तिर्भवति फलस्य अप्राप्तिः स्यात् १५९ गवेषयंत्याइति शलभादि भक्ष्यंगवेषयंत्याः विलोकयन्त्याः कुमार्याः इह यादृशी गतिः स्यात् आत्मकार्ये विपश्चिता पंडितेन तथाविधैवगतिः प्रविभावनीया विचारणीया १६० मौनेनेति मौनेन वा वामकृतस्वरावा वराही तारागतासती वित्तकीर्त्तीयच्छति वामप्रदेशेइति तु पुनः अपसव्यशब्दामौनिनीवावामप्रदेशेगतासती अर्थसिद्ध्यै कथिता १६१ वांछतीति एकावामभागं प्रयातुं गंतुं वां-

॥ भाषा ॥

वानें ओर प्राप्त होय जाय तो मनुष्यकूंवी वांछित फलनें दूसरो अर्थलाभ होय ओर भक्षकी प्राप्ती नहोय तो फलकीवी प्राप्ती नही होय ॥१५९॥ गवेषयंत्याइति ॥ भक्षकूं ढूंड रही होय पोदकी ओर वाकी वा समेंमें गती होय तेसीही गति अपने कार्यमें विद्वान् पुरुषकूं विचार करनो योग्य हे ॥१६०॥ मौनेनेति॥ जो तारा मौन धारे हुयें अथवा वामभागमें शब्दकर दक्षिण भागमें चली जाय तो धन कीर्ती देवे ओर वामप्रदेशमें होय जेमनें माऊं शब्द करे अथवा मौन धारें होय फिर वामगती होय तो अर्थसिद्धीके अर्थ जाननी ॥१६१॥ वांछतीति ॥ एक तारा तो वामभागमें जायवेकूं इच्छा करे हे ओर दूसरी तारा चलीजाय तो अल्पलाभ होय जो वामभागमें होय लघु आहार जाकेपास होय ओर रक्ष ये

लब्धाहारावामगापादपस्थादत्वानर्थं लंभयत्यर्थ
सिद्धिं१६२ एकातारास्याद्द्वितारा द्वितीया ताराचा
न्यास्याच्चतुर्थीचवामा सर्वाएवंस्वंस्वमात्मानुरू
पंकार्यंकुर्युःशुक्लपक्षाःक्रमेण १६३ किंचिद्व्रजित्वा
पथिकेनसाकं तारा ततोगच्छतियाथवामा वि
श्रम्यविश्रम्यशनैः प्रयाति फलप्रदासाचटिकाचिरे
ण १६४ गत्वोर्द्ध्वमागच्छतियर्ह्यधस्तान्तारातत
श्चेद्भयदानदानीम् ॥

॥ टीका ॥

छति अन्यातारायाति तदालाभोल्पःस्यात् यदिवामगालब्धाहारापादपस्था
भवति तदानर्थंदत्वा इष्टमर्थंलंभयति ददाति १६२ एकेति यद्यादौ एका ता
रास्यात् ततोद्वितीया अर्धतारा अथवा वितारा वामा भवति अन्या तृतीया
पुनस्तारा ततश्चतुर्थी वामास्यात् एवंशुक्लपक्षाः सर्वाः स्वंस्वमासानुरूपं
कार्यंक्रमेणकुर्युः १६३ किंचिदिति किंचित्पथिकेनसार्द्धं व्रजित्वा गत्वा
ततस्तारागच्छति ततो विश्रम्य२ विलंबंकृत्वा २ शनैः२ वामाप्रयाति सा
चटिकाक्रमेणफलप्रदाभवति क्वचिच्चिरेणेत्यपिपाठो दृश्यते तत्राचिरेण
चिरकालेनेत्यर्थः १६४ गत्वेति याऊर्ध्वंगत्वाऽधस्तादागच्छति तत

॥ भाषा ॥

स्थित होय तो अनर्थ देकरकें इष्ट जो अर्थ ताकूं लाभ करै ॥१६२॥ एकेति ॥ जो प्रथम
तारा होय और दूसरी अर्द्ध तारा होय फिर तारा होय और ता पीछें चोथी वामा होय शुक्ल
हैं पंखजाकें ऐसीये संपूर्ण तारा अपने अपने योग्य कार्य क्रमकरकें करैं हैं ॥१६३॥
॥किंचिदिति॥ तारामार्गमें गमन करवेवारेकी संग थोडी दूर चलकरकें फिर वांई चली
जाय अथवा विश्राम लेलेकें शनैं शनैं वामभागकूं गमन करै वो शीघ्रही वांछितफलकी
देवेवारी जाननी ॥१६४॥ गत्वेति ॥ जो पोतकी ऊपर जाय करकें फिर नीचेंकूं चली

एवंविधावामगतिर्यदिस्याद्धनुर्द्धरीतत्कुरुतेऽवसानं
१६५ चापच्च्युतायागुलिकेवदूरंधनुर्द्धरीव्योम्निज
वेनयाति ताराततःस्याद्यदिसारणायवामात्ववश्यं
मरणायगंतुः १६६ याब्रह्मपुत्रीगमनोद्यताना
मग्रेव्रजित्वाभिमुखीसमेति अदक्षिणाकार्यविना
शनायस्याद्दक्षिणा साद्रविणाप्तिहेतुः १६७

॥ टीका ॥

श्चेत्ताराभवति तदाभयदास्यात् तदानीमिति तत्कालं नकालांतरे एवंविधावामगतिर्यदिस्यात्तदा धनुर्द्धरी अवसानंमरणंकुरुते १६५ चापच्च्युतेति या धनुर्द्धरी चापच्च्युता चापंधनुस्तस्माच्च्युता प्रक्षिप्ता गुलिकेव व्योम्निपथेजवेनवेगेन दूरंयाति जवोवेगस्त्वरस्तूर्णिरितिहैमः यदिततस्तारा स्यात्तदा सारणाय युद्धाय स्यात् एवंविधावामा अवश्यंगतुर्मरणायस्यात् १६६ याब्रह्मपुत्रीति याब्रह्मपुत्रीदेवीगमनोद्यतानामग्रेव्रजित्वा अभिमुखीसमेति ततः अदक्षिणावामास्यात्तदाकार्यविनाशनायभवति साचेद्दक्षिणास्यात् तदा द्रविणाप्तिहेतुःस्यादित्यर्थः द्रविणंधनंतस्य प्राप्तिः तस्याहेतुःकारणं स्वमृक्थं द्रविणंधन-

॥ भाषा ॥

आवे और ता पीछें दक्षिण होय तो भयकी देवेवारी है तत्काल और जो ऊपर जाय नीचें उत्तर वाम आय जाय तो मरण करै ॥ १६५ ॥ चापच्च्युतेति ॥ जो धनुर्द्धरी धनुषमेंसूं निकसी हुई गुलिका ताकी सीनाई आकाशमें वेग करकें दूर चलीजाय फिर वहांसें दक्षिण भागमें होयजाय तो युद्धके अर्थ जाननी और जो वामभागमें होय तो अवश्य गमनकर्त्ताकूं मृत्यु करे ॥ १६६ ॥ याब्रह्मपुत्रीति ॥ ब्रह्मपुत्री जो पोदकी गमनकरवेवाले पुरुषके अगाडी जायकें फिर पीछी वाके सन्मुख आय फिर वामा होय जाय तो कार्यको नाशकरे और जो दक्षिणभागमें आयजाय तो-

भूत्वावितारापरिगृह्यभक्ष्यंप्रदक्षिणेनाभ्युपगम्यदेवी
मनोरमंस्थानकमाश्रयंतीहृत्वापदंसंपदमादधाति१६८
निमज्ज्यधूल्यांयदिशुक्लपक्षाविधायचेष्टांयदिवाविदु
ष्टाम् प्रयातितारा विपदंविधायक्षणेनलक्ष्मींतदुपाद
धाति १६९ दिक्कालचेष्टानिनदास्थितीनांमध्याद्वे-
दे्कतरेणादीप्ता भयंकरीदक्षिणगापिदुर्गास्याद्वा
मगामृत्युविधायिनीतु १७०

॥ टीका ॥

मितिहैमः १६७ भूत्वेति प्रथमंवितारा वामाभूत्वा भक्ष्यंपरिगृह्य
गृहीत्वा पुनः प्रदक्षिणेनाभ्युपगम्य मनोरमंस्थानकमाश्रयन्ती देवी -
आपदंहत्वासंपदमादधाति १६८ निमज्ज्येति यदिशुक्लपक्षा धूल्यांनिम
ज्ज्य स्नात्वा यदिवादुष्टांचेष्टांविधाय ताराप्रयाति तदा विपदं विधाय क्षणे
नलक्ष्मीमुपादधाति १६९ दिक्कालेति यदि दिक्कालचेष्टानिनदास्थिती
नां पूर्वोक्तानां मध्यादेकतरेण एकेन दीप्ता दक्षिणगापि दुर्गाभयंकरी
स्यात् दिक्चकालश्चचेष्टाचनिनदश्चस्थितिश्च दिक्कालचेष्टानिनदस्थि
तयः इतरेतरद्वंद्वः तासां तु पुनः वामगा सा मृत्युविधायिनी स्यात्
गंतुरितिशेषः १७० ॥छ॥ ॥छ॥

॥ भाषा ॥

धनप्राप्ती करावे ॥१६७॥ भूत्वेति॥ प्रथम वाम होय कर भक्ष्य ग्रहण करकें फिर दक्षि
णभागमें जाय सुंदर स्थानमें जाय बैठे तो आपदा दूर करकें संपदा करे ॥१६८॥ निम-
ज्ज्येति॥ श्वेत जाके पंख ऐसी पोदकी धूलमें स्नानकरकें बुरी चेष्टा करकें जो दक्षिणमें चली
जाय तो आपदा दे करकें क्षणमें ही लक्ष्मी प्राप्त करै ॥१६९॥ दिक्कालेति॥ जे
दिशा काल चेष्टा नाद स्थिती ये पहलें कहे हैं इनमेसुं एक प्रकारकी दीप्ता होय फि
र वो दक्षिणभागमें वी होय तो भय करै और जो या प्रकार दीप्ता होयकर वामभागमें

शुष्कभग्नकटुकंटकिवृक्षान् शीर्णपर्णमथवाप्यधिरु
ह्य दक्षिणाप्रकुरुतेऽल्पकमर्थंवामगात्वपरिहार्यम
नर्थम १७१ प्रत्यक्षरूपावरमुद्धृतापि मनोरमंस्था
नमाधिश्रयंती नसाप्रशस्तादिनरप्रदेशामधिष्ठिता
दक्षिणगापिशस्ता १७२ यांतीव्रजित्वायदिवाविरो
तिव्यावर्तनेवागमनंविधाय जुगुप्सितेचोपविशेत्
प्रदेशोदुर्गाफलंहन्तिगतेस्तदानीम् १७३

॥ टीका ॥

शुष्केति शुष्कंभग्नकटुकंटकिवृक्षान् शुष्काश्चभग्नाश्चकटवश्चकंटका
विद्यतेयेषुते कंटकिनश्च शुष्कभग्नकटुकंटकिनः इतरेतरद्वंद्वः पश्चात्तेच
तेवृक्षाश्चेति कर्मधारयस्तान् अथवाशीर्णपर्णंपतितपर्णमपिवृक्षमिति
शेषः अधिरुह्यदक्षिणाभवति तदाअल्पकमर्थंप्रकुरुते एवंविधावाम
गा अपरिहार्यंपरिहर्तुमशक्यमनर्थंकुरुते क्वचित्ग्रावखंडंप्रस्तरशकलं
इत्यपिपाठः १७१ प्रत्यक्षेति प्रत्यक्षरूपादेवीउद्धृतासतीवामापिमनोहरं
स्थानमाश्रयंतीवरंशुभास्यात्प्रशस्ताच्छुभप्रदेशादितरप्रदेशंदुष्टप्रदेशामधि
ष्ठितादक्षिणगापिशस्तान १७२ यांतीति यांतीगच्छंतीव्रजित्वा वा-

॥ भाषा ॥

आवे तो गमनकर्त्ताकूं मृत्यु करवेवारी जाननी ॥१७०॥ शुष्केति ॥ सूको भग्नहुयो कडुवो
कांटेको एसे वृक्षपे बैठकरकें अथवा पाषाणको टूक होयवापे बेठकरकें वामभागतें उडकर
दक्षिणभागमें आय जाय तो अल्प अर्थ करे औरइनपे बेठकें वामभागमें आयजाय तो जाके
दूर होयवेको उपाय ही नही एसो अनर्थ करे ॥ १७१ ॥ प्रत्यक्षेति ॥ जो प्रत्यक्षदेवी पोदकी उद्धृना
होय अर्थात दक्षिणभागतें उडकरकें वामप्रदेशमें आयकर मनोहरस्थानमें स्थित होय तो
उत्तम जाननी फिरवोही पोदकी उत्तमस्थानमेंसु उडकर फिर औरस्थानपे जाय बेठे तो फिर
जैमने माऊंची होय तोवी श्रेष्ठ नही जाननो ॥ १७२ ॥ यांतीति ॥ जोपोदकी चरुती चलती

कृत्वास्वरंगच्छतिकृष्णपक्षीपुनःस्वरंचेदुपविश्यकुर्यात्
गतेःफलंतर्हिनिहत्यतुच्छंफलंददातिप्रथमस्वरस्य
१७४ प्रदक्षिणावाय दिवाथवामागत्वोपविष्टास्व
फलंददाति निवर्तनेयोपविशेन्नयावाकृत्वाफलं
संप्रतिहंत्यवश्यम् १७५

॥ टीका ॥

यदि कुमारीविरौति शब्दंकुर्यात् वा अथवा गमनं विधाय व्यावर्तते व्याघुट्य समायाति जुगुप्सिते निंदितेप्रदेशेचोपविशेत्तदानीं दुर्गापूर्व गतेः फलं निहंति १७३ कृत्वेति कृष्णपक्षीस्वरं शब्दं कृत्वागच्छति प्रयाति पुनः उपविश्य चेत्स्वरंकुर्यात् तदागतेःगमनस्य फलं विनिहत्य प्रथमस्वरस्य तुच्छंफलंददाति १७४ प्रदक्षिणेति देवी प्रदक्षिणा तारा यदि वामागत्वोपविष्टासा स्वफलं स्वानुरूपं फलंददाति तयोर्मध्यात् यानि वर्तने अथवा तत्रगत्वा नोपविशेत् सा स्वानुरूपंफलंकृत्वा अवश्यं प्रतिहन्ति १७५ ॥ छ ॥ ॥ छ ॥

॥ भाषा ॥

शब्द करे अथवा जायकरकें शब्द करे अथवा गमन करकें फिर पीछी वगद करकें निंदितदेशमें स्थानमें प्रवेश करे तो पूर्वगतीके फलकूं दूर करैहै ॥ १७३ ॥ कृत्वेति ॥ कृष्णपक्षी जो पोदकी शब्द करकें गमन करे फिर बेठकरकें जो शब्द करे तो गतीके फलकूं दूर करकें पूर्व कियो जो शब्द ताको तुच्छ फल देवे ॥ १७४ ॥ प्रदक्षिणेति ॥ जो प्रदक्षिणा तारा वामा जायकरकें बेठ जाय तो अपने योग्य वामको फल देवे और जो प्रदक्षिणा और वामा इनके मध्यमेंसु वगद आवे अथवा प्रदक्षिणासूं नाम भागमें जायके बेठे नही तो वो पोदकी प्रदक्षिणाको फल देकरकें फिर अवश्य फलकूं नाश करे है ॥१७५॥ ॥ छ ॥ ॥ छ ॥

विधायशब्दंयदिदक्षिणास्यात्कृत्वापुनःशब्दमुपैति
वामा पुनःस्वरंचेत्कुरुतेतदानींस्याद्ब्रह्मपुत्रीफल
लाभकर्त्री १७६ भूत्वानुलोमाविदधातिशब्दंश्या
माविलोमापुनरेवचाग्रे निर्वाहयेत्सैवयदातदानीं
किंचिच्चिरात्कार्यमुपैतिसिद्धिम् १७७ दृष्टोपविष्टा
प्रथमंसशब्दाताराव्रजंतीतदनुप्रविष्टा पुंसामनल्पं
फलमल्पकालाद्यच्छत्यभीष्टंविनिहंत्यनिष्टं १७८

॥ टीका ॥

विधायेति विधायशब्दं यदि कुमारी दक्षिणा तारास्यात् पुनः शब्दंकृत्वा
वामा उपैति आगच्छति तत्रागत्यपुनः स्वरंचेत्कुरुते तदानीं तद्ब्रह्मपुत्री
देवी फललाभकर्त्रीस्यात् १७६ भूत्वेति यद्यनुलोमा तारा भूत्वा श्या
माशब्दं विदधाति पुनः साएव विलोमावामा यदा अग्रे निर्वाहयेत् तदा
किंचित्कार्यं चिरात् चिरकालेन सिद्धिमुपैति १७७ दृष्टाइति वामभागे
प्रथमं सशब्दा उपविष्टा दृष्टा ताराव्रजंती तदनुकुत्रचित् स्थले उपविष्टा
संस्थिता पुंसा मनल्पमभीष्टंफलं अल्पकालात् अचिरादेव यच्छति
अनिष्टमनभीप्सितं निहंति दूरीकरोतीत्यर्थः १७८

॥ भाषा ॥

॥विधायेति॥ शब्द करकें जो दक्षिणा होय फिर शब्द करकें वामा चली आवे
और वाम आयकरकें फिर शब्द करे तो वाईसमें ब्रह्मपुत्री फल लाभ करे ॥१७६॥
॥भूत्वेति॥ जो अनुलोमा होय करकें शब्द करै फिर वोही विलोमा होय तो कछूक
विलंब करकें कार्यकी सिद्धी होय ॥१७७॥ दृष्टाइति॥ तारा वामभागमें प्रथमशब्द
करनी वेठी हुई दीखे फिर उडकरकें कहूं स्थलमें जाय वैठे तो पुरुषनकूं वांछित
फल शीघ्रही देवे अनिष्ट फल दूर करै है ॥१७८॥

करोति विष्टां विधुनोति गात्रं शब्दं विधत्ते श्रयति प्रदीप्तं
तारापि या नश्यति लीयते वा सा स्यादनिष्टैकफलप्रदात्री
१७९ कृत्वा शब्दं वामतो मौनिनी वा ऋज्वी
तारा ब्रह्मपुत्री भवेद्वा आशाचेष्टास्थानशांता नराणा
माशापूर्तिः सा करोति क्षणेन १८० गुणाश्च दोषाश्च
यदा विमिश्रा निरूप्यमाणे शकुने भवंति ग्राह्या
स्तदा तेष्विह भूरयो येयान्वा वराही विदधाति पश्चात् १८१

॥ टीका ॥

करोतीति या तारापि भूत्वा विष्टां करोति गात्रं शरीरं धुनोति कंपयति शब्दं विधत्ते दीप्तं विचित्रं शब्दं श्रयति नश्यति नष्टायाति कुत्रचिल्लीयते वा लीना भवति सा अनिष्टैकफलदात्रीस्यात् १७९ कृत्वेति वामतोशब्दं कृत्वा मौनिनी वा या ब्रह्मपुत्री ऋज्वी तारा भवेत् कीदृशी आशाचेष्टास्थानशांतेति आशा दिग्चेष्टा पूर्वोक्ता शरीरव्यापारः स्थानमुपविशनस्थलं एतानि शांतानि यस्याः सा तथा आशाचचेष्टाचस्थानंच आशाचेष्टास्थानानीतरेतरद्वंद्वः सा देवी नराणामाशापूर्तिः क्षणेन करोति १८० गुणाइति यदा निरूप्यमाणेशकुने गुणाश्चदोषाश्च विमिश्राभवंति तदा तेषु येभूरयस्ते इह ग्राह्याः वा अथवा यान्गुणान्वा दोषान्वा वराहीदेवी

॥ भाषा ॥

॥करोतीति॥ जो पोदकी तारा होय कर विष्टा करे और देहकूं कंपायमान करे और दीप्त शब्द करे और नाशकूं प्राप्त होय या कहूं लीन होय जाय तो वो एक अनिष्टही फलकी देवेवारी हे ॥१७९॥ कृत्वेति॥ बांये माऊं शब्द करकें मौन धारें हुये जो ऋज्वी तारा होय जाय और दिशा चेष्टा स्थान ये शांता होंय तो मनुष्यनकी आशापूर्ति क्षणमात्रमें करे ॥ १८०॥ गुणाइति॥ जो आरंभ शकुनमें गुणदोष मिलवां होंय तोउनमेंसुं जो गुण बोहोत होंय तो गुणग्रहण करने जो दोष बोहोत होंय तो

भाषितचेष्टितगमनादीनां यः समुदायो भवति बहूनां सोधिक मधिकं शुभमाचष्टे बहु पुनरशुभं तत्र विदुष्टे १८२ त्वरितं गच्छति यच्छति तूर्णं लाभं पांडविका परिपूर्णम् किंचित्त्वरितात्त्वरिता दर्द्धंमंदगतिः सुचिरेण तदर्द्धम् १८३ आदौ नतिं दर्शयति प्रयाति समुन्नतिं व्योम्नि करोति चान्ते

॥ टीका ॥

पश्चाद्विदधाति ते प्रांतवर्तिनोग्राह्येत्यर्थः १८१ भाषितइति भाषितचेष्टितगमनादीनां बहूनां शुभानां यः समुदायो भवति स अधिकं आधिकं शुभमाचष्टे कथयति तत्रेति तस्मिन् समुदाये विदुष्टे बहु पुनः अशुभं भवति १८२ त्वरितमिति पांडविका या त्वरितं गच्छति सापरिपूर्णं तूर्णं शीघ्रं लाभं यच्छति ददाति किंचित्त्वरिता त्वरितात्पूर्वोक्तगमना दर्द्धं फलं ददाति मंद गतिः सुचिरेण तदर्द्धं किंचित्त्वरितगमन फलादर्द्धं फलमित्यर्थः १८३ आदाविति आदौ व्योम्नि नतिं दर्शयति परं समुन्नतिं प्रयाति प्रांते च नतिं करोति तदा वराही देवी ऊरीकृतं स्वीकृत मिष्टमर्थ मासन्नमपि दूरे

॥ भाषा ॥

दोष ग्रहण करनें अथवा जा गुण दोषकूं देवी पीछै करै ते अंतके ग्रहण करनें ॥१८१॥ भाषितइति ॥ भाषित कहिये शब्द चेष्टा गमन इनकूं आदिले शुभनको समूह वोहोननको होय तो अधिक आधिक शुभ कहनो और वाही समुदायमें दूषित वहोन होंय तो फिर असुभ होंय ॥१८२॥ त्वरितमिति ॥ जो पोदकी शीघ्र गमन करै तो परिपूर्ण शीघ्र लाभ देवे और कछूक कछूक शीघ्र गमन करे तो वासुंआधो फल देवे और मंद मंद चले तो वोहोन कालमें वा आधेसुं वी आधो फल करे ॥१८३॥ आदाविति ॥ प्रथम आकाशमें नीची दीखै फिर ऊंची दीखै फिर अंतमें नीची दीखै तो देवी स्वीकार कियो जो वांछित अर्थ वो निकटमें होनहार-

आसन्नमध्याह तदा धराही दूरेल्पभूरीकृतमिष्टमर्थम्
१८४ उड्डीयमानोन्नतिमादितो या ततोनतिं दर्शयते
कुमारी स्वल्पं चिरं प्राप्यमपीह यत्स्यात्तत्साप्रय
च्छत्यचिरेण भूरि १८५ नीचोच्चमध्यैर्गमनैःक्रमेण
नीचोच्चमध्यानि फलानि देव्याः प्रदक्षिणायाःकथ
यंति याने गृहप्रवेशे पुनरुद्धृतायाः १८६ शिरःकटी
जानुसमंव्रजंती मासायनाब्दैःफलदाक्रमेण

॥ टीका ॥

अल्पमाह १८४ उड्डीयमानेति या उड्डीयमाना आदितःउन्नतिं दर्शयते
ततः कुमारी नतिं दर्शयते साइह लोके स्वल्पं चिरं प्राप्यं यत्स्यान् तदचिरेण
स्तोककालेन भूरिप्रयच्छति ददाति १८५ नीचइति देव्या नीचोच्चमध्यैर्गमनैः
क्रमेण नीचोच्चमध्यानि फलानि स्युः तत्र प्रदक्षिणायास्ताराया:
पूर्वोक्तानि फलानि याने गमने कथयंति उद्धृतायावामायाः
पुनः ग्रहप्रवेशे फलानि प्रतिपादयंतीति तात्पर्यार्थः १८६ शिरइति
शिरःकटीजानुसमंव्रजंती कुमारी क्रमेण मासायनाब्दैः फलदाभवति

॥ भाषा ॥

होय तोची या कार्यकूं दूर ओर अल्प कहनो ॥१८४॥ उड्डीयमानेति ॥ जो प्रथम उडती
हुई उंची गती दिखावे फिरनीची गती दिखावे तो वो कुमारी अल्प ओर बहोत कालमें
प्राप्त होयवेके योग्य जो वस्तु ताय थोडेसे कालमें बोहोत वस्तु देवे ॥१८५॥
नीचइति ॥ पोदकीकी नीची गति मध्यगति ऊंची गति इन तीनो गतीन करकें तीनप्रकारके
नीच ऊंच मध्यफल होंयहें तामें प्रदक्षिणा ताराके फल पहलें कहें हें गमन
समयमें तेही फिर उद्धृताके फल गृहप्रवेशसमयमें प्रतिपादन करेहें ॥१८६॥
॥ शिरइति ॥ जो पोदकी शकुनीके मस्तककी समदेशमें होयकर गमनकरे तो मास
भरमें फल देवे ओर कटीभागके समानदेशमें होय गमन करे तो छे महिनामें फल

अकल्पितेकालविभागएवं प्रकल्पितेकल्पितमेवमानं
१८७ लाभोमहान्दंडमितंप्रदेशेस्यान्मध्यमोदंडयुग
प्रमाणे त्रिदंडमानेतुभवेज्जघन्यः प्रदक्षिणात्पांथ
समूहमातुः १८८ मासैश्चतुर्भिः प्रथमेर्थलाभस्त-
तोद्वितीयेपुनरष्टभिः स्यात् वर्षात्तृतीयेवसुधावि
भागेप्रदक्षिणायांशकुनैकदेव्यां १८९ आद्येमह-
त्तोरणभूमिभागेस्वल्पंद्वितीयेऽल्पतरंतृतीये ॥

॥ टीका ॥

अकल्पितेकालविभागे एवंमानंग्राह्यं प्रकल्पितेकालविभागेतु कल्पितमेवमानं ग्राह्यं १८७ लाभइति पांथसमूहमातुः देव्याः दंडमितप्रदेशेप्रदक्षिणात् महान्लाभोभवेत् दंडयुगप्रमाणेप्रदक्षिणान्मध्यमोलाभः स्यात् त्रिदंडमानेप्रदक्षिणाज्जघन्यालाभःस्यात् १८८ मासैरिति शकुनैकदेव्याः प्रदक्षिणायाः प्रथमे वसुधाविभागे मासैश्चतुर्भिरर्थलाभः स्यात् द्वितीय भूविभागे अष्टभिर्मासैरर्थलाभः स्यात् तृतीयेवसुधाविभागे वर्षात् लाभःस्यात् १८९ आद्यइति आद्ये तोरणभूमिभागे प्रदक्षिणा पांडविका महत्

॥ भाषा ॥

देवै ओर जानुकी समानदेशमें होयकर गमनकरे तो वर्ष दिनमें फल देवै यामें प्रवृत्ति निवृत्तिकाल विभाग विना याप्रकार फल करेहै ॥१८७॥ लाभइति ॥ पोदकी दंडके प्रमाण देशमें प्रदक्षिणा होयजाय वातें महान् लाभहोय ओर जो दोयदंडके प्रमाणमें प्रदक्षिणा हो जाय वातें मध्यम लाभहोय ओर तीनदंडके प्रमाण देशमें प्रदक्षिणा होय जाय तो वातें निकृष्ट लाभ होय ॥ १८८ ॥ मासैरिति॥ शकुनकी देवी पोदकी पूर्व कही जो शकुनकी पृथ्वी ताके प्रथमभागमें प्रदक्षिणा होय तो च्यारमासकरकें लाभहोय ओर पृथ्वी के दूसरे भागमें प्रदक्षिणा होय तो आठमासकरकें अर्थलाभ होय ओर पृथ्वीके तीसरे भागमें प्रदक्षिणा होय तो एकवर्षमें लाभ होय ॥१८९॥ आद्यइति ॥ प्रथमजो पृथ्वीको तोरण

फलं तु भूमित्रितये प्रभूतं प्रदक्षिणा पांडविका ददाति
१९० अब्दायनर्तूत्तुनमासपक्षदिनानि यामानथ ना-
डिका वा नरस्य भूमेरथवा विभागे प्रकल्पयेत्
कालविनिर्णयाय १९१ चेष्टानिनादोगमनास्थिती
नामेकेन पादो द्वितयेनचार्द्धम् फलस्य पादत्रित
यं त्रिभिः स्याद्भवेत्समस्तैर्विहिते समस्तम् १९२

॥ टीका ॥

फलं ददाति द्वितीये स्वल्पफलं ददाति पुनस्तृतीये अल्पतरं भूमित्रितये प्रभूतं फलं दत्ते १९० अब्दायनेति अथवा पक्षांतरे नरस्य कालविनिर्णयाय भूमेर्विभागे अब्दायनर्तूनिति अब्दं वर्षं अयने दक्षिणोत्तरायणे ऋतवः षट् वसंतप्रभृतयः मासपक्षदिनानि प्रसिद्धानियामाःप्रहराःनाडिकाः घटिकाःप्रकल्पयेत्प्रकल्पनांकुर्यात्१९१ चेष्टेति चेष्टानिनादोगमनस्थिता नां चतुर्णां शांतानां मध्यादेकेन पादः चतुर्थांशः फलं स्यात् समीहितस्येतिशेषः द्वितयेन अर्द्धं फलंस्यात् त्रिभिः पादत्रितयं पादोनंफलंस्यात् समस्तैश्चतुर्भिः समस्तं फलं स्यादित्यर्थः १९२ ॥ ७ ॥

॥ भाषा ॥

भाग तामें प्रदक्षिणा होय तो महान् फल देवै ओर दूसरे तोरण भागमें प्रदक्षिणा होय तो अल्प फल देवै ओर तीसरे तोरण भागमें प्रदक्षिणा होय तो बहोत अल्पफल देवै ओर भूमीके तीनो तोरणभागमें पांडविका प्रदक्षिणा दीखे तो वोहोत फल देवै ॥१९०॥ अब्दायेति ॥ मनुष्यके कालनिर्णयके अर्थ भूमिभागमें अर्थात् पृथ्वीभागमें वर्ष दक्षिणायन उत्तरायण ओर छे ऋतू मास पक्ष दिन घटी इनें कल्पना करे ॥१९१॥ चेष्टेति ॥ चेष्टा नाद गमन स्थान ये च्यारों शांत होंय इनमेंसु एक होय तो कार्यकोची एक पाद होय जो दोय होंय तो कार्य आधो होय ओर जो तीन होंय तो कार्यके तीनपाद होंय ओरजो समस्त च्यारों होयतो समस्तकार्यफल होय ॥१९२॥

चेष्टादिकं नाचरति क्षुधार्त्ताऽऽग्रहेण गृह्णाति तु भक्ष्य
मेव प्रत्यक्षदेवी यदि किंचिदूनं भवत्यभिप्रेतफलं
तदानीम् १९३ प्रशस्तचेष्टादिचतुष्टया चेत् गृह्णा
ति भक्ष्यं चटिका तदानीं अनंजितामित्रकलत्रने-
त्रामेकातपत्रीं कुरुते धरित्रीं १९४ वामंस्वरंदक्षि-
णतश्च यानं यात्रादिकार्येषु शुभं वदंति वामांगतिं
दक्षिणतश्च शब्दं ग्रामप्रवेशादि समीहितेषु १९५

॥ टीका ॥

चेष्टादिकमिति चेद्यदि प्रत्यक्षदेवी क्षुधार्ता पूर्वोक्तं चेष्टादिकं नाचरति तु पुनरर्थे आग्रहेण भक्ष्यमेव गृह्णाति तदा तदानीं अभिप्रेतफलं किंचिदूनं भवति १९३ प्रशस्तेति प्रशस्तचेष्टादि चतुष्टयात् चेच्चटिकाभक्ष्यं गृह्णाति तदानीं एकातपत्रीं धरित्रीं कुरुते कीदृशीं अनंजितामित्रकलत्रनेत्रामिति अनंजितानि कज्जलशून्यानि अमित्राः शत्रवः तेषां कलत्राणियोषितः तासां नेत्राणि यस्यांसा तथा १९४ वाममिति यात्रादि कार्येषु वामंस्वरं दक्षिणतश्च यानं शुभंवदंति ग्रामप्रवेशादिसमीहितेषु वामां गतिं दक्षिणतश्च शब्दं शुभं वदन्ति १९५ ॥छ॥

॥ भाषा ॥

॥चेष्टादिकमिति॥ जो प्रत्यक्षदेवी भूकी होय और चेष्टादिक कछूवी न करे - फिर आग्रह करकें भक्ष्य ग्रहण करे तो वांछित कार्य कछूक न्यून करे ॥१९३॥ ॥प्रशस्तेति॥ जो च्यारों चेष्टान करकें भक्ष्य ग्रहण करे तो सर्व वैरीनको नाशकर एकही छत्र जामें एसी पृथ्वी करे ॥१९४॥ वाममिति॥ यात्रादिककार्यमें पोदकीको वामशब्द और दक्षिणगति ये शुभ कहेंहें और ग्रामप्रवेशादिकमें वामगति और दक्षिण शब्द ये शुभ कहेंहें ॥१९५॥ ॥छ॥

गवेषयन्पांडविकां मनुष्यो निरीक्ष्यते तां यदि नो कदाचित् खगांतरं पश्यति चेत्स पृष्ठं श्यामैव सर्वं शकुनं ब्रवीति १९६ वामागतिर्यापि च वामचेष्टा शब्दास्थिती दक्षिणतस्तथा ये दीप्तं च यत्तानि भयादि कार्ये शुभानि चान्यानि निषेधकानि १९७ सकंटकोत्पादितशुष्कभग्नवृक्षेषु शूले मृतके च संस्था

॥ टीका ॥

गवेषयन्निति मनुष्यो पांडविकां गवेषयन् यदि कदाचित् ननिरीक्ष्यते चेत् खगांतरं पृष्ठे पश्यति स श्यामैव सर्वान्शकुनान् ब्रवीति १९६ वामेति वामागतिः यापिच वामचेष्टा ये शब्दस्थिती दक्षिणतः च अन्यद्यत्पुनः दीप्तं तानि भयादौ कार्येषु शुभानि अन्यानि अन्यत्रनिषेधकानि भवंति १९७ सकंटकेति सकंटकोत्पादितशुष्कभग्नवृक्षेष्विति सकंटकः कंटकाकुलः उत्पादितः गजादिना शुष्कः स्वभावतः भग्नो वाय्वादिना एवंविधेषु वृक्षेषु पादपेषु स्थिता नथा शूले शूलिकायां मृतके पतितकरंकादौ स्थिता अंतर्विनिद्रेति घूर्णितेक्षणाभय

॥ भाषा ॥

॥ गवेषयन्निति ॥ जो मनुष्य पांडविकाकूं शकुनके लियें देख रह्यो होय जो कदाचित् नही दीखे जो ओर कोई पक्षी पीठमाऊं दीखे तो ये जाननो श्यामाही सब शकुननकूं कहेंहे ॥१९६॥ वामेति॥ जो श्यामाकी वामगति ओर वामचेष्टा होय ओर दक्षिणमाऊं शब्द ओर स्थिति होय ओर जो फिर दीप्ता होंय तो ये भयादिककार्यमें तो शुभ हें ओर कार्यमें निषिद्ध हें ॥१९७॥ सकंटकेति ॥ कांटेको वृक्ष होय वा गजादिक करकें उखडो होय शुष्क होय या पवनसुं भग्न होयगयो होय एसे एसे वृक्षनपे बेठी होय तेसेंही शूलीपे बेठी होय वा मुरदा मरे हुयेपे बेठी होय निद्रामें घूर्णितनेत्र होय रहे होंय भय मोह शोकवान् होय नीचें ग

अंतर्विनिद्राभयमोहशोकश्वभ्राश्रयाधःपतनात्मघाता १९८ इत्यादिकायद्यपि कृष्णिकायाभयाद्यनिष्टं शमयंति चेष्टाः अत्यंतदुष्टत्ववशात्तथापि प्रायेणनस्युः सुखदावसानाः १९९ चेष्टानिनादाटनभक्ष्यलाभाः क्रमाद्भवंत्यत्यधिकाबलेन भवेत् चतुर्भ्यो बलवान् सएको या ब्रह्मपुत्रीविदधातिपश्चात् २०० क्षेत्रे ग्रामो ग्रामधाने पुरी स्यात्पुर्यां सत्यां मण्डलं मंडले तु ॥

॥ टीका ॥

मोहशोकश्वभ्राश्रयेति भयं प्रसिद्धं मोहशोकौ प्रतीतौ यस्यां सा अर्शादित्वात् च श्वभ्रं अवटंसएव आश्रयो यस्याः सा तथा पश्चात्कर्मधारयः अधः पतना आत्मघाता १९८ इत्यादिकेति यद्यपि कृष्णिकायाः इत्यादिकाश्चेष्टाः भयाद्यनिष्टं शमयंति तथाप्यत्यंतदुष्टत्ववशात् प्रायेण सुखदावसानाः नस्यु रतएव नग्रहीताः १९९ चेष्टेति चेष्टानिनादाटनभक्ष्यलाभा बलेन अधिकाःक्रमात् भवंति एभ्यः चतुर्भ्यः सएकः बलवान् भवेद्यं ब्रह्मपुत्रीदेवी पश्चात् विदधाति २०० क्षेत्रइति एवमग्रातिमात्रो योयो लाभः तद्राज्यमामनंति तदेव दर्शयाति क्षेत्रइति क्षेत्रेसति ग्राम

॥ भाषा ॥

ढेलेमें बेठी होय अधःपतन करेती होय ओर आत्मघात कर रही होय ॥१९८॥ इत्यादिकेति॥ कृष्णिकाकी ये चेष्टा भयादिक अनिष्टनकूं शांत करेहै प नतोबी अत्यंत दुष्टभावनके वशमें आये सुं अधिक करकें अंतमें सुखकी देवेवारी नही है यासुं एसी शकुनमें नहीं ग्रहण करनी ॥१९९॥ चेष्टेति॥ चेष्टाशब्द गमन भक्ष लाभ ये बलकरकें अधिक होंय तो ब्रह्मपुत्री जो पोदकी वा पुरुषकूं इकलेकूं ही बलवान् करदे ॥२०० ॥ क्षेत्रइति॥ जो क्षेत्राधीश होयवाकूं ग्रामप्राप्ति होतो ग्रामाधीश होयवाकूं पुरी

उर्वींसर्वामुर्विमन्नातिमात्रो यो लाभस्तद्राज्यमित्यामनंति १ पुंपक्षिणश्चेष्टितयानशब्दाः पुंसां विशेषात्फलदाभवंति स्त्रीपक्षिणीचेष्टितयानशब्दाःस्त्रीणां विशेषात्फलदाभवन्ति २ इति पोदकीरुते यात्राप्रवेशादिप्रकरणंसप्तमं ७ ॥ छ॥ एकत्रसार्थेव्रजतां बहूनां तुल्येपिजाते शकुने फलानि ॥

॥ टीका ॥

प्राप्तिः ग्रामधानेसति पुरीप्राप्तिः पुर्यांसत्यां मंडलं देशप्राप्तिः मंडले सति कियत्युर्वीं तस्यां सत्यां सर्वोर्वीमिति १ पुमिति पुंपक्षिणः चेष्टितयानशब्दाःविशेषात्पुंसां फलदाःभवंति स्त्रीपक्षिणीचेष्टितयानशब्दाः विशेषात्स्त्रीणां फलदा भवंति २ इति शत्रुंजयकरमोचनादिसुकृतकारिभिः महोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायां वसंतराजटीकायां पोदकी रुते यात्राप्रवेशादि प्रकरणंसप्तमंसमाप्तं ७ एकत्रेति तमिति तंहंसचारं वयं प्रविचारयामः विचारगोचरीकुर्मः येन तुल्येपि जाते शकुने नानाप्रकाराणि फलानि भवंति केषाम्

॥ भाषा ॥

प्राप्ती होनो ओर पुरीके अधिष्ठा ताकूं देशप्राप्ती होनो ओरजो मंडल नामदेशके अधिष्ठा ताकूं कछूक पृथ्वी प्राप्ती होनो ओर पृथ्वीपतीकूं समग्र पृथ्वी मिलनो याप्रकार अत्यंत लाभ जो जो होय ताकूंही राज्य कहेंहें ॥२०१॥पुमिति॥ पुरुषपक्षीकी चेष्टा गमन शब्द विशेष करकें पुरुषनकूं फलके देवेवारे होंयहें ओर स्त्रीपक्षीकी चेष्टा गमन शब्द ये स्त्रीनकूं फलके देवेवारे होंय हें ॥२०२॥ ॥ इतिश्रीवसंतराजशाकुने भाषाटीकाया पोदकी रुते यात्राप्रवेशादि प्रकरणं समाप्तं सप्तमम् ॥७॥

॥एकत्रेति॥ जो तीर्थयात्राकूं सो पचास मनुष्यनको संग जाय ताको नाम सार्थ हे वोहोतसें मनुष्यनको एकसार्थमें शकुन सबनकूं बराबर होंयहें फिर जाकरकें

नानाप्रकाराणि भवंति येन तंहंसचारंप्रविचारयामः ३ तारावहंत्यां विधुनाडिकायां क्षेमंकरीवामगतार्कनाड्याम् घ्राणेप्रपूर्णे फलदानुलोमा वामापिरिक्के रहितो फलेन ४ शशांकनाड्या मथवार्कनाड्यामंतः समीरे प्रविशत्युशांति यशः समृद्धिं कुशलं जयं च निर्गच्छति स्यात्फलवैपरीत्यं ५ ऐंदवीवहति नाडिकायदा स्वेच्छया प्रविशाति प्रभंजनः ॥

॥ टीका ॥

जनानां किं कुर्वतां व्रजतां कस्मिन्एकत्रसार्थे २०३ तारेति विधुनाडिकायां चंद्रनाडिकायां वहंत्यां वायुनापरिपूर्णायां ताराक्षेमंकरी भवति अर्कनाड्यांदक्षिणनाड्यां वहंत्यां वामाक्षेमंकरीभवति पूर्णेघ्राणे अनुलोमा फलदाभवति रिक्के वामाफलेनरहितास्यात् २०४ शशांकेति शशांकनाड्यामथवा अर्कनाड्यां अंतसमीरे वायौ प्रविशति सति पुंसः यशः कीर्तिं समृद्धिं संपदं कुशलं श्रेयः जयं प्रतीतं उशंति कथयंति वायोर्निर्गच्छतः सतः पुनः वैपरीत्यं कथयंति २०५ ऐंदवीति यदा नाडिका ऐंदवी

॥ भाषा ॥

नाना प्रकारके फल होंयहें वो हंसचार ताय हम विचार करेंहें ॥२०३॥ तारेति॥ चंद्रनाडी वहती होय ओर वायुकरकें पूर्ण होय तो दक्षिणा तारा कल्याणकी करवेवारी हे ओर सूर्यनाडी चलरही होय तो वामा तारा कल्याणकी करवेवारी होय ओर दोनों स्वर चलरहे होंय तो अनुलोमा फलकी देवेवारी होय दोनो स्वर खाली होंय तो वामातारा फलकरकें रहित होय ॥२०४॥ शशांकेति॥ ओर चंद्रनाडीमें वा सूर्यनाडीमें भीतर वायु प्रवेश करे ओर दक्षिणा तारा होय तो पुरुषनकूं यश कीर्ती समृद्धि संपदा कुशल श्रेय जय होय ओर जो पवन निकसतो होय तो विपरीत फल कहनो ॥२०५॥ ॥ऐंदवीति॥ जो चंद्रनाडी वह रही होय ओर पवन स्वेच्छा करकें प्रवेश करे भीतर

पोदकीव्रजति दक्षिणा यदास्यात्तदा सकलमीप्सितं
फलं ६ नाडिकावहति तापिनी यदा निस्सरत्युद-
रतः समीरणः अप्रदक्षिणगतिर्धनुर्द्धरी स्यादनिष्ट
फलमक्षयं तदा ७ मारुते विशति दक्षिणनाडीं द-
क्षिणा यदि गतिर्भगवत्याः अल्पकं तदुदितं शुभम
स्य व्यत्ययादशुभमल्पमुशंति ८ निःसरत्युदर-
तो यदीडया मारुतो भगवती च दक्षिणा यात्य
भीप्सितफलं भवेत्तदा व्यत्ययात्पुनरशोभनं तथा ९

॥ टीका ॥

चांद्री वहति प्रभंजने वायौ स्वेच्छया प्रविशति सति अंतरितिशेषः पोदकी देवी दक्षिणा व्रजति तदा ईप्सितं सकलं फलं स्यात् २०६ नाडिकेति यदा तापिनी दक्षिणा नाडिका वहति तथोदरतः समीरणो निःसरति सति अप्रदक्षिणागतिः वामा धनुर्द्धरी देवी भवति तदा अक्षयं फलमनिष्टं भवति २०७ मारुतेति दक्षिणनाडीं मारुते विशति सति यदि भगवत्या दक्षिणागतिर्भवति तदा फलं अल्पकं उदितं व्यत्ययात्पुनः अशुभं अल्पमुशंति कथयंति २०८ निःसरतीति ईडयाइति ईडया वामनाड्या उदरतः मारुते निःसरति सति भगवती च दक्षिणा याति तदा अभी-

॥ भाषा ॥

और पोदकी दक्षिणा होय तो वांछित फल संपूर्ण होय ॥ २०६ ॥ नाडिकेति ॥ जो दक्षिणनाडी वहती होय तैसें ही उदरमेंसुं पवन निकलतो होय और धनुर्द्धरी वाम भागमें होय तो अक्षय अनिष्ट होय ॥ २०७ ॥ मारुतेति ॥ पवन जेमनी नाडीमें प्रवेश करतो होय और जो भगवती पोदकी की दक्षिणगती होय तो फल अल्प होय ये पूर्व कह्यो जो विपरीत हुये तें अशुभ फल कहेंहें ॥ २०८ ॥ निःसरतीति ॥ वामनाडी करकें उदरमेंसुं पवन निकसे और पोदकी दक्षिणा होय तो वांछित फल प्राप्त होय और

प्रयातिवामापवनोप्यकस्मादभ्यंतरंसोमपथेनयाति
तत्रापिजाप्यंनियमेनभद्रं व्यत्यासतोजाप्यमभद्रमा
हुः २१० तारायांतीसोमनाड्यां वहंत्यां शस्ताश्या
मा शोभने कार्यभागे संत्रासादौशस्यतेवैपरीत्यात्
संमिश्रत्वेस्यात्फलंमिश्रमेव ११ तेनैकस्मिंसर्वजा
ते निमित्ते यादृग्येषांप्राणचारोभ्युदेति तादृक्तने
षांस्यात्फलंमानवानांनैकाकारोहंसचारस्तथाहि १२

॥ टीका ॥

प्सितफलंभवेत् व्यत्ययात्पुनः अशोभनंभवेत् २०९ प्रयातीति यदेति
देवी वामाप्रयाति सोमपथेनाकस्मात् पवनोपि अभ्यंतरंयाति तत्रापिजाप्यं
नियमेन भद्रं भवति तत्रजाप्यं नामजापेन परावर्तयितुं शक्यं व्यत्यासतः
अभद्रंजाप्यमाहुः २१० तारेति सोमनाड्यां वहंत्यांतारायांती शोभने
कार्यभागे शस्ता संत्रासादौ भयादौ वैपरीत्यंशस्यते मिश्रत्वेफलंमिश्रमे
वस्यात् २११ तेनेति तेनकारणेन एकस्मिन्नेव निमित्तेजाते यादृग्मा
नवानां प्राणसंचारः अभ्युदेति तेषां मानवानां तादृक्फलंस्यात् यस्मा
त्कारणात् हंसचारोनैकाकारोस्तितथाहीति तदेवदर्शयति २१२

॥ भाषा ॥

जोये विपरीत होय तो अशुभफल करे ॥२०९॥ प्रयातीति ॥ जोदेवीवामा होय ओरवाही
समें अकस्मात् चंद्रनाडीकरकें पवनवी भीतर जाय तो पीडा होय जपादिक करेसुं कोई
कामवा पीडा निवृत्त करो चाहें तो होय ओरजो विपरीत होय तो जपादिक करकें वी शु
भनही होय अशुभ होय ॥२१०॥ तारेति ॥ चंद्रनाडी वहती समें वांयेसुं जो श्यामा जेमने
भागमें आयजाय तो शुभ कार्यमें तो योग्य हे ओर भयादिक कार्यमें विपरीतहोय तो योग्य
हे ओर मिश्रित होय तो मिश्रितही फल होय ॥ २११ ॥ तेनेति ॥ एककार्य में मनुष्यनको
प्राण वायु जेसो जेसो चलतो होय तेसोही फल होय जासुं ये प्राणवायु सबनको एकसो
नही चले है ॥२१२॥

कस्यापीडाकस्यचिद्भानुनाडी कस्याप्येतेनाडिकेद्वेवहेते
कस्याप्यंतर्याति कस्यापिबाह्यं घोणायंत्रप्रेरितो
मातरिश्वा १३ श्यामाचारे हंसचारेणसाकं यस्याभ्यासो
वर्त्त्यसौकर्मपाकं जानात्येकंयोद्वयस्यास्य
मध्यात्तस्मिन्नास्तेशाकुनज्ञानसंपत् २१४ इतिपोदकीरुतेहंसचारप्रकरणमष्टमं ८ ॥७॥ स्यान्मर्यादानैववर्णाश्रमाणांमात्स्योन्यायश्चापलाद्दुःखदायी

॥ टीका ॥

कस्यापीति कस्यापि ईडावहति कस्यचिद्भानुनाडीवहति कस्याप्येते द्वेवहेतां घोणायंत्रः नासिकाप्रेरितः मातरिश्वा कस्याप्यंतर्याति कस्यापिबाह्यं २१३ श्मामेति हंसचारेणसाकं श्यामाचारे यस्याभ्यासो वर्तते असौ कर्म पाकंवेत्ति अस्यद्वयस्यमध्यात् य एकं वेत्तितस्मिन् शाकुनज्ञानसंपत् नास्तेनतिष्ठतीत्यर्थः २१४ इति शत्रुंजयकरमोचनादिसुकृतकारिभिः महोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायां वसंतराजटीकायांपोतकीरुतेहंसचारप्रकरणमष्टमं ८ ॥७॥ स्यादिति राज्ञोऽभावे वर्णाश्र-

॥ भाषा ॥

॥कस्यापीति॥ काऊपुरुषकी चंद्रनाडी वहेहे काऊकी सूर्यनाडी चलेहे काउकी दोनो नाडी चेलेंहें नासिकायंत्रकरकें प्रेरोहुयो पवन काऊपुरुषके भीनर प्रवेशकरेहे काऊकें वहार निकसे हे येश्वाससबनको एकसो नहीचलेहे ॥२१३॥ श्यामेति ॥ हंसचार जो इडा पिंगला को चलनो या करकें सहित जोश्यामा चारमें जाको अभ्यास होयवो कर्मपाककूं जानें हें ओर जो पुरुष इन दोनोनमेंसुं एकहीकूं जानतो होयतो वोपुरुष शाकुनमें यथार्थपूर्ण न ही होय ॥२१४॥ ॥इतिश्रीवसंतराज भाषाटीकायां पोतकी रुते हंस चारप्रकरणमष्टमं ॥८॥ ॥७॥ स्यादिति॥ जोराजा राज्यमें नहीं होय तो ब्राह्मण क्षत्री वैश्य शूद्र ये च्यारों वर्ण ओर ब्रह्मचारी गृहस्थी वानप्रस्थ संन्यास ये च्यारों आश्रम ओर

राज्ञोभावात्तेनराज्याभिषेकं सम्यक् ब्रूमो ब्रह्मपु-
त्रीरुतेऽस्मिन् २१५ वामस्वरादक्षिणगासुचेष्टा
स्थानं दिशंचश्रयतिप्रशांतं यस्याभिषेके शाकुने
कदेवी ससार्वभौमो भवतीह भूपः १६ निवर्तमा
नस्यचतोरणांताद्वामंव्रजेद्दक्षिणनिःस्वनाचेत् दि
ग्भागचेष्टास्थितिशांतरूपं चिरंस्थिरं तद्भवतीहराज्यं २१७

॥ टीका ॥

माणां मर्यादा नभवति तत्रवर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राः चत्वार आश्रमाः ब्रह्मचारी गृही वानप्रस्थो भिक्षुरिति क्रमात्तेषांमर्यादास्वस्वानुष्ठानविधिर्नभवति तथामात्स्योन्यायः मत्स्यगलांगलिइति लोके प्रसिद्धः आपतेत् न्यायकर्तुरभावेनदुर्नीतिपथप्रवृत्तेः न्यायः कीदृग्दुःखदायीप्रांते दुःखप्रदइत्यर्थः राज्ञोलाभेतत् नस्यात् तेनकारणेन ब्रह्मपुत्रीरुतेसम्यक्राज्याभिषेकंब्रूमः २१५ वामेति यस्याभिषेके शकुनैकदेवी वामस्वरासतीदक्षिणगा भवति कीदृशीसुचेष्टाशुभचेष्टा पुनः प्रशांतेंस्थानं दिशं च श्रयति स भूपः सार्वभौमोभवति २१६ निवर्तइति यदा तोरणांतात् निवर्तमानस्य दक्षिणनिस्वनाचेत् वामंव्रजेत् वामंकीदृशं दिग्

॥ भाषा ॥

इनकी मर्यादा नष्ट होय जांय न्यायकर्ता नही होय नव दुर्नीतीके न्याय दुःखके देवेवारे होंय ताकारणकर पोदकीके शब्दमें राज्याभिषेक हम कहेंहें ॥२१५॥ वामेति ॥ जाराजाके अभिषेकमें शकुनकी एकही देवी जो पोदकी सो वामभागमें शब्दकर दक्षिणभागमें आय जाय और शुभ चेष्टा करे शांत स्थानमें वा शांत दिशामें स्थिनहोय तो वो राजा चक्रवर्ती होय ॥२१६॥ निवर्तइति॥ जो शकुन देखबे वालो नोरणके अंतमेंसुं बगदके आवे नव वाके पोदकी जेमने भागमें शब्द करे फिर वामभागमें आय शांतदिशामें वा शांत चेष्टा करे वा शांतस्थानमें स्थिन होय तो वा राजाको राज्य चिरकाल तांई

राज्ञोराज्यंकुर्वतः कृष्णिकाया एताश्चेष्टाः सौरव्यदा
दुःरवदास्तु स्युर्व्यत्यासान्मिश्रभावात्तुतासांमि
श्रीभूतेसौरव्यदुःरवे भवेतां १८ श्यामानुलोमा
यदि तोरणांते वामाचतारा नतथानिवृत्तौ ददाति
राज्यंसुचिरंतदानींयुद्धान्वितंसापिचयुध्यमाना १९
वामानतारा नचतोरणांते निवृत्तिकाले यदि चोद्धृता तत् ॥

॥ टीका ॥

भागचेष्टास्थितिशांतरूपमिति दिग्चेष्टास्थितिभिः शांतं तदा इह लोके तद्राज्यं स्थिरंभवति २१७ राज्ञोराज्यमिति राज्यंकुर्वतः राज्ञः एताः श्रेष्ठाः चेष्टाः सौरव्यदाः स्युः तुपुनः आसां व्यत्यासाद्दुःरवदास्स्युः तथा तासां मिश्रभावात्तु मिश्रीभूते सौरव्यदुःरवे भवेताम् २१८ श्यामेति यदि तोरणांते अनुलोमा ताराभवति तथा निवृत्तौ वामा न तारा तदानींराज्यंसुचिरं भवति अपिचसा युध्यमानाचेद्युद्धान्वितंराज्यं यच्छति २१९ वामेति तोरणांते तोरणसंबंधिनी वामा न च तारापि न तथा निवृत्तिकालेचेदुद्धतास्यात्तदा राज्यंभवेत् कीदृग् अन्यावनिपालमौलिमालारजोभ्यर्चितपादपीठमिति अन्येऽवनिपालाः राजानः तेषांमौलयः शिरांसि ते-

॥ भाषा ॥

स्थिर होय ॥२१७॥ राज्ञोराज्यमिति॥ राज्यकरवेवाले राजाकूं ये कही हुई चेष्टा सुरवकी देवेवाली हें इनतें विपरीत चेष्टा होय तो दुःरवकी देवेवाली होंय और जो ये चेष्टा अमिलवां होय तो सुरवदुःरव दोनो होय ॥२१८॥ श्यामेति॥ जो तोरणके अंतमें अनुलोमा तारा होय और तहांसुं निवृत्त होती समें वामावी न होय और तारावी न होय तो चिरकालपर्यंत राज्य होय और जो पोदकी युद्ध करती दीरवे तो युद्धसहित राज्यदेवे ॥२१९॥ वामेति॥ तोरणांतमें वामावी न होय और तारावी न होय और निवृत्तिकालमें जो उद्धता तारा होय तो पृथ्वीपति राजा मस्तकनकूं नमाय

स्याद्राज्यमन्यावनिपालमौलिमालारजोभूषितपादपीठं २२० स्यात्तोरणांते प्रतिलोमगाचेत्तारायदिस्यादथवा निवृत्तौ सप्तांगविवृद्धसमृद्धराज्यमाज्यंयथाग्नौ प्रविलीयतेतत् २२१ राज्यंचिकीर्षोर्यदितोरणांते प्रदक्षिणंयाति खगोन्यजातिः विश्वंभरायासुररीकृतायां तदाधिपत्यं लभतेनृपोन्यः २२

इति पोदकीरुते राज्याभिषेकप्रकरणम् नवमं ९

॥ टीका ॥

षां मालाः स्रजः तासां रजांसिपरागाः तैरभ्यर्चितं पूजितं पादपीठं यत्र तत्तथा २२० स्यादिति सप्तांगैः स्वामिजनपदामात्यकोशदुर्गबलसुहृद्भिः विवृद्धं वृद्धिं प्राप्तं समृद्धं ऋद्धिमत् यद्राज्यंतत् तोरणांते प्रतिलोमगाचेत्स्यात् अथवा निवृत्तौ यदि तारास्यात् तदाविलीयते समागतमपि विलयंयातीत्यर्थः किमिव आज्यं यथा अग्नौ प्रविलीयते २२१ राज्यमिति यदिराज्यंचिकीर्षोःतोरणांते ऽन्यजातिःखगःप्रदक्षिणं याति तदा विश्वंभराया सुररीकृतायां अन्योन्नृपःआधिपत्यं लभते २२२ इतिशत्रुंजयकरमोचनादिसुकृतकारि महोपाध्याय श्रीभानुचंद्रविरचितायां वसंतराजटीकायां पोदकीरुते राज्याभिषेकप्र०९

॥ भाषा ॥

नमाय जाके सिंहासनकूं नमस्कार करें एसो राज्य होय ॥२२०॥ स्यादिति ॥ जो तोरणांतमें प्रतिलोमा होय अथवा निवृत्ति समयमें जो तारा होय तो स्वामी १ जनपद २ अमात्य ३ कोश ४ दुर्ग ५ बल ६ सुहृद ७ ये राज्यके सातो अंगनकरकें वृद्धीकूं प्राप्ती होय रह्यो और ऋद्धिवान् एसो वी राज्यनाशकूं प्राप्त होय कोन किसीनाई जेसें अग्नीमें घृत लीन होय जाय तेसेंही राज्य लीन होय जाय ॥२२१॥ ॥राज्यमिति॥ राज्य करो चाहें ताके जो तोरणांनमें और जातीको पक्षी प्राप्त

संधिविग्रहसपत्नसंगमात्सांप्रतं जयपराजयौतथा
ब्रूमहे शुभपथप्रवर्त्तिनां भूभृतां शकुननीतिवर्त्तिनां २३
वामस्वरोदक्षिणगः सुचेष्टोयः खेशयस्तेनसमंमिलंति
उत्कंठितायद्यपरेविहंगाः संधानमिच्छंतितदाद्विषंतः २४
वियुज्यतेयांतिसमागतंचेद्दुर्गायुगंतद्विघटेतसंधिः -
संगच्छते चेत्पृथगाश्रितंसत्संधिंचिकीर्षन्त्यरयस्तदानीं
२५

॥ टीका ॥

संधीति शुभपथप्रवर्त्तिनां भुभुजां संधिविग्रहसपत्नसंगमान् तथा जयपराजयौ ब्रूमहे कीदृशां शकुननीतिवर्त्तिनामिति शकुनानां या नीतिः मार्गः तत्रवर्त्तिनां शकुनमार्गानुगामिनामित्यर्थः २२३ वामइति वामस्वरोदक्षिणगः सुचेष्टो यः खेशयो वर्तते तेनसमं उत्कंठितायद्यपरेविहंगामिलंति तदा द्विषतः संधातुमिच्छंति २२४ वियुज्यतइति यदि ते पक्षिणः वियुज्य यांतिचेत् दुर्गायुगंसमागतं वियुज्यते तत् संधिः विघटेत चेत्पृथगास्थितं दुर्गायुगंसत् संगच्छते तदानीं अरयः संधिं

॥ भाषा ॥

होय और तारा कहूं चलीगई होय नही दीखे तो और राजा अधिपती होय ॥२२२॥ इतिश्रीवसंतराजभाषाटीकायां पोतकीरुते राज्याभिषेकप्रकरणं नवमम् समाप्तं ९

॥ संधीति ॥ शुभमार्गमें प्रवर्त होय रहे और शकुनमार्गमें वर्त रहे एसे राजानको मिलाप विग्रह वैरीनके संगमतें भय और जयपराजय ये अब कहें हें ॥ २२३ ॥ वामेति॥ वाममें स्वरकरकें दक्षिणमाऊं आय जाय सुंदर चेष्टा करे और आकाशमें स्थित होय फिर और पक्षि उत्कंठवान् होंय आकाशमें पोदकी करकें सहित मिलें तो वैरी अपने मिलापकी इच्छा करे हें एसो जाननो ॥ २२४ ॥ वियुज्यतइति ॥ जो वेही पक्षी पोदकीको जोडा आयेकूं वियोगकरकें चले जांय तो संधि होय और जो पोदकीकों जोडा न्यारो होयकें स्थित होय सब मिलजांय तो ये जाननो वैरीमिलापकी इ-

खगेनवामांदिशमाश्रितेनसार्द्धंखगोदक्षिणतोभ्युपेत्य संगच्छतेऽन्योयदिसौहृदेनसंधिंविधातुंतदुपैतिदूतः २६ अवामशब्दा प्रतिकूलयानाकलिं तथान्येनसमंकरोति निषेवतेदीप्तमनाप्तकल्पा यो पोदकीविग्रहमाहसेह २७ उत्पन्नसंधीरिपुणासमानं समागमंदक्षिणयाविदध्यात् करोतिराज्यं प्रतिकूलगाचेद्भवेत्ध्रुवंतत्प्रतिकूलमेव २८

॥ टीका ॥

चिकीर्षंति २२५ खगेनेति वामांदिशं आश्रितेन खगेन सार्द्धं दक्षिणतः खगः अभ्युपेत्य यदि सौहृदेन सुहृद्भावेनान्यः संगच्छते तदा संधिं विधातुं दूतउपैति आगच्छति २२६ अवामेति अवामशब्दा प्रतिकूलयाना अन्येनसमं कलिंकरोति तथा अनाप्तकल्पा अनाप्तभोजना दीप्तंस्थानं निषेवते तदा विग्रहमाह २२७ उत्पन्नेति उत्पन्नः संधिर्यस्याः सा तथा एवंविधा इह सा पोतकी दक्षिणयागत्या रिपुणासमानं समागमं विदध्यात् प्रतिकूलगाचेत्तदा राजा तत्प्रतिकूलमेव करोति २२८ ॥छ॥ ॥छ॥

॥ भाषा ॥

च्छा करेंहैं ॥ २२५ ॥ खगेनेति ॥ वांई दिशामें स्थित पक्षी होयवाकूं संगलेकर दक्षिण दिशामें पक्षी प्राप्त होय ओर जो स्नेह करकें ओर पक्षी आय मिलें तो जाननो मिलापकरवेकूं दूत आवेहै ॥२२६॥ अवामेति ॥ वांयों शब्द कियो नही एढी टेढी चल रही होय ओर पक्षी करकें कलह कररही होय भोजन जाकूं प्राप्त नही हुयो होय दीप्त स्थानकूं सेवनकरती होय तो विग्रह करावे ॥२२७॥ उत्पन्नेति ॥ पूर्वकलह करती होय फिर संधी जाके होय गई होय एसी पोदकी दक्षिणमाऊं वैरीनकरकें सहित समागमकरे तो राज्य करे प्रतिकूलगमन करती होय तोराजाके राज्यकूं प्रतिकूल करै ॥२२८॥

आशंकमानस्य समंद्विषद्भिः समागमंदक्षिणया भवे
त्सः वामंव्रजंत्यानियतंद्विषंतः समागमाद्विष्यति
राजकीयात् २९ तारातिघोरंसमरं विधत्ते वामात्तुत
स्यप्रतिषेधनाय वामस्वरादक्षिणतः प्रयाति या
पोदकी सा महते रणाय २३० यांतीप्रदीप्तंश्रयती
ह तारा कुर्वंति युद्धंयदिवाविहंगाः तस्याच्छिवा
फेत्कृततालबन्ध नृत्यत्कबन्धः समरोऽतिघोरः ३१

॥ टीका ॥

आशंकमानइति द्विषद्भिः समं समागमं आशंकमानस्य दक्षिणाया समागमोभ्रवेत्पुनः वामंव्रजंत्या तया राजकीयात्समागमा द्विषंतः द्विष्यंति दुःखं प्राप्नुवंतीत्यर्थः २२९ तारेति तारा अति घोरं समरं विधत्ते वामात्तु तस्य प्रतिषेधनायभवति या पोतकी वामस्वरान क्वच नप्रयाति तत्रैव स्थितं विधत्ते सापोतकी महते रणाय भवति २३० यांतीति यदितारायांती दीप्तं स्थानं श्रयति यदिवा विहंगाः युद्धं कुर्वन्ति तदा समरः अति घोरः स्यात् कीदृग् शिवाफेत्कृततालबंध नृत्यत्कबंधइति शिवा फेत्कृतमेव तालबंधः हस्तास्फोटः तेन नृत्यंतिकबंधानियत्रसतथा २३१

॥ भाषा ॥

॥ आशंकमानइति ॥ वेरीनकरकें सहित समागम कियो चाहे ताकूं दक्षिणतारा होयतो समागम होय फेर वांई गमन करती होय ताकरकें राजानकें समागमतें दुःख होय ॥ २२९ ॥ ॥तारेति ॥ ओर जो पोदकी तारा होय तो अति घोर संग्राम करे ओर जो वामा होय तो संग्रामके निषेधके अर्थ होय जो पोदकी वाममाऊं स्वरकरकें फिर दक्षिण माऊंते वांई मांऊं जायकर शब्द करे तो महान् संग्राम करावे ॥ २३० ॥ श्रयंतीति ॥ जो तारा गमनकरत दीप्तस्थानमें बेठ जाय ओर जो पक्षी हें ते युद्ध करते होंय तो श्यारिया जामें शब्द करते होंय हजारन कबंध जामें पडे होंय एसो अत्यंत घोर संग्राम करावे ॥ २३१ ॥ ॥ छ ॥

वामेबाह्यंदक्षिणेआंतरंस्वपुच्छोत्साटेपोदकीहंतिसैन्यं
चंच्वासर्वंचर्वयंतीस्वमंगंवक्तिश्यामास्वामिनोगात्रभंगं ३२
युद्धप्रश्नेनोद्धृतानापितारास्याद्व्यावृत्तौवामगापांडवी
चेत् मूर्द्धासार्द्धंश्रीजयश्रीपणंतत्प्राणद्यूतंस्याद
वश्यं भटानाम् ३३ प्रयातितारायदितोरणांते निवृत्ति
कालेप्रतिलोमगाचेत् तत्ध्वांक्षवैतालशृगालगृध्र
रक्षःक्षुधार्त्तिक्षपणंरणंस्यात् ३४

॥ टीका ॥

वामइति वामेस्वपुच्छोत्साटे पोतकी वाह्यं सैन्यं हंति दक्षिणेस्वपुच्छोत्साटेआंतरस्थांहंति चंच्वास्वमंगं चर्वयंती पोतकी युद्धे स्वामिनोगात्रभंगं वक्ति २३२ युद्धेति चेत् यदि युद्धप्रश्नेसति उद्धृतानस्यात् तारा अपि नस्यात् व्यावृत्तौवामगा पांडवीस्यात् तदा मूर्द्धासार्द्धं श्रीजय श्रीपणंस्यात् भटानां प्राणद्यूतमवश्यं ततस्यात् २३३ प्रयातीति यदि तोरणांते ताराप्रयाति चेत् निवृत्तिकाले प्रतिलोमगाभवेत् तदा रणंस्यात् कीदृग् ध्वांक्ष इति ध्वांक्षवेताल शृंगालगृध्ररक्षांसि तेषां क्षुधार्त्तिःक्षुत्पीडा तस्याः क्षपणं

॥ भाषा ॥

॥वामइति॥ वामभागमें पूंछकूं उत्पाटन करे तो पोतकी वाहरकी सेनाको नाश करे और जेमनेमांऊकी पूंछकों उखाडे तो भीतरकी सेनाको नाश करे औरजो चोंच कर अपने अंगकूं चर्वण करे तो पोदकी युद्धमें स्वामीके देहको भंग करे ॥२३२॥ युद्धेति॥ युद्धके शकुनमें पोतकी उद्धृता न होय और तारावी न होय वगदतीसमें वामभागमें होय तो मस्तक करके सहित राज्यश्रीकूं आदिले सव निवेदन करे और जो योद्धानके प्राणको नाश अवश्य होय ॥२३३॥ ॥प्रयातीति॥ ॥जो तोरणके अंतमें तारा होय वगदतीसमें प्रतिलोमगा होय तो काक वैताल शृगाल गीधराक्षस इनके क्षुधाकी पीडाकूं दूर करवेवारो संग्राम होय ॥२३४॥

॥छ॥

॥छ॥

अभ्यर्चितंपांडविकायुगंचेद्वियुज्यतेतोरणसन्निवेशे तदाजयश्रीर्हठतस्कराणांरणोनभावीरणदीक्षितानां ३५ वामेस्वरंदक्षिणतश्चयानंशांतेस्थितिंतोरणभूमिकायां करोतिवामांचगतिंनिवृत्तोश्यामायदातत्सुलभाजयश्रीः ३६ कृतापसव्यध्वनिरुद्धृताचेद्दीप्तंश्रयेत्तोरणसन्निवेशे प्रदक्षिणंयातिनिवृत्तिकाले तदायुयुत्सोर्मरणंरणेस्यात् ३७

॥ टीका ॥

दूरीकारं २३४ अभ्यर्चितमिति यदि अभ्यार्चितं पांडविकायुगंचेत् तोरणसन्निवेशे वियुज्यते तदा हठतस्कराणां जयश्रीर्भवति रणदीक्षितानां रणो नभवति २३५ वामेइति तोरणभूमिकायां यदि पांडविकावामेस्वरं कृत्वा दक्षिणतः यानंशांते स्थितिं करोति चपुनः निवृत्तोवामांगतिं विधत्ते तदा जयश्रीः सुलभा भवति २३६ कृतेति यदि तोरण सन्निवेशे कृतापसव्य ध्वनिरुद्धृतादीप्तंश्रयेत् तथा निवृत्तिकाले प्रदक्षिणं याति तदा युयुत्सोः रणे मरणं स्यात् २३७

॥ भाषा ॥

॥ अभ्यर्चितइति ॥ जो पूजन कियो हुयो पोदकीको जोडा जो तोरणमें लीन होय जाय तो हठ नाम बलात्कारी तस्कर इनकी जयश्री होय ओर रणवालेनको संग्राम नहीं होय ॥२३५॥ वामेति॥ तोरणकी पृथ्वीमें जो पोदकी वामभागमें स्वरकरकें फिरदक्षिण भागमें शांतस्थानमें स्थिती करे फिर निवृत्तिहोती समें वामगती करे तो जयश्री सुलभ होय ॥२३६॥ कृतेति ॥ जो पोदकी तोरणमें जेमने मांऊं शब्द करे ओर उद्धृता होय दीप्तस्थानमें वा दीप्तदिशामें स्थितहोय फिर वगदती समयमें दक्षिणभागमें होय तो युद्ध कर्ताको रणमें-मरण होय ॥२३७॥ ॥छ॥ ॥छ॥

तारस्यदुर्गा युगलस्यमध्यान्निवृत्यचेद्गच्छतिवाममेका वामानिवृत्तावपिचेत्तदास्यात्ससशस्त्रघातोविजयोनृपस्य ३८ प्रदक्षिणंतोरणभूमिकायांनिवृत्तिकाले प्रतिलोमगंवा तिरोभवेत्पांडविकायुगं चेत्तद्युद्धकामस्यपराजयः स्यात् ३९ समीपयुद्धे कृतवामशब्दा श्यामानुलोमाचपराजयाय अवामशब्दा यदि यातिवामं भवेत्तदा भूमिभुजो जयश्रीः २४० ॥ छ ॥

॥ टीका ॥

तारस्येति यदि तारस्यदुर्गायुगलस्यमध्यादेका निवर्त्यचेद्वामंगच्छति निवृत्तावपि वामेकाभवति तदानृपस्य सशस्त्रघातोविजयोभवेत् २३८ प्रदक्षिणमिति यदि तोरणभूमिकायां प्रदक्षिणं भवेत् निवृत्तिकाले प्रतिलोमगं भवेत् कीदृशं अंतर्हितमिति अनुलोमप्रतिलोमो भूत्वा क्वापि लीयते तदा योद्धुकामस्य पराजयः स्यात् २३९ समीपयुद्धइति आसन्ने युद्धे कृतवामशब्द अनुलोमापि श्यामापराजयाय स्यात् यदि अवामशब्दावामंयाति तदा भूमिभुजोजयश्रीर्भवेत् २४०

॥ भाषा ॥

॥तारस्येति ॥ ताराके युगलमेंसुं एक निवृत्त होय करकें वाममांऊंकूं गमन करे ओर निवृत्तीमेंवी वामा होय तो राजाकूं शस्त्रघात सहीत विजय होय ॥ २३८ ॥ प्रदक्षिणामिति॥ तोरणकी पृथ्वीमें पोतकी प्रदक्षिणा होय ओर वगदती समें प्रतिलोमगा होय अनुलोम प्रतिलोम होय करकें कहूं लीन होय जाय तो युद्धकी कामना जाकूं होय ताको पराजय होय ॥ २३९ ॥ समीपयुन्द्धइति॥ राजाके युद्ध निकटमें होनहार होय जो पोदकी शब्द वांयो करे ओर अनुलोमा होय तो पराजयके अर्थजाननी जो दक्षिणमांऊं शब्द करे वामभागमें जायतो पृथ्वीपति राजाकूं जयश्री होय ॥ २४० ॥ ॥ छ ॥

सद्योरणेवामरवेण भंगोजयोभवेद्दक्षिणवासितेन
कृतेध्वनौतोरणनामधेयेयुग्मेस्य शब्दाच्चजयोऽ
जयोवा ४१ वामेनगत्वायदियातितारायुद्धोद्यमे
हंतितदायुयुत्सुम् भूत्वापिताराप्रतिलोमगाचेन्न
दाजयश्रीर्वसुधाधिपस्य ४२ स्थिरेविहंगद्वितये
स्थिरंस्याद्युद्धं भवेत्तत्रवियुज्यमाने भवेद्ध्वनिर्वो
भयतोद्वयस्य संधिर्भवेत्पार्थिवयोस्तदानीं ४३ यो
द्धव्यमद्येतिविचिंत्यमानेयात्राविरुद्धः शकुनः शुभाय

॥ टीका ॥

सद्यइति सद्योरणेवामरवेणभंगो भवेत् दक्षिणवासितेनजयोभवेत् तोरणनामधेये कृतध्वनौयुग्मेसति अस्यशब्दात् जयोऽजयोवाभवेत् २४१ वामेनेति युद्धोद्यमे वामेनगत्वायदि तारायाति तदा युयुत्सुं हंति भूत्वा पितारा प्रतिलोमगाचेत्स्यात् तदा वसुधाधिपस्य जयश्रीर्नस्यात् २४२ स्थिरइति स्थिरे विहंगद्वितयेस्थिरंयुद्धं भवेत् वियुज्यमाने तत्रत दोभयतोद्वयस्यध्वनिर्भवेत् तदानीं पार्थिवयोः संधिर्भवेत् २४३ योद्धव्यमिति

॥ भाषा ॥

॥सद्यइति॥ संग्राममें पोदकीके वामशब्दकरकें रणभंग होय अोर दक्षिणा होय तो जय होय अोर तोरणमें शब्दकरे युग्म पोदकीको जोडा होय तो याके शब्दतें जय होय वा अजय होय ॥ २४१॥ वामेनेति ॥युद्धको उद्यम होयरह्यो होय अोर पोदकी वाम होयकरकें जो दक्षिणा आय जाय तो युद्ध करवेवालेकूं नाश करे जो तारा होयकरकें प्रतिलोमगा होय तो राजाके जयश्री होय ॥ २४२॥ स्थिरइति॥ दोनो पक्षी स्थिर होंय तो युद्धवी स्थिर होय अोर दोनो वियोगकरें होंय तोवी युद्ध करे अोर दोनो एक होय मिल जाय अथवा दोनोनको दोनो मांऊंसु शब्द होय तोवी राजानको मिलाप होय ॥२४३॥ ॥योद्धव्यमिति॥ मोकूं अब युद्ध करनो हे एसो मनमें चिंतमनकरत यात्रातें विरुद्ध

दिनांतरेस्यात्समरोयदाभवेत् क्षेमं करोयात्रिकएव
नान्यः ४४ अंगानियानिस्पृशतिप्रयत्नाद्वामांघ्रि
णापांथसमूहमाता सुशिक्षितस्यापिभटस्यतेषु
द्वंद्वप्रयुद्धेनियतंक्षतानि ४५ अभ्यर्च्च्यमंत्रेणविहं
गयुग्मं विन्यस्यभूपद्वयनामधेयं संधिर्विरोधःसम
रोजयोवा भंगोऽथवेत्यादिविकल्प्यपृच्छेत् ४६
यत्तत्रकिंचिच्चरितंव्यधत्तेखगोभवेत्तन्नृपयोरवश्यम्

॥ टीका ॥

योद्धव्यं मयाद्येति विचिंत्यमाने यात्राविरुद्धः शाकुनः शुभायभवति यदातु दिनांतरेसमरः स्यात् तदा यात्रिकएवक्षेमंकरः नान्यः २४४ अंगानीति वामांघ्रिणापांथसमूहमाता यानि अंगानि प्रयत्नात् स्पृशति सुशिक्षितस्यापिभटस्य द्वंद्वयुद्धे तेषु नियतं क्षतानिस्युः २४५ अभ्यर्च्येति पूर्वोक्तं विहंगयुग्मं अभ्यर्च्य भूपद्वयनामधेयं विन्यस्य च संधिः विरोधः समरः जयः भंगःइति विकल्प्यपृच्छेत् २४६ यत्तत्रेति खगौ यत् अत्र चरितं विधत्तः तत् नृपयोरवश्यं भवेत् सुबुद्धिनेत्यादिकमूहनीयम् यतः शाकुनसंविदर्हः अनार्किको नभवेत्

॥ भाषा ॥

शकुन होय तो शुभके अर्थ होय और जो बोहोत दिनमें संग्राम होय तो यात्राके शकुन हें सोई कल्याण करवेवारे हें और नही हे ॥२४४॥ ॥अंगानीति॥ पोतकी वांयें पामकरकें जा अंगकूं स्पर्श करे तो बोहोत सुंदर सीखे हुये योद्धारनको द्वंदयुद्धमें नाश होंय ॥ २४५ ॥ अभ्यर्च्येति॥ पहलें कह्याए पक्षीको युग्म ताको पूजन करकें दोनो राजानको नाम धरकरकें फिर संधिविरोध संग्राम जय भंग इनकूं आदिलेकें जो भेद तिनै पूछे ॥ २४६॥ यनत्रेनि॥ दोनो पक्षी जो कछू आचरण करें सो दोनो राजान-

सुबुद्धिनेत्यादिकमूहनीयंनातार्किकः शाकुनसंविद
ईः ४७ युग्मं अश्वमेषकृकलासलावका द्वंद्वयु
द्धकुशलायतः सदा तत्कृतेपिविहगद्वयंततः पूर्व
वच्छकुनवद्विभावयेत् ४८ इतिपोतकीरुतेसं-
धिविग्रहजयादिप्रकरणंदशमं १० गृहीसमस्ता
श्रमिणांवरिष्ठश्चारित्रवत्यासभवेद्युवत्या तस्या
विवाहार्थपतेः परीक्षामाचक्ष्महेपांडविकारुतेऽस्मिन् ४९

॥ टीका ॥

२४७ अश्वेति तत्कृतेपि भंगादिज्ञानार्थं पूर्ववद्विहगद्वयं शकुनवित् विभावयेत् यतः अश्वमेषकृकलासलावकाः सदाद्वंद्वयुद्धकुशलाः स्युः २४८ इतिश्रीशत्रुंजयकरमोचनादिसत्कृतकारिमहोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायां वसंतराजटीकायां पोतकीरुतेसंधिविग्रहजयादिप्रकरणं दशमम् १० ॥छ॥ गृहीति समस्ताश्रमिणां ब्रह्मचारिवानप्रस्थभिक्षूणां मध्येवरिष्ठः गृहीस्यात् तेषां तदधीनत्वात् सचारित्रवत्यायुवत्याभवेत् अस्मिन्पांडविकारुते तस्याविवाहार्थं परीक्षामाचक्ष्महे २४९ ॥छ॥ ॥छ॥

॥ भाषा ॥

कुं अवश्य होय बुद्धिमान्पुरुषकरकें विचार करनो योग्य हे शाकुनवेत्तानमें योग्य होय सो तर्क नाकरे ॥२४७ ॥अश्वेति॥ अश्व मेष कृकलास लावक नाम तित्तर ये द्वंद्वयुद्धमें कुशल होंयहें सो भंगादि ज्ञानके लियें पूर्व कह्याए जो युग्म पक्षी उनकी सीनाई शाकुनवेत्ता इन च्यारोनको विचार करनो योग्य हे ॥२४८॥ इतिश्री वसंतराजभाषाटीकायां पोतकी रुते संधिविग्रह जयादिप्रकरणं दशमं समाप्तं॥१०॥ ॥गृहीति॥ ब्रह्मचारी गृहस्थी वानप्रस्थी सन्यासी इनमें गृहस्थी श्रेष्ठ हे जो शुभ आचरण धर्ममें वर्तें ऐसी स्त्रीकरकें युक्त होय तब वोउत्तम हे यातें या पोतकीके

पुंसः कुमारीवरणायतारा प्रशस्यतेवामगतिर्विरुद्धा स्त्रियश्चपत्युर्वरणायवामाश्यामा प्रशस्तानतुयानुलोमा २५० पाणिग्रहप्रश्नविधिप्रसंगेदुर्गायुगंगच्छतिदक्षिणंचेत् परस्परंसौहृदवृद्धिभाजः स्त्रीपुंसयोस्तद्दिवसाःप्रयांति ५१ मध्यात्द्वयोः शोभनचेष्टयोर्यः प्रभूतचेष्टोयदिवोन्नतस्थः खगः खगीवावरकन्ययोःस आत्मीयपक्षेकुरुते प्रभुत्वम् ५२

॥ टीका ॥

पुंसइति कुमारीवरणाय पुंसः प्रश्ने तारा प्रशस्यते वामगतिर्विरुद्धाभवति पत्युर्वरणाय स्त्रियः प्रश्नेवामा श्यामा प्रशस्ता नत्वनुलोमा २५० पाणीति पाणिग्रहप्रश्नविधिप्रसंगे चेत् दुर्गायुगंदक्षिणंगच्छति तदा स्त्रीपुंसयोर्दिवसाः परस्परं सौहृदवृद्धिभाजः प्रयांति २५१ मध्यादिति द्वयोः पूर्वोक्तयोर्मध्यात् यः कश्चित्खगः खगीवा शोभनचेष्टया याति यदिवा प्रभूतचेष्टोभवति उन्नतस्थोभवति तदावरकन्ययोर्मध्ये स आत्मीयपक्षे प्रभुत्वं कुरुते २५२ ॥छ॥

॥ भाषा ॥

शब्दमें स्त्रीके विवाहके अर्थपतिकूं परीक्षा कहेंहें ॥२४९॥ पुंसइति ॥ कन्याके वरवेके अर्थ पुरुषकूं शकुनमें तारा होय तो शुभहे जो वामगती होय तो विरुद्ध होय ओरपतिके वरवेके लिये स्त्रीकूं प्रश्नमें वामा शुभ हे अनुलोमा निषेध है ॥२५०॥ ॥पाणीति॥ पाणिग्रहण करवेके शकुनविधिमें जो पोदकीको जोडा दक्षिणमांऊं गमन करे तो स्त्रीपुरुषके दिवस परस्पर स्नेहकी वृद्धीपूर्वक व्यतीत होंय ॥२५१॥ ॥मध्यादिति॥ पूर्व कहेजो २दोनो जोडा जोडी उनमेसुं जो कोई पक्षी पुरुषवा पक्षिणी स्त्री ये सुंदर चेष्टा करते होंय ओरऊंचे ये बेठे होंय जो पोदकी पुरुषके ये

खगीखगस्याशनदायिनीचेत्तदापतिस्त्रीधनमाद
धाति खगोऽशनंयच्छतिचेद्विहंग्याददातिवित्तं
पुरुषःस्त्रियस्तत् ५३ यत्प्रीतिदानादिनिजैःप
रैर्वाखगीखगोवा कुरुतेप्रयत्नात् तत्प्रीतिदानादिनिजैःपरैर्वासमंविधत्तेदयितापतिर्वा ५४
धनुर्द्धरीचेद्बहुभिर्विहंगैरावेष्ट्यतेस्वैःपरजातिभिर्वा
तत्कन्यकास्वैःपरजातिभिर्वाव्यूढासतीकाम्यतइत्युशान्ति २५५

॥ टीका ॥

खगीति यदि खगीखगस्याशनदायिनीस्यात् तदा पतिः स्त्रीधनमाददाति चेत्खगः विहंग्या अशनं यच्छति तदा पुरुषः स्त्रियः धनंददाति २५३ यदिति यत्प्रीतिदानादिनिजैः परैः वा खगः खगीवा प्रयत्नात्कुरुते तत्प्रीतिदानादिनिजैः परैर्वा समं दयितापतिर्वा कुरुते २५४ धनुर्द्धरीति चेद्धनुर्द्धरी स्वैः परजातिभिः बहुभिर्विहंगैरावेष्ट्यते तदाकन्यका व्यूढासती स्वैः परैर्वा काम्यतइति उशांति कथयंति वृद्धाइतिशेषः २५५ ॥छ॥

॥ भाषा ॥

शकुन होंय तो वरकूं प्रभुताई करे ओर जो पक्षिणीको शकुन एसो होय तो स्त्रीकूं प्रभुता होय ॥२५२॥ खगीति॥ जो पक्षिणी पुरुषपक्षीकूं भोजन देरही होय तो पति स्त्रीको धन ग्रहण करै ओर जो पक्षी पक्षिणीकूं भोजन देरह्यो होय तो पुरुष स्त्रीकूं धन देवै ॥२५३॥ यदिति॥ पक्षी वा पक्षिणी प्रयत्नतें प्रीतिदानादिक निज अपनेनकरकें या परायेनकरकें करें तो पुरुषवा स्त्री येवी दोनो निज अपनेनकर वा परायेनकरकें प्रीतिदानादिक समान धारन करै ॥२५४॥ धनुर्द्धरीति॥ जो धनुर्द्धरी अपनी जातिके वा परजातिके पक्षीनकरकें आवेष्टन होय रही होय तो कन्या-

पोदकीमिथुनमैथुनेक्षणे वामतोभवति कन्यकास
ती तादृशंतु यदिदक्षिणे तदा निश्चयेनकुलटाभव
त्यसौ ५६ ताराव्रजित्वा भगवत्यकस्मादधिष्ठि
तापादपवृन्दकंचेत् राज्ञीभवेत्सापरिणीयते या
भवेन्नृपत्वंद्वितयेद्वयस्य ५७ तारस्यपक्षिद्वितय
स्यमध्याद्यः संज्ञकोभ्येति निवृत्यवामं मध्यात्
कुमारीवरयोरवश्यं तत्संज्ञकःपूर्वमुपैति मृत्युं ५८

॥ टीका ॥

पोदकीति मिथुनमैथुनेक्षणे मिथुनस्यमैथनं संभोगः तस्यईक्षणं दर्शनं तस्मिन्नसमये यदि पोदकी वामतोभवति तदा कन्यकासती भवति यदि दक्षिणे भवति तदा असौ स्त्रीकुलटा भवति २५६ तारेति यदिभगवती ताराव्रजित्वा अकस्मात् पादपवृंदकमधितिष्ठिताभवति तदा या परिणीयते सा राज्ञी भवेत् द्वितयंच तथाविधं भवति तदाद्वयस्य राज्यंस्यात् २५७ तारस्येति तारस्यपक्षिद्वितयस्यमध्यात् यत्संज्ञकः निवृत्यवाममभ्येति तदाकुमारीवरयोर्मध्यात् तत्संज्ञकःपूर्वं

॥ भाषा ॥

विवाह हुये पीछे अपनेन करकें परायेनकरकें चाहना करवेमें आवे ॥२५५॥ पोदकीति ॥ स्त्रीसुं संभोग करवेको शकुन देखती समयमें जो पोदकी वामभागमें होय तो कन्यासती शील होय जो दक्षिणभागमें होय तो वो स्त्री कुलटा होय ॥२५६॥ तारेति ॥ जो श्यामा तारा होय करकें अकस्मात् वृक्षनके समूहये जायबैठे तो जाको व्याह हुयो है सो राणी होयवाके पुरुषकूं वी राज्य होय ॥२५७॥ तारस्येति ॥ पोदकीके युगलमेंसें स्त्रीसंज्ञक वा पुरुषसंज्ञक पीछेकूं वगदकर वाम भागमें आय जाय तो कन्यावर दोनोनमेंसुं वोही संज्ञक पूर्व मरे स्त्रीसंज्ञक पक्षीवाम आवे तो कंन्या पहलें मरे जो पुरुषसंज्ञक आवे तो वर पहलें मरे ॥२५८॥

श्यामायुगे दक्षिणगे विहंगीं विहंगमश्चेत्परिहृत्य याति
त्यक्त्वा स्त्रियं तत्पुरुषः प्रयाति नारी नरं मुंचति वैपरी
त्यात् ५९ निमज्ज्य धूल्यामुपगम्य तारा तारां शुभे
तिष्ठति चेत् प्रदेशे तन्निश्चितं पांथसमूहमाता वोढुः
परिव्राजकतां ब्रवीति २६० चंचूपुटांताऽस्थिल
वानुलोमा यद्याश्रयेद्देशमनिंदनीयं ब्रूते कपालव्र
तधारणं तत् खगी कुमारी विहगो नरस्य ६१ प्रद
क्षिणं गच्छति पक्षियुग्मं ततः समारोहति पादपं चेत् ॥

॥ टीका ॥

मृत्युमुपैति २५८ श्यामेति श्यामायुगे दक्षिणगे सति विहंगीं विहंगमः परिहृत्य याति तदा तत्पुरुषः स्त्रियं त्यक्त्वा याति वैपरीत्यात् नारी नरं मुंचति २५९ निमज्ज्येति धूल्यां निमज्ज्य ततः तारामुपगम्य चेत् शुभे प्रदेशे तिष्ठति तदा निश्चितं पांथसमूहमाता वोढुः परिव्राजकतां ब्रवीति २६० चंच्विति यदि चंचूपुटांतास्थिलवा अनुलोमा अनिंदनीयं देशमाश्रयेत् तदा खगी कुमार्याः कपालधृतधारितां ब्रूते खगश्चेत् नरस्य तद्ब्रूते २६१ प्रदक्षिणमिति

॥ भाषा ॥

॥श्यामेति॥ श्यामाको युगल दक्षिणभागमें होय पुरुष पक्षी पक्षिणीकूं छोडके चलो जाय तो वो पुरुष स्त्रीकूं छोडके चल्यो जाय जो वामभागमें आय विहंगी विहंगमकूं छोड चली जाय तो स्त्री पुरुषकूं छोडके चलीजाय ॥ २५९॥ निमज्येति॥ पोदकी धूलमें स्नान करकें तारा होयकर जो शुभस्थानमें स्थित होय तो निश्चयही कन्याको भर्तार सन्यासी होय ॥ २६०॥ चंच्विति॥ जो चोंचमें हाडको टूक लियें अनुलोमा होयकर शुभदेशमें स्थित होय तो जो खगी होय तो कन्याकूं और खग होय तो पुरुषकूं कपाल व्रत धारण करे अर्थात् भ्रष्ट होय जाय ॥ २६१ ॥ प्रदक्षिणमिति ॥ जो पोदकीको युग्म दक्षिणभागमें गमन करे ता पीछें फल पुष्प अंकुर पत्र

फलप्रसूनांकुरुपत्रहीनं जायापतीचेत्भवतोदरि
द्रौ ६२ कृत्वारवंदक्षिणतश्चगत्वाश्यामाद्रुमंशु
ष्कमधिष्ठिताचेत् तद्वंध्यतां जल्पतिकन्यकायाः
षंढत्वमारव्यातिरवगोनरस्य ६३ उभेविहंग्योवि
हगस्तथैको यदित्रयंदक्षिणभागमेति सौभाग्य
सौहार्दमहानिधानंवोढु स्तदाद्वे भवतोयुवत्यो ६४
तारस्यपक्षीद्वितयस्यमध्यात्खगांतरंचेच्छ्रयते वि
हंगी ॥

॥ टीका ॥

पक्षियुग्मंप्रदक्षिणंगच्छति ततः फलप्रसूनांकुरपत्रहीनंपादपंचेत्समारो
हति तदा तज्जायापतीदरिद्रौभवतः २६२ कृत्वेति यदिरवंकृत्वा दक्षिण
तः गत्वाचेत्श्यामा शुष्कद्रुमं अधिष्ठितास्यात् तदाकन्यकायास्तद्वंध्य
तां जल्पति रवगो नरस्य षंढत्वमारव्याति २६३ उभेइति उभेविहंग्यो
तथैको विहंगः यदित्रयंदक्षिणमार्गयायी भवति तदा वोढुः द्वेयुव
त्यो भवतः सौभाग्यसौहार्दमहानिधानं यथा स्यात्तथेति क्रियाविशेष
णं २६४ तारस्येति तारस्यपक्षिद्वयस्य मध्यात् रवगांतरं चेत्
विहंगी श्रयते तदा या कुमारी परिणीयते सा निश्चितं दुश्चरिता भ-

॥ भाषा ॥

इन करकें हीनसूके वृक्ष ये चढजाय तो स्त्रीपुरुष दोनो दरिद्री होंय ॥२६२॥
॥कृत्वेति ॥ जो पोदकी शब्दकरकें दक्षिणतें जायकरकें सूके वृक्ष ये जायबे
ठे तो कन्याकूं वंध्या करे ओर जो पुरुष पक्षी या रीतसुं स्थित होय तो वरकूं
नपुंसकता कहेंहें ॥२६३॥ उभेति॥ दोय पोदकी एक विहंग ये तीनो दक्षिण
मार्गमें गमनकरें तो वरकें सौभाग्य सुहृद महान् धन इनसहित दोयस्त्री होंय॥
॥२६४॥ तारस्येति ॥ पोदकीके युगलमेंसुं जो पोदकी ओर पक्षीको आश्रयकरे

तदा कुमारीपरिणीयतेयासानिश्चितंदुश्चरिताप्र
वित्री ६५ अन्योयदापांडविकायुगस्य मध्येविहं
गीश्रयतेविहंगः भवत्यसाध्वीवनितायदानुश्या
मासपत्नीनियतंतदास्यात् ६६ वामस्वरंमैथुन
सेवनं वा भक्ष्यप्रदानंयदिवाविधाय वामेततस्ता
रमदीप्तसंस्थं साध्वींस्त्रियंजल्पतिपक्षियुग्मं ६७
आहारदानस्वरमैथुनानिपक्षिद्वयंदक्षिणतःकरोति
यदातदानींनियतंकुमार्याआहारिकौमारिकमन्यपुंसा ६८

॥ टीका ॥

वित्री २६५ अन्यइति यदा पांडविकायुगस्य मध्ये अन्यः विहंगः विहंगीश्रयते तदा असाध्वी वनिता भवति यदा श्यामा श्रयति तदा नियतं सपत्नीस्यात् २६६ वामस्वरमिति वामे वामस्वरं मैथुनसेवनं वा भक्षप्रधानं कृत्यांतरं विधाय यदि ततस्तारमदीप्तसंस्थं पक्षियुग्मंस्यात् तदास्त्रियं साध्वींजल्पति २६७ आहारेति यदा आहारदानस्वरमैथुनानि पक्षिद्वयं दक्षिणतः करोति तदानीं नियतं कुमार्याः अन्य पुंसा कौमारि

॥ भाषा ॥

तो ब्याही कन्या निश्चयही कुत्सित आचरण कर्ता होय ॥ २६५॥ अन्यइति॥ जो पोदकीकु युगलमें और पक्षी विहंगी पोदकीके पास आय स्थित होय तो वो कन्या असाधुनी होय जो ये पोदकी दूसरे पक्षीके पास चली जाय तो निश्चयही कन्याके दूसरी सोत होय ॥२६६॥ वामस्वरमिति ॥ पोदकीको युगल वामभागमें वामस्वर वा मैथुनसेवन वा भक्ष्य दान करकें ता पीछें जेमने भागमें दीप्त दिशामें वा दीप्त स्थानमें नहीं होय एसो पक्षीको युग्म होय तो स्त्रीकूं साध्वी कहेंहें ॥२६७॥ ॥आहारेति॥ जो पक्षीद्वय आहार दान मैथुन ये दक्षिणमांऊं करै तो निश्चयही कुमारी कन्याके और पुरुषकरकें कुमारीपनो हरण होय ॥ २६८॥ ॥ ५॥

भूत्वानुलोमंयदिकृन्तशाखेश्यामातरौतिष्ठतिकोटरेवा तदाकुमारीक्षतयोनिमुद्रांगृहीतभक्ष्या यदिगर्भिणीस्यात् ६९ वामागतिर्वामशरीरचेष्टा संस्थानमादावऽपसव्यभागे पतिंवरायाः कथयंतिलाभमन्यावलादुर्लभवल्लभस्य २७० श्यामानिवृत्तौयदियातिवामा स्त्रींप्राप्यतत्स्यात्पुरुषः कृतार्थः तारानिवृत्तौयदितत्प्रविष्टासीमंतिनीवल्लभलाभतुष्टा ७१ इतिपो॰विवा॰प्र॰११

॥ टीका ॥

कमाहारि २६८ भूत्वेति यदि अनुलोमा भूत्वा कृत्तशाखेतरौ श्यामा तिष्ठति तदाकुमारीक्षतयोनिमुद्रास्यात् यदिगृहीतभक्ष्याभवति तदा गर्भिणीस्यात् २६९ वामेति यदिवामगतिः वामशरीरचेष्टाभवति आदौ अपसव्यभागेसंस्थानंस्यात् तदापतिं वरायाः अन्यावलादुर्लभवल्लभस्य लाभं कथयति २७० श्यामेति निवृत्तौ यदि श्यामा वामा यातितदा स्त्रियं प्राप्यपुरुषः कृतार्थःस्यात् यदितारा भवति तदा वल्लभलाभतुष्टा सीमंतिनीस्यात् २७१ इतिश्रीश-

॥ भाषा ॥

॥भूत्वेति॥ जो अनुलोमा होयकर श्यामा शाखा कट रही जाकी एसे वृक्षमें स्थित होय वा कोटरामें स्थित होय तो कुमारी कन्या क्षत है योनि जाकी एसी होय और जो तारा भक्षवस्तु ग्रहण करें होंय तो कन्यागर्भिणी होय ॥२६९॥ वामेति॥ जो वामागती होय वामशरीरकी चेष्टा होय - प्रथम अपसव्यभागमें स्थित होय पीछें पूर्वकह्यो सो होय तो पतिकूं वर लाई जो कन्या ताके और स्त्रीको दुर्लभ वल्लभ ताको लाभ कहेंहें ॥२७०॥ श्यामेति॥ निवृत्तिमें जो श्यामा वामा आवे तो स्त्री प्राप्त होय

आधानजन्माऽयतिकर्मपाकान् जानातिगर्भस्य
यथामनुष्यः उत्पादिताशेषजनप्रतीतौतथाभि
दध्मः शकुनेकुमार्याः ७२ तारापक्षीगर्भसंभू-
तिहेतुर्यद्वागृह्णन्पुष्पपत्रेफलंवा गर्भस्रावंवाम
यायीविधत्ते यद्वामुंचन्पुष्पपत्रंफलंवा ७३

॥ टीका ॥

त्रुंजयकरमोचनादिसुकृतकारिमहोपाध्याय श्रीभानुचंद्रविरचितायां वसंतराजटीकायां पोतकीरुते विवाहप्रकरणं एकादशं ११ ॥छ॥ आधानेति कुमार्याः शकुने वयं तथा अभिदध्मः यथामनुष्यः गर्भस्य आधानजन्मायतिकर्मपाकं जानाति तत्राधानंगर्भस्यास्थिते आद्यसमय संबंधः जन्मप्रसवः आयतिःउत्तरः कालः तस्मिन्कर्मपाकः सुखदुःखोपभोगः कस्यांसत्यां उत्पादिताशेषजनप्रतीताविति उत्पादिता अशेषजनानां समस्तजनानां या प्रीति र्यस्यांसत्यामित्यर्थः२७२ तारइति तारापक्षीगर्भसंभूतिहेतुर्भवति यद्वा पुष्पपत्रे फलंवा गृह्णन् तद्धेतुः स्यादित्यर्थः वामयायीगर्भस्रावंविधत्ते यद्वा पुष्पपत्रेफलंवा मुंचन् गर्भस्रावं कुर्यादित्यर्थः ७३ ॥छ॥

॥ भाषा ॥

कर पुरुष कृतार्थ होय जो निवृत्तीमें तारा होय तो कन्या भर्तारके लाभकरकें प्रसन्नरहे ओरपुत्रवती होय ॥ २७१॥ इतिश्रीशकुनवसंतराजभाषाटीकायां पोतकीरुते विवाहप्रकरणमेकादशम् ॥११॥ आधानेति॥ जेंसें मनुष्य सर्वजननकी प्रीति जामें एसे गर्भको आधान ओर जन्म ओर मृत्यु इनमें कर्म विपाकको फल जो सुखदुःखको उपभोग इनसंपूर्णकूं जानेहें ओर तेसें ही कुमारीके शकुनमें हम जानेहें ॥२७२॥ नारइति॥ जोपक्षी तारा होय तो गर्भकूं प्रगटकरे ओर पुष्पफल इनें ग्रहणकरेतोगर्भके ग्रहण करवेकी हेतु जाननी जो वामभागमें

अधः प्रपातोवमिमूत्रविष्ठागर्भप्रणाशं विदधात्यव
श्यं सन्मार्ष्टिवामेनयदायदंगं भवेत्सगर्भावयवो
विहीनः ७४ गर्भप्रश्नेयावतोदक्षिणेनश्यामाश
ब्दानुच्चरत्युच्चवाचा नार्यागर्भस्तावत स्तानपास्य
गर्भाधानंतारयास्यात्तदूर्ध्वम् ७५ प्रदक्षिणेपुंसि
सुतस्यजन्म जन्मस्त्रियोयोषितिदक्षिणस्याम् ॥

॥ टीका ॥

अधइति पक्षिणोऽधः प्रपातः वमिर्वमनंमूत्रंप्रस्रावः विष्ठा विट् वमिमूत्राभ्यां सहिता विष्ठेति मध्यमपदतत्पुरुषः समासः इत्यादिकाश्चेष्टाः गर्भप्रणाशं विदधति यदा वामेनपदा अंगं सन्मार्ष्टि तदासगर्भावयवोहीनः स्यात् ७४ गर्भइत्यादि गर्भप्रश्नेयावतोदक्षिणेन उच्चवाचाश्यामाशब्दानुच्चरति नार्यागर्भाः तावतःस्युःतानपास्येति तान् शब्दान् अपास्य त्यक्त्वा तदूर्ध्वं तारयागर्भाधानंस्यात् ७५ प्रदक्षिणेति गर्भवत्याः किंभविताइति पृष्टे पुंसि प्रदक्षिणे सुतस्यजन्म भवति यो-

॥ भाषा ॥

गमन करे तो गर्भस्राव करे अथवा पुष्पपत्र फल इनें त्याग करे तोभी गर्भको स्राव करे ॥२७३॥ अधइति ॥ पक्षीको अधःपात होय या वमन करे मूत्रस्राव करै विट् करे इनकूं आदिले चेष्टा करैं तो गर्भको नाश करे जो बांये पामकरकें अंगकूं मार्जन करे तो गर्भके अवयवकरकें हीन होय ॥२७४॥ गर्भइत्यादि ॥ गर्भके प्रश्नमें शकुन देखै तो श्यामा दक्षिणमाऊं आयकरकें ऊंचे स्वरकरकें जितनेशब्द उच्चारणकरे तितनेही गर्भ स्त्रीके होंय और उनशब्दनकूं छोडकरकें बांई होय जेमनी आजाय तो गर्भाधान होय ॥२७५॥ प्रदक्षिणेति ॥ गर्भवतीके कहा होयगो एसो प्रश्न करे तब पुरुष विहंग दक्षिणभागमें होय तो पुत्रको जन्म होय और स्त्री जो पोदकी दक्षिणभागमें आय जाय तो कन्याको जन्म होय जो युगल

जन्म द्वयेदक्षिणगेद्वयस्य किंगर्भवत्याभवितेतिपृष्टे ७६ ध्रुवंसुतोऽस्याभवितेतिपृष्टेयोषापितारासुतजन्म हेतुः कन्याभवित्रीतितुपृच्छ्यमानेप्रदक्षिणे पुंस्यपिकन्यकास्यात् ७७ पुन्नामानंपादपंपांडवीचेत्ताराभूत्वारोहतिस्यात्सुतस्तत् स्त्रीनामानंपादपंपुंस्खगश्चेत्ताराभूत्वारोहतिस्यात्सुतातत् ७८ प्रदक्षिणीभूयनपुंसकाख्यंतारायदारोहतियद्यकस्मात् खगःखगीवाप्यथगर्भिणी तन्नपुंसकाख्यंजनयत्यपत्यम् ७९

॥ टीका ॥

षिति दक्षिणायांसत्यां स्त्रियोजन्मस्यात् द्वये दक्षिणगेद्वयस्य जन्मभवति ७६ ध्रुवमिति ध्रुवंसुतो ऽस्याभविताइति पृष्टे योषापि तारासुतजन्महेतुर्भवति कन्याभवित्री इति पृच्छ्यमाने पुंस्यपिप्रदक्षिणे कन्यका स्यात् ७७ पुन्नामानमिति पांडवीचेत्ताराभूत्वा पुन्नामानं पादपं आरोहति तदा सुतःस्यात् पुंखगश्चेत्तारोभूत्वास्त्रीनामानंपादपं आरोहति तदासुतास्यात् ७८ प्रदक्षिणीति यदिखगः खगी वा प्रदक्षिणीभूयनपुंसकाख्यंतरुमकस्मात्समोरोहति तदा गर्भिणीनपुंसका-

॥ भाषा ॥

दोनो दक्षिणभागमें आवे तो पुत्र कन्या दोनोनको जन्म कहनो ॥२७६॥ ध्रुवमिति याके पुत्रनिश्चय होयगो एसो प्रश्न करे तो स्त्री जो पोदकीवी ताराहोय तो पुत्रजन्म होय याके कन्या होयगी एसो प्रश्न करे तो पुरुषवी प्रदक्षिणभागमें होयतोवी कन्या होय ॥२७७॥ पुन्नामानमिति ॥ पांडवी तारा होय करकें पुरुषनामके वृक्षपे चढजाय तो पुत्रहोय ओर जो पुरुष पक्षी ताराहोयकरकें स्त्रीनामके वृक्षपे चढजाय तो कन्या होय ॥ २७८॥ प्रदक्षिणीति ॥ जो खग वा खगी दक्षिणावर्ती होय

कन्याभवेच्चेद्विहगीसुचेष्टास्यादात्मजश्चेद्विहगः सुचेष्टः चेष्टाप्रदीप्ताप्रतिलोमयानाद्गर्भस्यपित्रोरथवाक्षयाय २८० यावत्संख्यास्तारगाः पुंविहंगाः स्युस्तावंतोप्यर्भकागर्भवत्याः यावन्त्यस्तुस्त्रीविहंग्योनुलोमाः स्युस्तावंत्यः कन्यकानिश्चयेन ८१ यावत्संख्याः पक्षिणोदक्षिणेन भ्रांत्वावामंव्याघुटंतेप्रदेशं तावत्संख्यान्यप्यपत्यानिनार्याभूत्वा भूत्वा निश्चयेन म्रियंते २८२

॥ टीका ॥

ख्यं सुतंजनयति २७९ कन्येति कन्याभवेच्चेद्विहगीसुचेष्टास्यात् चेद्विहगः सुचेष्टः तदात्मजः स्यात् यदि चेष्टाप्रदीप्ताप्रतिलोमयानं भवति तदागर्भस्य अथवा पित्रोः क्षयायभवति २८० यावदिति यावत्संख्याः यावंतः विहंगास्तारगाः स्युः गर्भवत्याः तावंतःः अर्भकाः स्युः यावंत्यः अनुलोमाः स्त्रीविहंग्यः स्युः निश्चयेन तावंत्यः कन्यकाः स्युः २८१ यावदिति यदियावत्संख्याः पक्षिणः दक्षिणेन भ्रांत्वावामंप्रदेशं व्याघुटंतेतदानार्य्याः निश्चयेन तावत्संख्यान्यपिअपत्यानिभूत्वाभूत्वाम्रियंते २८२

॥ भाषा ॥

करकें अकस्मात् नपुंसक नाम वृक्षपे चढजाय तो गर्भिणी नपुंसक पुत्र प्रगट करे ॥ २७९ ॥ कन्येति ॥ पोदकीकी शुभचेष्टा होय तो कन्या होय और विहगकी चेष्टा शुभ होय तो पुत्र होय जो प्रदीप्ता चेष्टा होय और प्रतिलोमा गमन करे तो गर्भको अथवा मातापिताको क्षय करें ॥ २८० ॥ यावदिति ॥ जितने पुरुष विहंग वाम होंय दक्षिण कूं आय जांय तो उतनेही गर्भवतीके बालक होंय और जितने स्त्री पक्षी पोदकी अनुलोमा होंय तितनीही कन्या होंय ॥ २८१ ॥ यावदिति ॥ जितने पक्षी जेमने मांऊं भ्रमण करकें वामभागमें भ्रमण करें तो उतनेही नारीके अपत्य होय-

दीप्तंश्रयेद्दक्षिणमेत्यपक्षी यद्वानिवर्त्तेततदासुवत्याः
गर्भोविपद्येत भवेद्विहंगो दुःस्थानसंस्थेसतिदुःख
भागी ८३ रुतस्वरोदक्षिणगोविहंगः शुष्कंतरुं
संश्रयते यदा तत् म्रियेत जातोयदिकीटजग्धमा
र्द्रंभवेद्व्याधिवशस्तदानीम् ८४ विधूयगात्राणि
विधाय विष्ठां तारस्तरुं चेच्छ्रयते विहंगः तद्गर्भना
शोयदिकृन्तशाखंशस्त्रेणजातस्य तदा विपत्तिः ८५

॥ टीका ॥

दीप्तमिति यदि दक्षिणमेत्य पक्षी दीप्तंस्थानं श्रयेत् यद्वा ततो निवर्त्तेत तदासुवत्याः गर्भोविपद्येत यदि विहंगः एतादृग्स्यात् पुनः तस्मिन् दुःस्थानसंस्थेति दुःखभागी भवति गर्भः २८३ रुतस्वरइति यदि पूर्वं वामे रुतस्वरो विहंगः दक्षिणगः सन् शुष्कं तरुं संश्रयते तदाजातः सुतः म्रियेत यदा कीटजग्धमार्द्रंतरुंश्रयतेतदानींसव्याधिवशः स्यात् २८४ विधूयेति यदिगात्राणि विधूय वर्चःविधाय तारः सन् तरुं श्रयते तदा

॥ भाषा ॥

होयकें मर जांय ॥ २८२॥ दीप्तमिति ॥ जो पक्षी पोदकी दक्षिणमांऊं आयकरकें दीप्तस्थानमें स्थित होय अथवा दक्षिणसुं पीछी वगदजाय तो स्त्रीको गर्भ नष्ट होय जाय जो विहंग एसें आवे ओर फिर कुत्सित स्थानमें स्थित होय तो गर्भ दुःखभागी होय ॥ २८३॥ रुतस्वरइति ॥ जो पहलें वामभागमें शब्द कर दक्षिणभागमें जाय सूके वृक्षपे स्थित होय तो उत्पन्न हुयो पुत्र मर जाय ओर जो वृक्ष कीडाननें खायो होय ओर गीलो होय तो व्याधीके वशीभूत होय ॥ २८४॥ विधूयेति॥ जो विहंग देहकूं कंपायमान कर बींट करकें वामसुं दक्षिण आय जाय फिर वृक्षपे बेठ जाय तो गर्भको नाश करे ओर जाकी शाखा कटी होय ता वृक्षपे बेठ जाय तो

गत्वानुलोमंयदिपुंविहंगः स्थितिंविधत्ते प्रचलेपदार्थे तदासजातो भ्रमणः क्षमःसन् प्रयातिभूरीणि दिगंतराणि ८६ निमज्यधूल्यामनुलोमयायीसुभंप्रदेशंश्रयतेखगश्चेत् गर्भाद्विमुक्तोनियतंतदानींभवेत्परिव्राजकमुख्यभूतः ८७ कृत्वानिनादंफलपुष्पपत्रविवर्जितेभूरुहियाति तारा ततः श्रयेत्तादृशमेववृक्षं तदाध्रुवंसकृपणः सभावी ८८

॥ टीका ॥

नवगर्भस्य नाशो भवति यदिशस्त्रेणकृतशाखंतरुं श्रयते तदा जातस्य विपत्तिः स्यात् २८५ गत्वेति यदिपुंविहंगः अनुलोमंदक्षिणांगत्वा चपलेपदार्थे स्थितिं विधत्ते तदा सजातः भ्रमणः क्षमः सन् भूरीणि दिगंतराणि प्रयाति २८६ निमज्येति धूल्यां निमज्य अनुलोमयायी सन् खगः शुभं प्रदेशं श्रयते तदा सगर्भात् विमुक्तः परिव्राजकमुख्यभूतः भावी २८७ कृत्वेति यदिफलपुष्पपत्रविवर्जिते भूरुहि अनुनादं कृत्वा तारः याति तादृशमेव वृक्षं यद्याश्रयेत् ध्रुवं तदा स

॥ भाषा ॥

उत्पन्नहुये बालककूं शस्त्र करकें विपत्तीहोय ॥२८५॥ गत्वेति ॥ जो पुरुष विहंगवामसुं दक्षिण दिशामें जायकर चपलपे अथवा चल रहै एसे पदार्थ गाडी घोडा ऊंट इत्यादिकनपे स्थिती करे तो उत्पन्नहुयो बालक भोतसे देशदेशांतरनमें भ्रमण करवे वालो होय ॥ २८६॥ निमज्येति ॥ जो खग धूलमें स्नानकरकें वामतें दक्षिणमें आय शुभ देशमें स्थित होय तो गर्भमेंसुं प्रगट हुयो बालक निश्चयही सन्यासीनमें मुख्य होय ॥२८७॥ कृत्वेति ॥ जो वाममें फलपुष्प पत्र इनकरकें रहित वृक्षपे शब्द करकें फिरदक्षिणमें आय जाय और वेसैहीं वृक्षपे जो स्थित होय तो निश्चयही वो बालक कृपण होय ॥२८८॥ ॥छ॥ ॥छ॥

सुस्वरोव्रजति दक्षिणाभागंशोभनंश्रयतिदेशविशेषं वाममाश्रयतिवाथनिवृत्तौबालकोभवतिनच्चिरजीवी ८९ पुंखगो विततदक्षिणपक्षस्तारगः श्रितमनोहरदेशः दर्शितप्रचुरशोभनचेष्टोमंक्षुयच्छतिशिशोर्नृपतित्वं २९० पूर्वोक्तरूपेण यदाविहंगीप्रयातितज्जन्मभवेत्कुमार्याः पूर्वोदितैः पुत्रगुणैर्युतायाइत्याहुरार्याःकृतलोककार्याः २९१

इति पोदकीरुते गर्भप्रकरणं द्वादशम् १२

॥ टीका ॥

रूपणः भावी २८८ सुस्वरइति सुस्वरः दक्षिणभागं व्रजति पुनः शोभनं देशविशेषंश्रयति अथ निवृत्तौ वामंश्रयति तदाबालकः न चिरजीवीस्यात् २८९ पुंखगइति यदिपुंखगः विततदक्षिणपक्षः सन् तारगोभवति कीदृग् आश्रितमनोहरदेशः पुनः कीदृग्दर्शितप्रचुरशोभनचेष्टइति दर्शिता प्रचुराशोभनचेष्टा येन सतथा सशिशोर्नृपतित्वंमंक्षुयच्छति २९० पूर्वोक्तेति यदाविहंगीपूर्वोक्तरूपेण पूर्वोक्तप्रकारेणप्रयाति तदाकुमार्याः जन्मभवेत् कीदृश्याः पूर्वोदितैः पूर्वप्रतिपादितैः पुत्रगुणैः युतायाः कृतलोककार्याः आर्या

॥ भाषा ॥

॥ सुस्वरइति ॥ सुंदरशब्दकर दक्षिणभागमें गमनकरे फेर शुभदेशमें स्थित होय अथवा निवृत्तीसमयमें वामभागमें स्थित होय तो बालक चिरजीवी होय ॥ ॥२८९॥ पुंखगइति ॥ जो पुरुषपक्षी जेमने पंखकूं फेलाय कर जेमनो होय सुंदरस्थानपे बैठकर शुभचेष्टा करे तो बालककूं समूहको राजा करे ॥२९० ॥ पूर्वोक्तेति ॥ जो विहंगी पूर्व कहेहुये प्रकारकरकें गमन करे तो पूर्व कहे जे पुत्रगुण उनकरकें युक्त कुमारीके पुत्रको जन्म होयपे लोकनके कार्य

यात्रास्थितस्यागमनं गतस्य भविष्यतः संप्रति किं-
नवेति प्रत्यक्षदेवी विरुतेक्रमेण निरूप्यते निश्चित
कार्यभागं ९२ यात्राभवित्री मम किंनवेति प्रश्ने
कृते स्याद्गमनाय तारा शाखांचलंतीमथवाधि
रूढा वामा तु यात्राप्रतिषेधयित्री ९३ दूरंगत-
स्यागमनाय तारा यद्वोपविष्टा प्रचले प्रदेशे ॥

॥ टीका ॥

इत्याहुः २९१ इति शत्रुंजयकरमोचनादि सुकृतकारि महोपाध्याय श्रीभानुचंद्रविरचितायां वसंतराजटीकायां पोतकीरुते गर्भप्रकरणं १२ यात्रेति स्थितस्य यात्रागतस्यागमनं संप्रति भविष्यतः नवेति प्रश्ने प्रत्यक्षदेवी विरुते निश्चितकार्यजातं तन्निरूप्यते २९२ यात्रेति मम यात्रा भवित्री चेन्नवेति प्रश्नद्वयं एकवारमन्वयव्यतिरेकाभ्यां प्रश्ननिर्णीतेः संदेहास्पदत्वं स्यादिति प्रश्ने कृते चेत्तारा स्यात्तदागमनाय यदिवेति पक्षांतरे चलंतीं शाखां अधिरूढा तारा भूत्वा तदा शीघ्रंगमनं वामा तु यात्रां प्रतिषेधयित्री स्यात् २९३ दूरमिति कदागमिष्य

॥ भाषा ॥

करवेवाले आर्यपुरुषनको कथन है ॥ २९१ ॥ इतिश्रीवसंतराजशाकुने भाषाटीकायां पोतकीरुते गर्भप्रकरणं द्वादशम् ॥ १२ ॥ ॥यात्रेति॥ यात्राकूं गयो ताको आगमन और घरमें स्थित ताको गमन होयगो वा नहीं होयगो वा कब होयगो एसो प्रश्न पोदकीके शब्दमें निश्चय होयहै सो निरूपण करेंहें ॥२९२॥ यात्रेति॥ मेरी यात्रा होयगी वा नहीं होयगी ये दो प्रश्न करे तब जो श्यामा तारा होय तो गमनके अर्थ होय और पवनादिक करकें चल रही वा हल रही शाखा तापें चढ जाय तारा होयकरकें तो शीघ्र गमन करे और वामा तो यात्रामें निषेध कर्ता है ॥२९३॥ दूरमिति ॥ कब आवेगो एसो प्रश्न करे तब जो पोदकी तारा होय

पुंसः स्वगेहागमनोत्सुकस्यश्यामांतरायंविदधाति
वामा ९४ विधायशब्दंयदिदक्षिणास्यादायाति
पांथस्तदवाप्तवित्तः श्यामास्थिरातिष्ठतिमौनि
नीयासावक्तिगत्यागमयोःस्थिरत्वं ९५ शुभप्र
देशेसहभार्ययाचेत्संगच्छतेदक्षिणगोविहंगः आ
गत्यदेशांतरतोध्वनीनः स्वगेहसौख्यान्युपलिप्स्यतेतत् ९६

॥ टीका ॥

तीति प्रश्नेयदि तारास्यात् तदादूरगतस्यागमनाय भवति यद्वा ताराभूत्वा प्रचलेपदार्थे उपविष्टा तदा शीघ्राऽऽगमनं स्वगेहागमनोत्सुकस्यपुंसः वामा श्यामा अंतरायंविदधाति २९४ विधायेति यदिशब्दंविधाय श्यामा दक्षिणास्यात् तदा पांथस्तदवाप्तवित्त इति सचासाववाप्तवित्तश्चेतिसमासः अन्यथा तत्शब्दस्यानर्थक्यंस्यात् आयाति स्वगृहमितिशेषः या प्रश्ने कृतेस्थिरामौनिनी वा तिष्ठति सागत्यागमयोः स्थिरत्वं वक्ति २९५ शुभइति यदि दक्षिणो विहंगः सह भार्यया शुभप्रदेशे संगच्छते तदा अध्वनीनः देशांतरतः आगत्य स्वगेहसौख्यानि उपलिप्स्यते २९६ ॥ ७ ॥

॥ भाषा ॥

तब दूरगयेको आगमन होय अथवा तारा होयकरकें हलते चलते पदार्थपे बेठजायतो शीघ्र आगमन होय जो अपने घरकूं आयवेमें उत्साह करनो होय वा पुरुषके श्यामा वामा होय तो विघ्न वा ढील जाननो ॥ २९४ ॥ विधायेति ॥ जो पोदकी शब्दकरकें दक्षिणा होय तब देशगयो धनप्राप्त होयकरकें अपने घरकूं आवे जो श्यामा शकुनमें स्थिरावा मौनिनी होय तब गमनमें और आगमनमें स्थिरता कहनो ॥ २९५ ॥ शुभइति ॥ जो विहंग दक्षिणभागमें शुभ देशमें स्त्री पोदकीकरकें मिलापकरे तबपरदेशगयो पुरुषपर देशतें आयकरकें अपने घरके सौख्य भोगे ॥ २९६ ॥

कृत्वाशब्दंपृच्छतोवामभागेपक्षीवृक्षंहृद्यमेवाधिति
ष्ठन् आगच्छंतंसाधिताशेषकार्यंपांथंजल्पत्यर्द्ध
मार्गावतीर्णम् ९७ वामस्वरस्तारगतिर्विहंगः शु
ष्कंसमारोहतिपादपंचेन् रुजार्द्दितोवाप्यथलुं
ठितोवा दिगंतराच्चत्पथिकोभ्युपैति ९८ विधा
यनादंयदिवामभागे तिरोहितत्वंभजतेसुदेशे त
त्रैवपांथःकुशलीतदास्ते दुःखीसमायातिपुनःकुदेशे ९९

॥ टीका ॥

कृत्वेति पृच्छतः पुंसः यदिशब्दंकृत्वापक्षीवामभागे दक्षिणभागस्थं
हृद्यमेववृक्षमधितिष्ठन् तदा आगच्छंतंपांथं अर्द्धमार्गावतीर्णंजल्पति
कीदृशंसाधिताशेषकार्यमिति साधितंनिष्पादितं अशेषंकार्यंयेनस
तथा २९७ वामइति चेद्वामस्वरः तारगतिर्विहंगः शुष्कंपादपंस
मारोहति तदा रुगार्दितः लुंठितो वा देशांतरात् तत्पथिकः अभ्युपैति
२९८ विधायेति यदिवामभागेनादं विधायसुदेशेतिरोहितत्वमदृश्यत्वंभजते
तदातत्रैव पांथः कुशली आस्ते यदा पुनः कुदेशे तिरोहित
त्वंभजते तदा दुःखी समायाति २९९ ॥छ॥

॥ भाषा ॥

॥कृत्वेति॥ पृच्छक पुरुषके जो पोदकी वामभागमें शब्द करकें दक्षिणभागमें म
नोहर सुगंधवान् वृक्षपे स्थित होय तो परदेशगयो संपूर्णकार्यकर आधे मार्गमें
आयो कहेहे ॥२९७॥ वामस्वरेति॥ जो विहंग वाम स्वर कर दक्षिणगति होय
शुष्क वृक्षपे चढ जाय तो परदेश गयो पुरुष देशांतरतें रोगार्दित होयकर आवे
॥२९८॥ विधायेति॥ जो वामभागमें शब्द करकें शुभ देशमें जाय अंत
र्धान होय जाय तो पांथकूं कुशल कहनो जो निंदित देशमें जाय लुप्त होय तो
दुःखी आवे ॥२९९॥ ॥छ॥ ॥छ॥

कृतस्वरादक्षिणतः सितांगीप्रयातिवामंश्रयतिप्र
दीप्तं यस्याध्वगस्यागमनार्थमुक्तेप्रश्नेगतोसौन
गरींयमस्य ३०० नष्टेविहंगेपथिकोनतत्रकृत
स्थितिर्यत्रविचिंतितोसौ करोतिशब्दंयदिदक्षिणे
नश्यामातदासौविपदागृहीतः १ स्याद्दूरताराय
दितत्प्रयातमायांतमावेदयतेवराही ॥

॥ टीका ॥

कृतस्वराइति यदिदक्षिणतः सितांगीकृतस्वरावामं प्रयाति पुनः प्रदीप्तंस्थानंश्रयति तदा यस्याध्वगस्यागमनार्थं प्रश्नउक्तः असौ यमस्य नगरींगतः इति वक्तीतिशेषः ३०० नष्टेति प्रश्नेकृतेसति नष्टेस्वस्थानादन्यत्रगतेविहंगे पथिको विवक्षितग्रामे नभवति क्वापिगतइत्यर्थः यत्र विहंगः कृतस्थिति स्तत्रैवासौ पथिको विचिंतितः यदिश्यामादक्षिणेन समागत्य शब्दं करोति तदासौ पांथोतिपदागृहीतो वेदितव्यः ३०१ स्यादिति यदिप्रश्नकाले दूरतारास्यात् तत्प्रयातुः वाराही दूरंसमावेदयते यतः प्रयाणागमयोः प्रवृत्तये तारा प्रशस्ता -

॥ भाषा ॥

॥कृतस्वरेति॥ जो दक्षिणमाऊं शब्दकर वामभागमें आय फिर प्रदीप्त स्थानमें स्थित होय तो जाके आगमनके लियें प्रश्न होयवो यमकी नगरीकूं गयो एसो कहनो ॥३००॥ नष्टेति॥ जो पोदकी अपने स्थानतें और जगें चलीजाय तो परदेश गयेकूं जा ग्राममें पृथक पूछे वाम नही है और ग्राममें गयो कहनो जहां पोदकी स्थित होय तहां पथिककूं चिंतमन करकें कहनो और जो श्यामा दक्षिण आयकरकें शब्द करेतो आपदा करकें युक्त हे एसो कहनो योग्यहे॥३०१॥ ॥स्यादिति॥ जो शकुन कालमें श्यामा दूर चली जाय तो परदेशगयेकूं वी दूर गमन जाननो यातें जामनो आमनो इन दोनोनके शकुनकी प्रवृत्तीमें तोजेमनी

ताराप्रयाणागमयोः प्रसह्य प्रवृत्तयेवामगतानिवृत्त्यै २ इतिगमनागमनप्रकरणं त्रयोदशम् १३

अनागतोद्भावितभाविकार्यमार्य्यैर्विचार्योद्धृतसारमेतत् चेष्टादिकं पांथसमूहमातुराख्यायते पांथसमूह तुष्ट्यै ३ प्रायेणगृण्हन्त्यधिवासनेन विनापिपांथाः शकुनंव्रजंतः तात्कालिकंजांघिकनामधेयं ब्रूमस्ततः संप्रति तादृशंतत् ४

॥ टीका ॥

स्यात् पुनरेनयोर्निवृत्तौ वामाशुभास्यात् ३०२ इतिशत्रुंजयकरमोचनादिसुकृतकारीमहोपाध्यायश्रीभानुचंद्रविरचितायां वसंतराजटीकायांपोतकीरुतेगमनागमनप्रकरणंत्रयोदशं १३ ॥छ॥ अनागतइति पांथसमूहतुष्ट्यैपांथसमूहमातुः चेष्टादिकं आख्यायते कीदृशं अनागतोद्भावितभाविकार्यमिति अनागते कालेउद्भावितंचेतस्यवधारितंयद्भाविकार्यंतद्विचार्य सारमेतदुद्धृतं ३०३ प्रायेणेति अधिवासनेन विनापि पांथाः व्रजंतः प्रायेणशकुनंगृह्णंति ततस्तस्मात्कारणात्तादृशंजांघिक नामधेयंयःजंघावलेनजीवति सजांघिकस्तत्रद्वयंतात्कालिकं वयंब्रूमः ३०४

॥ भाषा ॥

तारा शुभ और दोनोनके शकुनसुं निवृत्ती कालमें वामा शुभहे ॥३०२॥ इतिश्री शकुनवसंतराजभाषाटीकायां पोतकी रुते गमनागमनप्रकरणंत्रयोदशं ॥१३॥

॥अनागतइति॥ मार्गमें यात्रीनके समूहकी तुष्टीके लियें पांथ समूहकी माता पोदकीकी होनहार कार्यके जानवेकूं चेष्टादिक कहेंहें ॥३०३॥ प्रायेणेति॥ पूजा विना शकुन ग्रहण करे ता गमन करवेवालेकूं जांघिकनाम कहेंहें अर्थात् ऊंट अथवा डांक लेजायवेवारो इनकी सीनाई जाननो ॥३०४॥ ॥छ॥

वरंश्रयेद्दुर्जनकृष्णसर्पौ वरंक्षिपेत्सिंहमुखेस्वमंगम् वरंतरेद्वारिनिधिंभुजाभ्यांनोल्लुंघयेद्दुःशाकुनंतथापि ५ वामस्वरादक्षिणकायचेष्टातारागतिःशांतसमाश्रयश्च यात्तुःप्रयच्छंतिसमस्तकामान्निघ्नंतितानुक्तविपर्ययेण ६ पुनःपुनर्वर्त्मनियःप्रवासीविचेष्टतेपांथसमूहयात्रा असंशयंतस्यसमायतेतांसमस्तवित्तव्ययजीवनाशौ ३०७

॥ टीका ॥

वरमिति यः पुमान् दुर्जनकृष्णसर्पौ श्रयेत् तद्वरं सिंहमुखे यःस्वमंगं क्षिपेत् तद्वरं यःभुजाभ्यां वारिनिधिं तरेत् तद्वरंपरं कदाचित्दुःशाकुनमुल्लुंघयेत् तन्नवरं ३०५ वामइति वामस्वरा दक्षिणकायचेष्टा तारागतिः शांतसमाश्रयश्च यात्तुः समस्तकामान् प्रयच्छंति उक्त विपर्ययेण तान् निघ्नंति ३०६ पुनरिति यःप्रवासी पुनः पुनः पांथसमूह मात्रा विचेष्टयते तस्य असंशयंसमस्तवित्तव्ययजीवनाशौसमंभवेतां ३०७

॥ भाषा ॥

॥वरमिति॥ जो पुरुष दुर्जन ओर कृष्णसर्प इनकूं आश्रय लेसो ओर सिंहके मुखमें अपनो अंग पटक देवोवी उत्तम जो अपनी भुजानकर समुद्रकूं तिर जाय सोवी उत्तम जो कदाचित् दुःशकुनकूं उल्लुंघन करे तो श्रेष्ठ नहीं ॥३०५॥ ॥वामइति॥ वामस्वरा होय दक्षिण अंगमें चेष्टा करती होय जेमने मांऊं गती होय शांत स्थानमें स्थित होय तो गमन कर्ताकूं सर्व कार्य देवे ओर जो विपरीत होय तो सव कामनकूं नाश करे ॥३०६॥ पुनरिति॥ जो परदेशमें वारंवार पांथसमूहकी संगमें यात्रा चेष्टा करो करे तो ताके निः संदेह समस्त द्रव्यको व्यय ओर जीवको नाश होय ॥३०७॥ ॥६३॥

श्यामानुलोमाप्रथमंततोनुस्यादध्वगस्यप्रतिलो
मगाचेत् आस्तांतदाभीष्टफलाप्तिवार्तामन्येति
कष्टंनिपतत्यऽरिष्टं ८ वामेरटित्वायदियातिता
राभवंतिकामाःसफलास्तदानीं कृत्वापसव्यध्व
निमध्वगस्यवामंप्रयांतीप्रतिहंतिसिद्धिम् ९ वामे
प्रदेशेयदिवापसव्येविहंगयुग्मंसमभूमिभागे क्री
डारसव्याकुलितंनराणामव्याकुलत्वेनकरोतिसि
द्धिं ३१० वामदक्षिणविभागनिविष्टंतुल्यकालकृतशोभनशब्दं

॥ टीका ॥

श्यामाइति यदिप्रथमं श्यामा अनुलोमास्यात् ततोनु अध्वगस्य प्रतिलोमगाचेत्स्यात् तदा अभीष्टफलाप्तिवार्ता आस्तां मन्ये अहमिति शेषः अनिष्टंअनिकष्टंनिपतति ३०८ वामइति यदि वामेरटित्वा तारायाति तदानीं कामाः सफलाभवंति अध्वगस्य अपसव्यध्वनिंकृत्वा वामेप्रयांती सिद्धिं विनिहंति ३०९ वामइति यदि वामेप्रदेशेवाऽपसव्ये समभूमिभागे सति क्रीडारसव्याकुलितं पक्षियुग्मंभवति तदा नराणां सिद्धिमव्याकुलत्वेनकरोति ३१० वामेति इहास्मिन्शास्त्रेतोरण

॥ भाषा ॥

॥श्यामाइति॥ जोश्यामा प्रथमतो अनुलोमा होय तापीछें मार्गीकूं प्रतिलोमा होय तो अभीष्ट फलकी प्रामीकी वार्ता होय ये अनिष्ट ओर अरिष्ट दूरकरेहैं ॥३०८॥ ॥वामइति॥ जो पोदकी वामभागमेंशब्द करकें दक्षिणा होय जाय तो सबले काम सफल होंय ओर जो जेमने मांऊ.शब्द करकें वामभागमें चलीजाय तो सिद्धीकूं नाशकरे॥ ३०९॥ वामेति ॥ वामभागमें ओर जेमनें भागमें समान पृथ्वी होय तहां पक्षीको युगल होय तो मनुष्यनकूं क्रीडारूपी रस करकें व्याकुल सिद्धी करे ॥ ॥३१०॥ वामेति॥ वामभागमें ओर दक्षिणभागमें पक्षीको युगल वेठे होय

पक्षियुग्ममिहतोरणसंज्ञंसर्वकामदमुशंतिमुनींद्राः ११
उन्हृताभगवतीयदिगंतुर्मातृतोपिनभवंत्यभयंत
तु दक्षिणायदिपुनः कुशलीततु सिंहसर्प्पकरिवै
रिवशोपि १२ ताराप्रशस्तागमनेध्वगानांमहा
गुणासैवयदिप्रशांता तारैवदीप्तायदिवातदानीं
लाभक्षतिःस्यान्नतुकापिभीतिः १३ भूत्वोन्हृ
ताभक्ष्यमथोगृहीत्वाप्रदक्षिणाक्षीरतरोनिविष्टा

॥ टीका ॥

संज्ञंपक्षियुग्मं सर्वकामदं मुनयः उशंतिप्रतिपादयंति कीदृशंवामदक्षिणाविभागनिविष्टंपुनःकीदृशं तुल्यकालकृतशोभनशब्दं ३११ उन्हृतेति यदि गंतुर्भगवती उध्दृताभवति तदा मातृतो अभयं नभवति किमन्येभ्यः यदिपुनः दक्षिणाभवति तदासिंहसर्पकरिवैरिवशोपिकुशलीस्यात् ३१२ तारेति गमनोद्यतानांताराप्रशस्ताभवति यदि सैव प्रशांतास्यात् तदामहागुणायदि सा तारैवदीप्तास्यात् तदानींलाभक्षतिः नतुकापिभीतिः ३१३ भूत्वेति यदिउध्दृताभूत्वाभ-

॥ भाषा ॥

एक संग दोनो माऊं शब्द करतें होंय तो मुनिया शास्त्रमें सर्वकामको देवेवारो तोरण संज्ञा याकी कहें हें ॥३११॥ उन्हृतेति ॥ जो गमनकरवेवारेके भगवती उन्हृता होय तो मातातेंवी अभय नहीं होय श्रोर तें तो कहा श्रभय होय जो फिर दक्षिणा होय तो सिंह सर्प हाथी वैरी इनके वशमें पड जाय तोहुं कुशलही होय विगाड नही होय ॥३१२॥ तारेति॥ गमनमें दक्षिणा शुभ हे जो वोही शांता होय तो वोहोत गुणदायिक होय श्रोर जो वो दक्षिणा ही दीप्ता होय तो लाभकी क्षिती करे श्रोर कोई भयवी करे ॥३१३॥ भूत्वेति ॥ जो प्रत्यक्ष देवी उन्हृता होय कर भक्ष ग्रहण करकें दक्षिण भागमे दूध-

प्रत्यक्षदेवीयदितत्प्रयातुर्भवत्यवश्यंमहतीधनर्द्धिः १४ उन्मूलिताछिन्नविशीर्णशुष्कवृक्षेषुभस्मोपलकर्परादौ तारोपविष्टाफलहानिकर्त्रीभवेच्चवामानियमेनहंत्री १५ गत्वातिदूरंपुरतःप्रयातुरदृश्यतांगच्छतियस्यतस्य क्षेमंकरीसन्मुखमभ्युपैति यस्यध्रुवंतस्यपराजयः स्यात् १६ यदिप्रियंपांथमनुव्रजित्वानिवर्तमानस्यभवेद्धि तारा ॥

॥ टीका ॥

क्ष्यंगृहीत्वा प्रदक्षिणा क्षीरतरौनिविष्टा प्रत्यक्षदेवीस्यात् तदाप्रयातुरवश्यं महती धनर्द्धिः स्यात् ३१४ उन्मूलितेति उन्मूलितछिन्नविशीर्णशुष्कवृक्षेषु भस्मोपलकर्परेषु तारोपविष्टाफलहानिकर्त्रीभवेत् तुपुनः वामानियमेनहंत्रीभवेदित्यर्थः ३१५ गत्वेति यदि पुरतः अतिदूरंगत्वापोतकी यस्यादृश्यतां गच्छति तस्यक्षेमंकरी स्यात् यस्य सन्मुखमभ्युपैति तस्य पराजयः स्यात् ३१६ यदीति यदि प्रियं पांथं अनुव्रजित्वा मुक्त्वा लाप्य निवर्तमानस्य वितारा भवेत् तदा शुभावहा यदि

॥ भाषा ॥

के वृक्षमें जाय बैठे तो गमनकर्ताकूं अवश्य महान् ऋद्धि होय ॥३१४॥ उन्मूलेति ॥ जो दक्षिण माऊकी जड जाकी उखड रही होय कट्यो होय सूत्रको होय ऐसे वृक्षनमें वा भस्म पाषाण ठीकराईनमें बैठी होय तो फलकी हानी करै और जो वो वामा होय तो निश्चयही फलकी हानी करै ॥३१५॥ गत्वेति॥ जो पोदकी गमन कर्त्ताके अगाडी अत्यंत दूर जाय करकें अदृश्य होय जाय तो तापुरुषकूं कल्याणके करवेवारी जाननी और जाके सन्मुख आवे ताको पराजय करे ॥ ३१६॥ यदीति॥ जो अपने प्यारे पांथकूं पोंछायवे जाय फिर वासुं बोलके छोडकें पीछेंकूं वगदे तब वाकूं जेमने माऊंसें उडकर वाम आयजा-

शुभावहातद्यदिचेतितारायुक्तंतदातेनसमंप्रयातुं इति यात्राप्रकरणं चतुर्दशं १४ गार्हस्थ्यमूलंगृहिणीनराणांसाचेत्सुशीलासफलंतदातत् दोषैस्तुतस्यांनरकायतत्स्यात्तद्ब्रूमस्ततः सत्यसतींपरीक्षाम् १८ आलिख्यपत्रेवरवर्णिनींतांस्फुरत्सदृक्षाकृतिवर्णरूपां यस्यामसाध्वीतिभवेद्धितर्को व्यक्तंततोनामलिखेल्ललाटे १९

॥ टीका ॥

ताराएति तदा तेनसमंप्रयातुंयुक्तं अन्यथा तद्रक्षा नस्यादित्यर्थः ३१७ इति शत्रुंजय करमोचनादि सुकृतकारि महोपाध्यायश्रीभानुचंद्रविरचितायां वसंतराजटीकायां पोतकीरुतेयात्राप्रकरणं चतुर्दशं १४ गार्हस्थ्येति ततः तस्मात्कारणात् सत्यसतीं परीक्षां वयंब्रूमः यतः नराणांगृहिणी गार्हस्थ्य मूलं साचेत्सुशीला तदा तद्गार्हस्थ्यं सफलं स्यात् तस्याः स्त्रियः दोषैस्तु तत् नरकायस्यात् ३१८ आलिख्येति तां वर वर्णिनीं स्फुरत्सदृक्षाकृतिवर्णरूपामिति स्फुरंति सदृक्षाणि आकृतिवर्ण रूपाणि यस्याः सा तथा पत्रे आलिख्य यस्यामसाध्वी

॥ भाषा ॥

य तो शुभ करे और जो वामतें दक्षिण आय जाय तो येवी वाकी संग चल्यो जाय नहीं तो सुख नहीं होय ॥३१७॥ इति श्रीवसंतराजभाषाटीकायां पोदकीरुते यात्राप्रकरणं चतुर्दशं ॥१४॥ गार्हस्थ्येति॥ मनुष्यनके स्त्री गृहस्थाश्रमको मूल है वो स्त्री सुशीला होय तो गृहस्थाश्रम सफल है जो दुःशीला स्त्री होय तो ताके दोषनकरकें पुरुषनकूं नरक होय तातें सत्यसतीकी परीक्षा हम कहेंहें ॥ ३१८॥ आलिख्येति॥ सुंदरनेत्र आकृति रूप वर्ण जाको एसी स्त्री पत्रमें लिखकरकें ये असाध्वी है एसी तर्कना जामें होय ता स्त्रीको -

आदायतच्छाकुनिकोऽथपत्रंगत्वाततस्तोरणसन्निवेशं अभ्यर्च्यमंत्रेणकरेनिधायापृच्छेत्खगद्वंद्वमियंसतीति ३२० आहारदानग्रहणाशनानि कुर्वन्तिखेलंतिकलंध्वनंति वामेखगीयद्यबलासुशीला निर्मैथुनंनर्मकरोत्यवामे २१ वामखायदिवाप्यनुलोमापांडविकातदभीष्टचरित्रा वामगतिर्यदिदक्षिणशब्दायोषिदसौनियतंतदसाध्वी २२

॥ टीका ॥

ति वितर्कोभवेत् ततः तन्नामललाटे लिखेत् ३१९ आदायेति तत् छाकुनिकः पत्रमादाय ततः गृहीत्वा तोरणसंनिवेशंगत्वातत्पत्रं मंत्रेण अभ्यर्च्यकरे निधाय पृच्छेद्यूयं वदध्वंकिमियंसतीति ३२० आहारेति यदि वामेखगी आहारदानग्रहणाशनानि कुर्वंति खेलंति क्रीडंति कलं मधुरं ध्वनंति शब्दंकुर्वंति तदा अबलासुशीलायदि केवलं अवामागतिर्भवति तदा सास्त्री निर्मैथुनं नर्म हास्यादिकंकरोतीत्यर्थः ३२१ वामेति यदि वामखा यदिवाप्यनुलोमा पांडविकायाति तदाभीष्ट

॥ भाषा ॥

नाम वाकें ललाटमें लिखे ॥ ३१९ ॥ आदायेति॥ शकुनी वा पत्रकूं लेकें पीछें तोरण रचनामें जायकरकें वा पत्रकूं मंत्रकर पूजनकरकें पक्षीके युगलको पूजन कर फिरहाथमें धरकरकें युगलसूं पूछे ये स्त्री सती है तुम कहो एसें पूछें॥ ३२०॥ आहारेति ॥ जो वामभागमें खगी आहार देनो ग्रहण करनो भोजन करनो ये चेष्टा करती होय क्रीडा करती होय मधुर शब्द करती होय तो अबला सुशीला होय औरजो केवल दक्षिण होय तो वो स्त्री अतिमैथुन और हास्यादिक करे ॥ ३२१॥ वामेति ॥ जो पांडविका वामशब्द कर जो जेमनें भागमें आय जाय तो वांछित सुंदर चरित्र जाके एसी होय जो दक्षि-

दक्षिणतोयदिमैथुनसंस्थंपांडविकायुगलंकुलटात
त्वामदिशित्वथताहृशचेष्टंस्यात्तदसौयुवतिःपति
भुक्ता २३ यद्यपसव्यविभागनिनादोवामदिशं
भगवत्युपगम्य पुंविहगेनसमंमिलतिस्यात्तद्यु
वतेःस्वजनाद्व्यभिचारः २४ कृष्णविहंगयुगंस
रवंचेद्वामसुपैत्यथनिर्वहतेग्रे यस्यनरस्यवदंत्य
पवादं गच्छतितद्वनितासह तेन २५

॥ टीका ॥

चरित्रास्यात् यदि दक्षिणशब्दावामगतिर्भवति तदेयंयोषिन्नियतम साध्वीस्यात् ३२२ दक्षिणतइति दक्षिणतोयदिमैथुनसंस्थं पांडविकायुगलंस्यात् तदासाकुलटास्यात् अथ यदि ताहृक् चेष्टंवामदिशि स्यात्तदा सौ युवतिः पत्यनुगामिनीस्यात् ३२३ यदीति यदिअपसव्यविभागनिनादाभगवती वामदिशामुपगम्य पुंविहगेनसमंमिलति तदा तस्या युवतेः स्वजनाद्व्यभिचारः स्यात् ३२४ कृष्णेति यदि कृष्णविहंगयुगंसरवं वाममुपेत्यथाग्रे निर्वहते तदायस्यनरस्य अपवादं वदंति तेनसह तद्वनिता गच्छति ३२५

॥ भाषा ॥

एमें शब्दकर वामरवा होय तो वो स्त्री निश्चय असाधवी होय ॥३२२॥ ॥दक्षिणतइति॥ जो दक्षिणभागमें पांडविकाको युगल मैथुन करतो होय तो वो स्त्रीकुलटा जाननी और जो येही चेष्टा वामदिशामें होय तो स्त्री पतिकी आज्ञा करवेवाली होय ॥ ३२३ ॥ यदीति ॥ जो जेमने भागमें शब्दकर वामदिशामें आयकरकें पुरुष विहंगकरकें सहित मिलेतो तास्त्रीकूं स्वजनतें व्यभिचार होय ॥ ३२४ ॥ कृष्णेति ॥ कृष्णविहंगको युगल शब्दकरत वामभागमें आय करकें अगाडी अगाडी चले तो स्त्री सहित गमन करे तापुरुषको अपवाद करे ॥ ३२५॥

सौम्यरवौयदिवामविभागाद्दक्षिणमेत्यखगौखलु
शांतं आश्रयतोनतदान्यमनुष्यंध्यायतियोषिद
सौमनसापि ३२६ इतिसत्यसतीपरीक्षाप्र०१५
प्राणंत्यमीप्राणभृतोऽशनेनतस्यांबुनाजन्मतदंबुमे
घात् मेघोभवेत्प्रावृषितेनतस्याःश्यामारुतेऽस्मि
न्क्रियतेविमर्शः २७ आद्यस्त्रिधात्रेधमथद्वि
तीयस्ततस्तृर्नीयश्चचतुर्विभागः

॥ टीका ॥

सौम्यरवाविति यदि सौम्यरवौ खगौ वामविभागाद्दक्षिणमेत्य शांतं स्थानं आश्रयतः तदासौ योषित् मनसाप्यन्यमनुष्यंनध्यायति ३२६ इतिश्री शत्रुंजयकरमोचनादि सुकृतकारि महोपाध्यायश्री भानुचंद्रविरचितायां वसंतराजटीकायां पोतकीरुते सत्यसतीपरीक्षाप्रकरणं पंचदशम् १५ प्राणंतीति अमी प्राणभृतः अशनेन प्राणंति तस्य अशनस्य अंबुनाजन्मस्यात् तदंबुमेघात् भवति मेघस्य प्रावृषि भवेत् तेनकारणेन तस्यमेघस्य अस्मिन् श्यामारुते विमर्शः क्रियते मयेति शेषः ३२७ आद्यइति आद्यः प्रथमः तोरणभूविभागः त्रिधाकार्यःद्वितीयस्त्रिधैव तृतीयश्चतुर्विभागःकार्यः एवममुनाप्रकारेण

॥ भाषा ॥

॥सौम्यरवाविति ॥ जो सुंदर शब्द करत दोनो पक्षी वामभागतें दक्षिणभागमें आयकरकें शांतस्थानमें स्थित होंय तो स्त्रीमनकरकें वी अन्य मनुष्यकूं चिंतमनन करे ॥३२६॥ ॥इतिश्रीवसंतराजभाषाटीकायां पोतकीरुते सत्यसती परीक्षा प्रकरणम् पंचदशं ॥१५॥ प्राणंतीति॥ प्राणधारी भोजनकरकें पुष्ट होंयहे ता अन्नको जन्मजलकरकें होयहे वोजलमेघतें होयहे औरमेघवर्षा ऋतुमें होयहे ताकारणकरकें मेघको विचार पोदकीके रुतमें करेंहें ॥३२७॥ आद्यइति ॥

एवंत्रयस्तोरणभूमिभागारेखादिभेदैर्दशधाविधेयाः २८
आर्द्रादिकंस्वात्यवसानमेतन्नक्षत्रवृंदे दशकंयदस्ति
तत्सन्निवेश्यंदशसुक्रमेणविपश्चितातोरणभूदलेषु २९
मध्यादेषामत्रभानांदशानांकिंधिष्ण्यस्थेभास्करेवर्ष
णंस्यात् एवंपृष्टेयत्रनक्षत्रभागेतारागच्छेत् तद्ग
तेर्केंबुपातः ३३० श्यामावामायातिनक्षत्रभागे
यस्मिन्नस्याद्वर्षणंतद्गतेर्के सर्वांवृष्टिंनिश्चितार्थां
विपश्चित्कुर्वीतैवंवासराणांत्रयेण ३१

॥ टीका ॥

त्रयस्तोरणभूमिभागाः रेखादिभेदैः दशधाविधेयाः ३२८ आर्द्रादिकमिति यन्नक्षत्रवृंदे आर्द्रादिकं स्वात्यवसानंनक्षत्रदशकंयदस्ति तत्क्रमेणदशसु तोरणभूदलेषु विपश्चितासन्निवेश्यं ३२९ मध्यादिति अथ एषांभानांदशानां मध्यात् किं धृष्ण्यस्थे भास्करे वर्षस्यादितिपृष्टे यत्र नक्षत्रभागेतारागच्छेत् तद्गतेर्के अंबुपातःस्यात् ३३० श्यामेति यस्मिन् नक्षत्रभागे श्यामा वामा यानि तत् गतेर्केवर्षणंनस्यात् एवं

भाषा

पहलें तोरणकी पृथ्वीके तीन विभाग करनें दूसरो तीसरो चोथो ये तीनो विभागकरके इनकूं फिर रेखादिक करकें दशदल करनें ॥३२८॥ आर्द्रादिकमिति ॥ सत्ताईस नक्षत्रमेंसुं आर्द्रानक्षत्रतें लेकर स्वातिनक्षत्र तक नक्षत्रहें इनदशनक्षत्रनकूं तोरणकी पृथ्वीके दशदलनमें क्रमकरकें स्थापन करे ॥३२९॥ मध्यादिति ॥ इनदशनक्षत्रनके मध्यमेंसुं कोननक्षत्रपे सूर्य स्थित होय तब वर्षा करे एसो प्रश्न करे तब जानक्षत्रभागमें श्यामा तारा होय तानक्षत्रपे सूर्य आवे तब वर्षाहोय ॥३३०॥ श्यामेति ॥ जानक्षत्रभागमें श्यामावामा होय वा नक्षत्रपे सूर्य आवे तब वर्षा नकरे ओर पूर्व प्रकारकरकें विवेकी तीनदिना तांई सर्व वृष्टि निश्चय

कृत्वापसव्यंध्वनितंकुमारीभूत्वोद्धृतातिष्ठतिदीप्तमाता झषस्ययस्याभ्युपगम्यभागंसमावृडंशोरहितो जलेन ३२ श्यामाविशुष्कंयदिवाविशीर्णवृक्षंसमारोहतिदक्षिणेपि आसाद्ययामृक्षभुवंभवंति तत्रस्थितेऽर्केविरलाःपयोदाः ३३ वामतोरटति यातिदक्षिणंपोतकीतदनुयावतः करान् उन्नतंश्रयतिपादपादिकंतावतःपततिवारिवासरान् ३४

॥ टीका ॥

पूर्वोक्तप्रकारेणविपश्चित्पंडितः वासरत्रयेणसर्वांवृष्टिं निश्चितार्थांकुर्वीन ३३१ कृत्वेति अपसव्यं ध्वनितं कृत्वा उद्धृता भूत्वायस्य ऋक्षस्य देशं अभ्युपगम्य दीप्तमागे तिष्ठति समावृडंशो जलेनरहितोभवति ३३२ श्यामेति यामृक्षभुवं आसाद्य श्यामाविशुष्कं यदि वाविशीर्णवृक्षं समारोहति तत्रस्थितेऽर्के विरलाः पयोदाः भवंति ३३३ वामइति यदि पोतकी वामतो रटति दक्षिणं याति तदनुयावतः करान् गत्वा उन्नतं पादपादिकं श्रयति तावतः वासरान् वारि पतति ३३४

॥ भाषा ॥

करे एसो कहें हे ॥३३१॥ कृत्वेति ॥ जेमनें मांऊं शब्द करकें उद्धृता होय जा नक्षत्रके देशमें सन्मुख आयकर दीप्तमार्गमें स्थित होयवो वर्षा ऋतुको अंशजल करकें रहित होय ॥३३२॥ श्यामेति॥ जो श्यामा जा नक्षत्रकी दक्षिणपृथ्वीमें आयकरकें सूकेवृक्षपे चढजाय तो ता नक्षत्रमें स्थित सूर्य होय तब मेघजलके वर्षावचेवारे विरलेही होंयहें ॥३३३॥ वामइति ॥ जो पोदकी वामभागमें शब्दकरे दक्षिणमें चली जाय तापीछें जितने नक्षत्र पर्यंत ऊंचे वृक्षादिकनपे चढजाय तितने दिवस पर्यंत जलवर्षे ॥३३४॥ ॥छ॥

यावत्संख्यान्वामतोवारिशब्दान्कृत्वाश्यामाद-
क्षिणंयातिशांता तावत्संख्यान्वासरान्वारि
वाहोनौसंचार्यांभूतधात्रींकरोति ३५ खगारवं
वारुणमुच्चरंतोयद्यंतरिक्षंप्रविलोकयंति तथावि-
धास्तेयदिवाप्रभूताविशंतिनीडंतदुशंतिवृष्टिं ३६
प्राग्भूमिकायांजलपातमादौद्वितीयभूमौयदिम-
ध्यभागे तृतीयभूमावथचेत्तदंते प्रदक्षिणांपांड
विकाकरोति ३७ ॥ ६७ ॥

॥ टीका ॥

यावदिति पोतकी वामतो यावत्संख्यान् वारिशब्दान्कृत्वा दक्षिणं याति शांतेति शांतस्थानस्थितेत्यर्थः तावत्संख्यान् वासरान् वारिवाहो मेघः नौ संचार्यां नावातरितुं योग्यां भूतधात्रीमिति भूताः प्राणिनः तेषां धात्रीं निवसनस्थानं विधत्ते करोति ३३५ खगाइति यदि खगाः वारुणं आप्यं खंशब्दमुच्चरंतः अंतरिक्षं व्योम प्रविलोकयंति यदिवा प्रभूतास्तथाविधाः नीडं विशंति तदा वृष्टिमुशंति कथयंति ३३६ प्रागिति प्राग्भूमिकायां यदि पांडविका प्रदक्षिणं करोति तदा आदौ जलं स्यात्

भाषा

॥यावदिति॥ पोदकी वामभागतें जितने संख्या वारिशब्दकरकें दक्षिणभागमें जाय शांतस्थानमें स्थित होय तो उतनेही दिवसपर्यंत मेघ पृथ्वीकूं नौकासुं तिरवे लायक करदेवे ॥३३५॥ खगाइति॥ जो पक्षी आप्य नाम जलशब्द उच्चारण करत आकाशमें देखे अथवा बहोत हे जांय वा नीड घूंसु आतामें प्रवेश कर जांय तो वृष्टी करे ॥ ३३६ ॥ प्रागिति ॥ प्रथमभूमीमें जो पांडविका दक्षिणा होय तो आदिमें जलकी वर्षा होय जो द्वितीय भूमीमें प्रदक्षिणा होय तो मध्यमभागमें जलवर्षै और जो तृतीयभूमीमें प्रदक्षिणा होय तो अंतमें

दीप्तंस्वरंवायदियातितारावंध्यांगनायाइववाचदीप्तिः
नत्प्रावृषःपीनघनोन्नतानांपयोधराणामपयोधरत्वं ३८ प्रदक्षिणंभूमित्रयाद्बहिश्चकुर्वंतिदुर्गाः
कृतवारिशब्दाः वर्षास्त्वतीतास्कतदातिबह्वींस्याद्वृष्टि
रल्पापिनचांतराले ३९ अदक्षिणायाविनिवृत्ति
कालेसासंमताप्रावृषिवर्षणार्थम् प्रदक्षिणंयातितुयानिवृत्तौसाब्रह्मपुत्रीघनविघ्नकर्त्री ३४०

॥ टीका ॥

यदि द्वितीयभूमौ प्रदक्षिणंकरोति तदा मध्यभागेजलंस्यात् अथचेत् तृतीयभूमौ प्रदक्षिणंकरोति तदाप्रांतेजलंस्यात् ३३७ दीप्तमिति यदि पोदकीदीप्तस्वरं तारायाति तदा वंध्यांगनायाइव दीप्तिर्भवति तत्प्रावृषः पीनघनोन्नतानांपयोधराणामभ्राणां अपयोधरत्वंस्यात् ३३८ प्रदक्षिणमिति भूत्रितयाद्बहिश्चेद्दुर्गाः कृतवारिशब्दाः प्रदक्षिणंकुर्वंति तदावर्षासु अतीतास्क बह्वीवृष्टिः स्यात् अंतराले अल्पापिनस्यात् ३३९ अदक्षिणेति या विनिवृत्तिकाले पोतकी अदक्षिणावामास्यात् सा प्रावृषिवर्षणार्थे संमतां तु पुनः यानिवृत्तौप्रदक्षिणंयाति साब्रह्मपुत्री घनविघ्नकर्त्रीस्यात् ३४०

॥ भाषा ॥

जलकी वर्षा होय ॥३३७॥ दीप्तमिति॥ जो पोदकी दीप्तस्वरकर तारा आय जाय तो वंध्यास्त्रीकी सीनाई दीप्तस्वर निष्फल है यातें वर्षाऋतुमें पुष्ट ओर उंचे मेघनको आगमन तोहोय परंतु जल नहीं वर्षे ॥३३८॥ प्रदक्षिणमिति॥ जो दुर्गा तीनोभूमीननें बहार जलशब्द कर प्रदक्षिणा करे तो वर्षा व्यतीत हुये ये बहोत वृष्टि होय ओर बीचमें अल्पची वर्षा न होय ॥३३९॥ अदक्षिणेति॥ जो शकुनसुं निवृत्ति कालमें पोतकी वामा होय तो वर्षाकालमें वर्षा बहोत होय ओर जो निवृत्तिकालमें दक्षिणा होय तो ब्रह्मपुत्री मेघमें विघ्नकरवेवाली होय ॥३४०॥

विमुच्यशब्दंयदिभूत्रयेपि भवेद्वितारावितिनिवर्ततेतु ताराततदास्यात्तपनांशुमालाकरालदाहाकलिताधरित्री ४१ संमूत्र्यवांत्वायदिवाविहंगः स्याद्दक्षिणो वर्षतितंन्नितांतं पूर्वोक्तकारीयदिचोन्दृतःस्यात्तद्वारिदोवारिददातितुच्छं ४२ श्यामासुदेशेकृतमूत्रवांतिर्महीयसींशुष्कतरौतुतुच्छं पाषाणखंडे सतुषारखंडांब्रवीतिवृष्टिंजलदस्यकाले ४३

॥ टीका ॥

विमुच्येति यदि भूत्रयेपि शब्दं विमुच्य वितारा भवेत् यदा पुनः विनिवर्त्तते तारास्यात् तदा तपनांशुमालाकरालदाहा कलिताधरित्रीति तपनः सूर्यः तस्य अंशुमालाकिरणश्रेणिः तेनयः करालोकठिनोदाहः तापाधिक्यं तेनाकलिता व्याप्ता धरित्री पृथ्वी स्यादित्यर्थः ३४१ संसूत्र्येति यदि विहंगः संमूत्र्य वांत्वा वा प्रदक्षिणः स्यात्तदानितांतमत्यर्थं वर्षति यदिपूर्वोक्तकारी उन्दृत स्यात् तदावारिदोमेघः तुच्छंवारि ददाति ३४२ श्यामेति यदि वर्षाकाले श्यामासुदेशेकृतमूत्रवांतिर्भवति तदा महीयसीं वृष्टिं ब्रवीति यदि शुष्कतरौकृतमूत्रवांतिः स्यात्तदा

॥ भाषा ॥

॥विमुच्येति॥ जो पोदकी तीनो भूमीमें शब्दकरकें वामा होय और निवृत्तिकालमें तारा होय तो सूर्यकी किरणकी वोहोत तापकरकें व्याप्त पृथ्वी होय ॥३४१॥ ॥संमूत्र्येति॥ जो विहंग मूत्रकरकें वा वमनकरकें दक्षिणमें होय तो अत्यंत वर्षा करे जो मूत्रकरकें वमनकरकें उन्दृत होय तो मेघ तुच्छ जल देवे ॥३४२॥ ॥श्यामेति॥ जो श्यामा वर्षासमयमें सुदेशमें मूत्र करे वमनकरे तो महान् वृष्टी करे जो शुष्कवृक्षमें मूत्रवमनकरे तो तुच्छ वर्षा होय और जो पाषाणके ऊपर करे तो तुषारकी खंड खंड वृष्टी होय ॥ ३४३॥ ॥७॥

विधायविष्ठांयदिकृष्णपक्षीतारोभवेत्तर्हिनिहंतिवृष्टिम् उत्सृज्यवर्षोयदियातिवाममवग्रहंतत्सुमहांतमाह ४४ करोतिनीडंभुविचेद्वराही समान्यपत्यानिविजायतेवा समुद्भवद्भानुमयूखवह्निर्जाज्वल्पते तज्जगतींसमस्तां ४५ द्वारादिदेशेषुगृहस्ययस्य प्रत्यक्षरूपाकुरुतेकुलायं अंभोधरोवर्षतिचेत्तथापि तच्छून्यतांयातिचभज्यतेवा ३४६

॥ टीका ॥

तुष्टांवृष्टिंब्रवीति पाषाणखंडे पुनःसतुषारखंडांवृष्टिंब्रवीति ३४३ विधायेति यदि कृष्णपक्षी विष्ठां विधाय तारो भवेत् तदा वृष्टिं विनिहंति यदि वर्चः उत्सृज्य वामंयाति तदा सुमहांतमवग्रहं जलदप्रतिबंधकं आह कथयतीत्यर्थः ३४४ करोतीति चेद्यदि वराही भुवि नीडं कुरुते यदि वा समान्यपत्यानि विजायते तदा जगती समस्ता समुद्भवद्भानुमयूखवह्निभिः जाज्वल्पते ३४५ द्वारादीति यस्य गृहस्य द्वारादिदेशेषु प्रत्यक्षरूपाकुलायं पक्षिनिवासस्थानं कुरुते तदा चेद्यदि अंभोधरोवर्षति तथापि तद्गृहं शून्यतां गच्छति भजयते वा ३४६ ॥७॥

॥ भाषा ॥

॥विधायेति॥ जो कृष्णपक्षी वीटकरकें जेमने भागमें आय जाय तो वृष्टीकूं नाश करे जो वीट करकें वामभागमें आय जाय तो महान् मेघको प्रतिबंधक कहे हें ॥३४४॥ करोतीति ॥ जो वराही पृथ्वीमें अपनो स्थानकरकें समान अपत्य प्रगट करे तो सूर्यकी किरणरूप अग्नि समस्त पृथ्वीकूं तापकरे॥ ३४५॥ ॥द्वारादीति॥ जा घरके द्वारकूं आदिलेकें कोई स्थानमें पोदकी अपनो निवास स्थान करे तो मेघवर्षा तो करे परंतु वा घरकूं वा स्थानकूं सूनो करदे अथवा फूट जाय गिरपडे ॥३४६॥ ॥७॥ ॥७॥

गर्तेसरिद्रोधसिवावराहीशावानयुग्मानपिचेत्प्रसू
ते नांभोधरोमुंचतितावदंभोयावत्ससमुड्डीयन
तेव्रजंति ४७ प्रासादशैलद्रुमकोटरेषुतुंगेषुचा-
न्येषुविधायनीडं प्रसूयतेयद्यसमैरपत्यैः श्या-
मात्तदंभोभवतिप्रभूतं ३४८ इतिवृष्टिप्र०१६
आख्यास्यामोधान्यनिष्पत्तिहेतुर्यद्यादृक्संप्रोक्त-
माद्यैर्निमित्तं ज्ञातेतस्मिन्ब्रह्मपुत्रीरुतेऽस्मिन्
कर्त्तुंशक्यः केनकस्योपकारः ४९

॥ टीका ॥

गर्तेति गर्तेगर्तायांसरिद्रोधसिवायदिवराहीशावानयुग्मान्विषमसंख्या-
कान्प्रसूते तदा तावदंभोधरो नवर्षति यावत्तेसमुड्डीयनव्रजंति ३४७
प्रासादेति प्रासादशैलद्रुमकोटरेष्विति प्रासादोदेवभूपानांगृहंशैलः पर्व-
तः द्रुमकोटराणिप्रसिद्धानि एषु अन्येष्वपिच तुंगेषुनीडंविधाय यदिश्या-
मा असमैः अपत्यैः प्रसूयते तदाप्रभूतमंभः स्यात् ३४८ इतिशत्रुं-
जयकरमोचनादिसुकृतकारिमहोपाध्यायश्रीभानुचंद्रविरचितायांम्
वसंतराजटीकायां पोदकीरुते वृष्टिप्रकरणं १६ आख्यास्यामइति

॥ भाषा ॥

॥गर्तेति॥ गर्तमें नदीकी तटपे विषमऊन संख्या वालक प्रगट करे तो जव तांई
ये बच्चा उडकरकें नही चलन लगें तब तांई मेघ नहीं वर्षे ॥३४७॥ प्रासादे-
ति॥ देवमंदिर राजानको घर पर्वत वृक्षकी कोटरा इनमें औरबी ऊंचेस्थान तिनमें
अपनो घर करकें पोदकी जो विषमपुत्र प्रगट करे तों बहोत जल वर्षे॥३४८
॥ इतिश्रीवसंतराज भाषाटीकायां पोतकीरुत्ते वृष्टिप्रकरणंषोडशम् ॥१६॥
॥आख्यास्यामइति॥ ब्रह्मपुत्रीके शब्दमें धान्यकी सिद्धीके कारण आद्यमु-
नीनने जेसो निमित्त कह्योहे तेसोही हम कहेंहें ताकूं जानेसें सबको उपकार

धान्यानाहुः केचिदष्टादशास्मिंस्तेषांमध्याद्यस्यया
वंतिसंति तावद्भेदाः कुड्यरेखादिभिर्यैस्तिस्रोप्युर्व्यास्तेनसम्यग्विधेयाः ३५० प्रत्येकमुर्वीस-
कलेषुतेषुमुख्यक्रमेणाखिलधान्यमुष्टिं क्षिपेत्त
तोगच्छतियत्रतारा निष्पद्यतेतान्नियमेनधान्यं ५१

॥ टीका ॥

ब्रह्मपुत्री रुते धान्यनिष्पत्ति हेतोराद्यैः मुनिभिः यादृक्षंनिमित्तं प्रोक्तं तादृक् वयं आख्यास्यामः तास्मिन्ज्ञानेसतिकैः कस्योपकारः कर्तुंनशक्यः ३४९ धान्यानीति अस्मिन्लोके केचिदष्टादशधान्यान्याहुः तानिचेमानि चपलः १ हरिमंथकः २ तुवरि ३ मसूरि ४ कुलत्थ ५ गोधूम ६ वल्लः ७ शालिः ८ जवः ९ कोद्रवः १० रालः ११ तिलः १२ मुद्गः १३ माषः १४ अतसिः १५ त्रिपुटक १६ मुकुटः १७ कंगुः १८ क्वापि चतुर्विंशतिधान्यान्युक्तानि वनोद्भवान्यन्यानिबहूनि संति तेषांमध्यात् यस्यपुरुषस्य यावंति तेनशाकुनिकेन तावद्भेदाः तिस्रोप्युर्व्याः कुड्यरेखादिचिन्हैरिति कुड्यंनामभित्ति रेखाप्रतीता आदिशब्दादन्येषांपरिग्रहः चिन्हैः तल्लक्ष्मभिः सम्यग्विधेयाः ३५० प्रत्येकमिति तेषु पृथ्वीसकले-

॥ भाषा ॥

करवेकूं योग्य होयहे ॥३४९॥ धान्यानीति ॥ या लोकमें कोई अठारे धान्य कहेंहें कोनसेहें सो कहेंहें चपल १ हरिमंथक २ तुवरि ३ मसूरि ४ कुलत्थ ५ गोहुं ६ वल्ल ७ शालि ८ जव ९ कोद्रवा १० राल ११ तिल १२ १२ मुद्ग १३ माष १४ अतसी १५ त्रिपुटक १६ मकुट १७ कंगु १८ ये अठारेहें कोई चोवीस धान्य कहेंहें ओर वनमें हुये धान्य बहोत हें उनके मध्यमें पुरुषके जितनेहें उतने शकुनी करकें भेद तीनो पृथ्वीकी भींतमें रेखा वा ओर चिन्हकरनो योग्य हे ॥३५०॥ प्रत्येकमिति ॥ वासव पृथ्वीमें एकएकमें धान्यकी मुष्टी डाले ता पीछें जहां तारा होयकर गमन

त्रिषुक्षिपेदेकमिलातलेषु धान्यंततोदक्षिणगेविहंगे
पूर्वोप्त मध्योप्ततदुत्तरोप्त धान्यस्यवृद्धिः प्रथमादिभू
षु ५२ शुभस्वरातारगतिर्वराही भस्माथवारोह
तिदग्धवृक्षं सुरक्षितस्यापिभवेत्कुतोपिपक्कस्य
धान्यस्यतदग्निदाहः ५३ तारापिभूत्वायदिया-
तिदीप्तं विरुद्धभावाशकुनैकदेवी ॥

॥ टीका ॥

षु मुख्यक्रमेण प्रत्येकं धान्यमुष्टिं क्षिपेत् ततो यत्रतारागच्छति तन्नियमेन धान्यं निष्पद्यते ३५१ त्रिष्विति इलातलेषु त्रिषु एकं धान्यं क्षिपेत् ततः तदनंतरं दक्षिणगे विहंगे प्रथमादिभूषु पूर्वोप्तमध्योप्ततदुत्तरोप्तधान्यस्य वृद्धिरिति पूर्वं उप्तं भूमौ क्षिप्तं मध्ये यदुप्तं एवं तदुत्तरोप्तं यद्धान्यं तस्यवृद्धिः ज्ञेया प्रथमभूमौ तारया प्रथमोप्तं द्वितीयभूमौ मध्योप्तं तृतीयभूमौ तदुत्तरोप्तं धान्यंभवतीति तात्पर्यार्थः ३५२ शुभइति यदाशुभस्वरातारगतिर्वराही भस्म यदि वा दग्धवृक्षमधिरोहति तदा सुरक्षितस्यापि पक्कस्य धान्यस्य अग्नितोदाहः स्यात् ३५३ तारापीति यदि विरुद्धभावा शकुनैक देवी तारापि भूत्वा दीप्तं स्थलं याति पृथ्वीशकु-

॥ भाषा ॥

करे तहां तहां तो नियमकरकें धान्य होय ॥३५१॥ त्रिष्विति॥ पृथ्वीके तीनो भागमें एक धान्य डाले ता पीछें विहंग दक्षिणमें गमन करे तो प्रथमभूमीमें बीजबोयो होय और श्यामा तारा होय. तो प्रथम धान्य प्रथममें होय औरदूसरी भूमीमें बोये पीछें दक्षिणा होय तो दूसरेमें दूसरें होय तीसरेमें वातें पीछें होय ॥३५२॥ शुभइति ॥ जो शुभ शब्दकर जेमनी चली जाय औरभस्मा होय दग्धवृक्षके ऊपर जाय बेठे तो खूब रक्षा जाकी होय रही होय पकोहुयो धान्य होय तो अग्निकर जरजाय॥३५३ ॥तारापीति॥ जो पोदकी विरुद्धभाव होय फिर ताराची होय करकें दीप्तस्थानमें-

तदेतिपृथ्वीशहुताशचौरैरुत्साद्यतेसस्यमवाप्तवृद्धिः ५४ कीटजग्धमफलांकुरशाखंशाखिनंश्रयतिदक्षिणगापि पोदकीयदितदाखलुधान्यंभक्षयंतिशलभाऽऽखुशुकाद्याः ५५ दक्षिणेरटति गच्छतिवामंदीप्तमाश्रयतिकर्मविपाकात् पांडवीयदितदानियमेनव्रीहयः समुपयांतिनपाकं ५६ पूर्णोत्पत्तिःपूर्णयातारयास्यादर्द्धोत्पत्तिस्त्वर्द्धताराब्रवीति

॥ टीका ॥

ताशचौरैः आवाप्तवृद्धिसस्यं उत्साद्यतेदूरीक्रियते ३५४ कीटइति यदिदक्षिणगापि पोतकीकीटजग्धं अफलांकुरशाखं फलांकुरशाखावर्जितंशाखिनंश्रयति तदा शलभाखुशुकाद्याइति शलभातीडी इतिप्रसिद्धाः आखवः मूषकाः शुकाद्याः प्रतीताः खलु निश्चयेन धान्यंभक्षयंति ३५५ दक्षिणइति यदिपोतकी दक्षिणेरटति कर्मविपाकाद्दीप्तंवामंस्थानं आश्रयति तदा नियमेन व्रीहयः नपाकंसमुपयंति ३५६ पूर्णइति पूर्णया तारया पूर्णोत्पत्तिः धान्यस्यस्यात् अर्द्धोत्पत्तिं अर्द्धताराब्रवी-

॥ भाषा ॥

आय जाय तो राजाकरकें अग्निकरकें चौरकरकें धान्यकी वृद्धीनाश करे ॥ ॥३५४॥ कीटइति॥ जो पोदकी जेमनीवीं होयकीडाको खायो फल अंकुर शाखा रहित वृक्षपै स्थित होय तो टीडी मूसासूं आईनकूं आदिले जंतु निश्चयही धान्यकूं भक्षण करें ॥ ३५५॥ दक्षिणइति॥ जो पोदकी जेमने भागमें शब्दकरे कोई कर्म फलसुं वाममें होय दीप्तस्थानमें स्थित होय तो नियमकरकें चांवल परिपक्व नही होंय ॥३५६॥ पूर्णइति॥ जो श्यामा दक्षिणभागमें पूर्ण होय तो धान्यकी पूर्ण उत्पत्ती होय जो अर्द्धतारा होय तो अर्द्ध धान्यकी उत्पत्ति होय और वाम होय तो सर्व धान्यको नाश होय और अर्द्धवामा -

धान्यस्यस्याद्वामयासर्वनाशस्तस्यत्वर्द्धंनाशयत्य
र्द्धवामा ५७ सौम्यारवाभूत्रितयेपिभूत्वातारानि
तांतंश्रयतिप्रशांतं स्यादुद्धृतेकापियदानिवृत्तौस
स्यंभवेद्भूरिफलंतदानीं ५८ स्यादुद्धृतायद्यवनि
त्रयेपिनिवृत्तिकालेयदिदक्षिणातत् सिद्धोपियुक्ता
र्थतयापरार्थोव्रीहिर्बहुव्रीहिसमासवत्स्यात् ३५९
इतिधान्यनिष्पत्तिप्रकरणंसप्तदशम् १७ ॥छ॥

॥ टीका ॥

त्रिवामया धान्यस्य सर्वनाशः स्यात् अर्द्धवामा पुनः अर्द्धशस्यंनाशयति ३५७ सौम्यारवेति यदि भूत्रितयेपि सौम्यरवा भूत्वा तारानितांतं प्रशांतं श्रयति यदानिवृत्तौ उद्धृतेकापि स्यात् तदा सस्यं भूरिफलंभवेत् ३५८ स्यादिति यद्यवनित्रयेपि उद्धृतास्यात् यदिपुनः निवृत्तिकालेदक्षिणास्यात् तदा युक्तार्थतयापिसिद्धोपिव्रीहिः परार्थःस्यात् किंवत् बहुव्रीहिसमासवत् ३५९ इति शत्रुंजयकरमोचनादि सुकृतकारि महोपाध्याय श्रीभानुचंद्रविरचितायां वसंतराजटीकायां पोतकीरुतेधान्यनिष्पत्तिप्रकरणंसप्तदशम् १७ ॥छ॥ ॥छ॥

॥ भाषा ॥

होय तो अर्द्ध अन्नको नाश होय ॥३५७॥ सौम्यारवेति॥ जो तीनो पृथ्वीमें सौम्यशब्दकर निरंतर शांतस्थानमें स्थित होय जो निवृत्तीमें उद्धृता होय तो अन्न बोहोत फलवान् होय ॥३५८॥ स्यादिति ॥ जो श्यामा तीनों पृथ्वीमे उद्धृता होय जो फिर निवृत्तिकालमें दक्षिणा होय तो योग्यतासुं सिद्धवी होयगयो व्रीहि अन्नचावल तोवी परार्थही होय स्वार्थमें नहीं होय ॥३५९॥ ॥ इतिश्री वसंतराजभाषाटीकाया पोतकीरुते धान्यनिष्पत्ति प्रकरणम् सप्तदशं ॥१७॥

॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

पण्यंसमर्घंयदिवामहर्घंभावीतियस्मादवगम्यमेतत्
ब्रूमोथयत्रावगतेसमस्ताकृतार्थतास्याद्वणिजांगृहेपि
३६० पण्यस्ययस्योच्चरितेर्थनाथेप्रदक्षिणीभूयवि-
हायदीप्तं श्यामासमारोहतिपादपाग्रंमहर्घतात-
स्यभवत्यभीष्टम् ६१ अदक्षिणायांशकुनेकदे-
व्यांसमर्घतांपण्यधनंप्रयाति साचेत्प्रदीप्तंश्रय
तेकथंचित्पण्यंतदानींलभतेन किंचित् ६२

॥ टीका ॥

पण्यमिति पण्यं क्रयाणकं समर्घं स्वल्पमूल्यं यदि वा महर्घं बहुमूल्यं
भावीति यस्मादवगम्यते तद्ब्रूमः यथात्रेति अस्मिन् लोके एतदेवगते
सति वणिजांगृहेपि समस्ताकृतार्थना स्यात् ३६० पण्यस्येति
यस्यपण्यस्य अर्थवाक्येउच्चरिते पोदकी प्रदक्षिणीभूय दीप्तंविहाय पाद-
पाग्रं समारोहति तस्यमहर्घता अभीष्टंभवति ३६१ अदक्षिणाया
मिति अदक्षिणायांशकुनैकदेव्यां पण्यधनंसमर्घतांप्रयाति साचेत्प्र
दीप्तं प्रदेशंश्रयते तदानीं न किंचित्पण्यंलभ्यते ३६२

॥ भाषा ॥

॥ पण्यमिति॥ जो वस्तू खरीदनो हे वो वस्तूमें घी होयगी वा सोंघी होयगी ये
जासें जाने जांय हे सो ये हम कहेंहें ॥ और या लोकमें ये जानेसें वणिजन
के घरमें कृतार्थना होयहै ॥ ३६०॥ पण्यस्येति॥ जा वस्तूको अर्थवाक्य उच्चा-
रण करे फिर पोदकी दक्षिणावर्त होयकर दीप्तस्थानकूं छोड वृक्षके अग्रभा-
गमे जायबेठे तो वो वस्तूमें घी होय ॥ ३६१॥ अदक्षिणायामिति ॥ जो
वामा होय जाय तो वो वस्तू सोंघी होय वोही जो प्रदीप्तदेशमें स्थित होय-
तो गेंघो वी न होय सोंघोवी नहीं होय ॥ ३६२॥ ॥ ७॥

प्रदक्षिणानांगणनाभवेद्या भांडस्यतावद्गुणमर्घमाहुः व्रजंतितावद्गुणनास्तुवामा वदंतितावद्गुणमर्घपातं ६३ विण्मूत्ररूक्षध्वनिकायकंपस्वपिच्छसंत्रोटनकारिणीया सापांडवीदुर्लभमप्यवश्यंधान्यंसमर्घंकुरुतेऽतिमात्रं ६४ विभज्यभूमित्रितयंक्रमेणतेषुक्षिपेत्पण्यलवान्समस्तान् तस्यार्घहानिःखलुयत्रवामा महर्घतातस्यतुयत्रतारा ६५

॥ टीका ॥

प्रदक्षिणानामिति यागणना प्रदक्षिणानांभवेत् तावन् गुणंभांडस्य अर्घमाहुः तुपुनः यदि तावद्गुणनावामा व्रजंति तदा तावद्गुणं अर्घपातमाहुः ३६३ विण्मूत्रेति विण्मूत्ररूक्षध्वनिकायकंपस्वपिच्छसंत्रोटनकारिणीया पांडवी सादुर्लभमपि धान्यमवश्यंसमर्घीकुरुते अतिमात्रमतिशयेनेत्यर्थः ३६४ विभज्येति भूमित्रितयं विभज्य क्रमेणतेषु पण्यलवान्समस्तान् क्षिपेत् खलु निश्चयेन यस्यवामा तस्यार्घहानिः यस्यतारातस्य महर्घतास्यात् ३६५ ॥छ॥

॥ भाषा ॥

॥ प्रदक्षिणानामिति ॥ दक्षिणावर्त पक्षीनके शब्दकी जितनी गणना होय तितनें ही गुण वा वस्तुमें होंय और वामापोदकीकी जितनी गणना होय उतनेही गुण वा वस्तुमें पात कहेंहें ॥ ३६३ ॥ विण्मूत्रेति ॥ विड्मूत्र रूखो शब्द देहको कंपन अपनी पूंछको उखाडनो इन आचरणकूं करती होय एसी पोदकी दुर्लभ धान्यकूं अवश्य अत्यंत सोंघो करेहे ॥ ३६४ ॥ विभज्येति ॥ तीनभूमीनको विभागकरकें उनभूमीनमें सब वस्तूनके कण लेकर डाल दे फिर जाके पोदकी वामा होय ता वस्तूकी हानि होय और जाके श्यामा जेमनी होय ताकी महर्घता होय ॥ ३६५ ॥ ॥छ॥ ॥छ॥

वामारवादक्षिणतःप्रयाति श्यामाशांतंसेवतेचेत्प्रदेशम्
पुंसांयास्मिन्संग्रहीतेहृदिस्थेतंक्रीणीयाद्विक्रियार्थंपदार्थं ६६
इतिपो॰समर्घम॰प्र॰१८ आयुर्वर्षशतंसविंशतियुतंप्रायो
नराणांभवेन्न्यस्तंतद्धरणीत्रयंत्रिगणितंयत्रावनौदक्षिणा
तावद्वत्सरमायुरिष्टमुदितंदीसेत्रदुःखप्रदंभूमौयत्रग-
तापरत्रमरणंवर्षेषुतेष्वादिशेत् ६७ रुक्शस्त्रघा
तादिनिपीडितानांभूमौऽधुनाजीवितजीवनाशौ यथा
दिशेत्पाण्डविकाप्रसादादाश्चर्यमुत्पादयतेमनुष्यः ६८

॥ टीका ॥

वामेति यापोतकी वामारवादक्षिणेनप्रयाति चेत्प्रदेशंशांतंसेवते तदा पुंसां नृणां संग्रहीतेहृदिस्थे यस्मिन्पदार्थे तं विक्रयार्थं पदार्थं क्रिणीयात् ३६६ इतिशत्रुंजयकरमोचनादिसुकृतकारि महोपाध्याय श्रीभानुचंद्र विरचितायांवसंतराजटीकायांपोतकीरुतेसमर्घमहर्घप्रकरणमष्टादशं१८ आयुरिति प्रायोमानुषेसविंशतियुतंवर्षशतमायुर्भवेत् तत्त्रिगणितं धरणीत्रयंन्यस्तंभवति यत्रावनौ दक्षिणास्यात् तावत् वत्सरमायुरिष्ट मुदितंदीसे अत्रदुःखप्रदंभवति यत्रापरत्रभूमौगतातेषुवर्षेषुमरणमादिशेत् ३६७ रुगिति यथापांडविका आदिशेत् तदारुक्शस्त्रघाता-

॥ भाषा ॥

॥वामेति॥ जोपोदकी वाममें शब्दकर दक्षिएमें आयजो शांतदेशमें स्थिनहोय तो पुरुषनके संग्रह कियोपदार्थ मनमें वेचवेकूं करतो होयतो वेचदेवै ॥३६६॥ इतिश्रीवसंतराजभाषाटीकायांपोतकीरुते समर्घमहर्घप्रकरणमष्टादशं॥१८॥ आयुरिति॥ मनुष्यकी एकसो वीसवर्षकी आयूहै ताकी तीन पृथ्वी चालीसचालीस वर्षकी करनी जापृथ्वीमे तारा दक्षिण होय उत्तने वर्षकी आयु जाननी और दीप्तभूमीमें होयतो दुःखकी देवेवारी जाननी इनतें न्यारीचची भूमीसें ता रा होयतो उनवर्षनमें मरण कहनो॥३६७॥रुगिति॥

किमेषजीविष्यतिपृच्छ्यमानेप्राणी चिरंजीवति दक्षिणायां मरिष्यतीत्येषतुपृच्छ्यमानेप्राणीचिरंजीवतिचोद्धृतायां ६९ यावामगातोरणसन्निवेशेतारानुयायातिनिवृत्तिकाले जिजीविषुंमारयतेध्रुवंसासैव ध्रुवंजीवयतेमुमूर्षुं ३७० वामाचेष्टावामतोयानमस्यादीप्तंस्थानंभाषणंदक्षिणेन भस्योत्सर्गोवृक्षस्तस्यावरोहो विष्ठामूत्रंपक्षिणाविप्रलंभः ७१

॥ टीका ॥

दिनिपीडितानांजीवितजीवनाशोवयंब्रूमः यत्प्रसादान्मनुष्यः आश्चर्यमुत्पादयते ३६८ किमेषेति किमेषजीविष्यतीति पृच्छ्यमानेपोदकी दक्षिणायांप्राणी चिरंजीवति तुपुनः एष मरिष्यतीति पृच्छ्यमानेपोदकी उद्धृतायांप्राणी चिरंजीवति ३६९ यावामेति तोरणसन्निवेशे यावामगाभवतितुपुनः निवृत्तिकालेयातारायाति साध्रुवं जिजीविषुं मारयते सैव ध्रुवंमुमूर्षुंजीवयते ३७० वामेति वामचेष्टावामतोयानमस्याः देव्याः दीप्तेस्थलेस्थानंस्थितिः दक्षिणेनभाषणंशब्दः भस्योत्सर्गोवृ-

॥ भाषा ॥

जेसो पांडविका कहेंहें तेसोही रोगशस्त्रघातादिकनकर पीडायमान होय रहे तिनको जीवननाश हम कहेंहें जाकी कृपातें मनुष्य आश्चर्य प्रगटकरे ॥ ३६८ ॥ किमेषेति ॥ ये कहाजीवेगो एसें पूछे तब पोदकी दक्षिणा होय तो प्राणी चिरकाल तांई जीवेये मर जायगो एसो प्रश्न करे तब पोदकी उद्धृता होय तो प्राणी चिरकाल तांई जीवे ॥ ३६९ ॥ यावामगेति ॥ तोरणके प्रवेशमें जो वामगा होय और निवृत्ति होंतीसमें तारा होय तो निश्चयही जीवेकी इच्छा जाकूं होय ताय तो मारे और वोही श्यामा मरवेकूं जाकूं इच्छा होय ताय जिवावे ॥ ३७० ॥ वामेति ॥ पोदकीकी वामचेष्टा होय वाम माऊं दीप्तस्थानमें जाय और दक्षिण माऊं शब्दकरे और भ-

नाशत्रासौमूर्द्धदेहप्रकंपादधोमुखंवेत्यमूनिक्रमेण शांताशेषव्याधिबाधानुबंधंदीर्घकालंजीवयंतेमुमूर्षुम् ७२ युग्मं तारास्त्रीणांव्याधिनाशंविधत्तेवामामृत्युंदीर्घतांवागदस्य शांतेप्रश्नेशांतिदंशांतमेवप्रश्नेदीप्तेशोभनंस्यात्प्रदीप्तम् ७३ आमयनाशनमौषधमेतत्स्पृष्टइतिप्रतिलोमगतिर्या

॥ टीका ॥

क्षतश्चावरोहः विष्ठामूत्रं पक्षिणाविप्रलंभः वियोगः ३७१ नाशेति नाशत्रासौ मूर्द्धदेहप्रकंपौ अधोमुखंचेत्यमूनि चेष्टा विशेषाणिस्युः तदा शांताशेषव्याधिबाधानुबंधमिति शांताः अशेषाः समस्ताः व्याधिबाधायाः अनुबंधाः परंपरायत्र सतथा असौ मुमूर्षुः विदीर्घकालं जीवते ३७२ युग्मं तारेति तारास्त्रीणां व्याधिनाशं विधत्ते वामामृत्युं वागदस्य दीर्घतां शांत प्रश्ने शांतिदं शांतमेव स्याद्दीप्ते प्रश्ने दीप्तमेवशोभनं ३७३ आमयेति आमयनाशनमौषधमेतत् इति

॥ भाषा ॥

क्ष्यवस्तूको त्याग करे ओर वृक्षपेसूं उतरती होय ओर विट् मूत्रकरे ओर पक्षी करकें वियोग होय ॥ ३७१ ॥ नाशेति ॥ मस्तक ओर देंहकंपा नाश ओर त्रास ये होंय ओर नीचो मुख होय ओर पहले श्लोकमें चेष्टा कहीते होंय तो मरवेवालो सब व्याधी ओर बाधा अनेक प्रकारकी शांत होय करकें दीर्घकालपर्यंत जीवे ॥ ३७२ ॥ तारेति ॥ श्यामा तारा होय तो स्त्रीनकी व्याधीनाशकरे ओर वामा होय तो मृत्यू वा रोगकी वृद्धि होय ओर शांतप्रश्नमें तो शांतशकुन शांतीको देवेवारो है ओर दीप्तप्रश्नमें दीप्तशकुन शुभहे ॥ ३७३ ॥ आमयेति ॥ ये औषध रोगकूं नाश करवेवारो है ऐसो प्रश्नकरे तब जो श्यामा प्रतिलोम गम करे तो रोगीके रोगकूं शीघ्रही दूरकरे ओर जो विपरीत्त प्रश्नकरे तो श्यामा अ-

हंतिरुजंसरुजोऽचिरतःसाप्रश्नविपर्ययतस्त्वनुलो
मा ३७४ इतिपोतकीरुतेजीवितमरणेएकोन
विंशतितमःप्रकरणम् १९ अथकथ्यंतेशकुनि
रुते सौख्यादीनिबहूनिप्रकरणमधि कृत्यैकमिदं
यस्मात्तानिलघूनिद्विपथिकः ७६ सुखावहामे
त्रिभविष्यतीतिप्रश्नेकृतेदक्षिणगासुखायां दुःखा
त्ययोमेत्रिभविष्यतीतिप्रश्नेपिदुःखंविनिहंतिसेव ७७

॥ टीका ॥

पृष्टेया प्रतिलोमगतिः सासरुजोपि अचिरतः रुजंहंति प्रश्नविपर्ययतस्तु अनुलोमासुभा ३७४ इतिशत्रुंजयकरमोचनादिसुकृतकारिमहोपाध्यायश्रीभानुचंद्रविरचितायां वसंतराजटीकायांपोतकीरुतेजीवितमरणप्रकरणमेकोनविंशतितमं १९ ॥छ॥ अथेति पूर्वप्रकरणकथनानंतरं एकप्रकरणमधिकृत्य शकुनिरुतेसौख्यादीनिबहूनिकथ्यंते यस्मात्तानिपूर्वोक्तानि लघूनिप्रकरणानि द्विपथिकः छंदः ३७६ सुखावहेति इदंवस्तु मे सुखावहं भविष्यतीति प्रश्ने दक्षिणगा सुखायभवति दुःखात्ययोदुःखाभावोममभविष्यतीतिप्रश्नेसैव प्रदक्षिणादुःखं विनिहान्ति ३७७

॥ भाषा ॥

नुलोमा होय तो सुभ करे नहीं अशुभ जाननो ॥३७४॥ इतिश्रीवसंतराजभाषाटीकायां पोतकीरुतेजीवितमरणमेकोनविंशतितमः प्रकरणं ॥१९॥ अथेति ॥यापोदकी रुतनाम प्रकरणमें वोहोतसे सौख्यादिक कहे हें अब पहलें कह्याए जे सुखादिक तेही लघुप्रकरण द्विपथिक छंदकरकें कहेंहें ॥३७५॥ सुखावहेति ॥ ये वस्तु वा मैत्री मोकूं सुखकी देवेवारी होयगी एसो प्रश्न करे तब जो श्यामा दक्षिणमें होय तो सुख करे और मोकुं दुःखको अभाव होयगो एसो प्रश्नकरे तोवी प्रदक्षिणा होय तो दुःखकूं दूरकरे ॥ ३७६॥

क्लेशोऽधुनामंक्षुविनंक्ष्यतीति प्रश्नेऽनुलोमासुखदान
वामा अद्यापिमेदुःखमुदेष्यतीति प्रश्नेवितारा
सुखदानतारा ७७ लाभोऽभीष्टंस्यादवश्यंममेति
प्रश्नेतारालाभदानैववामा कार्येऽमुष्मिन्नंनास्ति
लाभोममेति प्रश्नेवामालाभदानानुलोमा ७८ वा-
मस्वरादक्षिणगानिजेनसंयुज्यमानाशकुनिःपुमांसं
जनेनसंयोजयतिप्रियेणावियोजयत्युक्तविपर्ययेण ७९

॥ टीका ॥

क्लेशइति अधुनाममक्लेशः मंक्षुशीघ्रंविनश्यतीति प्रश्ने अनुलोमासुखदाभवति नवामा अद्यापि मेदुःख मुदेष्यतीति प्रश्नेवितारा सुखदानतारा ३७७ लाभइति ममाभीष्टोलाभ अवश्यंस्यादिति प्रश्ने तारा लाभदाभवति नैववामा तथा असुष्मिन्कार्ये ममलाभोनास्तीति प्रश्ने वामालाभदानानुलोमा ३७८ वामस्वरेति वामस्वरादक्षिणगानिजेन पुंसा संयुज्य मानाशकुनिः पुंमांसं प्रियेणाजनेन संयोजयति उक्तविपर्ययेण वियोजयति ३७९ ॥छ॥ ॥छ॥

॥ भाषा ॥

क्लेशइति॥ अब मेरो क्लेश शीघ्रही मिटेगो एसो प्रश्न करे तब अनुलोमा श्यामा सुखकी देवेवाली है और वामा सुखकूं नहीं देवे है और अबीमोकूं दुःख होयगो एसो प्रश्न करे तो पोदकी वितारा होय तो सुख देवे औरजो तारा होय तो सुख नहीं देवे ॥ ३७७॥ लाभइति॥ मोकूं अभीष्ट लाभ अवश्य होयगो एसो प्रश्नकरे तो तारा सुख देवे वामा होय तो नही करे और या कार्यमें मोकूं लाभ नहीं है एसो प्रश्नकरे तो वामा लाभ देवे और अनुलोमा नहीं देवे ॥३७८॥ वामस्वरेति॥ वामस्वरा दक्षिणमें गमन करे अपने पुरुषकर युक्त होय तो पुरुषकूं प्यारे जननकर संयोग करावे और दक्षिणस्वरावामा होय तो निजजननको वियोग करावे॥ ३७९॥ ॥छ॥

स्याद्वाणिज्यंतारयाभूरिलाभंलाभाभावोवामयातन्नचस्यात् तारालब्ध्यैसेवयाद्रव्यलिप्सोर्वामाश्यामानिष्फलांवक्तिसेवां ३८० वामारवाशोभनचेष्टिताचकरोतिताराभिमतार्थलाभं दुश्चेष्टितादक्षिपानादिनीचवामाचकामान्विनिहंतिसर्वान् ८१ श्यामानुकूल्यायपरस्परस्यप्रदक्षिणांस्वामिसहाययोः स्यात् तयोश्चभिन्नेहृदिशंक्यमानेभेदायतारानपुनर्वितारा ३८२

॥ टीका ॥

स्यादिति वाणिज्यप्रश्नेतारयाभूरिलाभं वाणिज्यंस्यात् वामया तन्नलाभाभावः स्यात् सेवाप्रश्ने सेवयाद्रव्यलिप्सोः पुंसः तारालब्ध्यै स्यात् वामाश्यामा निष्फलांसेवांवक्ति ३८० वामारवेति वामारवा शोभनचेष्टितावा नारा अभिमतार्थसिद्धिंकरोति दुश्चेष्टितादक्षिणनादिनीवा वामा सर्वान्कामान् विनिहंति ३८१ श्यामेति परस्परेणप्रदक्षिणाश्यामा स्वामिसहाययोरानुकूल्यायभवति तयोः स्वामिसहाययोः हृ

॥ भाषा ॥

॥ स्यादिति ॥ जो वाणिज्यको प्रश्न होय ओंर पोदकी तारा होय तो बोहोत लाभपूर्वक वाणिज्य होय जो वामा होय तो लाभको अभाव होय जो सेवाके प्रश्नमें सेवा करकें द्रव्यकी वांछावान्पुरुषकूं तारा होय तो लाभ करे जो वामा होय तो सेवा निष्फल होय ॥ ३८० ॥ वामारवेति ॥ वामारवा होय ओर सुंदर चेष्टा करती होय वा तारा होय तो वांछित अर्थकी सिद्धी होय ओर दुष्टचेष्टा करती होय दक्षिणमाऊं शब्द करती होय वा वामा होय तो संपूर्ण कामनकूं नाश करे ॥ ३८१ ॥ श्यामेति ॥ श्यामा परस्पर दक्षिणा होय तो स्वामी ओर सहायी दोनोनके अनुकूलके अर्थ होय ओर स्वामी सहायीके मनमें भेदकी शंका होय जो श्यामा तारा होय

प्रदक्षिणायांपरचक्रमुग्रमायातिनायाति तदुद्धृतायां
स्याद्दक्षिणायामपि सुस्वरायांवार्त्तैवनत्वागमनंरिपूपाम् ८३ ताराभवेत्तोरणसन्निधानेनिवर्त्तनेवा
मगतिस्ततश्च श्यामायदिस्यात्पुनरेवतारास्तोकं
तदागत्यनिवर्त्ततेऽरिः ८४ द्विषद्भयेसत्यरिनाशमाह विरुद्धचेष्टास्थितियानशब्दैः त्रासंचसर्वं
द्विषदागमोत्थंधनुर्द्धरीहंतिधनुर्द्धरीव ८५

॥ टीका ॥

दिभिन्नेशंक्यमाने ताराभेदायभवति पुनर्वितारा अभेदायस्यादित्यर्थः ३८२ प्रदक्षिणायामिति परचक्रागमनपृच्छायांउग्रंपरचक्रं प्रदक्षिणायां आयाति उद्धृतायां पुनः नायाति सुस्वरायांदक्षिणायामपि वार्त्तैव स्यात् रिपूणांनत्वागमनं ३८३ तारेति रिपुनिवर्त्तनपृच्छायां तोरणसन्निधाने तारास्यात्ततश्चनिवर्त्तने वामगतिः यदिपुनरेवतारास्यात्तदा स्तोकं मार्गमागत्य रिपुः निवर्त्तते ३८४ द्विषद्भयइति द्विषद्भयेसति विरुद्धचेष्टास्थितिवामशब्दैः पोतकी अरिनाशमाह द्विषदागमोत्थं सर्वं-

॥ भाषा ॥

तो भेद जाननो जो वितारा होय तो अभेद जाननो ॥३८२॥ प्रदक्षिणायामिति ॥ शत्रूनके चक्रके आगमनमें प्रश्न होय और जो श्यामा प्रदक्षिणा आयजाय तो उग्रशत्रून की सेनाको आगमन कहनो और जो उद्धृता होय तो फिर नहीं आवेगी ऐसो कहनो और सुंदरस्वर करती होय औरदक्षिणावी होय तोवी कोरी वार्ताही जाननी और शत्रूनको आगमन नहीं होय ॥३८३॥ तारेति ॥ वैरीके निवृत्त होयवेके प्रश्नमें श्यामा तोरणके पास तारा होय फिर वगदनि विरियां वामगति होय फिर तारा होयजाय तो वैरी मार्गमें आयकरकें पीछो वगद जाय ॥ ३८४॥ द्विषत्भयइति ॥ वैरीनके भयके प्रश्नमें श्यामा विरुद्धचेष्टा करे विरुद्धस्थानमें होय वाम शब्द करै -

कृत्वास्वरंयद्यपसव्यभागेसव्यंचगत्वाश्रयतिप्रदीप्तं
धनुर्द्धरीचौर्यसमुद्यतानांतत्तस्कराणांकुरुतेऽपकारं
८६ ग्रामादिघातोद्यमगोग्रहादिकार्येंतिकस्थेसति त
स्कराणां पूर्वोदितंसिद्धिविधायितस्मादन्यादृशंस्या
दऽसमीपगेतु ८७ अदक्षिणांदक्षिणतोरटंतींपृष्ठेच
तारांशकुनेकदेवीं विपश्चितश्चौरहृतेगवादौप्रत्या
गमायप्रतिपादयंति ८८

॥ टीका ॥

आसंपूर्वोक्तचेष्टादिभिः धनुर्द्धरीवहंति ३८५ कृत्वेति यदि अपसव्यभागे स्वरंकृत्वा सव्यंचभागंगत्वा प्रदीप्तमाश्रयति एवंविधाधनुर्द्धरी चौर्यसमुद्यतानांतस्कराणामपकारंकुरुते ३८६ ग्रामादिति ग्रामादिघातोद्यमगोग्रहादिकार्ये अंतिकस्थेसमीपस्थे सति तस्कराणां पूर्वोदितं सिद्धिविधायि भवति असमीपगेतु कार्ये अन्यादृशंसिद्धिविधायि स्यात् ३८७ अंदक्षिणमिति दक्षिणतोरटंती अदक्षिणांपृष्ठेच तारां शकुनेकदेवींचौरहृतेगवादौविपश्चितः प्रत्यागमायप्रतिपादयंति ३८८

॥ भाषा ॥

तो वैरीनको नाश करे ओर वैरीकी आयवेकी सुनके हुयो जो सब त्रास ताकूं नाश करे है ॥३८५॥ कृत्वेति ॥ जो जेमनें भागमें शब्दकरकें वामभागमें जायकरकें दीप्तस्थानमें स्थित होय तो चौरीमें उद्युक्त होयरहे तिन चौरनको अपकार करे ॥३८६॥ ग्रामादिति ॥ ग्रामादिक घात उद्यमगो शालादिक कार्यमें जो श्यामा पासमें स्थित होय तो चौरनकी सिद्धी करे ओर जो पास नहीं होय तो कार्यमें चोरविना ओरनकी सिद्धी करे ॥३८७॥ अदक्षिणामिति ॥ दक्षिणमें शब्द करती होय ओर वामा होय ओरपीठपीछें तारा होय तो चोर लेगयो होयगो कुं आदिले पसू तिनें पीछे आयवेके लिये कहनो ॥३८८॥

तत्कालनीतेषुगवादिकेषुक्षेमायलाभार्थमयात्रिकः
स्यात् भवेच्चकालांतरितेपहारे प्रस्थानशंसीशकुनः
शुभाय ८९ वामतः सृजतियावतः स्वरास्तावतोब
लवतोऽथतस्करान् दक्षिणाभगवतीतुयावतस्ताव
तस्त्वभिदधातिदुर्बलान् ३९० मार्गभ्रमेरण्यगतस्य
जातेधनुर्द्धरींपश्यतियेनयांतीं मार्गेणतेनानुसरेन्
मनुष्यः पंथानमासादयते पुरस्तात् ९१

॥ टीका ॥

तत्कालइति तत्कालनीतेषुगवादिकेषु क्षेमार्थं लाभार्थं च अयात्रिकः स्यात् च पुनरर्थे कालांतरितापहारे प्रस्थानशंसीशकुनः शुभायभवति ३८९ वामतइति भगवती यावतः स्वरान् वामतः सृजतिकरोति तावतोबलवतः तस्करान् अभिदधाति दक्षिणेन पुनः यावतः स्वरान् करोति तावतः दुर्बलान्तस्करानभिदधाति ३९० मार्गभ्रमइति अरण्यगतस्य पुंसः मार्गभ्रमेजातेसति पुमान् धनुर्द्धरीं यांतीं येन पथा पश्यति तेनपथा मनुष्यः अनुसरेत् गच्छेत् पुरस्तात् पंथानमासादयते ३९१

॥ भाषा ॥

॥तत्कालइति॥ जो चौर गवादिकनकूं तत्काल हर करकें ले गयो होय तो क्षेमके लियें लाभके लियें औरविना गयेविना आय जाय एसो कहनो और जो कालांतरमें हरण हुये होंय तो गयेतें आवे शकुन शुभ जाननो ॥३८९॥ वामतइति ॥ पोदकी जितने स्वर वामभागतें करे उतनेही चौर बलवान् कहे और दक्षिणभागमें जितनेस्वर करे तितनेही दुर्बल तस्कर कहे ॥३९०॥ मार्गभ्रमइति॥ वनमें गमन करे ताकूं जो मार्गमें भ्रम होय जाय तब धनुर्द्धरी जा मार्ग कर गमन करती दीखे ताही मार्गमें पीछें पीछें चेल्यो जाय तो अगाडी मार्ग मिलजाय ॥३९१॥

नायंचौरोनिश्चितंदेवदत्तः साधुःसिद्धिंलप्स्यतेचेति
पृष्टे कृत्वाशब्दंदक्षिणाब्रह्मपुत्रीयायाच्चेत्तद्दह्यते
सौनदिव्ये ९२ मुक्तारावायातिवामायदर्थंचौरस्य
स्याद्दिव्यश्शुद्धिर्नतस्य वामाहंतुंनीयमानस्यतस्य
श्यामासुन्त्येस्यात्तुतारावधाय ९३ आरवेटकार्थं
गमनेनृपाणामगोचरस्थेषुमृगेषुतारा वामांतिकस्थेषु
यदातदानींपतत्यऽवन्यांनशरप्रहारः ९४

॥ टीका ॥

नायमिति नायंचौरः निश्चितंदेवदत्तः साधुः शुद्धिंलप्स्यते चेति पृष्टे यदिशब्दं कृत्वा दक्षिणा ब्रह्मपुत्रीचेत् यायात् तदा सौ दिव्येन दह्यते ३९२ मुक्तारावेति यदर्थमिति चौरशुद्धिप्रश्ने यदि मुक्तारावा वामायाति तस्यचौरस्य दिव्यश्शुद्धिर्नस्यात् प्रश्नांतरे यदि हंतुं नीयमानस्य तस्य वामा श्यामासुन्त्येस्यात् तारापुनः वधायभवति ३९३ आरवेटकइति आरवेटकार्थं मृगयार्थं नृपाणां गमने अगोचरस्थेषु मृगेषु तारास्यात् यदा अंतिकस्थेषु मृगेषु वामास्यात् तदानीं अवन्यां शरप्रहारः न

॥ भाषा ॥

॥नायमिति॥ ये निश्चय चौर है वा साधु है एसो प्रश्न करे तव जो श्यामा शब्दकरकें दक्षिणा होय तो दिव्य शुद्ध जाननो ॥३९२॥ मुक्तारावेति॥ चौरकी शुद्धी प्रश्नमें जो शब्दकर वामा गमन करे तो ता चौरकी दिव्यशुद्धी नहीं जाननी ओर प्रश्नांतरमें जो काऊकूं मारवे ले जाते होंय ताके श्यामा वामा आय जाय तो वो आवश्यक छूटजाय ओर जो श्यामा तारा होय जाय तो वधके अर्थ जाननी॥ ॥३९३॥ आरवेटकार्थमिति॥ सिकारके लियें राजा गमन करे ओर मृग तो नहीं दीखते होंय ओर श्यामा तारा होय ओर जो समीप मृग होंय ओर श्यामा वामा होय तो पृथ्वीमें बाणनको प्रहार नहीं पडै ॥३९४॥ ॥छ॥

वामरवासमुपैत्यपसव्यं पांडविकायदितत्प्रविविक्षोः स्युर्वधबन्धनशोकरुगार्त्तिद्रव्यविनाशमृतिप्रभृतीनि ९५ सव्यमुपैति रटत्यपसव्ये पांडविकायदिशोभनचेष्टा ग्रामपुरस्वगृहं प्रविविक्षुर्नृत्यतु पथिकस्तत्कृतकृत्यः ९६ एकोद्धृतास्याच्छुभदाप्रवेशेभवेद्द्वितीयातु धनर्द्धिकर्त्री साचेत्तृतीयाशुभकर्मपाका दुर्गातदायच्छति भूपतित्वम् ९७

॥ टीका ॥

पतति ३९४ वामरवेति यदिवामरवा अपसव्यंदक्षिणं समुपैति तत्प्रविविक्षोः वधबंधनशोकरोगार्ति द्रव्यविनाशमृति प्रभृतीनि स्युः ३९५ सव्यमिति यदिशोभनचेष्टा पांडविका अपसव्ये दक्षिणे रटति सव्यमुपैति तदाग्रामपुरः स्वगृहं प्रविविक्षुः कृतकृत्यः पथिकः नृत्यतु ३९६ एकेति एकोद्धृता प्रवेशे शुभदास्यात् तु पुनः द्वितीया धनर्द्धिकर्त्रीस्यात् यदि शुभकर्मपाका तृतीयास्यात् तदा भूपतित्वं यच्छति ३९७

॥ भाषा ॥

॥ वामरवेति ॥ जो श्यामा वामरवा होय जेमनं भाग आय जाय तो प्रवेशकरवेवालेकूं वध बंधन शोक रोष रोगार्ति द्रव्यको नाश मृत्यू इनकूं आदि ले सब होय ॥ ३९५ ॥ सव्यमिति ॥ जो श्यामा शुभचेष्टा करती होय और दक्षिणमें शब्द करत वामभागमें आय जाय तो ग्रामपुर अपनो घर इनमें प्रवेश करे वो पुरुष कृतकृत्य होय नृत्य करे ॥ ३९६ ॥ एकेति ॥ जो प्रवेशमें श्यामा एकानाम पहली उद्धृता होय तो शुभकी देवेवाली होय फिर द्वितीया उद्धृता होय तो धनऋद्धीकी करवेवाली होय और जो शुभकर्मके फलनें तृतीयाकी उद्धृता होय तो पृथिवीपतीपनो देवे ॥ ३९७ ॥

यावासित्वादक्षिणेनप्रयातिश्यामाशांतंस्थानमासेव
तेच योगक्षेमंकर्त्तुमिच्छन् मनुष्यः शीघ्रंतस्यामी-
श्वरंसंश्रयेत ९८ विद्यातडागालयधातुवादविवा
दवश्यांजनखन्यवादान् प्रस्थाननिक्षेपनिधानमं
त्रद्यूतादिकान् साधयतेनुलोमा ९९ प्रश्ननिश्च-
यकृतः पुरुषायेप्राप्नुवंतिशकुनस्यफलंते प्रष्टुमेव
नवदन्तिपुनर्येतेफलंनशकुनस्यलभंते ४००

॥ टीका ॥

यावासित्वेति याश्यामा वासित्वा दक्षिणेनप्रयाति शांतंस्थानं वा सेवते योगक्षेममिति अप्राप्तस्य प्राप्तिः योगः प्राप्तस्य परिपालनं क्षेमः तं कर्त्तुमिच्छन् मनुष्यः शीघ्रंतस्यांगतौसत्यां ईश्वरं संश्रयेत ईश्वरस्मरणं कुर्यादित्यर्थः ३९८ विद्येति विद्यातडागालयधातुवाद विवादवश्यांजनखन्यवादान् प्रस्थाननिक्षेपनिधानमंत्रद्यूतादिकान् पदार्थान् अनुलोमा साधयते ३९९ प्रश्नइति अन्वयसुखेन व्यतिरेकसुखेन वा प्रश्नः कार्यः नत्वेककालमन्वयव्यतिरेकाभ्यामिति ये प्रश्ननिश्चयकृतः पुरुषास्ते शकुनस्यफलं प्राप्नुवंति ये प्रष्टुमेव न विंदति तेशकुनस्यफलंनलभंते ४००

॥ भाषा ॥

॥ यावासित्वेति ॥ जो श्यामा निवास करकें दक्षिण होयकर चलीजाय वा शांतस्थान में सेवन करै तो अप्राप्तवस्तुकी प्राप्ति ओर प्राप्तवस्तूकी पालन करनो इनदोनोनकी इच्छा करवेवाला पुरुष शीघ्रही ईश्वरको स्मरण करे ॥ ३९८ ॥ विद्येति ॥ विद्यातलाव स्थान धातुवाद विवाद वश्य अंजन पृथ्वीखोदनोवाद प्रस्थान निक्षेप निधानमंत्र द्यूत इनकूं आदिलेकर पदार्थ तिनें श्यामा अनुलोमा होय तो साधन करे ॥ ३९९ ॥ प्रश्नइति ॥ प्रश्नकरकें निश्चय करेंहें जे पुरुष तेशकुनको फलप्राप्त होंयहें जो नहीं प्रश्न करकें निश्चय करेंहें ते शकुनको फल नहीं प्राप्त होंयहें ॥ ४०० ॥

वैराग्यकष्टाश्रयणेनतादृक् त्रैकालबोधायभवेन्नयोगः यदृच्छयाभोगभुजांसुखेनयादृक्नराणांशकुनाभियोगः १ अभ्यूह्यसर्वंशकुनंविपश्चित् तदन्वयाच्चव्यतिरेकतश्च अतींद्रियोयः परिनिश्चिनोति सस्वर्णपुष्पांविचिनोतिपृथ्वीं ४०२

इतिवसंतराजशाकुने पोदकीरुते सुखादिप्रकरणं विंशतितमम् समाप्तम् २० ॥छ॥

॥ टीका ॥

वैराग्यइति वैराग्यकष्टाश्रयणेन तादृक् त्रैकालबोधाय नभवेत् यादृक् यदृच्छयाभोगभुजांनराणां शकुनाभियोगः त्रैकाल बोधाय स्यात् ४०१ अभ्यूह्येति सर्वशकुनमभ्यूह्य अतींद्रियोयो दिव्यचक्षुः विपश्चित् तदन्वयात् व्यतिरेकतश्चकार्यं परिनिश्चिनोति स स्वर्णपुष्पां पृथिवीं चिनोति ४०२ इति शत्रुंजय करमोचनादि सुकृतकारि महोपाध्यायश्रीभानुचंद्रविरचितायां वसन्तराजटीकायाम् पोदकीरुते सुखादिप्रकरणं विंशतितमम् समाप्तम् २० ॥छ॥ ॥छ॥

॥ भाषा ॥

॥वैराग्यइति॥ वैराग्य करकें कष्टपायपाय करकें भूत भविष्यवर्तमानको ज्ञान नहीं होंय हें यदृच्छाकरकें भोगभोगेंहें तिन मनुष्यनकूं शकुन योग त्रैकालिकज्ञानके जानवेके लियेंहें ॥४०१॥ अभ्यूह्येति॥ जा संपूर्ण शकुननकूं जानकरकें दिव्यचक्षू होंय सर्वकार्यकूं निश्चय करेंहें वो विद्वान् पुरुष शकुननके प्रभावसूं स्वर्णके पुष्प जामें एसी पृथ्वीकूं ढूंड ले ॥४०२॥ ॥ इतिश्रीवसंतराजशाकुनेभाषाटीकायां पोदकीरुते सुखादि प्रकरणं विंशतितमं समाप्तं॥२०॥

॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

प्रतिप्रकरणंवृत्तसंख्येदानीमुदीर्यते सर्वप्रकरणानांच प्रोच्यंतेक्रमतोऽभिधाः १ वृत्तद्वात्रिंशतापूर्वमधिवासनसंज्ञकम् द्वितीयंशांतदीप्ताख्यंवृत्तैः षोडशभिः स्मृतं २ स्यात्पंचदशभिर्वृत्तैस्तृतीयंचस्वराभिधम् चतुर्थेशुभचेष्टाख्ये वृत्तान्युक्तानिषोडश ३ वृत्तान्यशुभचेष्टाख्येपंचमेपंचविंशतिः गतिप्रकरणंषष्ठंपंचविंशतिवृत्तकम् ४ ॥ छ ॥

॥ टीका ॥

प्रतिप्रकरणमिति इदानींप्रतिप्रकरणंवृत्तसंख्या उदीर्यते तथा सर्वप्रकरणानां क्रमतः अभिधाः प्रोच्यंते १ वृत्तेति आद्यमधिवासनसंज्ञं प्रकरणं वृत्तद्वात्रिंशतास्यात् द्वितीयंशांतदीप्ताख्यं षोडशभिः वृत्तैः स्मृतं २ स्यादिति तृतीयेस्वराभिधंपंचदशभिः वृत्तैः स्यात् शुभचेष्टाख्ये चतुर्थेप्रकरणेषोडशवृत्तान्युक्तानि ३ वृत्तानीति अशुभचेष्टाख्ये पंचमे प्रकरणे पंचविंशतिर्वृत्तानिस्युः गतिप्रकरणं षष्ठं पंचविंशतिवृत्तकं भवति ४ ॥ छ ॥

॥ भाषा ॥

॥ प्रतिप्रकरणमिति ॥ या सप्तमवर्गमें जे बीस प्रकरण तिनके नाम और प्रकरण प्रकरणके श्लोकनकी संख्या अब कहैंहैं ॥ १ ॥ वृत्तेति ॥ प्रथम अधिवासननाम प्रकरण यामें बत्तीस श्लोक हैं दूसरो शांतदीप्तनाम प्रकरण तामें सोलह श्लोक कहे हैं ॥ २ ॥ स्यादिति ॥ तीसरो स्वरनाम प्रकरण तामें पंद्रह श्लोक हैं चोथो शुभचेष्टानाम तामें सोलह श्लोक हैं ॥ ३ ॥ वृत्तानीति ॥ अशुभचेष्टानाम पंचमप्रकरण तामें पच्चीस श्लोक हैं छठो गतिप्रकरण तामें पच्चीस श्लोक हैं ॥ ४ ॥

उक्तायात्राप्रवेशादौसप्तमेचद्विसप्ततिः उक्तानिहंसचा-
रारव्येवृत्तानिद्वादशाष्टमे ५ राज्याभिषेकसंज्ञेष्टौवृत्तानि
नवमेतथा दशमेविंशतिःषट्कंसंधिविग्रहनामके ६
एकादशेविवाहारव्येप्रोक्तात्र्यधिकविंशतिः ७ गर्भप्र
करणेप्रोक्ताद्वादशेवृत्तविंशतिः ७ गमनागमनाख्या
नेत्वेकादशत्रयोदशे दशपंचचवृत्तानियात्रासंज्ञेचतु
र्दशे ८ वृत्तानिसत्यसत्यारव्येनवपंचदशेतथा वृ-
ष्टिप्रकरणेविंशात्यथद्वौषोडशेपुनः ९

॥ टीका ॥

उक्तेति यात्राप्रवेशादौ सप्तमं द्विसप्ततिः वृत्तानां उक्ता अष्टमे हंसचारारव्ये द्वादशवृत्तानिउक्तानि ५ राज्याइति राज्याभिषेकसंज्ञारव्येनवमे अष्टौ वृत्तानिस्युः संधिविग्रहनामनि दशमे प्रकरणे विंशतिः षट्चवृत्तानिस्युः ६ एकेति एकादशे विवाहारव्ये वृत्तानां त्र्यधिक विंशतिःप्रोक्ता द्वादशेगर्भप्रकरणेवृत्तविंशतिर्भवति ७ गमनइति गमनागमनारव्ये त्रयोदशेप्रकरणे एकादशवृत्तानिस्युः यात्रासंज्ञेचतुर्दशेप्रकरणे दशपंच वृत्तानिस्युः ८ वृत्तानीति सत्यसत्यारव्ये

॥ भाषा ॥

॥ उक्तेति ॥ सातमो यात्राप्रवेशादि प्रकरण तामें वारह श्लोक हैं ॥५॥ राज्याइति ॥ नोमो राज्याभिषेक नाम विवाह प्रकरण तामें आठ श्लोक हैं दशमो विग्रहनाम तामें छबीस श्लोक हैं ॥६॥ एकादशइति ग्यारमो प्रकरण तामें तेईस श्लोक हैं वारमो गर्भ प्रकरण तामें बीस श्लोक हैं ॥७॥ गमनेति ॥ तेरवों गमनाऽऽगमन प्रकरण तामें ग्यारह श्लोक हैं चोधवों यात्रा संज्ञा नाम तामें पंद्रह श्लोक हैं ॥८॥ वृत्तानीति ॥ पंद्रमो सत्यसत्याऽऽरव्यनाम प्रकरण तामें नो श्लोक हैं सोलवो वृष्टिप्रकरण तामें वाईस श्लोक हैं ॥९॥ ॥७॥

चैकादश सप्तदशेधान्यनिष्पत्तिनामनि अर्घप्रकरणेसप्तवृत्तान्यष्टादशेतथा १० वृत्तान्येऽकोनविंशेतु सप्तजीवितसंज्ञके स्युर्विंशतितमेत्वष्टाविंशतिश्चसुखाभिधे ११ एवंप्रकरणानीह विंशतिः पोदकीरुते शतान्येषुचचत्वारि वृत्तानांसर्वसंख्यया १२ इतिवसंतराजशाकुने पोदकीरुते सप्तमो वर्गः ॥७॥ ॥छ॥ ॥छ॥

॥ टीका ॥

पंचदशेनववृत्तानि तथा षोडशे वृष्टिसंज्ञे वृत्तानांद्वाविंशतिः स्यात् ९ चैकादशइति धान्यनिष्पत्तिसंज्ञे सप्तदशेचैकादशवृत्तानिस्युः तथा-अर्घाख्यके अष्टादशेसप्तवृत्तानि विदुः बुधाइतिशेषः १० वृत्तानीति जीवितसंज्ञके एकोनविंशे सप्तवृत्तानिस्युः शुभाभिधेविंशतितमे अष्टाविंशतिश्चवृत्तानिस्युः ११ एवमिति एवंपूर्वोक्तप्रकारेण इहास्मिन्पोतकीरुते विंशतिः प्रकरणानि भवंति एषु संख्यया वृत्तानांचत्वारिशतानि भवंति १२ वसंतराजइति इतिसमासोवसंतराजशाकुने इहपोतकीविचारिता अन्यानिविशेषणानिपूर्ववत् १३ इतिशत्रुंजयकरमोचनादिसुकृतकारि महोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायां वसंतराजटीकायां-पोतकीरुतेसप्तमोवर्गः ७ ॥छ॥ ॥छ॥

॥ भाषा ॥

॥चैकादशेति॥ सत्रमो धान्यनिष्पत्तिनाम प्रकरण तामें ग्यारह श्लोक हें ओर अठारमो अर्घप्रकरण तामें सात श्लोक हें ॥१०॥ वृत्तानीति॥ उन्नीसमो जीवितसंज्ञानाम प्रकरण तामें सात वृत्त हें ओर बीसमो सुखादि प्रकरण तामें अठ्ठाईस श्लोक हें ॥११॥ एवमिति॥ या पोदकीरुतमें बीस प्रकरण हें इनमें समग्र संख्या करकें चारसें श्लोक हें ॥ ॥१२॥ इति श्रीवसंतराजशाकुने भाषाटीकायां वृत्तप्रकरणं ॥ इति सप्तमो वर्गः समाप्तः

बहिर्गृहेवाथकृतस्थितीनांपुंसांयदाख्यातिफलंवराही दिक्कालमानादुपशांतदीप्तानिगद्यतेतत्प्रकटं समस्तम् १ चिलिचिलिरितिशांतः शूलिश्शूलिर्निनादश्चिकुचिकुरितिशब्दः कूचिकूचिस्तदर्थस् चिरिचिरिरितिदीप्तश्चीकुचीकुश्चचींचींचिलिकुरितिविरावस्तादृशाः कृष्णिकायाः २ कीलिकीलिस्तथा नादः कीतुकीतुरितिस्वरः प्रदीप्तोदीप्तसंयोगात् शांतः शांतः प्रसंगतः ३

॥ टीका ॥

बहिरिति यद्वराही बहिर्वाथगृहेकृतस्थितीनांपुंसां फलमाख्याति तत् दिक्कालमानादुपशांतदीप्तात्समस्तं प्रकटं निगद्यते १ चिलीति कृष्णिकायाः चिलिचिलिरितिशब्दः शांतः शूलिश्शूलिरिति निनादः चिकुचिकुरितिशब्दः कूचिकूचिरितिशब्दस्तदर्थः नामशांतः स्युः चिरिचिरिरितिशब्दः दीप्तोभवति च पुनश्चीकुचीकु चीचीचिलिकुरिति विरावास्तादृशाःनामतोदीप्ताः स्युः २ कीलिरिति कीलिकीलिरिति नाद स्तथा कीतुकीतुरितिस्वरः दीप्तसंयोगात् प्रदीप्तोभवति शांतः प्रसंगतः शान्तोभवति ३

॥ भाषा ॥

॥बहिरिति॥ बहार स्थित होंय वा घरमें स्थित होंय उनपुरुषनकूं वराही जो फल कहैहै सो दिशा कालके प्रमाणसूं हुये जो शांत दीप्त तिनें समस्त प्रकट कहेंहें ॥१ ॥चिलीति॥ कृष्णिकाके चिलिचिलिः शूलिश्शूलिः चिकुचिकुः कूचिकूचिः ये शब्द शांत हें ओर चिरिचिरिः चीकुचीकुः चीची चिलिकुः ये शब्द दीप्त हैं ॥२॥ ॥ ॥कीलिकीलिरिति॥ कीलिकीलिः ये नाद ओर कीतुकीतु ये स्वर दीप्तदिशादिकनके संयोगतें प्रदीप्तहोंयहें ओर शांतके प्रसंगतें शांत होंय हें ॥३॥

पूर्वस्यांप्रथमेयामेदुर्गाशांताभयप्रदा दीप्तातुमरणंकुर्यादित्युक्तंपूर्वसूरिभिः ४ द्वितीयेप्रहरेप्राच्यांशांतालाभप्रदामता प्रदीप्तस्वरसंयुक्तादुर्गास्वस्यार्थकारिणी ५ तृतीयप्रहरेप्राच्यांशांतासर्वार्थदायिनी दीप्तस्वरापुनःकुर्याद्दुर्गाहीनफलंनृणां ६ चतुर्थप्रहरेदुर्गाशांतापूर्वदिगाश्रिता निश्चौरत्वंसमाख्यातिदीप्तातस्करतोभयम् ७

॥ टीका ॥

पूर्वस्यामिति पूर्वस्यांदिशिदुर्गाप्रथमेयामे शांताभयप्रदाभवति तु पुनः दीप्तामरणं कुर्यादिति पूर्वसूरिभिः उक्तं ४ द्वितीयेति दुर्गाप्राच्यांदिशि द्वितीयप्रहरे शांतालाभप्रदामता प्रदीप्तस्वरसंयुक्तासती दुर्गास्वस्यार्थकारिणीभवति ५ तृतीयेति प्राच्यांदिशि तृतीयेप्रहरे शांतासर्वार्थदायिनीभवति पुनः दीप्तस्वरादुर्गानृणांहीनफलं कुर्यात् ६ चतुर्थेति दुर्गाचतुर्थप्रहरे पूर्वदिगाश्रितासती निश्चौरत्वंसमाख्याति दीप्तातस्करतोभयंकरोति ७ ॥छ॥ ॥छ॥

॥ भाषा ॥

॥ पूर्वस्यामिति ॥ जो दुर्गा प्रथमप्रहरमें पूर्वदिशामें शांता होय तो भयकी देवेवारी होय जो दीप्त होय तो मरण करै ये पूर्व कवीनको वाक्य हे ॥४॥ द्वितीयेति जो दूसरे प्रहरमें दुर्गा पूर्व दिशामें शांता होय तो लाभ देवै और दीप्तस्वरकरकें संयुक्त होय तो आपके अर्थकी करवेवाली होय ॥५॥ तृतीयेति॥ दुर्गा तीसरे प्रहरमें पूर्व दिशामें शांता होय तो सर्व अर्थकी देवेवारी होय और जो दीप्तस्वरा होय तो मनुष्यनकूं हीन फल करै ॥६॥ चतुर्थेति ॥ चोथे प्रहरमें दुर्गा पूर्व दिशामें स्थित होयकर शांता होय तो निश्चौरता करे जो दीप्ता होय तो चौरनें भय करै ॥७॥ ॥छ॥ ॥छ॥

आग्नेय्यांप्रथमेयामे शांतास्वल्पाग्निभीतिदा दीतस्वरात्तुयाद्दुर्गारिपुणादह्यतेपुरम् ८ द्वितीयप्रहरेशांताकुर्यादग्निपरिक्षयं दुर्गादीप्तस्वरामृत्युंकरोत्यग्निदिशाश्रिता ९ तृतीयप्रहरेशांताधनवानेति बांधवः दुर्गाप्रदीप्ताचाग्नेय्यांमित्रमायातियाचकं १० चतुर्थप्रहरेशांताचाख्यातिसुहृदागमं दीप्ता पांडविकानृणामग्निस्थाव्याधितोभयम् ११

॥ टीका ॥

आग्नेय्यामिति आग्नेय्यांदिशि प्रथमेयामेदुर्गाशांतासती स्वल्पाग्निभीतिदाभवति तु पुनः दीप्तस्वरा यादुर्गा सारिपुणापुरं दह्यते ८ द्वितीयेति द्वितीयप्रहरे यदि अग्निदिशाश्रितासती दुर्गाशांता भवति तर्हि अग्निपरिक्षयं कुर्यात् यदि दीप्तस्वराभवति तर्हि मृत्युं करोति ९ तृतीयेति तृतीयप्रहरे यदा दुर्गा आग्नेय्यांदिशि शांताभवति तदा बांधवः धनवानेति प्रदीप्तासति याचकं मित्रमायाति १० चतुर्थेति चतुर्थप्रहरे पांडविका अग्निस्थासति शांताभवति तदासुहृदागममाख्याति च पुनः प्रदीप्ता दुर्गानृणांव्याधितोभयं करोति ११ ॥छ॥

॥ भाषा ॥

॥ आग्नेय्यामिति प्रथम प्रहरमें अग्निकोणमें दुर्गाशांता होय तो अल्पाग्निकरकें भय देवै जो दीप्तस्वरा होय तो वैरीकरकें पुरजर जाय ॥८॥ द्वितीयेति ॥ दूसरे प्रहरमें दुर्गा अग्निदिशामें शांता होय तो अग्नीको क्षय करे जो दीप्तस्वरा होय तो मृत्यु करे ॥ ९॥ तृतीयेति ॥ तीसरे प्रहरमें अग्निदिशामें शांता होय तो धनवान् बांधव आवै और प्रदीप्ता होय तो मित्र याचना करवे आवे ॥१०॥ चतुर्थेति ॥ चोथे प्रहरमें अग्निकोणमें स्थित पांडविका शांता होय तो सुहृदजननको आगमन कहे हे और दीप्ता होय तो मनुष्यनकूं व्याधीनें भय करै ॥११॥

प्रातर्याम्यासुमाशांताप्रथमप्रहरेनृणाम् लाभं
कुर्यात्प्रदीप्ताचध्रुवंशंसातिगोगृहंम् १२ द्वितीयप्रहरेशांतारुजंजल्पातिपांडवी प्रदीप्तध्वनिनाऽवाच्यांमृत्युंवाथधनक्षयम् १३ राजप्रासादमाख्यातिशांतायामेतृतीयके दीप्तस्वरेषुदुर्गायाभूपतिर्याचतेधनं १४ शांताकांचनरत्नानिप्रदत्तेदक्षिणाश्रिता चतुर्थेप्रहरेदीप्तास्वजनैरल्पकंकलिम् १५

॥ टीका ॥

प्रातरिति याम्यांदिशिउमा पांडविका प्रथमप्रहरे शांताचेद्भवति तदा नृणां लाभंकुर्याच्चपुनः प्रदीप्तासती गोगृहंध्रुवं शंसाति १२ द्वितीयेति पांडवी द्वितीयप्रहरेऽवाच्यांदक्षिणस्यां शांतास्यात् तदारुजंजल्पति प्रदीप्तध्वनिना मृत्युंवाथ धनक्षयं करोति १३ राजेति तृतीयके यामे दक्षिणस्यां दिशि शांतादुर्गाराजप्रसादं राजगृहमाख्याति कथयति दुर्गायाः दीप्तस्वरेषु सत्सु भूपतिः धनंयाचते १४ शांताइति चतुर्थेप्रहरेदक्षिणाश्रिताशांतापोदकी कांचनरत्नानि प्रदत्ते दीप्तास्यात् स्वजनैरल्पकं कलिं करोति १५

॥ भाषा ॥

॥प्रातरिति॥ प्रातः काल प्रथम प्रहरमें पांडविका दक्षिण दिशामें शांता होय तो मनुष्यनकूं लाभ करे प्रदीप्ता होय तो निश्चय गोगृह करे ॥१२॥ द्वितीयेति॥ दूसरे प्रहरमें दक्षिणदिशामें पांडवी शांता होय तो रोग करै प्रदीप्तध्वनीकरकें मृत्यु वा धनको क्षय करै ॥१३॥ राजेति ॥ तीसरे प्रहरमें दक्षिणदिशामें दुर्गाशांता होय तो राजगृहकी प्राप्ती करे ओर दुर्गाके प्रदीप्तस्वर होंय तो राजा धनकी याचना करे॥१४॥ ॥शांताइति॥ चोथे प्रहरमें दक्षिणदिशामें शांता दुर्गा होय तो सुवर्ण रत्न देवे ओर

पथिकःपीडितोऽभ्येति प्रातःशांतकरैःस्वरैः दीप्त-
स्वरैस्तुनैर्ऋत्येकुर्यात्तस्यैवपंचतां १६ द्वितीयप्रह
रेशांताचौराणांभयमादिशेत् दुर्गाहानिकरीदीप्ता
दुर्गारक्षोदिगाश्रिता १७ शांतातृतीययामेतुरोगभी
तिप्रवर्द्धिनी चिरंसंस्थायिनंरोगंदुर्गावदतिसुस्वरा
१८ चतुर्थप्रहरेशांताचिरंवियुक्तसंगमम् दीप्त
स्वरापुनर्ब्रूतेवार्त्तामक्षेमकारिणीम् १९

॥ टीका ॥

पथिकेति प्रातः प्रथमप्रहरे नैर्ऋत्ये दुर्गा शांतकरैः स्वरैः पथिकः पीडितोऽभ्येति आगच्छति तुपुनः दीप्तस्वरैस्तस्यैवपथिकस्यैव पंचतां मृत्युं कुर्यात् १६ द्वितीयेति द्वितीयप्रहरे रक्षोदिगाश्रिता शांता दुर्गा चौराणां भयमादिशेत् नैर्ऋत्ये दीप्ता दुर्गा हानिकरीभवति १७ शांतेति तृतीययामे नैर्ऋत्ये शांता दुर्गा रोगभीति प्रवर्द्धिनीभवति तु पुनः सुस्वरा दीप्ता दुर्गा चिरं चिरकालपर्यंतं संस्थायिनं रोगं वदति १८ चतुर्थेति चतुर्थप्रहरे नैर्ऋत्यकोणे शांता पोदकी चिरं चिरकालेन वियुक्तसंगमं करोति वियुक्तस्य पुरुषस्य संगममित्यर्थः पुनः दीप्तस्वरा पोदकी अक्षेमकारिणीं

॥ भाषा ॥

दीप्ता होयतो स्वजननकरकें अल्पकलह करावे ॥१५॥ पथिकेति ॥ प्रथमप्रहरमें नैर्ऋत्यकोणमें दुर्गा शांतस्वर करै तो मार्गी पीडायमान होय घर आवे और दीप्तस्वर करती होय तो ता मार्गीकी मृत्यू करै ॥१६॥ द्वितीयेति ॥ दूसरे प्रहरमें नैर्ऋत्यमें शांता दुर्गा चौरनको भय करै और दीप्ता होय तो हानी करै ॥१७॥ शांतेति ॥ तीसरे प्रहरमें नैर्ऋत्यकोणमें शांता दुर्गा होय तो रोगभयइनकी वृद्धी करैं और दीप्तस्वरा होय तो चिरकाल तांई स्थिर रहै एसो रोग होय ॥१८॥ चतुर्थेति ॥ चोथे प्रहरमें पोदकी नैर्ऋत्यकोणमें शांता होय तो बोहोत कालसुं वियोग होयरह्यो होय ता पुरुषको समागम करावे फिर वोही-

दुर्गाशुभस्वराब्रूतेपश्चिमायांजलागमं प्रातर्दीप्त
स्वरान्नूनंनिवारयतिवारिदान् २० अर्थलाभाभवेद्यामे
द्वितीयेमधुरस्वरैः प्रदीप्तधूमितैरल्पंलाभं
जल्पतिपोदकी २१ तृतीयप्रहरेशांतावारुण्या
मायुधक्षितिं प्रदीप्तध्वनिसंयुक्तावराहीवक्तिपंचताम्
२२ तुरीयप्रहरेशांताप्रतीच्यांमंगलप्रदा
अशुभध्वनितादुर्गागृहहानिकरीमता २३

॥ टीका ॥

वार्त्तां ब्रूते १९ दुर्गेति प्रातः प्रथमप्रहरे पश्चिमायांदिशि शुभस्वराशांता
पोदकी जलागमं ब्रूते च पुनः दीप्तस्वरान्नूनं वारिदान् मेघान् निवारयति २०
अर्थेति द्वितीये यामे प्रहरे पश्चिमायां दिशि शांता पोतकी मधुरस्वरैरर्थलाभा
भवेत् प्रदीप्तासती प्रदीप्तधूमितैः स्वरैरल्पं लाभं जल्पति कथयतीत्यर्थः
२१ तृतीयेति वराही तृतीयप्रहरे वारुण्यांदिशि शांतास्यात्
तदा आयुधक्षितिं करोति आयुधानां क्षितिमित्यर्थः पुनः प्रदीप्ताचासौ
ध्वनिश्च प्रदीप्तध्वनिः प्रदीप्तध्वनिनासंयुक्ता प्रदीप्तध्वनिसंयुक्ता वराही
पंचतां मृत्युं वक्ति २२ तुरीयेति तुरीयप्रहरे प्रतीच्यां पश्चिमायां दिशि

॥ भाषा ॥

पोदकी दीप्तस्वरा होय तो अक्षेमकरवेवारी वार्त्ताकूं कहे ॥१९॥ दुर्गेति॥ जोदुर्गाप्रथमप्रहरमें
पश्चिमदिशामें शुभस्वरा होय तो जलको आगमन करै ओरदीप्तस्वरा होय तो मेघनकूं
निवारण करे ॥२०॥ अर्थेति॥ जो पोदकी द्वितीय प्रहरमें पश्चिमदिशामें शांता होय मधुरस्वरनकरकें
अर्थ लाभ करै फिर प्रदीप्ता होय ओर प्रदीप्त धूमित स्वरन करकें अल्पलाभ
करे ॥ २१ ॥ तृतीयेति ॥ तीसरे प्रहरमें पश्चिम दिशामें शांता होय तो आयुधनकी क्षिति
करै ओर फिर प्रदीप्तध्वनी करकें युक्त पोदकी होय तो मृत्यू करै ॥ २२ ॥ तुरीयेति ॥ चोथे
प्रहरमें पश्चिमदिशामें शांता दुर्गा मंगलकी देवेवारी है ओरदीप्तस्वरा होय तो घरकी

अत्यागमागमंब्रूतेवायव्येमधुरस्वरा प्रातर्दीप्तामृ
तस्यास्यवार्तांजल्पतिपांडवी २४ द्वितीयप्रहरेशां-
तावक्तिरामासमागमं प्रदीप्तध्वनितादुर्गावायव्यां
कलहंस्त्रिया २५ तृतीयप्रहरेशांताकन्यायाः कु
रुतेरुजं तस्याएवंभवेन्मृत्युर्मारुतेविकृतस्वरैः २६
चतुर्थप्रहरेशांतास्त्रियःपरनरार्थितां दीप्तापांडवि-
काब्रूतेपरपुंसासमागमम् २७ ॥ छ॥

॥ टीका ॥

शांतादुर्गामंगलप्रदाभवति अशुभध्वनितादीप्तस्वरादुर्गागृहहानिकरीमता
२३ अत्यागमागममिति प्रातः प्रथमप्रहरे वायव्यां मधुरस्वराशांतस्व-
रापांडविका अत्यागमागमंब्रूते दीप्तादीप्तस्वरा साअस्यमृतस्य वार्त्तांजल्पति
२४ द्वितीयेति द्वितीयप्रहरेवायव्यांदिशि शांतादुर्गारामासमागमं वक्ति प्र-
दीप्तध्वनिता प्रदीप्तस्वरा स्त्रियाकलहंवक्ति २५ तृतीयेति तृतीयप्रहरे
मारुते कोणे शांता पोदकी कन्यायाः रुजं रोगंकुरुते विकृतस्वरैः प्रदीप्त-
स्वरैः तस्याः कन्यायाः मृत्युर्भवेत् २६ चतुर्थेति चतुर्थप्रहरे वायव्य
कोणे पांडविका शांता भवति तदास्त्रियः परनरार्थिनां यांति यदि दीप्ता -

॥ भाषा ॥

हानि करवेवारी ॥२३॥ अत्येति॥ प्रथमप्रहरमें वायव्यकोणमें शांतस्वरा पांडविका
होय तो पुरुषको गमनागमन कहेहै ओर दीप्त स्वरा होय तो वाकूं मरेकी वार्ता कहे ॥
॥२४॥ द्वितीयेति ॥ दूसरे प्रहरमें वायव्य दिशामें दुर्गा शांता स्त्रीको समागम कहे ओर
प्रदीप्तस्वरा होय तो स्त्रीकरकें सहित कलह करावे ॥ २५॥ तृतीयेति॥ तृतीयप्रहरमें -
वायव्य कोणमें पोदकीशांता होय तो कन्याकूं रोग करे प्रदीप्तस्वर करकें ता कन्याकी
मृत्यू होय ॥ २६॥ चतुर्थेति॥ चतुर्थप्रहरमें वायव्य कोणमें पांडविका शांता होय तो
स्त्रीकूं परपुरुषकरकें प्रार्थना होय जो दीप्ताहोय तो परपुरुष करकें समागम होय ॥२७

सौम्यायांमधुरालापालाभंकथयतिप्रगे अर्थनाशंसमाख्यातिकुमारीपरुषस्वरा २८ द्वितीयप्रहरेशांतावस्त्रलाभकरीमता विरूपध्वनिनादुर्गावस्त्रनाशायकथ्यते २९ प्रधानलाभदाशांतातृतीयप्रहरेमता धनहानिकरीदीप्ताधनदस्यदिशिस्थिता ३० चतुर्थप्रहरेशांताकुरुतेभुजगाद्भयम् दुर्गादीप्तस्वराकुर्यात्सौम्यायांमरणंविषात् ३१

॥ टीका ॥

भवति तदा परपुंसासमागमं ब्रूते २७ सौम्यायामिति सौम्यायां उत्तरस्यांदिशिप्रगे प्रभाते प्रथमेप्रहरे कुमारी मधुरालापाभवति तदालाभं कथयति परुषस्वरा अर्थनाशं समाख्याति ॥२८ द्वितीयेति द्वितीयप्रहरे उत्तरस्यांदिशिशांतादुर्गावस्त्रलाभकरीमता विरूपध्वनिनादीप्तशब्देनवस्त्रनाशाय कथ्यते २९ प्रधानेति तृतीयप्रहरे धनदस्यदिशि स्थिताकुमारी यदाशांतास्यात् तदाप्रधानलाभदामता भवति दीप्तासती धनहानिकरीभवति ३० चतुर्थेति चतुर्थप्रहरेसौम्यायां दिशिशांतापोदकी भुजगात्सर्पाद्भयंकुरुते दीप्तस्वरादुर्गाविषात् मरणंकुर्यात् ३१

॥ भाषा ॥

॥ सौम्यायामिति ॥ उत्तरदिशामें प्रथमप्रहरमें कुमारी मधुर आलाप करती होय तो लाभ करे और कठोर शब्द करती होय तो अर्थको नाश करे ॥२८॥ द्वितीयेति ॥ दूसरे प्रहरमें उत्तरदिशामें दुर्गा शांता होय तो वस्त्रको लाभ करे दीप्तध्वनी करती होय तो वस्त्रके नाश के अर्थ जाननी ॥२९॥ प्रधानेति ॥ तृतीयप्रहरमें कुवेरकी दिशामें स्थित होयकर शांता होय तो पोदकी प्रधानलाभके देवेवारी जाननी और प्रदीप्ता होय तो धनकी हानी करे ॥३०॥ चतुर्थेति ॥ चोथे प्रहरमें उत्तरदिशामें पोदकी शांता होय तो सर्पतें भय करे और दीप्ता होय तो विषतें मरण करे॥३१॥

प्रातरीशानगाशांताभयवार्तांप्रजल्पति प्रदीप्तध्वनितादुर्गापरचक्रसमागमम् ३२ द्वितीयप्रहरे शांताकन्यालाभविधायिनी प्रदीप्ताकलहोद्वेगौ ब्रूतेशाकुनिकाध्रुवं ३३ तृतीयप्रहरेशांतादुर्गाय च्छतिकन्यकां दीप्ताकन्यापरिक्लेशंब्रूतेहरदिगाश्रिता ३४ शांतारोगभयंस्वल्पमीशानीवक्तिपोदकी दीप्तस्वरामहाव्याधिंचतुर्थप्रहरेनृणाम् ३५

॥ टीका ॥

प्रातरिति प्रातः प्रथमप्रहरे ईशानगाशांतापोदकीभयवार्त्तांप्रजल्पति प्रदीप्तध्वनिता दुर्गा परचक्रसमागमंकरोति ३२ द्वितीयेति द्वितीयप्रहरेईशानदिशिस्थिता शाकुनिकाशांता कन्यालाभविधायिनी भवति प्रदीप्ताचेत्कलहोद्वेगौध्रुवं ब्रूते ३३ तृतीयेति तृतीयप्रहरे हरदिगाश्रिता शांतादुर्गाकन्यकां यच्छति प्रदीप्तासती कन्यायाः परिक्लेशं ब्रूते ३४ शांतेति चतुर्थप्रहरे ईशानी ईशानकोणे स्थिताशांता पोदकी स्वल्पंरोगभयंवक्ति दीप्तस्वरानृणां महाव्याधिं करोति ३५

॥ भाषा ॥

॥प्रातरिति॥ प्रथम प्रहरमें ईशानदिशामें पोदकी शांता होय तो भयकी वार्त्ता करे ओर प्रदीप्त ध्वनी करती होय तो शत्रूनको समागम करे ॥३२॥ द्वितीयेति॥ दूसरे प्रहरमें ईशान दिशामें पोदकी शांता होय तो कन्याको लाभ करे जो प्रदीप्ता होय तो निश्चयही कलह उद्वेग करावै ॥३३॥ तृतीयेति ॥ तीसरे प्रहरमें ईशानदिशामें दुर्गा शांता होय तो कन्या प्राप्त करे ओर जो दीप्ता होय तो कन्याको क्लेश करे ॥३४॥ शांतेति॥ चोथे प्रहरमें ईशानदिशामें स्थित पोदकी शांता होय तो अल्परोगको भय कहे है दीप्तस्वरा होय तो मनुष्यनकूं महाव्याधी करे ॥३५॥

ब्रह्मप्रदेशगाशांताप्रथमप्रहरेनृणाम् लाभंकुर्यात्प्रदीप्ताचगृहस्यस्वामिनोरुजं ३६ द्वितीयप्रहरेशांताब्रह्मपुत्रीधनप्रदा प्रदीप्ताचविनाशायजायतेब्रह्मणिस्थिता ३७ तृतीयप्रहरेशांतालाभंकुर्यात्कुमारिका प्रदीप्तार्थपरिभ्रंशंब्रह्मस्थानेसमाश्रिता ३८ चतुर्थप्रहरेशांताचौरेभ्यःकुरुतेभयम्प्रदीप्ताराजभयंकुर्यात्पोदकीब्रह्मसंस्थिता ३९

इतिपोदकीरुतेभूपालमततथ्यादिकुप्रकरणम्

॥ टीका ॥

ब्रह्मेति प्रथमप्रहरे ब्रह्मप्रदेशगाशांता पोदकी नृपांलाभंकुर्यात् चपुनः प्रदीप्ताउग्रा गृहस्य स्वामिनोरुजंरोगं करोति ३६ द्वितीयेति द्वितीयप्रहरेब्रह्मणि आकाशे स्थिता ब्रह्मपुत्री शांतासती धनप्रदाभवति चपुनः प्रदीप्ताविनाशाय जायते ३७ तृतीयेति तृतीयप्रहरे ब्रह्मस्थाने आकाशे समाश्रिताशांता कुमारिका लाभंकुर्यात् प्रदीप्तास्यात् तदा अर्थ परिभ्रंशंकरोति ३८ चतुर्थेति चतुर्थप्रहरे ब्रह्मसंस्थिता आकाशेस्थिता पोदकीशांताचेत्तदा चौरेभ्यः भयंकुरुते दीप्तासती राजभयंकुर्यात् ३९ इति पोदकीरुते भूपालमततथ्यादिकुप्रकरणम् ॥छ॥

॥ भाषा ॥

॥ब्रह्मेति॥ प्रथम प्रहरमें आकाशमें स्थित पोदकी शांता होय तो लाभ करे प्रदीप्ता होय तो गृहके स्वामीकूं रोग करे ॥३६॥ द्वितीयेति॥ दूसरे प्रहरमें आकाशमें स्थित ब्रह्मपुत्री शांता होय तो धन देवै और प्रदीप्ता होय तो विनाशके अर्थ जाननी ॥३७॥ तृतीयेति तृतीय प्रहरमें आकाशमें स्थित कुमारी शांता होय तो लाभ करे प्रदीप्ता होय तो कार्यमें नाशकरे ॥३८॥ चतुर्थेति॥ चोथेप्रहरमें आकाशमें स्थितपोदकी शांता होय तो चौरनतें भय करे और दीप्ता होय तो राजभय करे ॥३९॥ इतिभूपालमततथ्यादिकुप्रकरणं॥

उदीरयामो द्विपदेष्विदानीं विहंगमानां शकुनानिसम्यक् प्रवर्त्तते यान्यधिगम्यलोकः कार्येष्वसंदिग्धमनाः संदेव १ जातास्थयस्माद्विनतासुतस्य कुले ततः पत्ररथा भवंतः दिव्यप्रभावा हृदयेप्सितज्ञा नमोस्तु वो मे क्रियतां प्रसादः २ योमुनार्चयति मंत्रवरेण श्रद्धया परमया कुसुमाद्यैः पक्षिणः प्रमुदिताः किल पुंसस्तस्यसत्यशकुनानि वदन्ति ३

॥ टीका ॥

उदीरयामेति इदानीं द्विपदेषु विहंगमानां शकुनानि सम्यक् उदीरयामः लोकः यानिशकुनानि अधिगम्य संदेव कार्येषु असंदिग्धमनाः प्रवर्त्तते १ जातास्थेति यूयंविनतासुतस्यकुले जातास्थ ततो भवंतः पत्ररथाः दिव्यप्रभावा हृदयेप्सितज्ञाः अतः वः युष्माकं नमः अस्तु मेम मोपरि प्रसादः क्रियताम् २ यइति यः पुमान् अमुनामंत्रवरेण पक्षिणः परमया श्रद्धया कुस्कमाद्यैरर्चयति पुनः प्रमुदिताः पक्षिणः तस्य पुंसः सत्यशकुनानि वदंति ३ ॥ छ॥

॥ भाषा ॥

॥उदीरयामेति॥ अब द्विपदनमें विहंगमनके शकुन कहें हैं ये मनुष्य जिनशकुनकूं जानकरकें सदां कार्यनमें निः संदेह मन प्रवर्त्त होय ॥१॥ जातास्थेति॥ तुम विनताके वेटा गरुडके कुलमें प्रगट हुये हो तातें तुम पक्षी हो दिव्यप्रभाव जिनके एसे ओर हृदयमें कछूक ज्ञानवान् ओर तुमकूं नमस्कार हो मेरे ऊपर अनुग्रह करो ॥२॥ यइति॥ जो पुरुष या मंत्र करकें पक्षीनकूं परमश्रद्धाकर पुष्पादिकन करकें अर्चन करे फिर प्रसन्न हुये पक्षी ता पुरुषकूं सत्य शकुन कहेंहें ॥३॥ छ ॥ छ ॥ छ

काष्ठासु सर्वास्वपिदर्शनेनहंसस्यशब्देनच सर्वसिद्धिः नामानिहंसस्यशृणोतियस्तु प्रयांतिनाशंदुरितानितस्य ४ चौरैः समंदर्शनमाद्यशब्देनिधिंद्वितीयेचभयंतृतीये युद्धंचतुर्थेनृपतिप्रसादः स्यात्पंचमेहंसरवेनराणाम् ५ इति हंसः

॥ टीका ॥

तत्र द्विपदेषु हंसानां तावन्मुख्यत्वेन प्रथमम् हंसानाम् शकुनं प्रदर्शयन्नाह तत्रहंसानां चत्वारो भेदाः चंचुचरणैरतिलोहितैः राजहंसाः तैर्मलिनैः मल्लिकाख्यः सितेतरैस्तैः धार्तराष्ट्राः अति धूसरैः पक्षैः कादंबाः शकुनेषु सर्वेषां समफलत्वेन सामान्येन प्रदर्शनं काष्ठास्विति सर्वास्वपिकाष्ठासु हंसस्य दर्शनेन सर्वसिद्धिः स्यात् यः हंसस्य नामानि शृणोति तस्य दुरितानि नाशं प्रयांति अत्र दुरितशब्देन विघ्नो गृह्यते नत्वघम् ४ चौरैरिति हंसस्य आद्यशब्देनराणां चौरैः समं दर्शनं भवति द्वितीयशब्दे निधिप्राप्तिः तृतीयेशब्दे भयं चतुर्थे युद्धं पंचमेनृपतेः प्रसादः

॥ भाषा ॥

द्विपदनमें हंस मुख्य हैं यातें प्रथम हंसनको शकुन कहें हैं तामें हंसनके चार भेद हैं ॥ लाल चोंच ओर लाल पाम जिनके ते तो राजहंस ओर मैले मैले होंय उनकी मल्लिका संज्ञा हे ओरं श्वेतवर्णतें इतर वर्ण जिनको वे धार्तराष्ट्र संज्ञा हे ओर अति धूसर पंखजिनके उनकी कादंब संज्ञा ये च्यारों प्रकारकें हंस शकुननमें संपूर्णनकूं समान फल देवें हैं सो समानफल कहें हैं ॥ काष्ठास्विति ॥ संपूर्ण दिशानमें हंसके दर्शनकरकें सर्वसिद्धी होयहे जो हंसके नाम श्रवण करें हैं उनके विघ्ननाशकूं प्राप्त होंय हे ॥ ॥४॥ चौरैरिति ॥ हंसके प्रथम शब्दमें मनुष्यनकूं चौरदर्शन होय ओर द्वितीय शब्दमें निधि प्राप्ती होय ओर तृतीयशब्दमें भय होय ओर चतुर्थमें युद्ध होय ओर पंचममें राजाकोअनुग्रह ओर विचार एसें शब्द करत जा शब्दपे चुपहोजाय वाकोही फल विचारनो ॥५॥ इतिहंसः ॥

वामांघ्रिणैकेनबकः स्थितःसन् धनर्द्धिपत्नीविषया
सिहेतुः पुनःपुनः पश्यतिभूमिपांथौयोवासविघ्ना
नपहंतिसर्वान् ६ त्रस्तोबको यः ककुभश्चतस्त्रः
पश्यन्कृतंचौरभयंब्रवीति निरूपयन्नात्मवपुर्वि-
शंकः स्त्रीरत्नलाभायदिनत्रयेण ७ इतिबकः
स्थानेषुसर्वेष्वपिचक्रवाकयुग्मंसमृद्ध्यैरववीक्षणा-
भ्याम् विछिद्यमानंसविषादचेष्टमार्त्तस्वरं स्था-
द्विपदेतदेव ८ इतिचक्रवाकः

॥ टीका ॥

अत्रायंभावार्थः यदाप्रथमंशब्दंकृत्वैवविरमते तदातस्यशब्दस्यफलंविचारणीयमेवमन्यत्रापि ५ इतिहंसः वामइति वामांघ्रिणाएकेनबकः स्थितःसन् धनर्द्धिपत्नी विषयासिहेतुर्भवति यःपुनःपुनः भूमिपांथौ पश्यतिससर्वान्विघ्नानपहंति ६ त्रस्तइति यःबकस्त्रस्तःसन् चतस्त्रः ककुभः पश्यन् चौरकृतं भयंब्रवीति सएवविशंकः आत्मवपुर्निरूपयन् दिनत्रयेण स्त्रीवित्तलाभायभवेत् ७ इतिबकः स्थानेष्विति सर्वेष्वपिस्थानेषुरववीक्षणाभ्यां चक्रवाकयुग्मं समृद्ध्यै भवति तदेवविक्षिप्यमानंसविषा

॥ भाषा ॥

॥वामइति॥ वगुलाएक वांये पामकरकें स्थित होय तो धन ऋद्धी स्त्री विषय प्राप्ती करे अथवा दूसरी स्त्रीकी प्राप्ती करे ओर जो वारंवार पृथ्वीमाऊं ओर मार्गीमाऊं देखे तो सर्व विघ्नकूं दूर करे ॥६॥ त्रस्तइति॥ जो वगुला त्रासपाय रह्यो होय फिर च्यारों दिशानमें देखतो होय तो चौरकरकें कियो हुयो भय कहेहे ये जाननो ओर वोही विशंक होयकर अपने देहकूं निरूपण करत तीन दिनकरकें ही स्त्रीरूपी रत्नवित्त इनको लाभ करे ॥७॥ इतिबकः॥ स्थानेष्विति॥ चक्रवाकको युगल सर्वस्थानमें देखे या शब्द करे तो समृद्धी करे वोही जो दुखी होय चेष्टा कर रह्यो होय आर्तस्वर

इष्टार्थसिद्धिः सकलासु दिक्षुससारसद्वंद्वविलोकनेन श्रुत्वास्य पृष्ठे निनदं नगच्छेत्सिध्यत्यभीष्टग्रहएवयस्मात् ९ वामेनयोषिद्धनलाभकारीशब्दस्तथाग्रेनृपतोर्थलब्ध्यै पार्श्वद्वयेसारसयुग्ममेकं कृतारवंजल्पतिकन्यकाप्तिं १० यः सारसाभ्यांयुगपद्विरावः कृतोऽचिरेण क्रमतोपिवामः सवेदितव्यः कथितोर्थकारीक्रौंचद्वयस्याप्ययमेवमार्गः ११

इति सारसः

॥ टीका ॥

दचेष्टं आर्त्तस्वरं विपदे स्यात् ८ इतिचक्रवाकः इष्टार्थइति सकलासु दिक्षु सारसद्वंद्व विलोकनेन इष्टार्थसिद्धिः स्यात् पृष्ठे अस्य निनदं श्रुत्वा नगच्छेत् यस्मात् गृहेएव अभीष्टं सिध्यति ९ वामेनेति वामेन सारसद्वंद्वं योषिद्धनलाभकारी स्यात् तथाग्रे शब्दः नृपतः अर्थलब्ध्यै स्यात् पार्श्वद्वये एकं सारसयुग्मं कृतारवं कन्यकाप्तिं जल्पति १० यइति सारसाभ्यां युगपद्विरावःकृतः स अचिरेण स्तोककालेन क्रमतोपि यः शब्दः कथितार्थकारी वेदितव्यः क्रौंचद्वयस्यापि अयमेवमार्गः पंथाज्ञेयः

॥ भाषा ॥

करतो होय तो मनुष्यकूं विपदा करे ॥८॥ इतिचक्रवाकः ॥ इष्टार्थइति ॥ सारसको जोडा सर्वदिशानमें देखतो होय तो इष्टार्थ सिद्धी करे और जो पीठपीछें सारसके युगलको शब्द श्रवणकरकें गमन न करे यातें घरमेंही अभीष्ट सिद्धि होय ॥९॥ वामेनेति ॥ सारसकोयुगल वामभागमें शब्द करे तो स्त्रीधन इनको लाभ करे तेसेंही अगाडी मध्य करे तो राजाकी प्रशांतीके अर्थ होय और दोनो पसवाडेनमें शब्द करे एकही सारसको युगल तो कन्या प्राप्ती करे ॥१०॥ यइति॥ जो सारसको युगल दोनो एकसंगही शब्द करें तो शीघ्रही क्रमसूं अर्थकारी जाननो और क्रौंचद्वयकोवी येही-

कार्यक्षितिर्वामगतोचढेंके मृत्युः पुरोदक्षिणपृष्ठगेच
रुवन्वियत्स्थःसमरे पुरोगा यदीयतंत्रस्यजयेत्सशत्रून्
१२ इतिढेंकः वामंप्रवासे रटितं हिताय
तथोपरिष्टादपि टिट्टिभस्य टिटीतिशांतं टिटिटीति
दीप्तंशब्दद्वयंचास्य बुधा वदन्ति १३ इति टिट्टिभः

॥ टीका ॥

यथा सारसद्वंद्वस्य शकुनानि तथा क्रौंचद्वयस्येति तात्पर्यार्थः ११ यदिसारसः पथियुद्धं प्रकुर्वाणोदृश्यते तदा तत्र कलहमाख्याति यदुद्दिश्य प्रयातितदभावोपिच १ एकोपि यदि दृश्यते तदावियोगंकुर्यात् कार्यहानिश्चस्यात् अभीष्टसमागमाभावश्च २ ग्रंथांतरेत्वेवं इतिसारसः कार्यइति वामगते ढेंके कार्यक्षितिर्भवति पुरो दक्षिणपृष्ठगेच मृत्युर्भवति यदीयतंत्रस्य समरे वियत्स्थः पुरोगा रुवन् भवति सशत्रून् जयेत् १२ इतिढेंकः वाममिति प्रवासे टिट्टिभस्य वामंरटितं हितायभवति तथोपरिष्टादपि अस्यशब्दद्वयंबुधावदंति एकं टिटीतिशांतं एकं टिटिटीति दी-

॥ भाषा ॥

मार्ग हे जेसें सारसके जोडाके शकुन हें तेसें ही क्रौंचके जोडाको जानना ॥ ११ ॥ जो सारसमार्गमें युद्ध करतो दीखे तो कलह कहे और जाको उद्देशकरकें जातो होय ताको अभाव जानना और जो एकही दीखे तो वाकोवी वियोग करे और कार्यकी हानी करे अभीष्ट समागमको अभाव करे ये ग्रंथांतरको मत हे ॥ इति सारसः ॥ कार्यइति ॥ ढेंक पक्षी जो - वामगती होय तो कार्यक्षिती करे और अगाडी जेमने माऊं पिछाडी गमन करे तो मृत्युकूं देवे और संग्राममें आकाशमें स्थित होय अगाडी आय शब्द करे तो शत्रूनकूं जीतले ॥ १२ ॥ इतिढेंकः ॥ वाममिति ॥ मार्गमें टिट्टिभ पक्षीको वांयो शब्द हितके अर्थ जानना और जो ऊपर शब्द करे तोवी हितके अर्थ जानना एक तो टिटि ये शब्द शांतहे और टिटिटी ये शब्द दीप्त जानना ॥१३॥ ॥ इतिटिट्टिभः ॥ ॥

कारंडवाटीजलवायसाना मुपस्थिताभ्यांरववीक्षणाभ्याम्
बहूनिदुःरवानिभवंति गंतुर्मुहुःप्लुवा
द्यास्त्वपरे प्रशस्ताः १४ इतिकारंडवादयः ॥
वामेपठन्राजस्शुकः प्रयाणे शुभोभवेद्दक्षिणतः
प्रवेशे वनेचराः काष्ठशुकाः प्रयाणेस्युःसिद्धिदाः
सन्मुरवमापतंतः १५ अग्रेरटंतोवधबंध
नादीन्कुर्वन्तिकीटाः सुबहूननर्थान्

॥ टीका ॥

त्तम् १३ इतिटिट्टिभः कारंडवाटीति कारंडवः करेडुआइतिलोके प्रसिद्धः आटिः आडिइति प्रसिद्धः जलवायसाः जलोद्भवाः काकाः एतेषांरववीक्षणाभ्यां बहूनिदुःरवानि भवंति अपरे ये जलद्विजाः जलपक्षिणः ते प्रशस्ताः १४ इतिकारंडवादयः वामइति प्रयाणेवामे पठन् राजस्शुकः शुभोभवेत् प्रवेशेदक्षिणतः शुभः स्यात् यः नृभाषयाजल्पति सराजशुकइत्युच्यते सन्मुरवमापतंतः वनेचराः काष्ठशुकाः सिद्धिदाः स्युः १५ अग्रइति अग्रेरटंतः वधबन्धनादीन् कुर्वन्ति

॥ भाषा ॥

॥कारंडवाटीति॥ कारंडव करेडुआ यानामकर प्रसिद्ध हे ओर आटिवा आडी या नामकर प्रसिद्ध हे ओर जलकौआ काक इनके समीपमें शब्द ओर देरवनो येदोनो बहोत दुःरवके देवेवारे हें ओर जे मेंडका जलकू कूडाकूं आदिले जलके पक्षी हें ते शुभ हे ॥१४॥ इतिकारंडवादयः॥ वामइति॥ प्रयाणसमयमें राजशुक जो सूआ- वामभागमें बोले तो शुभ होय ओर प्रवेशसमयमें दक्षिणमाऊं बोले तो शुभ होय जो मनुष्यभाषाकरकें बोलेहे वाकूं राजशुक कहेंहें ओर वनमें विचरेंहें उनकूं काष्ठशुक कहेंहें ते काष्ठशुक सन्मुरव चलो आवे वो सिद्धीदेवे बोलेहें ॥१५॥ अग्रइति॥ आगाडी बोले तो वधबंधनादिक करे ओर बोहोत अनर्थ करे ये का-

आचक्षते काष्ठशुकैः सहक्षान्विचक्षणाः पत्रशुकानपीह १६ इतिशुकः कलिः समं दस्युभिरग्रदेशे पृष्ठे च मित्रैः सह वामतश्च स्त्रीभिः समं दक्षिणतश्च पित्रा स्यात्सारिकायां च विलोकितायाम् १७ क्रांक्रेवमाद्यैरटितैस्तथास्याः श्रुतैः श्रुतिः स्याद्सृजोऽचिरेण न सारिकायाः शकुनेन कार्यं कार्यं मनुष्यैः किमपीह तस्मात् १८ इति सारिका ॥

॥ टीका ॥

सुबहून् अनर्थांश्च इह काष्ठशुकैः सहक्षान्विचक्षणाः पत्रशुकानाचक्षते तत्र काष्ठशुकः काष्ठवज्जडो भवति वक्तुं न जानाति पत्रशुकस्तु दीर्घपुच्छः किंचिन्नृभाषया वक्ति १६ इतिशुकाः कलिरिति अग्रदेशे अवलोकितायां सारिकायां दस्युभिः समं कलिः स्यात् पृष्ठेऽवलोकितायां मित्रैः सह कलिः स्यात् वामतस्तु स्त्रीभिः समं कलिः स्यात् दक्षिणतश्च पित्रा कलिः स्यात् १७ क्रांक्रेवमाद्यैरिति तथा अस्याः क्रांक्रेवमाद्यैः रटितैः श्रुतैः अचिरेण असृजः श्रुतिः स्यात् तस्मात्सारिकायाः शकुनेन कार्यं तस्याः दर्शनेन मनुष्यैः दानादिकिम-

॥ भाषा ॥

ष्ठकी सीनाईं जड होयहे वो काष्ठशुक कहनो बोलनो नहीं जाने हे और जाकी दीर्घलंबी पूंछ होय और मनुष्यकी सीक कछू भाषा नाम वाणी बोले वो राजशुक हे ॥१६॥ इतिशुकाः ॥ कलिरिति ॥ सारिका अगाडीकूं देखती होय तो चोरनसूं कलह करावे पीठमाऊं देखती होय तो मित्रनकरकें सहित कलह करावे और वाममाऊं देखे तो स्त्रीनकरकें कलह होय और दक्षिणमाऊं देखें तो पिता करकें कलह करावे ॥१७॥ क्रांक्रेवमाद्यै रिति॥ सारिकाके क्रांक्रा ये आदिशब्द सुनें तो शीघ्रही रुधिरको श्रवण करे यातें सारिकाके

सदाभरद्वाजचकोरयोः स्युर्निनादनामग्रहणेक्षितानि सर्वत्रसर्वाभिमतार्थसिद्ध्यै हारीतमप्येवमुदाहरंति १९ इतिभारद्वाजः भासावनांते बहवः समेताः प्रयांतिचेद्दृष्टिपथंतदानीम् ज्ञेयंलवंतस्करसंप्रवृत्तं यात्रासुभासः शुभदोऽपसव्यः २०

॥ टीका ॥

पिकार्यम् १८ इतिसारिका सदेति भारद्वाजचकोरयोः सदा सर्वकालं सर्वत्रसर्वस्मिन् कार्ये निनादनामग्रहणेक्षणानि अभिमतार्थसिद्ध्यैस्युः हारीतमप्येवमुदाहरंति तत्राद्यस्य नामत्रयंमरुस्थल्यांरूपारेलइति उग्रपुरादौ लाटइति अन्यत्रमागधादौ भारद्वाजइति चकोरः प्रसिद्धः हारीतः हारिलः इतिलोकेप्रसिद्धः १९ इतिभारद्वाजादयः भासाइति वनांतेबहवोभासाःसमेताः दृष्टिपथंप्रयांतिचेत् तदानीं लवंलवमात्रंतस्करसंप्रवृत्तं ज्ञेयम् यात्रासु भासपक्षी अपसव्यः शुभदो भवति २० ॥छ॥ ॥छ॥

॥ भाषा ॥

शकुन करकें कोई कार्य नहीं करनो योग्य हे सारिकाके दर्शनकरकें कछूदान करनो योग्य हे यातें ॥१८॥ इतिसारिका ॥ सदेति॥ भरद्वाज चकोर इनको शब्द नाम ग्रहण देखनो ये वांछित अर्थसिद्धीके अर्थ हें सदा सर्व कार्यमें और या प्रकार ही हारीतकूंवी कहें हें ये तीननके नाम मरुस्थलीमें हें रूपारेल लाट और मागधादिक देशनमें भारद्वाज इननामनकरकें प्रसिद्ध हें और चकोर तो प्रसिद्ध ही हे और हारीत हारिल ये प्रसिद्ध हें लोकमें ॥१९॥ इतिभारद्वाजादयः ॥ ॥भासाइति॥ वनमें वहोत सेसे भासपक्षी इकट्ठे होयजांय वे देखवेमें आंवे कछूक चोरनकर उपाधि होय और यात्रानमें भासपक्षी अपसव्य शुभको देवेवारो हे ॥२०॥

भासस्यशब्दादवलोकनाद्वाप्रदक्षिणाद्वाभवनेवने
वा लाभोऽस्यशब्देषुबहुष्वरण्येश्रुतेषुसंगः सह
राजपत्न्या २१ इतिभासः मयूरशब्देप्रथमेर्थ
लाभः स्त्रियंद्वितीयेलभतेतृतीये नृपाद्भयंचौरभ
यंचतुर्थेभीः पंचमेसिध्यतिकर्मषष्ठे २२ अन्या
नक्षुधार्त्तोविदधातिनादान्मिष्टान्नदोवामसुपैतिकेकी

॥ टीका ॥

भासस्येति भवने भासस्यशब्दादवलोकनात्प्रदक्षिणाद्वा लाभः स्यात् अरण्येबहुषुशब्देषु श्रुतेषु राजपत्न्यासह संगः स्यादत्र भास शब्देनगौर्जरप्रसिद्धाकावरिः मध्यदेशे गुडशिलः पश्चिमायां गोगलः स्मृत्यादौ गोघ्रकुर्कुटः इतिप्रसिद्धः २१ इतिभासः मयूरेति मयूरशब्दे प्रथमे अर्थलाभः स्यात् द्वितीये स्त्रियं लभते तृतीयेनृपाद्भयं स्यात् चतुर्थे चौरभयं भवति पंचमेभीः स्यात् षष्ठेकर्म सिध्यति २२ अन्यानिति अतिक्षुधार्त्तः अन्यान्नादान् विदधाति यदा वामसुपैति केकी तदा मिष्टान्नदः स्यात्

॥ भाषा ॥

॥भासस्येति॥ घरमें भासके शब्दतें अवलोकनतें वा प्रदक्षिणातें लाभ होय और अरण्यमें वोहोत सेसें शब्दश्रवण करवेमें आवें तो राजाकी स्त्रीको समागम होय भासनामकरकें गौर्जरदेशमें प्रसिद्ध हे और कावरिः या नामकर मध्यदेशमें विख्यात हे और पश्चिमदेशमें गुडशिल या नामकर प्रसिद्ध हे और स्मृत्यादिकनमें गोगल नामकर प्रसिद्ध हे और गोघ्रकुर्कुट ये प्रसिद्ध नाम हें ॥२१॥ इतिभासः ॥ मयूरेति ॥ मयूरको शब्द प्रथम होय तो अर्थलाभ होय द्वितीयशब्दमें स्त्रीलाभ होय तृतीयशब्दमें राजातें भय होय चतुर्थशब्दमें चौरको भय होय पंचममें भय होय छटेशब्दमें कर्मसिद्धी होय ॥२२॥ अन्यानिति ॥ अत्यंतक्षुधार्त्त होय और शब्दकर वामभागमें आयजाय तो मयूर मिष्टान्नकूं देवे जो फिर नृत्य करे तो मांगल्य देवे

मांगल्यदोनृत्यतिभाषितेन प्रीतिः शुभंतस्यविलोकितेन २३ इतिमयूरः संकीर्त्तनालोकननादयानैरूहेतदात्यूहगतेर्मनुष्यः सिद्धिंसदासर्वमनोरथानां दात्यूहवत्कुक्कुटमामनंति २४ इति दात्यूहकुक्कुटौ कपिंजलः कूजतिदक्षिणश्चेत्पुनः पुनः स्यात्कृतकृत्यताच वामेविभागे विफलंप्रयाणं हानिर्भवेत्तस्करदर्शनं च २५

॥ टीका ॥

यदा पुनः नृत्यति तदा मांगल्यदस्तस्यभाषितेन प्रीतिः स्यात् तस्यविलोकनेन शुभंस्यात् २३ इतिमयूरः संकीर्त्तनेनेति संकीर्त्तनालोकननादयानैः मनुष्यः दात्यूहगतिं ऊहेन तदासर्वमनोरथानां सिद्धिः स्यात् दात्यूहवत् कुक्कुटमप्यामनंति तत्र दात्यूह इतिनाम्ना मध्यदेशे प्रसिद्धः कुत्रचित् दांतुलइति जलजंतुः कुक्कुटः जलकुक्कुट कुक्कुटकुंभारो वा गुर्जरदेशेप्रसिद्धः २४ इति दात्यूहकुक्कुटौ कपिंजलइति यदिदक्षिणेनकपिंजलः पुनःपुनः कूजति तदा कृतकृत्यता स्यात् वामेविभागे

॥ भाषा ॥

मयूरके शब्दकरकें प्रीति होय और याके देखवेकरकें शुभ होय ॥२३॥ इतिमयूरः ॥ ॥संकीर्त्तनेति॥ संकीर्त्तन आलोकन शब्द गमन इनकरकें मनुष्य दात्यूहकी गती ताय प्राप्त होय तो सर्व मनोरथनकी सिद्धी होय और दात्यूहकी सीनाई कुक्कुटकू भी कहेहें॥ दात्यूह नाम करकें मध्यदेशमें प्रसिद्ध है कहूं वाकूं दांतुल कहेंहें जलजंतु है कुक्कुट नाम जलकुक्कूडा वा कुक्कुट नाम कुंभारो गुर्जरदेशमें प्रसिद्ध है ॥२४॥ इति दात्यूहकुक्कुटौ ॥ कपिंजलइति॥ जो जेमनें माऊं कपिंजल वारंवार शब्द करे तो कृतकृत्य होय जो कपिंजल वामभागमें होय तो गमनयात्रा निष्फल होय हानि होय चौरदर्शन होय जो दूरदेशके कार्यकरकें अपनें घरमें आय स्थित होय वाके घरमें

लाभोभवेद्दक्षिणपृष्ठभागे कार्याणिसिद्ध्यंतिनवामपृष्ठे पृष्ठेक्षितिश्चौरभयंतथाग्रेभवेन्निनादेनकपिंजलस्य २६ आत्मीयकंनामकपिंजलेतिपुनःपुनर्योऽनुकरोतिजल्पन् सोत्साहमुत्साहितचित्तवृत्तिः सतित्तिरिः साधयतीष्टमर्थम् २७ अयुग्मसंख्याः कथिताः परस्यैकृतारवास्तित्तिरयः समृद्धे करोति वाव्योमनिरीक्ष्यमाणोनिरीक्षितास्तित्तिरिरर्थनाशम् २८ ॥ छ॥

॥ टीका ॥

प्रयाणंविफलंभवति हानिर्भवेत्तस्करदर्शनंच अत्रायंविशेषः यो दूरदेशकार्याणिकृत्वा स्वगृहंप्रतिस्थितस्तस्यप्रथमं वामो विलोक्यते तदुक्तं यःकृत्वा विनिवृत्त कार्याणि सदूरदेशकार्याणिवामरवस्तद्देशमनि कपिंजलः कुशलमाख्याति २५ लाभइति दक्षिणपृष्ठभागे लाभोभवेद्वामपृष्ठेनकार्याणि सिद्ध्यंति कपिंजलस्यनिनादेन पृष्ठेक्षितिर्भवेत् तथाग्रेचौरभयं २६ आत्मीयकमिति आत्मीयकं नामकपिंजलइतिपुनःपुनःजल्पन्योऽनुकरोति सतित्तिरिः इष्टमर्थंसाधयति कीदृग्सोत्साहंयथास्यात्तथाउत्साहितचित्तवृत्तिः २७ अयुग्मेति अयुग्मसंख्याः कृतारवास्तित्तिरयः परस्यैसमृ-

॥ भाषा ॥

कपिंजल वामभागमें शब्दकरे तो कुशल करे ॥२५॥ लाभइति ॥ कपिंजल दक्षिणपृष्ठभागमें शब्द करे तो लाभ होय और वामपृष्ठभागमें बोले तो कार्यसिद्धि नहीं होय और पीठपीछें बोलेतो क्षिती होय तैसेंही अग्रभागमें बोले तो चौरभय होय ॥२६॥ आत्मीयकमिति ॥ उत्साह सहित उत्साहमें चित्तकी वृत्ती जाकी एसो कपिंजल अपनोनाम कपिंजल कपिंजल याप्रकारवारंवार उच्चारण करैवो तित्तिरिइष्ट अर्थकूं साधन करे ॥ ॥२७॥ अयुग्ममिति ॥ अयुग्मनाम उनासंख्या शब्दकरे तित्तिरी समृद्धी करे फेर आका-

शब्दायमानौयदितुल्यकालं कपिंजलौदक्षिणवामसंस्थौ गंतुर्भवेतांपथितोरणंतत्सर्वार्थसिद्धिप्रदमुद्यमेषु २९ कृष्णातित्तिरिरितीहपतत्री रक्ततित्तिरिरितिप्रथितोयः यश्चपक्षिषुमतोऽधिपमल्लो गौरतित्तिरिसमा शकुनेन ३० इतिकपिंजलादयः खगोत्रयोलावकनामधेयः खगौचकोरक्रकराभिधानौ त्रयोपितेतित्तिरितुल्यचेष्टाःपुरोव्रजंतोबहवोर्थसिद्ध्यै ३१ इतिलावकादयः

॥ टीका ॥

द्धैस्युः चपुनः व्योमनिरीक्ष्यमाणः निरीक्षितः तित्तिरिः अर्थनाशंकरोति २८ शब्दायइति यदिकपिंजलौ वामदक्षिणसंस्थौ तुल्यकालंशब्दायमानौ गंतुर्भवेतां तत्पथितोरणंस्यात् उद्यमेषु सर्वेषु सिद्धिप्रदंभवति २९ कृष्णाइति इहयः पतत्री कृष्णातित्तिरिरिति यः वर्त्ततेसः रक्ततित्तिरिरितिप्रथितः यश्चपक्षिषुमतोऽधिपमल्लो गौरतित्तिरिः एते त्रयोपिशकुनेनसमाः भवंति ३० इतिकपिंजलादयः खगोइति अत्रयः खगः लावकनामधेयः वर्त्तते यौखगौ चकोरक्रकराभिधानौ त्रयोपि ते तित्तिरितुल्यचेष्टाभवंति पुरोव्रजंतोबहवः अर्थसिद्ध्यै स्युः ३१

॥ भाषा ॥

शमें देखत्तो होय तो अर्थ नाशकरे ॥२८॥ शब्दायइति ॥ गमनकर्त्ताके जो दोयकपिंजल वामदक्षिण दोनो भागमें स्थित होंय एकसंगशब्दकरें मार्गमें तोरण होय संपूर्ण उद्यमनमें अर्थसिद्धी होय ॥२९॥ कृष्णाइति ॥ जो कालोतित्तर हे वाकूंही रक्ततित्तिरि कहेंहें जो पक्षीनमें अधिपहे मल्ल हे वो गौरतित्तिरि हे ये तीनो शकुनमें समहे ॥३०॥ ॥इतिकपिंजलादयः॥ खगौतिइति जो लावकपक्षी चकोर क्रकरपक्षीकर ढोंक करक करेडु ये क्रकरके भेदहें ये तीनोपक्षी तीत्तरकीसी इनकी चेष्टा हे ये अगाडी गमन

यांतीनृणांदक्षिणतोऽनुलोमंस्याद्वर्त्तिकापक्षिषुनप्पिकाच सर्वार्थसिद्धिप्रतिपादयित्रीतद्वैपरीत्त्येन पुनःप्रवेशे ३२ इतिवर्त्तिकानप्पिकौ वामोऽपसव्यःपुरतोऽथपृष्ठेयुद्धंविभेदंमरणंश्रियंच गृध्रः स्थितःसन्कुरुतेक्रमेणशब्दोऽपसव्योस्यविपत्तिहेतुः ३३ इतिगृध्रः प्रदक्षिणीकृत्यनरंव्रजंतो यात्रासुवामेनगताः प्रवेशे ॥

॥ टीका ॥

इतिलावकादयः यांतीति नृणामनुलोमं यस्यस्यात्तथादक्षिणतः यांती वर्त्तिकावटेर इति प्रसिद्धा छिप्पिकाच छापोइति मरुस्थल्यां प्रसिद्धः यच्छब्दश्रवणाज्जनानां रुधिरप्रकोपः स्यात् सासर्वार्थसिद्धिप्रतिपादयित्रीस्यात् प्रवेशे पुनः वैपरीत्येनज्ञेयम् ३२ इतिवर्त्तिकाछिप्पिके वामइति गृध्रः वामे अपसव्ये पुरतः पृष्ठे स्थितः सन् यथाक्रमं युद्धविभेदंमरणंश्रियंच तथापसव्यशब्दः विपत्तिहेतुर्भवति ३३ इतिगृध्रः प्रदक्षिणीति यात्रासु नरं प्रदक्षिणीकृत्यव्रजंतः प्रवेशे वामेनगताः

॥ भाषा ॥

करें तो वोहोत अर्थसिद्धी करें ॥३१॥ इतिलावकादयः॥ यांतीति॥ वर्त्तिकाके नाम वटेर वा वटई वा वनचटक इननामनकर वनचिडीहे ओर नप्पिका वा छप्पिका याकूं छाप मारवाडमें नाम प्रसिद्ध हे ये दोनो अनुलोमा होंय दक्षिणमाऊं गमन करें तो सर्वार्थसिद्धी करें फिर ये प्रवेशमें विपरीत फल करें हें ॥३२॥ इतिवर्त्तिकानप्पिको वाछिप्पिको ॥ वामइति॥ गीध वांयो जेमनो अगाडी पिछाडी इन च्यारो जगें स्थित होय तो क्रमकरकें युद्ध १ भेद २ मरण ३ श्री ४ ये करे ओर जो गीध जेमनो वोले तो मृत्यूकूं देवे ॥ ३३ ॥ इतिगृध्रः ॥ प्रदक्षिणीति ॥ यात्रामें मनुष्यकूं प्रदक्षिण करकें गमन करे ओर प्रवेशमें वाम होयकर गमन करे एसे शिखरा सुभ जाननें अप-

श्येनाः प्रशस्ता प्रकृतस्वरास्ते शांताः प्रदीप्तादिकृतस्वरास्तु ३४ श्येनोनृणांदक्षिणवामपृष्ठभागेषु भाग्येः स्थितिमादधाति तिष्ठन्पुरस्तान्मृतयेकरोतियुद्धंजयेच्छत्ररथध्वजस्थः ३५ इतिश्येनः फेटः शुभोदक्षिणभागसंस्थोवामः प्रहारं मरणंपुरस्तात् करोतिगच्छन्पुरतोबलानांध्वजास्थितो वाविजयंनृपाणाम् ३६ इतिफेटः संमुखीशवलिकाथवामिका श्रेयसीयदिचभाससंगता ॥

॥ टीका ॥

श्येना प्रशस्ताः प्रकृतिस्वराः शांता आस्ते तु पुनः विकृतस्वराः प्रदीप्ता आस्ते ३४ श्येनइति श्येनः सिंचाणाइति लोकेप्रसिद्धः नृणांदक्षिणपृष्ठवामभागेषु भाग्येः स्थितिमादधाति पुरस्तात्तिष्ठन्मृतये भवति छत्ररथध्वजस्थः युद्धेजयंवक्ति ३५ इतिश्येनः फेंटइति फेटःपक्षिविशेषः सदक्षिणभागसंस्थः शुभः वामः अपहारंकरोति पुरस्तात् मरणंकरोति बलानांपुरतः गच्छन् ध्वजास्थितो वा नराणां विजयंकरोति ३६ इतिफेटः सन्मुखीति ग्रावलिका संमुखी अथवा वामिका श्रेय-

भाषा

नी प्रकृतीकूं लिये स्वर बोलें ते तो शांता और विकारयुक्तस्वर बोलें ते प्रदीप्ता जानने ॥ ३४ ॥ श्येनइति ॥ श्येननाम शिखरा वा शिचाणा इति लोके प्रसिद्धा ये मनुष्यनके दक्षिण पृष्ठ वामभाग इनमें स्थित होय तो भाग्य वढावे और जो अगाडी स्थित होय तो मृत्यू करे और छत्ररथ ध्वजामें स्थित होय तो युद्धमें जय करे ॥ ३५ ॥ इतिश्येनः ॥ फेटइति ॥ फेट जो पक्षी सो जेमने भागमें स्थित होय तो शुभ होय शुभकरे जो वामभागमें होय तो प्रहार करे औरअगाडी होयतो मरणकरे वलवाननके अगाडी गमनकरत ध्वजापें वेठजाय तो मनुष्यनको जय करे ॥ ३६ ॥ इतिफेटः ॥ संमुखीति ॥

तद्विशेषशुभदातु सामिषा यस्यमूर्द्धनिपतेत् सभूपतिः ३७ इतिशवलिका आलोकशब्दौनिशिकौशिकस्य वामौशुभौदक्षिणतोविनिंद्यौ पृष्ठेनयानं विदधातितस्यसमीहितंसिद्धिफलंयियासोः ३८ करोतिहुंहुंहुमिति ध्वनिं यो नेष्टोनदु ष्टः सयतोरतार्थी चलस्वरः स्यात्कलहायशब्दः कीकीति शब्दो गुरुलस्तु शांतः ३९

॥ टीका ॥

सी श्रेयः प्रदाभवति यदिभाससंगता भवति तत्रस्था सामिषा विशेषशुभदाभवति सा यस्य मूर्द्ध निपतेत् सभूपतिर्भवति ३७ इतिशवलिका आलोकइति निशिकौशिकस्य आलोकशब्दौवामौशुभौ दक्षिणतः अतिनिंद्यौ भवतः अस्यपृष्ठे नयानंगमनं यियासोः समीहितं सिद्धिफलं विदधाति ३८ करोतीति हुंहुंहुमितिध्वनिं यः करोति सनेष्टः नदुष्टः यतः सरतार्थी अस्यचलस्वरः कलहाय स्यात् अस्यकीकीतिशब्दः दीप्तः गुरुलइतिशब्दः शान्तः ३९ ॥छ॥

॥ भाषा ॥

सन्मुखीति ॥ शवलिका सन्मुखी होय अथवा वामभागमें होय तो श्रेयकी करवेवाली होय और जो भासपक्षी सहित मांससहित होय तो विशेष शुभ देवे वो शवलिका जाके मस्तकपे आय वेठै वो राजा होय ॥ ३७॥ इतिशवलिका ॥ आलोकइति ॥ रात्रीमें घूघूको वांयोशब्द और आलोकन ये दोनो शुभ हें और जेमने माऊं ये दोनो अति अशुभ हें और पीठपीछें गमन करे तो वा गमन कर्त्ता पुरुषकूं वांछितासिद्धी फलकूं देवेवारो है ॥ ३८ ॥ करोतीति ॥ जो हुंहुंहुं या प्रकार ध्वनिकरे तो नेष्टजाननो वो संभोगको अर्थी होय तो दुष्ट नहीं जानवो वोलतो हुयो चले तो कलहके अर्थहे और कीकी एसो शब्द वोले तो दीप्तऔर गुरुल ये शब्दवोले तो शांत है ॥३९॥

रात्रौगृहस्योपरिभाषमाणोदुःखाय घूकःसुतमृत्यवेच गृहस्थनाशायचसप्तरात्रान्नाशायराज्ञोद्विगुणानुबंधी ४० अहंगृहद्वारिरुदत्युलूकोहरंतिचौराद्रविणान्यवश्यं तस्मिन्प्रदेशेनिशिमांसयुक्तस्तद्दोषनाशायबलिः प्रदेयः ४१ पृष्ठेपुरोवापथिकस्यशब्दंकुर्वन्सदासूचयतिप्रणाशं विशेषतोवायसवैरिशब्दोदुष्टः प्रदिष्टोऽहनिसर्वदिक्षु ४२

इत्युलूकः

॥ टीका ॥

रात्राविति गृहस्योपरिरात्रौभाषमाणः घूकः दुःखाय सुतमृत्यवेच भवति सप्तरात्रं गृहस्य नाशायभवति द्विगुणानुबंधी चतुर्दशदिनानि यावद्गृहोपरिजल्पन्राज्ञोनाशायस्यात् ४० अहमिति अहं दिनत्रयं गृहद्वारि घूकः रुवन्स्यात्तदा चौराद्रविणान्यवश्यं हरंति निशितस्मिन् प्रदेशे तद्दोषनाशाय मांसयुक्तः बलिः प्रदेयः ४१ पृष्ठेइति पथिकस्य पृष्ठेऽथवा पुरःशब्दं कुर्वन्नुलूकः सदा प्रणाशंसूचयति तथा विशेषतः वायसवैरीशब्दः सर्वदिक्षु अहानि दुष्टः प्रदिष्टः ४२ इत्युलूकः

॥ भाषा ॥

॥रात्राविति॥ घरके ऊपरि रात्रीमें वोले तो दुःखके अर्थ हे और सुतके मृत्यूके अर्थ हे और जो सातरात्रिपर्यंत घरके ऊपर वोले तो घरके नाशके अर्थजाननो औरजो चोधे रात्रि तांईं वोले तो राजाके नाशके अर्थ हे ॥४०॥ अहमिति॥ तीन दिन तांईं घरके द्वारेपे घूघू शब्द करे तो चौर द्रव्य अवश्य हरण करें यातें जहां बेठकें बोले वाई स्थानमें वाके दोष दूर होयवेके लियें मांस सहित वलिदान देनो योग्य हे ॥४१॥ पृष्ठेइति॥ मार्गमें गमनकर्त्ताके अगाडी वा पिछाडी शब्द करत घूघू नाशकूं सूचना करें और विशेषकरकें दिनमें तो च्यारों दिशानमें दुष्टफलकूं देवै है ॥४२॥ इत्युलूकः

अवामगोभ्रातृविनाशनाय वामाग्रतोधान्यधनस्य लब्ध्यै पृष्ठेप्रयातोभवति प्रयातु र्प्रभूतभीत्यैर्नियतंकपोतः ४३ शस्तानिसंज्ञारववीक्षणानिक्कचित्कदाचिन्नकपोतकस्य करोत्यसौमूर्द्धनियस्य विष्ठातमाशुनिर्नाशयते मनुष्यम् ४४ पर्यंकयानासनसन्निविष्टोगृहेप्रविष्टःकुरुतेकपोतः दुःखंविभेदोपिविपांडुरष्टादर्द्धैर्नाचिन्नोदिवसेनधूम्रः ४५ इतिकपोतः

॥ टीका ॥

अवामइति कपोतः होलाख्यः अवामः भ्रातृविनाशाय स्यात् वामाग्रतोधान्यधनस्यलब्ध्यैस्यात् पुनः पृष्ठे प्रयातः महत्यै भीत्यै प्रयातुर्भवति ४३ शस्तानीति कपोतस्यसंज्ञा रववीक्षणानि क्वचित्कदाचित् नशस्तानि यस्य मूर्द्धि विष्ठां असौ करोतितं आशुशीघ्रं मनुष्यं निर्नाशयते ४४ पर्यंकेति पर्यंकयानासनसन्निविष्ट इति पर्यंकः पल्यंकः यानमश्वादि आसनं प्रतीतं तत्रसन्निविष्टः स्थितः गृहप्रविष्टश्चाविभेदोपि दुःखदः स्यादित्यर्थः ४५ इतिकपोतः

॥ भाषा ॥

॥अवामइति॥ कपोतके नाम होला पिंडुकिया पारावत ये हें सो कपोत जेमनें भागमें होय तो भ्रातृको विनाश करे ओर वामभागमें वा अग्रभागमें होय तो धान्य धनकी प्राप्ती करे फेर पीठभागमें होय तो महान् भीती करे ॥४३॥ शस्तानीति॥ कपोतकी चेष्टा शब्द देखनो येक देखी कदाचित्वी शुभ नही हैं ओर जाके मस्तकपेवींट करे ताकूं शीघ्रही नाश करेहे ॥४४॥ पर्यंकेति॥ पर्यंक नाम पलका यान नाम अश्वादिक ओर आसन इनमें जो कपोत स्थित होय ओर घरमें प्रवेश करे तो दुःखकों देवेहे ॥४५॥ इतिकपोतः ॥

॥ ७॥

वामाशुभावर्त्मनिपुष्पभूषीशुभो भवेत्पोटियको
पिवामः पर्यंदिकास्यात्तुशुभापसव्यासर्वेशु-
भाव्यत्ययतः प्रवेशे ४६ इतिपुष्पभूष्यादयः
वामः स्त्रियंयच्छति पृष्ठतश्चपारावतो दक्षिणतो
तिभीत्यै शस्तारलाकर्णियकोच वामोसवल्गु
लाचर्मचटो प्रयाणे ४७ इतिपारावतादयः

॥ टीका ॥

वामेति वर्त्मनिपुष्पभूषी वामाशुभाभवतीत्यर्थः इति पुष्पभूषीपर्यंदिके देशांतरप्रसिद्धे पुष्पभूषी कृष्णावर्णा सूक्ष्मबिंदु युक्तालघुचटिका पर्यंदिका कोकिल सदृशा। अन्यत्र डांपुल इतिकुत्रचित् भुजंगइति ४६ इतिपुष्पभूषीपर्यंदिके वामइति पारावतः पारेवोइति लोकेप्रसिद्धः वामः पृष्ठतश्चश्रियंयच्छति दक्षिणतः अतिभीत्यै भवति तथा रलाकर्णियिकोसवल्गुलाचर्मचटोप्रयाणेशस्तोशोभनोस्तः तत्र रलाकर्णियको परदेशप्रसिद्धो वल्गुलिकावागुलिइति लोकेप्रसिद्धचर्मचटः कन्नुउइति प्रसिद्धः ४७ इतिपारावतादयः

॥ भाषा ॥

॥ वामेति ॥ मार्गमें पुष्पभूषीवामा होय तो शुभ देवे ओर पोटियकवी वामशुहे ओर पर्यंदिका जेमनी होय तो शुभ हे ओर प्रवेशमें संपूर्ण विपरीत करकें शुभ हें ओर पुष्पभूषी नाम लघुचटिका कृष्णवर्णा छोटे छोटे बूंद करकें युक्त होय हे ओर पर्यंदिका कोकिलकी तुल्य होय हें कहुं वाकूं डांपुल नाम कहेहें । कोई भुजंग कहेंहें ॥४६॥ इतिपुष्पभूषीपर्यंदिके ॥ वामइति ॥ पारावत नाम पारेव कबूतर इति प्रसिद्धं पारावत वामभागमें ओर पिछाडी होय तो स्त्री देवें ओर जेमनें भागमें होय तो अतिभीती करे ओर रलाकर्णियक ये दोनो वामभागमें शुभ हें ओर वल्गुला याकूं वागुलवी कहेंहें ओर चर्मचट ये चलती पोतप्रयाण स-

वामेऽथपृष्ठेफलमादधातियुद्धंपुरोदक्षिणतश्चहानिं गोवत्सकोदर्शननिस्वनाभ्यांक्रूरस्वरोसौकलिकृत्सदैव ४८ इतिगोवत्सकः लट्वाभवत्युच्चरतः प्रयातुः पुरस्थितावांछितसाधयित्री यात्राप्रवेशादिषुचप्रशस्ताः श्यामायथादक्षिणवामगेयम् ४९ लट्वैवनीलश्चटिकः प्रविष्टः शुभायकालश्चलकोपि तद्वत् वामोऽथवादक्षिणतोनिनादः श्रेयःप्रदःस्यात्किलकोकिलायाः ५० इतिलट्वादयः

॥ टीका ॥

वामेति गोवत्सकः वामेच पृष्ठे फलमादधाति फलंकरोतीत्यर्थः पुरः युद्धं दक्षिणतश्चहानिं करोति असौ दर्शननिस्वनाभ्यां क्रूरस्वरः सदैव कलिकृद्भवति . ४८ इतिगोवत्सः लट्वेति प्रयातुः पुरस्थितालट्वाउच्चरवा वांछितसाधयित्री भवति यथा श्यामा यात्राप्रवेशादिषु दक्षिणवामगा प्रशस्तातथेयमपि ४९ लट्वेति लट्वैवनीलश्चटकः प्रदीष्टः कथितः मुनिभिरितिशेषः कालश्चटकोपि तद्वच्छुभाय भवति तथा कोकिलायाः

॥ भाषा ॥

मयमें शुभ हें ॥४७॥ इतिपारावतादयः ॥ वामेइति ॥ गौको वछडा वांयो वा पीठपीछें दीखे याशब्द करे तो शुभफल करे और अगाडी होय तो युद्ध करावे और जेमने माऊं होय तो हानी करे जो क्रूरशब्द करे तो सदां कलह करवेवारो होय ॥४८॥ इतिगोवत्सकः ॥ लट्वेति ॥ लट्वा गमनकर्ता पुरुषके अगाडी स्थित होंय ऊंचो शब्द करे तो वांछित अर्थकूं साधन करे जेसें श्यामा यात्रा प्रवेशादिकमें जेमनी बांईं प्रसिद्ध हे तेंसेंही ये प्रसिद्ध हे ॥४९॥ लट्वेति ॥ मुनीननें लट्वाको नीलचटक नाम कह्यो हे और कालाचटकवी ताकी सीनाई शुभ करे हे और कोकिलाको शब्द बांयो होय अथवा जेमनो होय तो कल्याणकोही कर-

कपेक्षुकोऽभीष्टफलायवामेपृष्ठेशुभोदक्षिणतश्च शस्तः श्रीकर्णशब्दःपथिदक्षिणेनक्षेमायवामोऽर्थविनाशनाय ५१ इतिकपेक्षुश्रीकर्णौ दक्षिणेनशुभदःपथिफेंचोवासितेनखलुतस्यविशेषः दक्षिणोदहियकस्त्वनुकूलःशेषदिक्षुकथितः प्रतिकूलः ५२ इति फेंचदहियकौ

॥ टीका ॥

निनादः वामः अथवा दक्षिणतः श्रेयप्रदःस्यात् ५० इतिलद्वादयः कपेक्षुकइति वामः कपेक्षुकः पक्षिविशेषः अभीष्टफलाय स्यात् पृष्ठेशुभः दक्षिणतश्च शस्तःस्यात् तथा श्रीकर्णस्यशब्दः पथिदक्षिणेन क्षेमायस्यात् वामः शब्दः अर्थविनाशायस्यात् अत्रश्रीकर्ण.वनचटकइत्यन्ये ५१ इतिकपेक्षुश्रीकर्णौ दक्षिणेति फेंचः बुलबुलइतिलोके प्रसिद्धः पथिदक्षिणेन शुभदः स्यात् वासितेनतस्यशुभस्यविशेषःस्यात् दहियकः दहियटइतिलोकेप्रसिद्धः दक्षिणेन अनुकूलः स्यात् शेषदिक्षु प्रतिकूलः कथितः ५२ इतिफेंचदहियकौ

॥ भाषा ॥

वेवारो जान्नो ॥५०॥ इतिलद्वादयः ॥ कपेक्षुकेइति॥ कपेक्षुकपक्षी वांयो होय तो अभीष्टफल करे पीठपीछें होय तो शुभ करे ओर दक्षिण होय तो अशुभ करे ओरतेसेंही श्रीकर्ण जो वनचटक ताको शब्द मार्गमें दक्षिण होय तो कल्याण करे ओर वाम शब्द होय तो अर्थको विनाश करे ॥५१॥ इतिकपेक्षुश्रीकर्णौ॥ ॥दक्षिणेति॥ फेंचको नाम बुलबुल ये प्रसिद्ध हे फेंचमार्गमें दक्षिणमाऊं होय तो शुभदेवे ओर वामनें होय तो विशेषशुभकूं करे ओर दहियकपक्षी याकूं दहियटवी कहेंहें सोये दक्षिण दिशामें होय तो अनुकूल होय ओर बाकीकी दिशानमें

अवामभागेपथिकस्यशस्ताचालोकशब्दौकिलकुक्कुटस्य भीतोपिशब्दंकुकुकूइतीममसौविमुंचन्नभवत्यभीष्टः ५३ तारोगभीरःकथितोविरावोनिशावसानेनृपराष्ट्रवृद्ध्यै योवासयामंप्रतियामिकस्ययादस्यशब्दस्त्वपरोविरुद्धः ५४ इतिकुक्कुटः प्राप्यस्थिरत्वंचिरमन्तरिक्षेनानाप्रकारंमधुरंस्वनंती आश्चर्यमुत्पादयतेयियासोसाभारती यच्छतिभूपतित्वम् ५५ इतिभारती

॥ टीका ॥

अवामेति पथिकस्य अवामभागेकुक्कुटस्य आलोकशब्दौशस्तौ असौभीतोपिकुकुकूइतीमंशाब्दं विमुचन् अभीष्टोनभवति ५३ तारइति निशावसाने अस्य गभीरस्तारोविरावः नृपराष्ट्रवृद्ध्यैकथितः योवासयामंप्रतियामिकस्यशब्दः सोपिशुभः अपरोविरुद्धःस्यादित्यर्थः ५४ इतिकुक्कुटः प्राप्येति अंतरिक्षेचिरंस्थिरत्वंप्राप्य नानाप्रकारंमधुरंस्वनंती यियासोः या आश्चर्यमुत्पादयते साभारती भूपतित्वंयच्छति ददाति मध्यदेशेभारहीति प्रसिद्धः गौर्जरे रेवइतिप्रसिद्धा चटिकाभारती

॥ भाषा ॥

होय तो प्रतिकूल होय ॥५२॥ इतिफेंचदहियकी ॥ अवामेति ॥ आगींकूं कक्कूडाको देखनो ओर शब्दये दक्षिणभागमें शुभ हें. ओर ये भयवान् होय ओर कुकू या प्रकार ये शब्द करे तो अभीष्ट नहीं होय ॥५३॥ तारइति ॥ प्रातःकालमें कुक्कूडाको गंभीर शब्दजेमनो होय तो राजा देश इनकी वृद्धी करे ओर वांयोशब्द करे तोवी शुभ करे ओर जो शब्द हें सो विरुद्ध कर्त्ता हें ॥ ५४ ॥इतिकुक्कुटः ॥ प्राप्येति ॥ भारतीकों मध्यदेशमें भारही नाम कर प्रसिद्ध हे ओर गुर्जरदेशमें रेव नाम कर प्रसिद्ध हे ओर चटिकाची नाम हे भारती चिडैया आका-

प्राक्पार्श्वपृष्ठेसुभदःसशब्दोनिरीक्ष्यमाणःकलविंकपक्षी स्त्रीराजयोगोसुरतेनपृष्ठेस्त्रीलाभसाहापर्दिक्क्षयेसौ ५६ इतिकलविंकः ग्रामेयकारण्यजलेचराणांस्वयंविभेदोवयसांविरावः नास्माभिरुक्तःसुखबोधभावाच्चाषादिकान्संप्रतिवर्णयामः ५७ इतिश्रीवसंतराजविचारिताः पतत्रिणः इत्यष्टमोवर्गः समाप्तः ॥ ८॥

॥ टीका ॥

त्युच्यते ५५ इतिभारती प्रागिति प्राक्पार्श्वपृष्ठे सुशब्दो निरीक्ष्यमाणः कलविंकः गृहचटकः शुभदः स्यात् सुरतेनस्त्रीराजयोगः स्यात् स्त्रियाराज्ञाचेत्यर्थः ५६ ग्रामेयकइति ग्रामेयकारण्यजलेचराणां वयसां विरावः अस्माभिः नउक्तः ग्रंथबाहुल्यत्वात्सुखबोधभावाच्चाषादिकान्संप्रतिवर्णयामः ५७ इतिकलविंकः इतिवसंतराजशाकुने विचारिताःपतत्रिणः अष्टमोवर्गः समाप्तः

॥ भाषा ॥

शमें वोहोत देरस्थित होयकरकें अनेक प्रकारशब्द करत गमनकर्ता पुरुषकूं आश्चर्य प्रगट करे है वो भारती राजापनो देवे ॥५५॥ इतिभारती ॥प्रागिति ॥ कलविंक नाम गृहचटकको है ये पुरुषसंज्ञक चिडाको नाम है कलविंक अगाडी ओर पसवाडेनमें ओर पीठपीछें शब्द करे तो देखे तो शुभ करे ओर चिडियासुं संभोग करतो होय तो स्त्रीकरकें ओर राजाकरकें योग करावे ॥५६ इतिकलविंकः ॥ ग्रामेयकेति ॥ ग्रामके वनके वोहोत पक्षीनके भेद शब्द हैं याते हमनें कहे नहीं हे अब सुखपूर्वक बोध जिनके एसे चाषकूं आदिले पक्षी तिनें वर्णन करेंहैं ॥ ५७ ॥ इतिश्री वसंतराजभाषाटीकायां विचारिता पतत्रिणः अष्टमोवर्गः ॥८॥

स्वर्णचूडमणिकंठविशोकं स्वस्तिकाख्यमपराजि
तसंज्ञं नंदिवर्द्धनमशोकमहंत्वानोमिचाषसक
लाभिमतार्थम् १ अनेनमंत्रेणविधायसम्यक्पू
जोपहारैः पुरुषोयियासुः अभ्यर्चयेदुद्यतका
र्यसिद्धिंज्ञातुंविशेषाद्विहगेषुचाषम् २ प्रदक्षिणं
स्वस्तिकमध्यगत्यागृहीतभक्ष्योविदधातिचाषः

॥ टीका ॥

स्वर्णचूडेति हे चाष अहं त्वांनोमि किमर्थंसकलाभिमतार्थमिति सक
लंयदभिमतंतदर्थमित्यर्थः कीदृशं त्वां स्वर्णचूडमणिकंठविशोकमिति
स्वर्णस्यचूडायस्यतंमणिः कंठेयस्य सतथा विगतः शोको यस्मात् सत
था पश्चात्कर्मधारयः स्वस्तिकाख्यमिति स्वस्तिकइति आख्यायस्य
सतथा अपराजितसंज्ञं अपराजिता संज्ञायस्यसः तंनंदिवर्द्धनं नंदिरानंदस्तेन
वर्द्धतेयः सतथा अशोकमिति शोकवर्ज्जितं १ अनेनेति
यियासुः पुरुषः उद्यतकार्यसिद्धिं ज्ञातुं विशेषाद्विहगेषुचाषं अभ्यर्चयेत्
कैः अनेनपूर्वोक्तेनमंत्रेणसम्यक् स्तुतिं विधाय पूजोपहारैरिति पूजा
चंदनादिनाउपहारो बलिस्तैरित्यर्थः २ प्रदक्षिणमिति यदि चाषः स्वस्तिक
मध्यगत्यागृहीतभक्ष्यः सन् प्रदक्षिणं विदधाति तदाऽभीष्टलाभा-

॥ भाषा ॥

॥ स्वर्णचूडेति ॥ हे चाष संपूर्ण वांछाके लिये स्वर्णकी चूड जामें एसी मणी जाके
कंठमें और शोककर रहित अपराजित जाकी संज्ञा आनंदकरकें बढ रह्यो एसे
जो तुम ताय नमस्कार करूं हुं चाष नामनीलकंठको है ॥ १ ॥ अनेनेति ॥ गमन
कर्त्तापुरुष कार्यकी सिद्धि जानवेकूं विशेषकर पक्षीनमें श्रेष्टचाष ताय पूर्वमं
त्रकर स्तुती करकें फिर चंदनादिक उपहार बलिकरकें पूजन करे ॥ २ ॥ ॥
प्रदक्षिणामिति ॥ जो चाष स्वस्तिकगती करकें भक्ष्य पदार्थ ग्रहण करें हुयें-

अभीष्टलाभाययदातदास्यसर्वत्रशस्तंरुतमीक्षणं च ३ चाषंव्रजंतंयदिदक्षिणेनकाकोजयेत्पांथपराजयः स्यात् चाषोथकाकंजयतिप्रदिष्टस्तदाध्वगानांविजयोविदेशे ४ अरण्यमध्येव्रजतःपुरस्ताद्योरौतिचाषःकलहावहोसौ केंकेंतुदीप्तोनिनदोस्यशांतेकेकेइतीदृक्कुशलायवामः ५ इतिविचारितोपराजितोनवमोवर्गःसंपूर्णम् ९

॥ टीका ॥

यस्यात् एतस्यसर्वत्ररुतमीक्षणंचशस्तं ३ चाषमिति यदिदक्षिणेनचाषंव्रजंतंकाकोजयेत् तदा पांथपराजयः स्यात् यदि चाषःकाकंजयति तदा ध्वगानां विदेशे विजयः प्रदिष्टः ४ अरण्येति अरण्य मध्येव्रजतः पुंसः पुरस्तात् यश्चाषः रौति असौ कलहावहो भवति अस्य केंकेंइति निनादः सदादीप्तो भवति अस्यशांतः केकेइति ईदृक्निनादयुक्तः वामः कुशलायभवति ५ इतीति वसंतराजशाकुनेऽपराजिते विचारितः अन्यानिविशेषणानिपूर्ववत् इतिश्रीशत्रुंज-

॥ भाषा ॥

प्रदक्षिणा करे तो अभीष्टफलको लाभ करे याको शब्द और देखनो सर्व दिशानमें शुभकारी है ॥३॥ चाषमिति ॥ जो दक्षिणमांऊं चाष गमन करतो होय वाकूं काक जीतले तो पांथ पुरुषकूं वी पराजय करे और जो चाष काककूं जीतले तो मार्गी पुरुषकूं विदेशमें विजय कहनो ॥ ४ ॥ अरण्येति ॥ वनके मध्यमें गमन करे जा पुरुषके अगाडी जो रुदन करे तो कलहकूं प्राप्त करे और याको केंकें या प्रकार जो शब्द होय तो दीप्तस्वर जाननो और के के या प्रकार जो स्वर करे सो शांत जाननो ये शांत स्वर वाम भागमें होय तो कुशलके अर्थ जाननो ॥ ५ ॥ इतिश्रीवसंतराजभाषाटीकायां अपराजितसंज्ञिकनामनवमोवर्गः ९ ॥

अथखंजनः त्वंयोगयुक्तोमुनिपुत्रकस्त्वमदृश्य
तामेषिशिखोद्गमेन विलोक्यसेप्रावृषिनिर्गतायां
त्वंखंजनाश्चर्यमयोनमस्ते १ दृष्टोदितेऽगस्त्य
मुनौसुदेशेसुचेष्टितंखंजनकंविदध्यात् मंत्रेण
पूजांशिरसाप्रणामंतत्सूचितस्येष्टफलस्यसिद्ध्यै २
कुचेष्टितोयःकुवपुःकुदेशेनिरीक्ष्यतेखंजनकः क-
दाचित् ॥

॥ टीका ॥

यकरमोचनादिसुकृतकारिमहोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायांवसंतराजटीकायां अपराजितसंज्ञकोनामनवमोवर्गः ९ त्वमिति हे खंजन त्वं मुनिपुत्रकः असि कीदृग्योगयुक्तः त्वंशिखोद्गमेन अदृश्य तां एषि प्रावृषिनिर्गतायां त्वांविलोक्यसेकीदृगाश्चर्यमयः अतस्तेतुभ्यं नमः अस्तु १ अगस्त्यमुनौउदितेसति सुदेशे सुचेष्टितंखंजनकंदृष्ट्वामंत्रेणपूजां विदध्यात् शिरसाप्रणामं च यतः तत्पूजादिकं सूचितस्येष्टफलस्य वृद्ध्यै स्यात् २ कुचेष्टितइति यःकुचेष्टितः कुवपुः कुदेशेनिरीक्षितःखंजनकः कदाचित्स्यात् तदा तद्दृष्ट्वा विशेषात्परिलो-

॥ भाषा ॥

॥अथखंजनः॥ त्वमिति॥ हे खंजन तुम मुनिपुत्र हो और योगकरकें युक्त हो और शिखा तुमारे प्रगट होयहें तब तुम अदृश्य होय जाओ हो और वर्षाऋतु जब निकस जाय है तब तुम आश्चर्यमय दीखो हो यातें तुमारे अर्थ नमस्कार हो खंजनके नाम खंजरीट खञ्जरचेट खंजरखेल इतने हें ॥१॥ दृष्टेति॥ अगस्त्यमुनीको उदय होय तब सुंदरदेशमें शुभ चेष्टा करतो होय ऐसे खंजनकूं देखकर मंत्रपूर्वक पूजा करे फिर मस्तक नमायकरकें प्रणाम करै याको ये पूजन कर्त्ताकूं इष्टफलकी वृद्धीके अर्थ हे ॥२॥ कुचेष्टितइति॥ खोटी चेष्टा करतो

दृष्ट्वाविशेषात्परितोषयेत्तंघातायतत्सूचितदुष्कृतस्य ३ मांसंनभुंजीतशयीतभूमौस्त्रियंनसेवेत दिनानिसप्त स्नायाज्जपेत्संजुहुयाद्विधायपैष्टंपुमान्खंजनमर्चयेच्च ४ समंतभद्रस्तदनुप्रभद्रस्ततोनुभद्रांबर भद्रसंज्ञौ एषांचतुर्णामपिखंजनानामाचक्ष्महेसंप्रतिलक्षणानि ५ यः कंधरोरः शिरसासमंताद्बिभर्तिकार्ष्ण्यं ससमंतभद्रः कृष्णेनयुक्तः शिरसोरसाचभवेत्प्रभद्रः सितकंठपृष्ठः ६

॥ टीका ॥

षयेत् किमर्थं तत्सूचितदुष्कृतस्यघाताय ३ मांसमिति मांसंनभुंजीत भूमौशयीतसप्तदिनानियावत् स्त्रियंनसेवेत प्रतिदिनंस्नायाज्जपेत् संजुहुयात्पैष्टंपिष्टमयंखंजनकंविधायपुमानर्चयेत् ४ समंतभद्रइति एषांचतुर्णामपिखंजनानांसंप्रतिलक्षणानिच आचक्ष्महे तत्राद्यः समंतभद्रः तदनुद्वितीयः प्रभद्रः ततस्तृतीयचतुर्थौअनुभद्रांबरभद्रसंज्ञौ ५ य इति यः कंधरोरः शिरसांसमंतात् कार्ष्ण्यंबिभर्ति ससमंतभद्रः स्यात् शिरसोरसाचकृष्णेनयुक्तः सप्रभद्रः भवेत् कीदृक्सितकंठपृष्ठइतिसितौपृष्ठ

॥ भाषा ॥

होय कुत्सित जाको अंग होय निंदित देशमें देखतो होय तो एसे खंजनकूं देखकरकें विशेषकर प्रसन्न करे क्यों एसे के देखे सुं अशुभ फल होय ताकी निवृत्तीके लियें पूजनकर प्रसन्न करे ॥ ३ ॥ मांसमिति ॥ मांस भोजन न करे पृथ्वीमें शयन करे सातदिनपर्यंत स्त्रीसेवन नकरे नित्यप्रतिस्नान करे जपकरे हवन करे पुरुष चूनको खंजन बनायकें फिर वाको पूजन करे ॥ ४ ॥ समंतभद्रइति ॥ समंतभद्र १ प्रभद्र २ अनुभद्र ३ अंबरभद्र ४ खंजननके ये च्यार प्रकारके लक्षण कहें हें ॥ ५ ॥ ॥ यइति ॥ जो कंधा वक्षस्थल मस्तक इनमें श्यामवर्ण धारण करे वो समंतभद्र

कंठोरसीयस्यतुखंजनस्यकृष्णेभवेतांससमोनुभद्रः कृष्णाभवेत्कंठगतेवरेखायस्यत्वसौचांबरभद्रनामा ७ मध्यादमीषांशुभकार्यसिद्धैयोयोभवेत्पूर्वतरःसमुख्यः आकाशभद्रोगलमात्रकृष्णः सिताननःकार्यविनाशनाय ८ स्याद्योहरिद्रारससन्निकाशोगोमूत्रनामासतुखंजरीटः निरीक्षितः प्राक्दिवसेप्रभूतंरोगोद्गमंशंसतियावदब्दम् ९

॥ टीका ॥

कंठोयस्यसतथा ६ कंठोरसीति यस्यखंजनस्य कंठोरसी कृष्णे भवेतां सअनुभद्रोमतः यस्य कंठगतेवरेखाकृष्णाभवेत् असौ अंबरभद्रनामा भवति ७ मध्यादिति शुभकार्यसिद्धै अमीषांमध्यात् यः यः पूर्वनरः भवेत् ससमुख्यः य एतद्व्यतिरिक्तः आकाशभद्रः गलमात्रकृष्णः सिताननः सकार्यविनाशनाय स्यात् ८ स्याद्यइति यः हरिद्रारससन्निकाशः गोमूत्रनामाखंजरीटः स्यात् सः प्राक् प्रथमं दिवसे निरीक्षितः यावदब्दं दुःखोद्गमं शंसति कीदृशं प्रभूतम् ९

॥ भाषा ॥

संज्ञक और जो मस्तक और वक्षस्थल इनमें श्यामवर्ण होय पीठ और कंठपे - जाके श्वेत होय वो प्रभद्र नाम खंजन है ॥ ६ ॥ कंठोरसीति ॥ जा.खंजनके कंठ और वक्षस्थलपे श्याम होयचो अनुभद्र संज्ञक जाननो और जाके कंठमें श्यामरेखा होय वाकी अंबर भद्र संज्ञा जाननी ॥ ७ ॥ मध्यादिति ॥ शुभकार्यकी सिद्धीके अर्थ इनके मध्यमें जो जो पूर्व होय वोवो मुख्य जाननो जाके श्यामता कंठमें होय वो आकाश भद्र जाननो और श्वेत मुख जाको सो कार्यके विनाशके अर्थ जाननो ॥ ८ ॥ स्याद्यइति ॥ जोहलदीके रसकी समान होयवो गोमूत्रनाम खंजरीट जाननो वो प्रथमदिवसमें दीखे तो वर्षपर्यंताईं वोहोत दुःखके प्रगटकूं कहेहे ये जाननो ॥ ९ ॥

शिखोद्गमेनाऽथत्यदृश्यतांगतोयोदृष्टपूर्वःपुनरेव
यद्दिने एतेषुसद्यःसखगोयदाभवेत्दृग्गोचरःखं
जनकःस्थलेषु १० गजाश्ववशालोपवनांतरेषु
प्रासादहर्म्याग्रसितांबरेषु दध्यादिभांडेष्वुपलिप्त
भूमौसुवर्णराजांकितचामरेषु ११

॥ टीका ॥

शिखोद्गमेनेति येन एतेषुस्थलेषु खंजनकः प्रथमेन्हिदृष्टः अवलोकितः यःशिखोद्गमेनादृश्यतां प्राप्तः पुनः यस्मिन्नेवदिने दृग्गोचरी भवति - अदृष्टपूर्वःसखंजनकः तस्यश्रियंददाति तेषुकेष्वित्यपेक्षायामाह १० गजाश्वेति गजानामश्वानां च शालाबंधनस्थानं उपवनंगृहसमीपवर्तिवनं तेषु प्रासादहर्म्याग्रसितांबरेष्विति प्रासादः देवभूपानांगृहं हर्म्याग्रं सौधशृंगं सितांबरं श्वेतवस्त्रं तेषु दध्यादि भांडइति दध्यादिनाभृतं भांडं भाजनं आदिशब्दात् घृतादीनां परिग्रहः उपलिप्तभूमाविति उपलिप्ता छगणादिनाया भूमिस्तस्यां सुवर्णराजांकितचामरेष्विति सुवर्णप्रतीतं राजांतिकं राज्ञः समीपंचामरं बालव्यजनं तेषु ११

॥ भाषा ॥

॥शिखोद्गमेनेति॥ हाथी घोडा इनके बंधनके स्थान और उपवन जो घरके समीपवन देवमंदिर, राजमहल इनके ऊपर शिखरपे जो ध्वजादिकको श्वेत वस्त्र और दही दूध घृतादिकनकर भरे पात्रादिक और गोबरकर लिपी पृथ्वी और सुवर्णकी दंडीके चमर पंखा अथवा राजाके समीप चमर पंखा इनस्थलनमें स्थित खंजन प्रथम दिवसमें दीखे जो शिखा प्रगटहुयेपे अदृश्य होय फेर जा दिना नेत्रनसूं दीखे वाको नाम अदृष्टपूर्व खंजनहें सो वो जा पुरुषकूं दीखे ता पुरुषकूं श्री देवे ॥१०।११॥ ॥छ॥ ॥छ॥

सच्छायहृद्यांकुरपुष्पपत्रफलावनम्रेषुशुभद्रुमेषु ये
नोपविष्टः प्रथमेन्हि दृष्टस्तस्याश्रियंखंजनकोददाति
११ नद्यादिनीरांबुजगोपुरीषंगोपृष्ठदूर्वानृपमंदिरेषु
अट्टालजंबालफलप्रवाल क्षीरद्रुमोपस्कृततोरणेषु
१२ एतेषुचाद्येहनिखंजरीटो दृष्टोतिहृष्टः सहसोपवि-
ष्टः भोज्यान्नपानप्रियगोऽश्ववस्त्र लाभायरोगोपश-
मायचेष्टः १३

॥ टीका ॥

सच्छायेति सच्छायहृद्यांकुरपुष्पपत्रफलावनम्रेषु द्रुमेष्विति छायया सहवर्तमानाः सच्छायहृद्याः मनोहराः अंकुरपुष्पपत्रफलैरवनम्राः शुभद्रुमाः सहकारप्रभृतयः तेषु ११ नद्यादीति नदीप्रभृतियत्स्थलं नीरंपानीयं अंबुजंकमलंगोपुरीषंछगणंगोपृष्ठप्रतीतं दूर्वादूबइतिप्रसिद्धानृपमंदिरंराज्ञः सौधंतेषु अट्टालगृहोपरिगृहं जंबालःफलंप्रसिद्धं प्रवालं किसलयं क्षीरद्रुमः क्षीरवृक्षः वटादिः उपस्कृततोरणंनवीनंयत्तोरणंतेषु १२ एतेष्विति आद्येऽहनिएतेषुस्थलेषुसहसोपविष्टइति अकस्मादागत्योपविष्टः अतिहृष्टः प्रमोदवान्खंजरीट इष्टःसन् भोज्यान्न

॥ भाषा ॥

॥सच्छायेति॥ छायासहित सुंदर होय पुष्पफल अंकुरपत्र इनकरकें नम्र होय शुभ होय ऐसे वृक्षनपे बेठो होय प्रथमदिवसमें दीखे तो वो खंजन तापुरुषकूं श्री देवे ॥११॥ नद्यादीति॥ नदीकूं आदिले स्थान होय जल होय कमल गोवर गोकी पीठदूर्वा राजाके महल घरके ऊपर अटाली कीचफलकूं फल दूधके वृक्ष वडकूं आदिले तिनमें और नवीन तोरणपे ॥१२॥ एतेष्विति॥ प्रथम दिवसमें इनस्थलनमें सहज बेठजाय वा अकस्मात् आयकरकें बेठजाय अतिप्रसन्न ऐसो खंजरीट भोज्यान्नपान अपनो प्यारो गो अश्ववस्त्र इनको लाभादिक करे और

तुरंगमातंगमहोरगेषुसरोजगोछत्रवृषेषुयेन पूर्वेचदृष्टोऽह्निखंजरीटोनिःसंशयंतस्यभवेन्नृपत्वं १४ धान्यार्थलब्ध्यैमहिषीध्वजादौस्यात्गोमयेगोरसलाभमाह वस्त्रस्यलाभायचशाद्वलादौलाभायगेहस्यचनाविदृष्टः १५ संदर्शितेऽन्येनचखंजरीटेस्यादन्यनार्यासहसंगमाय विवाहलाभोहलखातभूमौधान्यस्यराशावपिधान्यलाभः १६

॥ टीका ॥

पानप्रियगोश्ववस्त्रलाभायरोगोपशमायचबुधैरिष्टं वांछितं १३ तुरंगइति तुरंगः अश्वः मातंगोगजः महोरगः सर्पः तेषु सरोजगोछत्रवृषेष्विति सरोजंकमलंगौःप्रतीताछत्रंआतपत्रंवृषः धवलः तेषुयेन एतेषुस्थलेषु पूर्वत्राहनि खंजरीटोदृष्टः तस्यनिःसंशयं नृपत्वं भवेत् १४ धान्यार्थइति महिषीध्वजादौ स्थितः खंजरीटः धान्यार्थलब्ध्यैस्यात् गोमये स्थितः गोरसलाभहेतुः स्यात् सएव शाद्वलादौस्थितः वस्त्रस्यलाभाय स्यात् नाविदृष्टः गेहस्यलाभायस्यात् १५ संदर्शितइति अन्येनसंदर्शिते खंजरीटे अन्यनार्यासह संगलाभः स्यात् हलखातभूमौ दृष्टे वि-

॥ भाषा ॥

रोगकी शांती करे ॥ १३ ॥ तुरंगइति ॥ जापुरुषकूं घोडा हाथी सर्प कमल गौछत्र वृषइनपे वेठे हुयो पूर्वदिनमें खंजरीट दीखे तो तापुरुषकूं निःसंदेह राजापनो होय ॥ १४ ॥ धान्यार्थइति ॥ भैंस और ध्वजादिकनपे खंजरीट वेठो होय तो धान्य अर्थकी प्राप्ती होय और गोवरपे स्थित होय तो गोरसकी प्राप्ती करे जो हरी घासादिकनपै स्थित होय तो वस्त्रको लाभ करे जो नांवमें दीखे तो घरको लाभ करे ॥ १५ ॥ संदर्शितइति ॥ जो खंजरीट और करके सहित दीखे वा औरने अपनीदृष्टीसूं दिखायो होय तो अन्यस्त्रीकरकें संगको लाभ होय

भवेत्प्रभातेप्रियसंगमायस्याद्बंधुसंगायतथांतरिक्षे भूमौधनस्यावतरन्नभस्थः खादन्पिबन्खादनपानलब्ध्यै १७ एवंप्रकारेषुमनोरमेषुस्थानांतरेष्विष्टफलांतराणि इच्छानुरूपाणिददात्यवश्यंपूर्वत्रदृष्टोऽहनिखंजरीटः १८ वल्लीदृषत्कंटकिशुष्कवृक्ष दग्धास्थिशूलाभृतभाजनेषु शून्यालयेलोमसुगेहकोणेबुसेपलाशेसिकतासुयूपे १९

॥ टीका ॥

वाहलाभः स्यात् धान्यस्यराशावपिदृष्टेधान्यलाभः स्यात् १६ भवेदिति प्रभातेदृष्टःप्रियदर्शनायभवेत् तथांतरिक्षेबंधुसंगाय भवेत् भूमौदृष्टः धनायस्यात् नभस्तः अवतरन् खादन् भोजनपानलब्ध्यैस्यात् १७ एवमिति एवंप्रकारेषु मनोरमेषुस्थानांतरेषु पूर्वत्रअहनि दृष्टः खंजरीटः इच्छानुरूपाणि फलांतराणि अवश्यंददाति १८ वल्लीति वल्लीप्रततिःदृषत्प्रस्तरःकंटकिः कंटकाकुलः शुष्कः एवंविधोवृक्षः दग्धंज्वलितं यदस्थिशूला प्रतीताम्रृतंकलेवरं भाजनंमद्यप्रभृतीनामिति

॥ टीका ॥

हलकरकें खोदी हुई पृथ्वीमें दीखे तो विवाहको लाभ करे धान्यकी राशीपे दीखे तो धान्यको लाभ करे ॥१६॥ भवेदिति॥ खंजन प्रभात समयमें दीखे तो, अपने प्यारेको दर्शन करावे जो अंतरिक्षमें दीखे तो बंधूको समागम करावे और जो भूमीमें दीखे तो धनको लाभ करावे और जो आकाशसूं उतर तो वा खातो वा जलादिक पान करतो वा भोजन करतो दीखे प्राप्तीके अर्थ जाननो ॥ १७ ॥ एवमिति॥ या प्रकारके मनोरम और स्थानमें प्रथम दिवसमें दीखे तो अपनी इच्छाके योग्य फलांतर अवश्य देवै ॥१८॥ वल्लीति॥ लता पाषाणको टूक कांटेको सूको वृक्ष और दग्ध नाम जलोहुयो हाड होय शूली मरेको देह मदिराको पात्र मनु-

एषुप्रदेशेषुतथापरेषुयदीदृशेषूपहतेषुदृष्टः कुमूर्तिचेष्टः सतदाकरोतिन्यक्कारभीरुक्कलहाद्यनर्थान्
२० युग्मम् बंधोवरत्रास्वऽशुचौचरोगोगृहच्छदेऽस्यद्रविणस्यनाशः निरीक्ष्यतेवानसिदेशभंगोनिद्राभिभूतोभिभवोतिरोगान् २१

॥ टीका ॥

शेषः पश्चात्द्वंद्वः तेषु तथा शून्यालयेजनवर्ज्जितेगृहे लोमसु अलकेषुगेहकोणे प्रतीतेषु बुसेतुसइति लोके प्रसिद्धे पलाशे धान्यवर्ज्जितेतृणसमूहे सिकतासु रजस्सु यूपेयज्ञस्तंभे १९ एष्विति एषुप्रदेशेषु तथाईदृशेषु अपरेषु उपहतेषु निंद्येषु यदिकुमूर्तिचेष्टइति कुत्सितेमूर्तिचेष्टे यस्यसतथा खंजरीटः दृष्टः सन् न्यक्कारभीरुक्कलहाद्यनर्थान्सततं करोति २० युग्मं बंधइति वरत्रासुदृष्टः बन्धःस्यात् अशुचौस्थानेरोगः गृहछदे गृहस्थछदेतृणरूपे आच्छादने भाषायां छप्परइतिप्रसिद्धे अस्यदर्शने द्रविणस्यनाशः स्यात् अनसिशकटे निरीक्ष्यते देशभंगःस्यात् निद्राभिभूते अभिभवः पराभवः स्यात् अतिरोगांश्चकरोतीत्यर्थः २१

॥ भाषा ॥

ष्यनकरकें रहित शून्यस्थान होय केशनमें घरके कोणनमें धान्यरहित तृणनको समूह होय तामें रजमें यज्ञस्तंभमें ॥१९॥ एष्विति॥ इनदेशनमें वा एसे एसे और निंदित जगेमें निंदित मूर्तीचेष्टा जाकी एसो खंजन दीखे तो धिक्कारी भयरोग कलह इनकूं आदिले जे अनर्थ तिनें करे॥२०॥ युग्मं ॥ बंधइति ॥ वरत्र जो चरसको रस्सा लावजाकूं कहें हें तापे दीखे तो बंधन करे और अपवित्र जगेमें दीखे तो रोग करे और छप्परपें दीखे तो धनको नाश करे और गाडीपै दीखे तो देशभंग करे निद्रामें भरो दीखे तो अपनो तिरस्कार करावे और अतिरोग करे॥२१॥

खरोष्ट्रकैलेयकपृष्ठपातेछिंदन्स्वपक्षांविदधातिमृत्युं पक्षौविधुन्वन्दिवसस्यचांतेबन्धोमृतोवानशुभःकदाचित् २२ यादृश्यवस्थाशकुनेरमुष्यशुभाशुभा स्यात्प्रथमेह्निदृष्टा तस्यापितादृश्युपलक्षणीयात्तद्विस्तरेणालमिहापरेण २३ पूर्वोक्तमेतच्छकुनं समस्तंयात्रादिकार्येष्वपितुल्यमाहुः प्रत्यक्षमाश्चर्यमन्यद्विहायसर्वोजनःपश्यतुखंजनस्य २४ अंगारखंडेकिलभूमिभागेतस्मिन्भवेद्यत्रकरोतिविष्ठां

॥ टीका ॥

खरेति खरोगर्दभः उष्ट्रः करभः कैलेयकश्वा तेषांपृष्ठेपातः पतनमुपरिगमनमितियावत् पक्षंछिंदन्मृत्युंविदधाति दिवसस्यचांतेपक्षौविधुन्वन्तत्पश्यन्जनबन्धोमृतोवाभवति अतःकदाचिच्छुभोनभवति २२ यादृश्येति अमुष्यशकुनेः यादृशी शुभाऽशुभावा अवस्था प्रथमेह्निदृष्टास्यात् तस्यापितादृशीउपलक्षणीया २३ पूर्वोक्तमिति यात्रादिकालेष्वपिएतत्पूर्वोक्तंशकुनंतुल्यमाहुः अन्यद्विहायखंजनस्यसर्वोजनःप्रत्यक्षमाश्चर्यंपश्यतु २४ अंगारेति यत्रासौ विष्ठांकरोति तस्मिन्किल भूमि-

॥ भाषा ॥

॥ खरेति ॥ गधा ऊंट श्वानं इनकी पीठउपरि आय बेठो दीखे ओर, अपने पंखनकूं छेदन करतो होय तो मृत्यू करे ओर दिवसके अंतमें पंखनकूं कंपायमान करे तो जन बंधन ओर मृत्यूकूं प्राप्त होय यातें कदाचित्बी शुभ नहीं होय ॥ २२ ॥ यादृश्येति॥ खंजनके शकुनन करकें जेसी अवस्था शुभ वा अशुभ प्रथम दिवसमें दीखे ताकूं तेसीही उपलक्षणा करनो योग्य हे ॥ २३ ॥ पूर्वोक्तमिति ॥ यात्रादिककार्यमें पूर्व सब शकुन तुल्य कहें हें सो ओर सब छोडकें खंजनके शकुन प्रत्यक्ष आश्चर्यवान् देखो ॥ २४ ॥ अंगारेति ॥ जहां बेठकें बीट करे ता पृथ्वीमें

यत्रावनो खंजनकोविधत्तेरतंभवेत्तत्रमहानिधानं २५ खंजनस्यपरिकीर्तनंशुभंदर्शनंभवतिमंगलप्रदं यात्यसौयदिपुनः प्रदक्षिणंतत्करोतिपथिकस्य वांछितं २६ इतिवसंतराजशाकुनेसदागमनार्थशोभनेसमस्तसत्यकौतुके विचारितोऽत्रखंजनः इतिदशमोवर्गः १० ॥ छ॥ यथार्थलाभंस्वरचेष्टितेनरुतांतरेभ्योभ्यधिकंप्रभावं रुतंत्विदानीमुभयप्रकारंकरापिकायाः परिभावयामः १

॥ टीका ॥

भागे अंगारखंडंभवेत् यत्रावनौ खंजनकोरतंविधत्ते तत्रमहानिधानंभवेत् २५ खंजनेति खंजनस्यपरिकीर्तनंशुभंभवति तथादर्शनंमंगलप्रदंभवति यदिप्रदक्षिणं असौ याति तदापथिकस्यवांछितंकरोति २६ वसंतराजइति वसंतराजशाकुने विचारितोत्रखंजनः अन्यानिविशेषणानिपूर्ववत् इतिशत्रुंजयकरमोचनादिसुकृतकारि महोपाध्यायश्रीभानुचंद्रमणिभिर्विरचितायांवसंतराजटीकायांखंजनको दशमोवर्गः १० यथार्थेति स्वरचेष्टितेनयथार्थलाभंरुतांतरेभ्यः अधिकप्रभावं इदानीं उभयप्रकारंरुतं करापिकायाः वयं परिभावयामः मनसिविचारयामः

॥ भाषा ॥

अंगारको खंड होय और जा पृथ्वीमें खंजन संभोग करे तामें महान् धनको स्थान जाननो ॥२५॥ खंजनेति॥ खंजनको नाम लेनोही शुभहे तेसेंही याको दर्शन मंगलको देवेवारो हे जो ये दक्षिणभागमें आय जाय तो मार्गचलवेवारेकूं वांछित फल करे ॥२६॥ ॥ इतिश्रीवसंतराजभाषाटीकायां खंजननाम दशमो वर्गः ॥१०॥ ॥ यथार्थेति॥ स्वरकी चेष्टा करकें यथार्थ लाभ होयहें और एकशब्दतें औरशब्दनकरकें अधिक प्रभाव होयहे अब हम दोनो प्रकारको क-

गणाधिपंचाथकुमारसंज्ञंकरापिकांकार्तिकनामधेयां दुर्गांतथासोमटिकाभिधानांत्वांसर्वहेमंतगते नमामि २ करापिकांवीक्ष्यबहिस्तरुस्थामनेनमंत्रेणतदेकचित्तः अभ्यर्च्यभक्त्याकुसुमाक्षताभ्यां पृच्छेदभिप्रेतमिहस्वकार्यम् ३ दक्षिणंकिलकरापिकारुतंपश्चिमोत्तरनिवासिनांनृणाम् श्रेयसेभवतिवामतः पुनः पूर्वदक्षिणदिगंतवासिनाम् ४

॥ टीका ॥

तत्रकरापिकालंबपुच्छाउपरिश्यामवर्णामहरिइतिलोकेप्रसिद्धा १ गणाधिपमिति गणाधिपं अथकुमारसंज्ञं करापिकां कार्तिकनामधेयां दुर्गां तथासोमटिकाभिधानां हेमंतगते त्वां नमामि अन्यानिसर्वाण्यपि एतस्या अभिधानानि २ करापिकामिति बहिस्तरुस्थांकरापिकांवीक्ष्य अनेनकुसुमाक्षताभ्यां भक्त्याऽभ्यर्च्य तदेकचित्तः सन् अभिप्रेते स्वकार्यंपृच्छेत् ३ दक्षिणमिति पश्चिमोत्तरनिवासिनांनृणां करापिकारुतंदक्षिणंश्रेयसेभवति पूर्वदक्षिणादिगंतवासिनां पुनः वामतः श्रे-

॥ भाषा ॥

गपिकाकोशब्द कहें हें ॥ १ ॥ गणाधिपमिति ॥ गणेशजीकूं अथवा स्वामिकार्तिकजीकूं मैं नमस्कार करूंहूं कार्तिकनाम दुर्गा और करापिका सोमटिका ये नाम जाके एसीजो तुमहों ता तुमें नमस्कार करूंहूं औरवी याके संपूर्ण नामहें जाकी लंबी पूंछ होय उपरसूं श्यामवर्ण जाको होय वाकूं करापिका कहें हें और मल्लारी महरी या नाम कर प्रसिद्ध हे ॥ २॥ करापिकामिति ॥ वहार वृक्षपे वेठी होय ताकरापिकाकूं देखकर पूर्व या मंत्रकूं बोलकर पुष्पअक्षत कर भक्तीपूर्वक पूजनकरकें एकाग्रचित्त होयकर वांछित जो अपनो कार्य ताकूं पूछे ॥ ३ ॥ ॥ दक्षिणमिति ॥ पश्चिमउत्तर वासीनकूं करापिकाको शब्द दक्षिण कल्याण-

वामतः करकरापिकाशुभा दक्षिणेनकुरुकुंचिता तथा अग्रतोभवतिसर्वसिद्धिदापृष्ठतोपिजयदाकरापिका ५ पक्षद्वयस्याभिमुखोगणेशः कंडूयनाच्छंसतिनास्तिभावं भंगंरणेवर्त्मनिचोरभीतिंकस्याप्यवश्यंमरणंविवाहे ६ कंडूयनाद्दक्षिणपृष्ठभागेयात्रासुहानिंमरणंविवाहे कंडूयतेऽसौयदिवामपक्षंवृद्धिर्विवाहेविजयोर्थलाभः ७

॥ टीका ॥

यसे भवति ४ वामइति वामतः करापिका शुभा भवति तथा दक्षिणेनकुरुकुंचिता करापिकेत्यर्थः शुभा शुभप्रदेत्यर्थः अग्रतः सर्वसिद्धिदाभवति पृष्ठतोपिजयदाभवति पुनःपुनः तस्याग्रहणं अत्यादरख्यापनार्थम् ५ पक्षइति पक्षद्वयस्य कंडूयनादभिमुखोगणेशः कृत्यस्यनास्तिभावंरणे भंगंवर्त्मनि चोरभीतिं विवाहे कस्याचिदवश्यंमरणं शंसति ६ कंडूयनादिति दक्षिणपृष्ठभागे यात्रासु हानिं विवाहे मरणंशंसति यद्यसौवामपक्षं कंडूयते तदा विवाहेवृद्धिः स्यात् विजयः -

॥ भाषा ॥

कारी है और पूर्व दक्षिण दिगंतवासीनकूं फिर वामकरकें कल्याण करे है ॥४॥ वामइति॥ वाममाऊं करापिका शुभ होय है और दक्षिण माऊं करापिका शुभकी देवेवाली है और अगाडी माऊं सर्वसिद्धीकी देवेवाली है और पीठपीछेंकी विजयके देवेवाली है वारंवार याको ग्रहण अति आदरके लियेंहें ॥५॥ पक्षइति करापिका संमुख होय दोनोपंखनकूं खुजाय रही होय तो कार्यको नास्तिभाव कहेहे और रणमें भंग कहेहे और मार्गमें चोरभीति कहेहे और विवाहमें काहूंको अवश्य मरण कहेहे ॥६॥ कंडूयनादिति॥ और दक्षिणभागमें और पृष्ठभागमें खुजावती होय तो यात्रामें हानि कहे और विवाहमें मरण कहेहे

कंडूयमाने हृदयप्रदेशेमित्रेणपत्न्याचसमागमः स्यात् इष्टार्थसिद्धिश्चमिलत्यभीष्टोगुह्यस्यकंडूयतिगुणेनपत्नी ८ कंडूयतेमूर्द्धनिसर्वलाभःस्वगोत्रसंगोजठरेप्रदिष्टः प्रदक्षिणंवाकुरुतेकदाचिदिष्टागमोहस्तगताचसिद्धिः ९ अग्रेतथादक्षिणतः प्रशस्ताकरापिकास्याद्विजयायपृष्ठे वामाप्रणाशंकुरुतेप्रयाणेग्रामप्रवेशेफलदातुवामा १०

॥ टीका ॥

अर्थलाभश्चस्यात् ७ कंडूयइति हृदयप्रदेशेकंडूयमाने मित्रेणपत्न्याचसमागमः स्यात् इष्टार्थसिद्धिश्च अभीष्टः मिलति तथागुह्यस्य कंडूयति गुणेनपत्नीस्यादित्यर्थः ८ कंडूयतइति मूर्द्धनिकंडूयते सति सर्वलाभः स्यात् जठरेकंडूयतेतेन स्वगोत्रसंगः स्यात् वा कदाचित् प्रदक्षिणं कुरुते तदाइष्टागमः हस्तगताचसिद्धिः स्यात् ९ अग्रेइति अग्रेतथादक्षिणतः करापिका प्रशस्तास्यात् पृष्ठे विजयाय भवति प्राणप्रणाशंवामा प्रयाणेकुरुतेतुपुनः वामापुरप्रवेशे फलदा भवति १०

॥ भाषा ॥

जो वांई पंखकूं खुजावे तो विवाहमें वृद्धी होय विजय होय और अर्थलाभ होय ॥७॥ कंडूयमानइति ॥ हृदयमें खुजावे तो मित्रकरकें और स्त्रीकरकें समागम होय और इष्टार्थसिद्धी होय और अभीष्ट मिले और गुह्य स्थानके खुजायवेसूं गुणकरकें पत्नी प्राप्त होय ॥ ८ ॥ कंडूयतइति ॥ मस्तकमें खुजावे तो सर्वलाभ होय और उदरमें खुजावे तो अपने गोत्रके कोसंग करावे और दक्षिण अंगमें खुजावे तो कोई अपने इष्टजनको आगम और हस्तमें सिद्धी आई एसो जाननो ॥ ९ ॥ अग्रेइति ॥ अगाडी और जेमने मांऊं करापिका शुभ जाननी और पीठपीछें विजयके अर्थ और वामा प्राणनाश करे

शब्देनासिद्धिर्लघुनाप्रदिष्टाभयंभवेन्निष्ठुरजल्पितेन
कार्योद्यमेसोमदिकांविहायसत्त्वंकुतस्त्यंशकुनांतरेषु ११ इतिविचारिताकरापिका इत्येकादशोवर्गः

अथोच्यतेकाकरुतंरुतानांमूर्द्धिस्थितेशाकुनभाषितानाम् अचिंतितावेदितभूरिकार्यंपूर्वादिकाष्ठाप्रहरक्रमेण १

॥ टीका ॥

शब्दइति लघुनाशब्देन सिद्धिः प्रदिष्टाकथिता निष्ठुरजल्पितेनभयं भवेत्कार्योद्यमेसोमटिकां विहाय शकुनांतरेषु सत्त्वं कुतस्त्यं ११ वसंतराजइति वसंतराजशाकुने करापिकाविचारिता अन्यानिविशेषणानिपूर्ववत् ११ इतिशत्रुंजयकरमोचनादिसुकृतकारिमहोपाध्यायश्रीभानुचंद्रविरचितायांवसंतराजटीकायांकरापिकासंज्ञकः एकादशोवर्गः अथेति करापिकारुतकथनानंतरंकाकरुतमुच्यते कथ्यंते कीदृशंशाकुनभाषितानांरुतानांमूर्द्धिस्थितं सर्वेभ्योप्यधिकमित्यर्थः पुनः कीदृशं अचिंतितावेदितभूरिकार्यमिति अचिंतितं आवेदितं भूरिकार्यंयेनतत्तथा केन पूर्वादिकाष्ठाप्रहरक्रमेणेति पूर्वादिकाः दिशः तासुप्रहरादि-

॥ भाषा ॥

प्रयाणसमयमें फिर पुरग्रामप्रवेशसमयमें वामा शुभफलकी देवेचारी जाननी ॥१० ॥ शब्दइति ॥ लघुशब्द करे तो सिद्धी कहनो कठोर शब्द करे तो भय होय कार्यके उद्यममें या करापिकाकूं छोडकरकें और शकुननमें सत्यला नहीं ॥ ११ ॥ इतिश्री शकुनवसंतराजभाषाटीकायां करापिका नाम एकादशो वर्गः ॥ ११ ॥ अथेति ॥ करापिकाके शब्दके अनंतर शकुनीननें कहे जे शब्द तिनके ऊपर संपूर्णतें अधिक और विना चिंतमन करे और जानोहुयो बोहोतसो कार्य ताय पूर्वादिक दिशानमें प्रहर प्रहरके क्रमकरकें अर्थात् प्रथम प्रहरमें केसो फल द्वितीय प्रहरमें केसोफल

येब्राह्मणक्षत्रियवैश्यशूद्राःकाकाभवंत्यंत्यजपंच
मास्ते वर्णाकृतिभ्यामृषिभाषिताभ्यांसदाभियुक्तै
रभिलक्षणीयाः २ बृहत्प्रमाणोगुरुदीर्घतुंडोदृढः
स्वरःकृष्णवपुःसविप्रः पिंगाक्षनीलास्यविमिश्र
वर्णस्यात्क्षत्रियोरूक्षरवोतिशूरः ३

॥ टीका ॥

क्रमः प्रथमप्रहरे कीदृक् फलं द्वितीयप्रहरे कीदृगित्यादिकस्तेन १ येइति ब्राह्मणक्षत्रियवैश्यशूद्राः अंत्यजपंचमाः काकाभवंति ते ऋषिभाषिताभ्यांवर्णाकृतिभ्यां अभियुक्तैःपंडितैः अभिलक्षणीयाः २ बृहदिति सकाकः विप्रःस्यात् कीदृक् बृहत्प्रमाणमस्येति तथासः गुरुदीर्घतुंड इति गुरुः मांसोपचितं दीर्घंलंबायमानं तुंड वक्त्रंयस्यसतथा दृढस्वरइति दृढः गंभीरः स्वरोयस्यसतथाकृष्णवपुरिति कृष्णंवपुः शरीरंयस्यसतथा सर्वेषांकाकानां कृष्णत्वेपिकृष्णवपुरिति विशेषणं अत्यंतकार्ष्ण्यख्यापनपरं एवंविधः क्षत्रियःस्यात् कीदृक् पिंगाक्षनीलास्यविमिश्रवर्णइति पिंगेअक्षिणीयस्यसतथा नीलंआस्यं यस्यसतथा विमिश्रो किंचित्श्यामः किंचित्श्वेतः वर्णो यस्यसतथा पश्चात्कर्मधारयः पुनः कीदृक् रूक्षरवइति रूक्षः अस्निग्धोरवोयस्यसतथा अतिशूरइति अत्यंतंशूरः

॥ भाषा ॥

या रीतकरकें काकरुत कहें हें ॥१॥ येइति ॥ जे ब्राह्मण क्षत्रिय वैश्यशूद्र और पांचमें अंत्यज ये पांच प्रकारके ऋषीननें वर्ण आकृतिनकरकें काक कहें हें सो योग्य पंडितनकर लक्षण करनो योग्य हे ॥२॥ बृहदिति ॥ लंबो होय देहसूं भारी होय और लंबी चोंच और मुख जाको लंचो होय और गंभीर शब्द जाको होय और अत्यंत श्यामवर्ण जाको होय वो काक ब्राह्मण जाननो और जो पीले नेत्र जाके नील मुख जाको और कछूक श्याम कछूक श्वेत वर्ण जाको

आपांडुनीलः सितनीलचंचुर्नात्यंतरूक्षोरटितैश्चवेश्यः भस्मछविर्भूरिककारशब्दः शूद्रः कृशांगश्च पलातिरूक्षः ४ विरूक्षसूक्ष्मास्यतनुर्विशंको यः कंधरांदीर्घतरांबिभर्ति स्थिरानन्नः स्थैर्यसमेत बुद्धिः काकोऽन्त्यजातिः सतुपंचमोत्र ५ द्रोणाभिधः कृष्णवपुर्द्विजोयोग्राह्यः सकाकः खलुमुखव्य वृत्या ॥

॥ टीका ॥

क्षत्रियत्वादित्यर्थः ३ आपांडुइति आईषत्पांडुनीलः सितनीलचंचुरिति सिताश्वेतानीलाचंचुर्यस्यसतथा नात्यंतइति रटितैः शब्दितैः अत्यंतरूक्षोयः सवैश्यः तथायः भस्मछविः भूरिककारशब्दः सः शूद्रः कृशांगश्चपलः अतिरूक्षः ४ विरूक्षइति विरूक्षंसूक्ष्मंआस्यंतनुश्चयस्यसतथा विशंकइति शंकारहितः यः कंधरांदीर्घतरांबिभर्त्ति स्थिराननइति स्थिरमाननंमुखंयस्यसतथा स्थैर्यसमेतबुद्धिरिति स्थैर्यसमेतांबुद्धिर्यस्यसतथासत्वत्र पंचमःकाकोंत्यजातिर्भवति ५ द्रोणाभिधइति

॥ भाषा ॥

और रूखो शब्द जाको होय अत्यंत शूर होय वो काक क्षत्रिय जाननो ॥ ३ ॥ आपांडु इति ॥ कछूक श्वेत नीलवर्ण जाको होय और श्वेत और श्याम चोंच जाकी होय नहीं है अत्यंत रूखो शब्द जाको वो काक वैश्य जाननो और जो भस्मको सोवर्ण जाको बोहोत ककारशब्द बोलतो होय कृश जाको अंग होय चपल और अतिरूखो होय वो काक शूद्र जाननो ॥ ४ ॥ विरूक्षइति ॥ विशेषकररूखो और सूक्ष्म हे मुखवशरीर जाको और शंकाकर रहित होय और जो लंबीकंधरा धारण करे स्थिर जाको मुख वास्थिर जाको शब्द होय और स्थिर सामंत जाकी बुद्धी होय वो काक पांचमो अंत्यज जाती जाननो ॥ ५ ॥ द्रोणाभिधइति ॥ जो पक्षि द्रोणनामकर -

तस्मादृतेश्यामगलोनिरीक्ष्यः श्वेतस्तुनिंद्योद्भुतदर्शनोऽसौ ६ विप्रःस्फुटंजल्पतिपृछ्यमानोन्यूनंततः क्षत्रियजातिराह आख्यातिवैश्यस्त्वधिवासनेनब्रवीतिशूद्रोबलिदानलोभात् ७ प्रश्नंकृतंजल्पति सार्ववर्णसदासमस्तंविहगोंत्यजातिः स द्यस्त्रिसप्ताहदशाहपक्षैः पंचापिकाकाःफलदाःक्रमेण ८

॥ टीका ॥

मुख्यवृत्यासकाकः ग्राह्यः योद्विजः द्रोणाभिधः कृष्णवपुः तस्मादृते तदभावेश्यामगलोनिरीक्ष्यः श्वेतस्तुनिंद्य यतोसौ अद्भुतदर्शनः यदाजगति किमद्भुतं भवति तदाश्वेतकाकोदृग्गोचरीभवति ६ विप्रइति - विप्रःपृछ्यमानः स्फुटंजल्पति क्षत्रियजातिः ततः न्यूनमाह वैश्यस्तुअधिवासनेन आख्याति बलिदानलोभात्शूद्रः ब्रवीति ७ प्रश्नमिति विहगोंत्यजातिः सार्ववर्ण सर्वसंबंधिप्रश्नकृतं समस्तं जल्पति सद्यस्त्रिसप्ताहदशाहपक्षैः क्रमेण पंचापिकाकाः फलदाभवंति तत्रविप्रःसद्यः

॥ भाषा ॥

श्याम वपु जाको होय वो मुख्य वृत्तीकरकें काकग्रहण करनो और ताको अभाव होय तो श्याम जाको कंठ होय सो देखनो योग्य है श्वेत तो निंदित है जब श्वेत काक नेत्रनसूं देखेहें तब वाकूं अद्भुत बतावे है यातें वो शकुनमें निंदित है ॥६॥ विप्रइति॥ विप्रसंज्ञक काकसूं पूछे तो सर्व योग्य कहै और क्षत्रियजातिकाक वातें न्यून कहैहें और वैश्य तो पूजन करेसूं यथार्थ कहेहें और शूद्रकाक बलिदानके लोभसूं कहेंहें ॥७॥ प्रश्नमिति॥ अंत्यजाति पक्षी सर्वसंबंधी प्रश्न कियोहुयो सर्व कहेंहें विप्रकाक तो तत्काल फल देवे है और क्षत्रिय तीनदिनकरकें फल देवेहै वैश्यजाति सात दिनमें फल देवेहै और शूद्र-

शांतेचदीप्तेचसदाविहंगः शुभप्रदोदीप्तपराङ् मुखः सन् नक्वापिरौद्रोरटितः प्रशस्तः सर्वत्रशस्तोमधुरस्वरश्च ९ दीप्तांस्थितोयःपुरुषस्वरेणविरौति दीप्ताभिमुखःसकार्यम् निष्पाद्यनिर्नाशयतेनिशायांदीप्तोन्मुखःशांतरवोपिसिद्ध्यै १० शांतेप्रदीप्ताभिमुखोभिधायशब्दंप्रविश्याथपुनःप्रदीप्ते योरौतिकाकोमधुरस्वरेणकृत्वाविरुद्धंसददातिसिद्धिं ११

॥ टीका ॥

स्तत्कालं ददाति क्षत्रियः त्रिभिर्दिनैः वैश्यः सप्तभिर्दिनैः शूद्रः दशदिनैरंत्यजातिः पक्षेणफलप्रदोभवतीत्यर्थः ८ शांतेचेति दीप्तः पराङ्मुखइतिदीप्तदिशि यस्यमुखंनास्तीत्यर्थः शांतेचदीप्तेच स्थितोविहंगः सदाशुभप्रदो भवति तथारौद्रः रटितः क्वापिनप्रशस्तः मधुरस्तु सर्वत्रशस्तः ९ दीप्तइति यः दीप्तः स्थितः दीप्ताभिमुखः परुषस्वरेण विरौति सकार्यं निष्पाद्य निर्नाशयते निशायांदीप्तोन्मुखः शांतरवोपि सिद्ध्यैस्यात् १० शांतइति शांतेस्थितः प्रदीप्ताभिमुखः शब्दं-

॥ भाषा ॥

जातिकाक दशदिनमें फल देवे ओर अंत्य जातिकाक पक्षभरमें फल देवे हे ॥ ८ ॥ शांतेति ॥ दीप्त दिशामें जाको मुख न होय ओर शांत दिशामें वा दीप्तदिशामें स्थितकाक सदां शुभकूं देवे हे तेसें ही रौद्र शब्द याको कदेवी शुभ नहीं देवे ओर मधुरशब्द सर्वत्र शुभ करेहे ॥ ९ ॥ दीप्तइति ॥ जो काक दीप्त दिशामाऊं मुख कर दीप्तदिशामें स्थित होय कठोर शब्द करे वो कार्यकूं बनायकर फिरनाश करे ओर जो रात्रीमें दीप्तदिशामाऊं मुखकर शांत शब्द करे तो सिद्धी करे ॥१०॥ शांतइति ॥ शांत दिशामें स्थित होय ओर दीप्त दिशामें मुखकरकें शब्द कर फिर दीप्तदिशामें प्रवेश करकें काक शब्द करे तो प्रथम विरुद्धकरकें

विधायदीप्ताभिमुखोविरावंततः प्रशांताभिमुखोविरौति
योवायसोऽसौविनिहत्यसम्यक्कार्याणि
सर्वाणिपुनः करोति १२ सूर्योदयेपूर्वदिशिप्रशस्ते
स्थानेस्थितोयोमधुरंविरौति नाशंरिपोश्चिंति
तकार्यसिद्धिं स्त्रीरत्नलाभंचकरोतिकाकः १३
ध्वांक्षःप्रभातेयदिवह्निभागेविरौतितिष्ठन्रमणीयदे
शे शत्रुः प्रणश्यत्यचिराद्विशस्त्रः प्रयातियोषित्
समवाप्यतेच १४

॥ टीका ॥

अभिधायपुनःप्रदीप्तंप्रविश्ययः मधुरस्वरेणकाकः रौति सविकारंविधाय
सिद्धिंविदधाति ११ विधायेति दीप्ताभिमुखः विरावंविधाय ततःशांताभिमुखोयो विरौति असौवायसः कार्याणिविनिहत्यसम्यक् पुनः सर्वाणि करोति १२ सूर्योदयेति पूर्वदिशिप्रशस्ते स्थानेस्थितः यः काकः मधुरंविरौति सरिपोर्नाशंचिंतितकार्यसिद्धिं स्त्रीरत्नलाभंचक्रमेणकाकः
करोति १३ ध्वांक्षइति यदि प्रभाते ध्वांक्षः वह्निभागे अग्निविदिशं रमणीयदेशे तिष्ठन्विरौति तदाशत्रुरचिरात् स्तोककालेन प्रणश्यति सविशस्त्रः निर्मुक्तशस्त्रः प्रयाति योषित्समवाप्यतेच १४

॥ भाषा ॥

फिर सिद्धीकरे ॥११॥ विधायेति॥ प्रथमदीप्तदिशामें सुख कर शब्द करकें फिर शांतदिशामें सुखकरकें शब्दकरे तो वोकाक प्रथम सर्व कार्य विगाड करकें पीछें सर्वकार्य करे॥१२॥ सूर्योदयेति॥ सूर्यउदय होय जासमें पूर्व दिशामें सुंदरस्थानमें बैठकें जो काक मधुर शब्द करे वो वैरीको नाश ओर चिंतमन कियो कार्यकी सिद्धी ओर स्त्रीरत्नलाभकरे॥१३॥ ध्वांक्षइति॥ जो प्रभातकालमें काक अग्निकोणमें रमणीयदेशमें स्थित होयशब्दकरेतोशत्रु शीघ्रनाशकूं प्राप्त होय ओरशस्त्र छोडकर चल्योजाय ओरस्त्रीप्राप्त होय ॥१४॥ ६॥

रुवन्प्रभातेदिशिदक्षिणस्यांकाकः समावेदयतेऽतिदुःखम् रोगार्तमृत्युंपरुषस्वरेणरम्येणचेष्टागमयोषिदाप्तिः १५ नैर्ऋत्यभागेचयदिप्रभाते करोतिकाकः सहसाविरावम् क्रूरंततः कर्मकिमप्युपैति द्यूतागमेमध्यमिकाचसिद्धिः १६ प्रातः प्रतीच्यांयदिरौतिकाको ध्रुवंतदावर्षतिवारिवाहः - स्त्रीवस्त्रभूभृत्पुरुषागमश्चकलिः कलत्रेणसमंतथास्यात् १७ ॥छ॥

॥ टीका ॥

रुवन्निति प्रभाते दिशि दक्षिणस्यां रुवन्काकः अतिदुःखंसमावेदयते - परुषस्वरेणरुवन् रोगार्तस्य मृत्युं करोति च पुनः रम्येणस्वरेण रुवन् इष्टागमयोषिदाप्तिः स्यात् १५ नैर्ऋत्यइति यदिनैर्ऋत्यभागे प्रभाते काकः सहसाक्रूरंविरावंकरोति तदाकिमपि कर्म उपैति दंडागमोभवति कार्यस्य च सिद्धिर्मध्यमिकास्यात् १६ प्रातइति यदिप्रातः प्रतीच्यांपश्चिमायांकाकः रौति तदा ध्रुवं वारिवाहः वर्षति तथा स्त्रीभृत्यभूभृत् पुरुषागमश्चस्यात् कलत्रेणसमंकलिश्च १७ ॥छ॥

॥ भाषा ॥

॥रुवन्निति॥ प्रभातकालमें दक्षिण दिशामें काक शब्द करे तो अतिदुःख होय और कठोरशब्द करेतो रोगीकूं मृत्यु करे और मधुरस्वर करकें इष्टजनको आगम और स्त्रीकी प्राप्ती करे॥१५॥ नैर्ऋत्यइति॥ जो काक प्रभातसमयमें नैर्ऋत्यकोणमें क्रूर शब्द करे तो कोई दंड मिले और कार्यकी सिद्धी मध्यम होय ॥१६॥ प्रातइति ॥ जो काक प्रातःकाल पश्चिमदिशामें शब्द करे तो निश्चय मेघवर्षा करे और स्त्रीवस्त्र राजा वा कोई पुरुष इनको आगम होय और स्त्रीकरकें कलह होय ॥१७॥ ॥छ॥

ध्वांक्षेसशब्देपवनालयस्थेवस्त्रान्नपानाभिमतागमाः स्युः पांथागमोब्राह्मणवृत्तिनाशःस्यादन्यदेशेगमनंस्वदेशात् १८ दिश्युत्तरस्यांसरवः प्रभातेनिरीक्ष्यमाणोवलिभुग्नराणाम् ददाति दुःखंभुजगाच्चभीतिं दारिद्र्यतांनष्टधनेष्वलाभम् १९

दिशीशवत्यांयदिरौतिकाक आगच्छतस्तद्वनितांत्यजाती व्याधेर्निमित्तंप्रियवस्तुलाभोभवेत्तथारोगवतोवसानम् २०

॥ टीका ॥

ध्वांक्षइति पवनालयस्थे ध्वांक्षे सशब्देसति वस्त्रान्नपानाभिमतागमाः स्युः तथा पांथागमः ब्राह्मणवृत्तिनाशः स्वदेशादन्यदेशेगमनं स्यात् १८ दिशीति यदि उत्तरस्यां दिशि प्रभाते सुरवः बलिभुग्निरीक्ष्यमाणः स्यात्तदा जनानां दुःखंददाति भुजगाच्चभीतिं दारिद्र्यतांनष्टधनस्यलाभंकरोतीति शेषः १९ दिशीति यदि ईशवत्यांदिशिप्रभाते काकः रौति तदा वनितांत्यजाती आगच्छतः किमर्थं व्याधेर्निमित्तं प्रियवस्तुलाभोभवेत् तथा रोगवतः अवसानंमरणं स्यात् २०

॥ भाषा ॥

॥ध्वांक्षइति॥ वायव्यकोणमें काक बोले तो वस्त्र अन्न पान वांछितको आगमन होय और पांथको आगम होय और ब्राह्मणकी वृत्तीको नाश होय अपने देशतें अन्यदेशमें गमन होय ॥१८॥ दिशीति॥ जो काक उत्तर दिशामें शब्द करतो दीखे तो मनुष्यनकूं अति दुःख देवे और सर्पनें भीती करे दरिद्रता करे नष्टधनको लाभ करे ॥१९॥ दिशीति॥ जो ईशान दिशामें काक बोले तो व्याधीकें निमित्त कोई स्त्री या अंत्यज जाति आवे और प्रिय वस्तूको लाभ होय और रोगीको तो मरण होय ॥२०॥

ब्रह्मप्रदेशोस्थितवायसस्यप्रभातकालेमधुरस्वरेण
अभीप्सितस्यागमनंध्रुवंस्यात् स्वामिप्रसादोद्रविण
स्यलाभः २१ इतिश्रीवसंतराजशाकुनेकाकरु
तेदिक्चक्रप्रकरणंसूर्योदयफलं ॥ १ ॥
प्राच्यांचयामेप्रथमेसुशब्दः काकोभवेच्चिंतितकार्य
सिद्ध्यै अभीष्टलोकागमनंयथास्या दिष्टार्थला
भोनियतंनराणाम् २२ आग्नेयभागेप्रथमेचया
मेस्त्रीलाभविद्वेषिवधौभवेताम्

॥ टीका ॥

ब्रह्मइति ब्रह्मप्रदेशः आकाशमध्ये तत्र स्थितस्य वायसस्य मधुरस्वरेण अभीप्सिताभ्यागमनं ध्रुवं स्यात् तथा स्वामिप्रसादः द्रविणस्य च लाभो भवति २१ इतिशत्रुंजयकरमोचनादि सुकृतकारि महोपाध्यायश्रीभानुचंद्रगणिभिर्विरचितायां वसंतराजटीकायां काकरुते दिक्चक्रप्रकरणे सूर्योदलफलं ॥१॥ प्राच्यामिति प्राच्यां पूर्वस्यांच प्रथमेयामे सुशब्दः काकः चिंतितकार्यसिद्ध्यै भवेत् तथा ऽभीष्टलोकागमनंस्यात् नियतंनराणामिष्टार्थलाभः स्यात् १ आग्नेयेति

॥ भाषा ॥

॥ ब्रह्मइति ॥ आकाशमें स्थित काक मधुर शब्द बोले तो वांछितको आगमन होय और स्वामीको अनुग्रह होय और धनको लाभ होय ॥ २१ ॥ ॥ इति श्रीवसंतराजभाषाटीकायां काकरुते दिक्चक्र प्रकरणे सूर्योदयफलम् ॥ ॥ प्राच्यामिति पूर्वदिशामें जो काक प्रथम प्रहरमें सुंदर बोले तो चिंतित कार्यकी सिद्धी करे वांछित लोकको आगमन होय निश्चय मनुष्यनको वांछित अर्थको लाभ होय ॥ २२ ॥ आग्नेयेति ॥ प्रथम प्रहरमें अग्निकोणमें काक बोले तो स्त्रीलाभ और वैरभाव दूर करे और प्रथम प्रहरमें दक्षिण दिशामें बोले तो स्त्रीलाभ सो-

कृतांतभागेबलिभुग्विरावः स्त्रीलाभसौख्यप्रियसौख्यकारी २३ नैर्ऋत्यकोणेप्रिययोषिदाप्तिर्मिष्टाशनंसिध्यतिचिंतितार्थः दिशिप्रतीच्यांविरुतेभवेतामभ्यर्चनीयागमनांबुवृष्टी २४ वायव्यकोणे शुचिसंगतिः स्यान्नृपप्रसादोऽध्वगदर्शनंवा सौम्येचभीस्तस्करशोकवार्तासौम्याचवार्ताधनलाभवार्ता २५ ईशानकोणेऽभिमतेनसंगस्त्रासोहुताशाद्बहुलोकसंगः ॥

॥ टीका ॥

प्रथमेच यामे आग्नेयभागेस्त्रीलाभविद्वेषि वधौ भवेतां तथा प्रथमेयामे कृतांतभागे दक्षिणदिशि बलिभुग्विरावः स्त्रीलाभसौख्यप्रियसंगकारीस्यात् २३ नैर्ऋत्येति नैर्ऋत्यकोणेप्रथमे यामे प्रिययोषिदाप्तिर्भवति तथा मिष्टाशनं सिध्यति चिंतितोर्थोभवति तथा प्रतीच्यांदिशि विरुतेः अभ्यर्चनीयागमनांबुवृष्टीभवेतां २४ वायव्येति वायव्येकोणेविट्संगतिः स्यात् तथानृपप्रसादः अध्वगदर्शनंचस्यात् सौम्येचउत्तरस्यां भीः तस्करशोकवार्ता सौम्याचवार्त्ता धनलाभवार्त्तास्यात् २५ ईशानेति प्रथ-

॥ भाषा ॥

ख्य प्यारेको संग करे ॥ २३ ॥ नैर्ऋत्येति ॥ प्रथम प्रहरमें नैर्ऋत्यकोणमें बोले तो प्रियस्त्री की प्राप्ती होय मिष्टान्नभोजन होय और चिंतित अर्थ होय और पश्चिमदिशामें प्रहरप्रहरमें बोले तो पूजनके योग्य तिनको आगमन और जलकी वृष्टी ये होंय ॥ २४ ॥ वायव्येति ॥ वायव्य कोणमें प्रथम प्रहरमें बोले तो वैश्यको समागम होय और राजाको अनुग्रह होय वा मार्गीको दर्शन होय और उत्तर दिशामें प्रथम प्रहरमें बोले तो भय चौर शोक वार्त्ता अथवा सौम्यवार्त्ता धनलाभ वार्त्ता होय ॥ २५ ॥ ईशानेति ॥ प्रथम प्रहरमें ईशान कोणमें बोले तो अच्छे जनको संग होय और अग्नीतें त्रास वोहोत

ब्रह्मप्रदेशेसुखकामभोगः सन्मानसंपद्द्रविणेष्टसिद्धिः २६ इतिदिक्प्रमाणप्रथमप्रहरः ॥ प्राच्यांद्वितीयेप्रहरेविरावैः काकस्यकश्चित्पथिकोभ्युपैति - चौराद्भयंव्याकुलतातिबह्वी जायेतकाचिन्महतीचशंका २७ हुताशदेशेनियतंकलिः स्यात्प्रियागमाकर्णनयोषिदाप्ती याम्ये च वृष्टिर्महती च भीतिः प्रियस्यवैश्यस्यतथागमः स्यात् २८

॥ टीका ॥

मेयामेईशानकोणेध्वनितेन अभिमतेन संगः स्यात् हुताशात्त्रासः बहुलोकसंगश्चस्यात् तथा ब्रह्मप्रदेशेसुखभोगसंगः संतानसंपत् द्रविणेष्टसिद्धयः स्युः २६ इतिवसंतराजटीकायां काकरुतेदिक्प्रकरणे प्रथमप्रहरे शुभाऽशुभफलम् ॥ प्राच्यामिति द्वितीयप्रहरेपूर्वस्यांकाकस्यविरावैः कश्चित्पथिकोऽभ्युपैति चौराद्भयंस्यात् बह्वीव्याकुलतास्यात् काचिन्महतीशंकाजायेत २७ हुताशेति हुताशदेशेऽग्निकोणेनियतं कलिःस्यात् तथा प्रियागमाकर्णनयोषिदाप्ती भवतः याम्येचमहती भीतिः स्यात् तथाप्रियस्यवैश्यस्यागमः स्यात् २८ ॥ छ॥

॥ भाषा ॥

होय मनुष्यनको संग होय ओर आकाशमें स्थित होयकर बोले तो सुखभोगकामसन्मान संपदा धन इष्टसिद्धी ये होंय ॥ २६॥ ॥ इतिश्रीवसंतराजभाषाटीकायां दिक्प्रकरणे प्रथमप्रहरे शुभाऽशुभफलम् ॥ २॥ पूर्वदिशामें दूसरे प्रहरमें बोले तो कोई पथिकजन आवे ओर चौरतें भय ओर बोहोत व्याकुलता कोई महान् शंका होय ॥ २७॥ हुताशेति ॥ अग्निकोणमें दूसरे प्रहरमें बोले तो निश्चय कलह होय ओर प्रियके आगमनको श्रवण ओर स्त्रीप्राप्ती होय ओर जो दक्षिणमें बोले तो महान् वृष्टि महान् भीति होय ओर प्यारेको वैश्यको आगमन होय ॥ २८॥ ॥ छ॥

रक्षोदिशिप्राणभयंतथास्युःस्त्रीभोगलाभाखिलरुक्प्रणाशाः भवेत्प्रतीच्यांप्रबलानलाप्तिर्योषागमोवृद्धिसुवर्षणंच २९ समीरभागेऽध्वगचौरसंगोदूतागमःस्त्रीपिशितान्नलाभः सौम्येधनेष्टागमनंजयश्च रम्येरवेचौरभयंत्वऽरम्ये ३० महेश्वराशाधिगतश्चकाकश्चौराग्निसंत्रासविरुद्धवार्त्ताम् ब्रवीतिरूक्षैरदितैस्त्वरूक्षैःसभार्यगुर्वागमनंजयश्च ३१

॥ टीका ॥

रक्षोदिशीति रक्षोदिशिनैर्ऋतेप्राणभयंस्यात् तथा स्त्रीभोज्यलाभाखिलरुक्प्रणाशाःस्युः प्रतीच्यांप्रबलानलाप्तिर्भवेत् तथायोषागमः वृद्धिःसुवर्षणंचभवति २९ समीरेति वायव्येऽध्वगचौरसंगः स्यात् तथादूतागमःस्त्रीपिशितान्नलाभश्चसौम्येधनेष्टागमनंस्यात् रम्येरवेजयश्च अरम्येरवेतु चौरभयंस्यात् ३० महेश्वरेति महेश्वराशाधिगतस्तु काकः रूक्षैः रदितैश्चौराग्निसंत्रासविरुद्धवार्तांब्रवीति अरूक्षैः रदितैः सभार्यगुर्वागमनंजयश्चस्यात् ३१ ॥ छ ॥

॥ भाषा ॥

॥ रक्षोदिशीति ॥ नैर्ऋत्यकोणमें द्वितीयप्रहरमें बोले तो प्राणभय होय ओर स्त्रीभोजन लाभ सर्वरोगको नाश ये होंय पश्चिममें बोले तो प्रवल अग्नि होय ओर स्त्रीको आगमन वृद्धी वहोत वर्षा होय ॥ २९ ॥ समीरेति ॥ वायव्यकोणमें द्वितीयप्रहरमें काक-बोले तो मार्गमें चौरको संग होय कोई दूतको आगमन होय ओर स्त्रीमांस अन्न इनको लाभ होय ओर उत्तरदिशामें बोले तो धन ओर इष्टजनको आगमयेहोय सौम्य-शब्द करे तो जय होय ओर क्रूर शब्द करे तो चौरभय होय ॥ ३० ॥ महेश्वरेति ॥ ईशानदिशामें द्वितीयप्रहरमें काक रूरवा बोले तो चोर अग्नि इनके त्रास कर विरुद्धवार्ताकूं कहेहे ओरमधुरवाणी बोले तो स्त्रीसहीतगुरूनको आगमन ओर जय होय॥ ॥ ३१ ॥

ब्रह्मप्रदेशेप्रहरेद्वितीयेकाकः सुशब्दोनृपतिप्रसादं
मिष्टान्नभोज्यंचददातिपुंसांकरोत्यसौचौर भयंकुश
ब्दः ३२ इतिकाकरुतेदिक्चक्रप्रकरणे द्वितीयः प्रहरः
ऐंद्र्यांविरूक्षः प्रहरेतृतीयेदृष्टिंतथाचौरभयंब्रवीति
हृष्टस्तुराजागमनंजयंचकरोतियात्रासुचकार्यसिद्धिं
३३ अग्नेर्विभागेऽग्निभयंकलिश्चविरुद्धवार्त्ताविफ
लाचयात्रा भवेद्विरुद्धैर्बलिभुग्विरावैर्जयादिवार्त्ता
चभवेद्विसुद्धैः ३४

॥ टीका ॥

ब्रह्मेति ब्रह्मप्रदेशेद्वितीयप्रहरेसुशब्दः काकः नृपतिप्रसादंमिष्टान्नभोज्यंच ददाति कुशब्दः पुनरसौपुंसांचौरभयंकरोति ३२ इतिवसंतराजटीकायांकाकरुतेदिक्प्रकरणेद्वितीयप्रहरेशुभाऽशुभफलं ॥ ऐंद्र्यामिति तृतीयप्रहरे ऐंद्र्यांपूर्वस्यांविरूक्षः अर्थाद्दीप्तशब्दाद्दृष्टिः तथाचौरभयंब्रवीति तत्रैवदिशिहृष्टस्तुराजागमनजयंचयात्रासुच कार्यसिद्धिंकरोति ३३ अग्नेरिति आग्नेयभागेविरुद्धैर्बलिभुग्विरावैः अतिभयंकलिश्चविरुद्धवार्त्ताविफलाचयात्राभवेत् पुनः विशुद्धैर्जयादिवार्त्ता भवेत् ३४

॥ भाषा ॥

॥ब्रह्मेति॥ द्वितीयप्रहरमें आकाशमें स्थित होय बोले तो राजाको अनुग्रह मिष्टान्न भोजन पदार्थ देवे क्रूर बोले तो मनुष्यनकूं चौर भय करे ॥३२॥ इतिश्रीवसंतराजभाषाटीकायां काकरुते दिक्चक्र प्रकरणे द्वितीय प्रहरे शुभाऽशुभ फलं ॥ ऐंद्र्यामिति ॥ तृतीयप्रहरमें पूर्व दिशामें दीप्तशब्द बोले तो वृष्टि और चौरभय करे और पूर्व दिशामें काक प्रसन्न होय तो राजाको आगमन जय और यात्रानमें कार्यसिद्धी करे॥ ३३॥ ॥अग्नेरिति॥ अग्निकोणमें तृतीय प्रहरमें काकविरुद्ध शब्द बोले तो अग्निभय कलह विरुद्ध वार्त्ता निष्फला यात्रा ये होंय फेर जो शुद्ध शब्द बोले तो जयादिक वार्त्ता होय ॥३४॥

ककुभ्यवाच्यांकुरुतेतुतूर्णंरोगंतथा सागमनंविहंगः क्षुद्राणिकार्याणिचयांति सिद्धिंसर्वाणिसन्मुख्यतयानराणाम् ३५ क्रव्याददेशेजलदागमः स्यान्मिष्टान्नलाभोरिपवोनमंति शूद्रागमश्चापिविरुद्धवार्ता भवंतियात्रासुचकार्यनाशः ३६ स्यात्पश्चिमेनष्ट धनस्यलाभोदूराध्वयानंसुहृदागमश्च योषागमाभीष्टजयादिवार्त्तायात्रासुरम्यैरटितार्थसिद्धिः ३७

॥ टीका ॥

ककुभीति अवाच्यांदक्षिणस्यां ककुभि विहंगः अतितूर्णं रोगं तथासागमनंकुरुते नराणां क्षुद्राणिकार्याणि सर्वाणि तन्मुख्यतयेति तदेवकार्यं मुख्यंचतस्यभावस्तन्मुख्यता तयाचसिद्धिंयाति ३५ क्रव्यादेति क्रव्याददेशे तृतीय प्रहरे काकस्यरटितेन जलागमः स्यात् तथा मिष्टान्नलाभोरिपवो नमंति शूद्रागमः स्वामि विरुद्धवार्त्ताः भवंति यात्रासुचकार्यनाशः स्यात् ३६ स्यादिति पश्चिमेनष्टधनस्यलाभः स्यात् दूराध्वयानमिति दूरेऽध्वनियानंगमनंसुहृदागमश्चयोषागमाभीष्टजयादिवार्ताभवति रम्यैः रटितैः अर्थसिद्धिः स्यात् ३७

॥ भाषा ॥

॥ककुभीति॥ दक्षिणदिशामें काक बोले तो अतिशीघ्र रोग करे ओर अच्छे महात्माको आगमन होय ओर मनुष्यनके संपूर्ण क्षुद्र कार्य मुख्यभाव करकें सिद्धी प्राप्ती होय ॥ ३५ ॥ क्रव्यादेति ॥ नैर्ऋत्यकोणमें तृतीयप्रहरमें बोले तो मेघनको आगम होय मिष्टान्न लाभ होय ओर वैरीनमें शूद्रको आगम ओर विरुद्ध वार्ता ओर यात्रानमें कार्यको नाश होय ॥३६॥ स्यादिति॥ पश्चिममें बोले तो नष्टधनको लाभ होय दूरमार्गमें गमन होय ओर सुहृदको आगमन होय ओर स्त्रीको आगमन अभीष्टजयादिकनकी वार्ता होय ओर यात्रानमें सुंदरशब्द बोले तो अर्थसिद्धी होय ॥ ३७॥

वातालयेदुर्दिनवातमेघाश्चौराप्तिनष्टार्थसमागमौच संतोषवार्त्तावरयोषिदाप्तिर्यात्रारवेस्यान्मधुरेप्रशस्ता ३८ यामेतृतीयेविरुवीत्युदीच्यांकाकोर्थलाभोनृपसेवकानाम् भोज्याप्तिवृद्धीशुभदाचवार्त्ताप्रयाणकंवैश्यसमागमश्च ३९ दिश्यंधकारेकुरुतेसुशब्दोभोज्यंजयंहानिकलीकुशब्दः ब्रह्मप्रदेशेतिलतंदुलाभ्यांभोज्यंसतांबूलसुपादधाति ४० इतिकाकरुतेदिक्चक्रप्रकरणेतृतीयप्रहरेशुभाऽशुभफलम्

॥ टीका ॥

वातालयइति वायव्येदुर्दिनेमेघवार्त्ताभवति चौराप्तिनष्टार्थसमागमौचभवतः तथासंतोषवार्तावरयोषिदाप्तिश्चभवति मधुरेरवेयात्राप्रशस्तास्यात् ३८ यामइति तृतीयेयामे उदीच्यांकाकोविरुवीति तदा नृपसेवकानांअर्थलाभः स्यात् तथाभोज्याप्तिवृद्धीभवतः शुभदाचवार्त्ता तथाप्रयाणकंवैश्यसमागमश्च ३९ दिशीति अंधकारेईशानदिशि सुशब्दः भोज्यंजयंकुरुते चकुशब्दःहानिं कलिंकरोति ब्रह्मप्रदेशे तिलतंदुलाभ्यांभोज्यंसतांबूलसुपादधाति ४० इतिवसंतराजटी॰काकरु॰दिक्प्रकरणंतृ॰प्र॰शु॰ऽशु॰फ॰

॥ भाषा ॥

॥वातालयेइति॥ वायव्यकोणमें बोले तो खोटो दिन और पवनमेघकी वार्त्ता होय और चौरकी प्राप्ती नष्ट अर्थको समागम संतोषकी वार्ता श्रेष्ठस्त्रीकी प्राप्ती ये होंय और काकके मधुरशब्दमें यात्रा शुभ हे ॥ ३८ ॥ यामइति ॥ तृतीयप्रहरमें उत्तरदिशामें काक विशेष शब्द करे तो राजसेवकनके सकाशसूं अर्थको लाभ होय भोजनपदार्थकी प्राप्ती वृद्धी शुभकी देवेवाली वार्ता गमन वैश्य समागम ये होंय ॥ ३९ ॥ दिशीति ॥ ईशान दिशामें तृतीयप्रहरमें काक सुंदरशब्द करे तो भोज्यपदार्थ और जय करे और कुशब्द करे तो हानी और कलह करे आकाशमें स्थित होय तृतीय प्रहरमें बोले तो

ऐंद्र्यांतुरीयेप्रहरेर्थलाभोभूमीशपूजाभयवृद्धिरोगाः
वह्नेर्विभागेभयरोगमृत्युः शिष्टागमोवायसवासितेन
४१ याम्येरवेतस्करवैरिभीतिः स्यातांचशिष्टागम-
रोगमृत्युः स्याद्यातुधान्यांमहतीप्रवृद्धिरभीष्टसिद्धिः
पथिचोरयुद्धम् ४२ दिशिप्रतीच्यांप्रहरेचतुर्थेद्वि-
जातिरभ्येतिततोर्थलाभः आयातियोषिद्विजयोंबु
वृष्टिः सिद्धिः प्रयाणेनृपविद्वरस्य ४३

॥ टीका ॥

ऐंद्र्यामिति तुरीयेप्रहरे ऐंद्र्यां पूर्वस्यां अर्थलाभः स्यात् भूमीशपूजाभयवृद्धि रोगाः स्युः वह्नेर्विभागेवायसवासितेन भयरोगमृत्युशिष्टागमाः स्युः ४१ याम्येइति याम्येदक्षिणस्यां काकरवेसति तस्करवैरिभीती स्यातां तथा शिष्टागमः रोगमृत्युश्च यातुधान्यां महतीप्रवृद्धिः अभीष्टसिद्धिः पथिचोर युद्धंचस्यात् ४२ दिशीति प्रतीच्यांदिशि चतुर्थेप्रहरे द्विजातिरभ्येति ततोऽर्थलाभः तथायोषिदायाति विजयश्च अंबुवृष्टिः स्यात् प्रयाणेसिद्धिः स्यान्नृपविद्वरस्येति ४३ ॥ छ॥

॥ भाषा ॥

तिल चांवल भोज्यपदार्थ तांबूल येसब करे ॥४०॥ इतिश्रीवसंतराजभाषाटीकायां काकरुतेदिक्प्रकरणं तृतीयप्रहरे शुभाऽशुभफलं ॥ ऐंद्र्यामिति ॥ चोथे प्रहरमें पूर्व दिशामें काक बोले तो अर्थलाभ होय राजपूजा भयवृद्धि रोग ये होंय और अग्निकोणमें चोथे प्रहरमें बोले तो भय रोग मृत्यु महज्जनको आगमन ये होंय ॥४१॥ याम्यइति ॥ दक्षिणमें काक बोले तो चौरभीती वैरीको भय शिष्टजननको आगम रोग मृत्यु ये होंय और नैर्ऋत्यकोणमें बोले तो महान् वृद्धि अभीष्टासिद्धी मार्गमें चौर और युद्ध ये होंय ॥४२॥ दिशीति ॥ पश्चिमदिशामें चोथे प्रहरमें काक बोले तो कोई ब्राह्मण आवे और अर्थलाभ स्त्रीको आगमन विजय जलकी वर्षा प्रयाणमें सिद्धी राजा-

वायव्यभागेकरटस्यशब्दैरायातियोषित्प्रियमानिनी या ध्रुवंप्रवासोदिनसप्तकेनशीघ्रागमःस्याद्गमने कृतेच ४४ कुबेरभागेपथिकोभ्युपैति तांबूललाभः कुशलस्यवार्त्ता वैश्याद्धनाप्तिस्तुरगाधिरूढाया त्राविभूत्यैम्रियतेचरोगी ४५ स्थाणोर्दिशिस्थैर्बलिभुग्विरावैः सुवर्णवार्त्तासरुजोविनाशः ब्रह्मप्रदेशेप्रहरेतुतुर्येवार्ताभवेन्मध्यमिकेष्टसिद्धिः ४६

इतिकाकरुतेदिक्चक्रप्रकरणेचतुर्थप्र॰शु॰शु॰फलं

॥ टीका ॥

वायव्येति वायव्यभागेकरटस्यशब्दैः प्रियमानिनीया योषिद्भवति साआयाति तथा दिनसप्तकेनध्रुवंप्रवासोभवति गमनेकृतेचशीघ्रागमःस्यात् ४४ कुबेरइति उत्तरस्यांपथिकः अभ्युपैति तथा तांबूलस्यलाभः कुशलस्यचवार्त्ता तथा वैश्याद्धनाप्तिः तुरगाधिरूढाच यात्राविभूत्यैभवति रोगीम्रियतेच ४५ स्थाणोरिति स्थाणोर्दिशिस्थैः बलिभुग्विरावैः सुवर्णवार्तास्यात् सरुजश्चविनाशः ब्रह्मप्रदेशे तुरीये प्रहरे यात्रामध्यमिकाभवेत् तथेष्टसिद्धिश्च ४६ इतिवसंतराजटीकायांकाकरुतेदिक् प्रकरणे

॥ भाषा ॥

और धनवान् वैश्य ये होंय वा प्रयागमें राजा और धनवान् वैश्य मिलें ॥ ४३ ॥ ॥वायव्येति॥ वायव्य कोणमें काक बोले तो भर्तारकर मानवेके योग्य ऐसी स्त्री आवे और सातदिनमें निश्चयही प्रवास अर्थात् यात्रागमन याग मन करे तो शीघ्र आगमन होय ॥ ४४ ॥ कुबेरइति॥ उत्तर दिशामें बोले तो पथिक घर आवे और तांबूलको लाभ कुशलकी वार्ता वैश्यतें धनकी प्राप्ती घोडापे बेठनो यात्रा करे तो विभूति होय और रोगी होय तो मरे ॥ ४५॥ स्थाणोरिति॥ ईशानकोणमें काक-बोले चोथे प्रहरमें तो सुवर्णकी वार्ता रोगको नाश करे और आकाशमें ठाडो होय

यत्भाषितंशाकुनिकैर्विमिश्रंशुभाशुभंदिक्प्रहरक्रमेण तथाऽशुभंयच्छतिदीप्तशब्दःश्रेयस्करःशांतरवस्तुकाकः ४७ रम्येरवेदीप्तदिशिप्रपश्यन् शांतांदिशंभूरिफलंददाति तदेवतुच्छंवितरत्यशो चेदीप्तांस्थितःपश्यतिदीप्तकाष्ठाम् ४८ यथोपदिष्टंफलमत्रदुष्टंतथैवतद्दीप्तदिशिस्थितःसन् ध्वांक्षोविरूक्षोविरवं करोतिनिरीक्ष्यमाणःककुभंप्रदीप्ताम् ४९

॥ टीका ॥

चतुर्थप्रहरेशुभाशुभफलं ॥छ॥ यदिति दिक्प्रहरक्रमेणशाकुनिकैर्विमिश्रंशुभाऽशुभंयद्भाषितं तत्र दीप्तःशब्दःकाकः अशुभंयच्छति शांतरवश्चकाकःश्रेयस्करःस्यात् ४७ रम्यइति दीप्तादिशि रम्येरवेसति शांतदिशंपश्यन्काकः भूरिफलंददाति असौकाकः तदेवतुच्छंवितरति यः दीप्तस्थितः दीप्तकाष्ठांचपश्यति ४८ यथोपदिष्टमिति यथायेन प्रकारेण दुष्टमत्र फलमुपदिष्टं तेनप्रकारेण दीप्तादिशिस्थितः सन् ध्वांक्षोविरूक्षंविरवं प्रदीप्तांककुभं निरीक्ष्यमाणः करोति ४९

॥ भाषा ॥

वोले तो यात्रा मध्यमिका होय और इष्टसिद्धी होय ॥४६॥ इतिश्रीवसंतराजभाषाटीकायां काकरुते दिक्चक्रप्रकरणे चतुर्थप्रहरे शुभाऽशुभफलं ॥ यदिति ॥ शाकुनाचारीननें दिशाप्रहरके क्रमकर मिलवां शुभअशुभ फल जो कह्यो उनदोनोनमेंसूं दीप्तशब्द वोलवेवारो काक अशुभ देवे और शांतशब्द वोले सो कल्याण करे ॥४७॥ रम्यइति ॥ दीप्तदिशामें स्थित होय शांत वोले शांतदिशामें दीखे तो काक वोहोत फल देवे और येही काक अपवित्रस्थानमें स्थित होय दीप्तदिशामें वैठेहोय और दीप्तदिशामाऊं देखतो होय तो तुच्छ फल करे ॥४८॥यथोपदिष्टमिति॥

काकः प्रशांताभिमुखोतितुच्छंदीप्ताश्रितोदुष्टफलं
ददाति शांताश्रितः शांतदिगीक्षणोनरूक्षारवोऽ
ल्पंकथयत्यनिष्टम् ५० शांतस्वरः शांतककुप्प्रदे
शोतिष्ठन्प्रदीप्तांककुभंचपश्यन् ददात्यभीष्टंफल
मल्पमेवदीप्तामपश्यंस्तुतदेवपूर्णं ५१ आकारचेष्टारवभा
वविज्ञादग्धादिकाष्ठादितयोःप्रमाणे सदाभियुक्ताश्चनिरू
पयंतिविंदंतितेकाकरुतंमनुष्याः ५२ इ० वं० का० रु० दि० प्र० १

॥ टीका ॥

काकइति प्रशांताभिमुखः काकः अतितुच्छंदुष्टंफलंददाति दीप्ताश्रितः दुष्टफलंददाति शांताश्रितः शांतदिगीक्षणोनरूक्षारवः अल्पमनिष्टंकथयति ५० शांतइति शांतककुभ्प्रदेशोतिष्ठन्शांतस्वरः प्रदीप्तांककुभं चपश्यन्नभीष्टंफलमल्पमेवददाति दीप्तामपश्यन्पुनः तदेवपूर्णंफलंददाति ५१ आकारइति तेऽभियुक्ताः पंडिता आकारचेष्टारवभावविज्ञाः दग्धादिकाष्ठादियद्वर्तते तयोः प्रमाणेनिरूपयंति ते मनुष्याः काकरुतंविन्दंति ५२ इतिशत्रुंजयकरमोचनादिसुकृतकारिमहोपाध्यायश्रीभानुचंद्रवि० वसंतराजटी० काकरुतेदिक्चक्रप्रकरणंप्रथमं १

॥ भाषा ॥

जो काक दीप्तदिशामें स्थित होय रूखो शब्द करे दीप्तदिशामें देखतो होय तो दुष्ट फल करे ॥ ४९ ॥ काकइति ॥ शांतदिशामें मुख होय और दीप्त दिशामें वेठो होय तो काक अति तुच्छ दुष्ट फल देवै और शांतदिशामें होय शांत दिशामें देखतो होय और रूखो शब्द वोले तो अल्प अनिष्ट फल कहेहे ॥ ५० ॥ शांतइति ॥ शांतदिशामें वेठो होय शांतस्वर वोलतो होय और दीप्तदिशामें देखतो होय तो अभीष्ट फल अल्पही देवे जो दिप्त दिशामें नहीं देखतो होय तो फिर वोही पूर्ण फल देवे ॥ ५१ ॥ आकारइति ॥ जे आकार चेष्टा शब्दभाव इनकूं जाने और दग्धादि दिशादिकनके

वर्षकालमधिकृत्यकिंचनप्रोच्यतेबलिभुजोऽधुनाक्रमात् आलयांडकविचारसुंदरंशाकुनंसकलशाकुनोत्तमं ५३ वैशाखमासेनिरुपद्रवेषु द्रुमेषुकाकस्यशुभायनीडं निंद्येषुशुष्केषुसकंटकेषुवृक्षेषुदुर्भिक्षभयायहेतुः ५४ प्रशस्तवृक्षेयदिपूर्वशाखामाश्रित्यकाकेनकृतंकुलायं तद्वृष्टिरिष्टाकुशलंप्रमोदोनीरोगतास्याद्विजयश्चराज्ञः ५५

॥ टीका ॥

वर्षइति वर्षाकालमधिकृत्य अधुनाबलिभुजः क्रमात् आलयांडकविचार सुंदरंशाकुनंसकलशाकुनोत्तमंप्रोच्यते ५३ वैशाखइति वैशाखमासेनिरुपद्रवेषु द्रुमेषुकाकस्यशुभायनीडं भवति तथाशुष्केषुनिंद्येषुसकंटकेषुवृक्षेषुदुर्भिक्षयादिहेतुर्भवति ५४ प्रशस्तइति यदि प्रशस्तवृक्षेपूर्वशाखामाश्रित्य काकेनकुलायंकृतं तदावृष्टिरिष्टाकुशलंच तथा प्रमोदः नीरोगताराज्ञोविजयश्चभवति ५५

॥ भाषा ॥

प्रमाणमें निरूपण करें योग्य होय ते मनुष्य काकके शब्दकूं जाने हे ॥ ५२ ॥ इतिश्रीवसंतराजभाषाटीकायां काकरुते दिक्प्रकरणं प्रथमं ॥१॥ वर्षइति ॥ वर्षाकालकूं अधिकार करकें अव काकको स्थान अंडाके विचारसूं सुंदर सवशकुननमें उत्तम शकुन कहेंहें ॥ ५३ ॥ वैशाखइति ॥ वैशाखके महिनामें उपद्रवरहित वृक्षनपे काकको घर होय तो शुभके अर्थ हे ओर शुष्क होय निंदाके योग्य होय एसे कांटेनके वृक्षनमें काकको घर होय तो दुर्भिक्ष भयादिकनको करवेवालो जाननो ॥ ५४ ॥ प्रशस्तवृक्षेति ॥ उत्तमवृक्षके ऊपर पूर्व माऊकी शाखापे बेठकरकें काकनें घर वनायो होय तो वृष्टी अछी होय ओर कुशल हर्ष निरोगता राजाको विजय ये करे ॥ ५५ ॥ ॥ छ ॥ ॥ छ ॥

आग्नेयशाखारचितेचनीडेस्याद्वृष्टिरल्पाग्निभयंकलि
श्च दुर्भिक्षशत्रूद्रवदेशभंगाभवंतिरोगाश्चचतुष्प
दानां ५६ याम्यासुशाखासुचवायसेननीडेकृतेऽ
ल्पंजलपातमाहुः व्याधिप्रकोपंमरणंसमंतादन्नक्ष
यंराजविरोधतांच ५७ नैर्ऋत्यशाखारचितेचनीडे
पश्चाद्घनोवर्षतिवर्षकाले पीडानृणांविड्वरचौरभीति
र्दुर्भिक्षयुद्धानिभवंत्यवश्यं ५८ नीडेकृतेपश्चिम
वृक्षशाखामाश्रित्यकाकैः कथितातिवृष्टिः

॥ टीका ॥

आग्नेयइति आग्नेयशाखारचितेनीडे वृष्टिरल्पाग्निभयं कलिश्च दुर्भिक्ष
शत्रूद्रवदेशभंगा रोगाश्च चतुष्पदानांभवंति ५६ याम्येति याम्यासु
शाखासुच वायसेननीडे कृतेऽल्पंजलपातमाहुः तथा व्याधिप्रकोपंमर-
णंसमंतादन्नक्षयंराजविरोधतांचाहुः ५७ नैर्ऋत्यंइति नैर्ऋत्यशा
खारचिते कुलाये वर्षाकाले पश्चात् घनोवर्षति अवश्यंनृणां पीडाविड्व
रचौरभीतिः दुर्भिक्षयुद्धानिचभवंति ५८ नीडइति पश्चिमवृक्षशा-
खामाश्रित्य काकैः नीडेकृतेऽतिवृष्टिः कथिता तथा लोके निरोगताक्षेम

॥ भाषा ॥

॥आग्नेयइति॥ जो काक वृक्षकी अग्निकोणकी शाखामें घर करे तो वृष्टी अल्प होय
और अग्निभय कलह दुर्भिक्ष शत्रूतें देशभंग रोग चोपदानकूं ये सब होंय ॥ ५६॥
॥याम्येति ॥ जो काकनें वृक्षकी दक्षिण शाखामें घर कियो होय तो अल्पजलपात होय
और व्याधिप्रकोप मरण अन्नक्षय राजविरोधता ये होय ॥ ५७॥ नैर्ऋत्यइति ॥
वृक्षकी नैर्ऋत्यकोणकी शाखामें घररचो होय तो वर्षाकालमें मेघपीछेंपे वर्षै और
मनुष्यनकूं अवश्य पीडा धनवान् वैश्यनकूं चौरभीती दुर्भिक्षयुद्ध ये होंय ॥५८॥
॥नीडइति॥ जो काकननें वृक्षकी पश्चिमदिशाकी शाखामें बेठकर घर कियो होय

निरोगताक्षेमसुभिक्षवृद्धिः संपत्प्रमोदाश्चभवन्ति
लोके ५९ वायव्यशाखासुकृतेचनीडे प्रभूतवाताल्प-
जलाःपयोदाः स्युर्मूषकोपद्रवसस्यनाशः पशुक्ष
योद्वेगमहाविरोधाः ६० कुबेरशाखामधिकृत्य
नीडेकृतेभवेत्प्रावृषिवृष्टिरिष्टा भवंतिचक्षेमसु-
भिक्षसौख्यनीरोगतावृष्टिसमृद्धयोऽस्मिन् ६१
ईशानशाखासुचवृष्टिरल्पाचिरंप्रजानामुपसर्गदोषः
स्याद्बांधवानांकलहप्रवृत्तिर्मर्यादयाहीयतएषलोकः ६२

॥ टीका ॥

सुभिक्षवृद्धिः संपत्प्रमोदाश्चभवंति ५९ वायव्यइति वायव्यशाखासु नीडेकृते प्रभूतवाताल्पजलाः पयोदाःस्युः तथामूषकोपद्रवसस्यनाशः पशुक्षयोद्वेगमहाविरोधाः स्युः ६० कुबेरइति कुबेरशाखामधिकृत्यनीडेकृते प्रावृषिवृष्टिरिष्टाभवेत् तथाऽस्मिन्जाते सुक्षेमसुभिक्षंसौख्यंनीरोगतावृष्टिसमृद्धयः भवंति ६१ ईशानेति ईशानशाखासुचवृष्टिरल्पास्यात् वैरंप्रजानां उपसर्गदोषौ स्यातां तथा बांधवानांकलहप्रवृत्तिः स्यात् तथाएषलोकः मर्यादयाहीयतेहीनोभवतीत्यर्थः ६२

॥ भाषा ॥

तो अतिवृष्टि लोकमें निरोगता क्षेम सुभिक्ष वृद्धि संपदा हर्ष ये होंय ॥५९॥ वायव्यइति ॥ वृक्षकी वायव्य कोणकी शाखामें घर करे तो पवन अल्प जलके मेघ-मूसान करकें उपद्रव अन्नको नाश पशूनको क्षयउद्वेग महाविरोध ये होंय ॥६० ॥कुबेरइति॥ वृक्षकी उत्तरमाऊंकी शाखापे स्थितहोय घरकरे तो वर्षाकालमें योग्य अछी वृष्टी होय वर्षाके होतेंही क्षेम सुभिक्ष सौख्य निरोगता वृद्धी समृद्धी येहोंय ॥६१॥ ईशानेति॥ वृक्षकी ईशानशाखामें घरकरे तो अल्पवृष्टी प्रजानके वैर और ऊपरलोदोष बांधवनको कलह मर्यादयाकर हीन लोक ये होंय ॥६२॥ ॥छ॥

वृक्षाग्रनीडेत्वातिवर्षकालो मध्येतरोर्मध्यमतोयपा
तः तुच्छापिवृष्टिर्नभवत्यधस्तात्स्फुटंयथोक्तं
नदिशोऽस्फुटत्वात् ६३ अवृष्टिरोगारिभ
यादिवृद्धिं विंद्याच्चभूमौ बलिभुक्कुलाये शुष्केच
वृक्षेडमरान्ननाशोप्राकाररंध्रेऽरिभयंप्रभूतम् ६४
निम्नप्रदेशे तरुकोटरेवावल्मीकरंध्रे अवनीष्वपी
ह काकस्यनीडेरुगवृष्टिदोषैर्भवंतिशून्यानियमे
नदेशाः ६५ इतिकाकरुते आलयप्रकरणम् २

॥ टीका ॥

वृक्षाग्रइति वृक्षाग्रनीडेतु अतिवर्षकालः तरोर्मध्येमध्यमतोयपातः स्यात् अधस्तान्नीडे कृते तुच्छापिवृष्टिर्नभवति दिशः अस्फुटत्वात् यथोक्तंस्फुटंनभवति ६३ अवृष्टिरिति भूमौचबलिभुक्कुलायेकृते अवृष्टिरोगारिभयादिवृद्धिं विंद्यात् तथा शुष्केचवृक्षेडमरान्ननाशौस्याताम् तथा प्राकाररंध्रे प्रभूतमरिभयं भवति ६४ निम्नइति निम्नप्रदेशे वा तरुकोटरे वल्मीकरंध्रे अवनीष्वपि काकस्यनीडेसति भयवृष्टिदोषैः नियमेन देशाः शून्याः स्युः ६५ इतिश० वसं०टी० काकाल०प्र०२

॥ भाषा ॥

॥ वृक्षाग्रेति ॥ वृक्षके अग्रभागमें घर करेतो अतिवर्षा होय और वृक्षके मध्यभागमें घर करे तो मध्यमजलकी वर्षा होय और जो वृक्षके नीचें घर करे तो अल्पवी वृष्टी नही होय ॥ ६३ ॥ अवृष्टिरिति ॥ काक पृथ्वीमें घर करे तो अवृष्टीरोग अरिभयादिककी वृद्धी जाननी और सूके वृक्षमें घर करे तो प्रलयकोसोनाश और अन्ननाश होय तेसेंही प्राकारमें छिद्र होय वोहोत सो वैरीको भय होय ॥ ६४ ॥ निम्नइति ॥ कहूं नीचे देशमें वा वृक्षकी कोटरामें वा वंवेंके छिद्रमें वा पृथ्वीमें काकको घर बनो होय तोभयवृद्धी दोषइनकरकें और नियमकरकें देशशून्य होंय ॥ ६५ ॥ इ० व० टी० काकरुतेआ०प्र०२

अथकाकांऽडविचारः ॥ एकंभवेद्वारणमग्निसंज्ञं
द्वितीयकंमारुतजंतृतीयं ऐंद्रंतथानामचतुर्थमेव
मंडानिकाक्याः परिकीर्तितानि ६६ काक्याभवे
द्वारणमंडकंचेत्पृथ्वीतदानंदतिसर्वसस्यैः मन्दः
प्रवर्षोनलसंज्ञकेंडेनोप्तस्यबीजस्यभवेत्प्ररोहः ६७
जातानिसस्यानिसमीरजेंडेखादंतिकीटाः शलभाः
शुकाद्याः क्षेमंसुभिक्षंसुखिताधरित्रीस्यादिंद्रजें
डेभिमताचसिद्धिः ६८ इतिकाकरुतेंडप्रकरणं ३

॥ टीका ॥

एकमिति एकं वारुणंभवेत् द्वितीयकमग्निसंज्ञकं तृतीयंमारुतजं चतुर्थंनाम ऐन्द्रं एतानिकाक्याः अंडानिपरिकीर्तितानि ६६ काक्याइति वारुणमंडकंचेत् काक्याभवेत् तदासर्वसस्यैः पृथ्वी नंदति अनलसंज्ञकेंऽडे मन्दः प्रवर्षोभवेत् तथोप्तस्यबीजस्यप्ररोहो नभवेत् ६७ जातानीति . समीरजेंडे जातानि सस्यानि कीटाः शलभाः शुकाद्याः खादंति इंद्रजेंडे क्षेमंसुखिताधरित्रीस्यात् तथाऽभिमताच सिद्धिः स्यादित्यर्थः ६८ इतिवसंतराजशाकुनेकाकरुते अण्डप्रकरणम् तृतीयम् ३

॥ भाषा ॥

॥ अथकाकांडविचारः ॥ एकमिति ॥ पहलो वारुणनाम १ दूसरो अग्निसंज्ञा २ तीसरोमारुतनाम ३ चोथो ऐंद्रनाम ४ ये काककी स्त्री कागली ताके अंडानके च्यार नाम कहें हें ॥ ६६ ॥ काक्याइति ॥ जो कागली वारुण नाम अंडा धरे तो पृथ्वी सर्व अन्नन करकें आनंद करे ओर जो अग्निसंज्ञा नाम अंडा धरे तो मंदवर्षा होय ओर वीजवोयो होय ताको अंकुर नहीं प्रगट होय ॥ ६७ ॥ जातानीति ॥ जो काजली समीरज नाम अंडा धरे तो प्रगट हुये अन्नकूं टीडीसू आइनकूं आदिले कीडा अन्नखाय जांय ओर जो ऐंद्र नाम अंडा धरे तो क्षेम सुभिक्ष सर्वपृथ्वी सुखी होय ओर तेसेंही

यात्रानिमित्तान्यथकीर्त्तयामः सकृत्प्रजानांशकुनानितानि विज्ञाययानि प्रजहात्यनर्थान्स्वार्थांश्चसर्वान्कुरुतेध्वनीनः ६९ भुंक्तेबलिंपक्षिषुमंत्रपूतंत्वंप्राणिषुप्राणिषिसर्वलक्षम् गुप्तेनिजांस्त्रीं भजसेनमोस्तुतुभ्यंखगेंद्रायसकृत्प्रजाय ७० विलोक्यकाकंविनिवेद्यतस्मैमंत्रेणपूजांदधिभक्तयुक्ताम् उदीर्यकार्यंनिजमध्वगेनविलोकनीयंशकुनंतदर्थम् ७१

॥ टीका ॥

यात्राइति अथेति अंडनिरूपणानंतरं सकृत्प्रजानां यात्रानिमित्तानि तानि शकुनानि वयंकीर्त्तयामः यानि विज्ञाय अध्वनीनः अनर्थान्जहाति सर्वान्स्वार्थांश्च कुरुते ६९ भुंक्तेइति त्वंपक्षिषु मंत्रपूतं बलिंभुंक्ष्व त्वं प्राणिषु सर्व लक्षं प्राणिषि गुप्तेस्थानेनिजांस्त्रीं भजसे अतः तुभ्यंखगेंद्रायनमः सकृत्प्रजायनमोस्तु ७० विलोक्येति काकंविलोक्यतस्मै मंत्रेण दधिभक्तयुक्तांपूजां विनिवेद्य निजंकार्यमुदीर्य अध्वगेनशकुनं विलोकनीयं तदर्थं स्वकार्यार्थमित्यर्थः ७१

॥ भाषा ॥

वांछित सिद्धी होय ॥६८॥ इतिवसंतराजभाषाटी० काकरुते अंडप्रकरणं ३ ॥ यात्राइति॥ अंडानको प्रकरण कहेपीछें अब प्रजानकूं यात्राके निमित्त शकुन कहें हे जिनशकुनकूं जानकरकें मार्गके चलवेवारे मनुष्य अनर्थनकूं दूर करे और स्वार्थ करे ॥६९॥ भुंक्तेइति ॥ हे काक तुमपक्षीनमें मंत्रकर पवित्रहुयो बलि ताय भोगो हो और तुम प्राणीनमें लक्षवर्षपर्यंत रहोहो और गुप्तस्थानमें अपनी स्त्रीकूं सेवन करो हो यातें पक्षीनमें इंद्ररूप तुमारे अर्थ नमस्कार हो और एकही संतान जाके होय एसे तुम ता तुमारे अर्थी नमस्कार हो ॥७०॥ विलोक्येति ॥ काककूं देखकर फिर भात दही सहीत पूजा पूर्वमंत्रकर निवेदन करकें निजकार्य कह करकें फिर अपनेकार्यके अर्थ शकुन देखनो चाहिये ॥७१॥

वामेनशब्दंमधुरंविमुंचन्व्रजंश्चवामेनकरोतिकाकः
सर्वार्थसिद्धिंपुनरागमंचशुभप्रवेशोतुतदन्यरूपः ७२
प्रदक्षिणंयः प्रविधायमार्गेवामेनकाकोविनिवर्त्ततेसौ
यातुःकरोतीहितकार्यसिद्धिंक्षेमंचशीघ्रंपुनरागमंच
७३ वामःकलंरौत्यनुलोमयायीयोवायसोसौस
कलार्थसिद्ध्यै स्यातांक्रमाद्दक्षिणवामशब्दौसि-
द्धौविरुद्धेविपरीतभावौ ७४

॥ टीका ॥

वामेनेति वामेनशब्दंमधुरंविमुंचन्व्रजंश्चवामेनकाकः सर्वार्थसिद्धिं करोति पुनरागमं च तदन्यरूपः पूर्वस्माद्विपरीतः पुनः नशस्तः कथितः ७२ प्रदक्षिणमिति यःकाकः प्रदक्षिणंप्रविधाय वामेनविनिवर्त्तते असौ यातुः गच्छतःपुंसः ईहितकार्यसिद्धिं क्षेमंच शीघ्रं पुनः आगमनंचं करोति ७३ वामइति योवायसः वामःकलं रौति कीदृक् अनुलोमयायी सकलार्थसिद्ध्यैस्यात् क्वापि कलहायसिद्ध्यैस्यादितिपाठः तदा कलहाय कलहनिमित्तप्रश्ने सिद्धिःस्यादित्यर्थः क्रमादिनिदक्षिणवामशब्दौ सिद्धौ विरुद्धेचस्यातां विपरीतभावौ ज्ञेयौ ७४

॥ भाषा ॥

॥ वामेनेति ॥ काक वामभागमें मधुरवाणी बोलतो हुयो वामभागमेंही गमन करे तो सर्वार्थ सिद्धी करे फिर आगमन करे और पूर्वतें विपरीत होयतो फिर शुभ नहीं करे ॥७२॥ प्रदक्षिणमिति ॥ जो काक मार्गमें प्रदक्षिण होय वामकर निवर्त्त होय तो गमन कर्ता पुरुषकूं वांछित कार्यकी सिद्धी क्षेम और शीघ्र पीछे आगमन करे॥ ७३ ॥ वामइति ॥ जो काक वामभागमें मधुर बोले अनुलोमा गमन करत तो सकलार्थसिद्धी होंय जो दक्षिण वाम दोनो शब्द सिद्धीके अर्थ हैं और जो ओरसूं ओर होय तो विपरीत फल करे ॥७४॥ ॥ छ॥ ॥ छ॥

पृष्ठेविरावंमधुरंविमुंचन्ननुव्रजंश्चाभिमतोहिताय प्रायेणयातारमनुव्रजन्तः सर्वेपिकाकैः सदृशाविहंगाः ७५ कृतारवोयः पुरतः प्रयाति पुरस्थितोयो मुदमादधाति कण्डूयतेयश्चशिरोंघ्रिणासोपुंसांस दाभीष्टफलंददाति ७६ स्तंभेगजानांनियतंगजाप्तिंगजाधिरूढः पृथिवीपतित्वम् तुरङ्गमेवाहनभूमिलाभंकरोतिकाकोविजयंध्वजेच ७७

॥ टीका ॥

पृष्ठेइति पृष्ठे मधुरंविरावंविमुंचन् अनुव्रजंश्च हितायाभिमतः प्रायेण यातारमनुव्रजंतः सर्वेविहंगाः काकैः सदृशाः ज्ञेयाः ७५ कृतारवइति कृतारवोयः पुरतः प्रयाति पुरस्थितः योमुदमादधाति हर्षितोभवति शिरः अंघ्रिणायः कंडूयतेऽसौ पुंसां सदाऽभीष्टफलंब्रवीति ७६ स्तंभइति स्तंभेगजानां नियतं गजाप्तिं गजेधिरूढः पृथिवीपतित्वं इति गजानां स्तंभे नियतंगजाप्तिः स्यात् गजाधिरूढः काकः पृथिवीपतित्वं कुरुते तुरंगमेस्थितः काकः वाहनभूमिलाभं करोति ध्वजेस्थितः काकः विजयं करोति ७७ ॥ छ ॥

॥ भाषा ॥

॥ पृष्ठेइति ॥ जो पीठपीछें मधुरशब्द वोले ओर गमन करतो वोले तो हितके अर्थ जाननो ओर गमन कर्ताके पीछें गमन करे एसे संपूर्ण पक्षी काककी सदृश जाननो ॥ ७५
कृतारवइति ॥ जो काक वोलतो हुयो अगाडी चल्यो जाय अथवा अगाडी स्थित होय हर्ष करे ओर पाम कर मस्तक खुजावे तो पुरुषनकूं सदा अभीष्टफल देवे ॥ ७६ ॥
॥ स्तंभेइति ॥ हाथीनके निसानके ऊपर वेठो होय तो निश्चय गजकी प्राप्ती होय ओर गजपे वेठो होय तो पृथिवीपती करे ओर घोडापे वेठो होय तो वाहन ओर भूमि लाभ करे ध्वजापे स्थित होय तो काक विजय करे ॥ ७७ ॥ ॥ छ ॥

प्रनष्टलाभंविजयंचकूपेक्षिप्रंनदीरोधसिकार्यसिद्धिं
पूर्णेघटेंऽडेचधनाप्तिवृद्धिं ध्वांक्षोधिरूढः कुरुतेसुशब्दः ७८
प्रासादधान्योच्छ्रयहर्म्यपृष्टिनिष्पन्नसस्यावनिशाद्वलादौ
ध्वांक्षोधिरूढोधनसाधनायरौतिस्त्रियंयच्छतियुग्मशब्दः ७९
पृष्ठेपुरोवानवगोमयस्थोवटादिषुक्षीरतरुष्वपीह
स्थितोरुवन्भोजनपानमिष्टंविष्ठांचकुर्वन्वितरत्यवश्यम् ८०

॥ टीका ॥

प्रनष्टेति कूपेस्थितः प्रनष्टंलाभंविजयंचकरोति नदीरोधसिस्थितः क्षिप्रं कार्यसिद्धिंकरोति पूर्णेघटेंऽडे चाधिरूढो ध्वांक्षः सुशब्दः सन् धनाप्तिवृद्धिं कुरुते ७८ प्रासादेति तत्रप्रासादोदेवभूपानां गृहं धान्योच्छ्रयो धान्यराशिः हर्म्यंसामान्यगृहं पृष्टिर्हस्त्यादीनांप्रसिद्धा निष्पन्नंसस्यंयस्यामेवंविधावनिः शाद्वलंबालतृणं आदिशब्दादन्येषांशुभवस्तूनां परिग्रहः एषु ध्वांक्षोऽधिरूढः धनसाधनायभवति युग्मशब्दः यदा रौति तदास्त्रियंयच्छति ७९ पृष्ठेइति पृष्ठे तथा पुरोनवगोमयस्थः वटादिषुक्षीरतरुषुइह स्थितोरुवन् भोजनपानमिष्टं वितरति विष्ठांचकुर्वन्नवश्यमितिभावः ८०

॥ भाषा ॥

॥ प्रनष्टेति ॥ कूपके ऊपर वेठो होय तो नष्टहुयेको लाभ और विजय करे और नदीके तटके ऊपर स्थित होय तो कार्यसिद्धी करे और पूर्ण कहिये भरोहुयो घटके ऊपर वा अंडापे वेठो होय और सुंदर शब्द करतो होय तो धनकी प्राप्ती और वृद्धी करे ॥ ७८ ॥ प्रासादेति ॥ देवमंदिर राजानके घर धान्यकी राशि सामान्य घर हाथी घोडादिकनकी पीठ अन्न जामें खूब भररह्यो होय एसी पृथ्वी छोटी घासकूं आदिलेकें और शुभवस्तूनपे काक वेठो होय तो धनके साधनके अर्थ जाननो और जो युग्म वोल वोले एसो काक इनपे वेठोहुयो वोले तो स्त्री प्राप्ती करे ॥ ७९ ॥ पृष्टेइति ॥ पीठपीछें वा अगाडी

अन्नाद्यवर्चः फलमूलपुष्पमांसादिभिः पूर्णमुखःस
दैव स्याद्दृष्टमात्रोभिमतार्थसिद्ध्यैमिष्टान्नभोज्या
यमुदेचकाकः ८१ नारीशिरः पूर्णघटास्थितस्य
काकस्यशब्दैर्वनिताधनाप्तिः शय्याधिरूढस्य तु
तस्यशब्दैः समागमः स्यात्स्वजनेनसार्द्धम् ८२
गोपृष्ठदूर्वातरुगोमयेषुतुंडंविघर्षन्नवलोकितोऽग्रे
आहारमन्यस्यतथाददानोददातिभोज्यंबलिभुग्विचित्रं ८३

॥ टीका ॥

अन्नाद्यवर्चइति अन्नाद्यवर्चः फलमूलपुष्पमांसादिभिः पूर्णमुखः काकः दृष्टमात्रः संदैवाभिमतार्थसिद्ध्यैस्यात् तथामिष्टान्नभोज्यायमुदेचभवति ८१ नारीति नारीशिरः पूर्णघटस्थितस्य काकस्य शब्दैर्वनिताधनाप्तिःस्यात् शय्याधिरूढस्य तु तस्यशब्दैः स्वजनेनसार्द्धंवनितासमागमः स्यात् ८२ गोपृष्ठइति गोपृष्ठदूर्वातरुगोमयेषुतुंडंविघर्षन् अग्रेऽवलोकितः तथान्यस्याहारंददानः बलिभुग्विचित्रंभोजनं ददाति ८३ ॥छ॥ ॥छ॥

॥ भाषा ॥

नवीनगोवरपे बेठो होय वडकूं आदिले दूधवान् वृक्षपे स्थित होय बोले तो भोजनपान वांछित करे जो वींट करतो होय तो अवश्य भोजनादिक करे ॥ ८० ॥ अन्नाद्यवर्चइति ॥ अन्नादिक फल मूलपुष्प मांसादिकन करकें मुख भरो होय तो काक दीखवे मात्रसूंही वांछितसिद्धी करे और मिष्टान्नभोज्यपदार्थ हर्ष होंय ॥ ८१ ॥ नारीति॥ स्त्रीके मस्तकपे और भरे हुये घटपे जो काक स्थित होयकर बोले तो स्त्रीकी और धनकी प्राप्ती करे और शय्याके ऊपर बेठके बोले तो स्त्रीसमागम होय ॥ ८२ ॥
॥गोपृष्ठइति॥ गौकी पीठकूं आदिले पीठनपे दूर्वापे वृक्षपे गोवरपे बेठ चोंचघिसतो जाय अगाडीकूं देखरह्यो होय औरकूं आहार देवे तो काकचित्रविचित्र भोज्यपदार्थ देवे ॥ ८३ ॥

प्रनष्टलाभंविजयंचकूपेक्षिप्रंनदीरोधसिकार्यसिद्धिं पूर्णेघटेंऽडेचधनाप्तिवृद्धिं ध्वांक्षोधिरूढः कुरुतेसुशब्दः ७८ प्रासादधान्योच्छ्रयहर्म्यपृष्टिनिष्पन्नसस्यावनिशाद्वलादौ ध्वांक्षोधिरूढो धनसाधनायरौतिस्त्रियंयच्छतियुग्मशब्दः ७९ पृष्ठेपुरोवानवगोमयस्थोवटादिषुक्षीरतरुष्वपीह स्थितोरुवन्भोजनपानमिष्टंविष्टांचकुर्वन्वितरत्यवश्यम् ८०

॥ टीका ॥

प्रनष्टेति कूपेस्थितः प्रनष्टंलाभंविजयंचकरोति नदीरोधसिस्थितः क्षिप्रं कार्यसिद्धिं करोति पूर्णेघटेंऽडे चाधिरूढो ध्वांक्षः सुशब्दः सन् धनाप्तिवृद्धिं कुरुते ७८ प्रासादेति तत्रप्रासादोदेवभूपानां गृहं धान्योच्छ्रयोधान्यराशिः हर्म्यंसामान्यगृहं पृष्टिर्हस्त्यादीनांप्रसिद्धा निष्पन्नंसस्यंयस्यामेवंविधावनिः शाद्वलंबालतृणं आदिशब्दादन्येषांशुभवस्तूनांपरिग्रहः एषु ध्वांक्षोऽधिरूढः धनसाधनायभवति युग्मशब्दः यदा रौति तदास्त्रियंयच्छति ७९ पृष्ठेइति पृष्ठेतथा पुरोनवगोमयस्थः वटादिषुक्षीरतरुषुइह स्थितोरुवन्भोजनपानमिष्टं वितरति विष्टांचकुर्वन्नवश्यामितिभावः ८०

॥ भाषा ॥

॥ प्रनष्टेति ॥ कूपके ऊपर वेठो होय तो नष्टहुयेको लाभ ओर विजय करे ओर नदीके तटके ऊपर स्थित होय तो कार्यसिद्धी करे ओर पूर्ण कहिये भरोहुयो घटके ऊपर वा अंडा पे वेठो होय ओर सुंदर शब्द करतो होय तो धनकी प्राप्ती ओर वृद्धी करे ॥ ७८ ॥ प्रासादेति ॥ देवमंदिर राजानके घर धान्यकी राशि सामान्य घर हाथी घोडादिकनकी पीठ अन्न जामें खूब भर रह्यो होय एसी पृथ्वी छोटी घासकूं आदिलेकें ओर सुभवस्तूनपे काक वेठो होय तो धनके साधनके अर्थ जाननो ओर जो युग्म वोल वोले एसो काक इनपे वेठोहुयो वोले तो स्त्री प्राप्ती करे ॥ ७९ ॥ पृष्टेइति ॥ पीठपीछें वा अगाडी

अन्नाद्यवर्चैः फलमूलपुष्पमांसादिभिःपूर्णमुखःस
दैव स्याद्दृष्टमात्रोभिमतार्थसिद्ध्यैमिष्टान्नभोज्या
यमुदेचकाकः ८१ नारीशिरःपूर्णघटास्थितस्य
काकस्यशब्दैर्वनिताधनाप्तिः शय्याधिरूढस्य तु
तस्यशब्दैः समागमःस्यात्स्वजनेनसार्द्धम् ८२
गोपृष्ठदूर्वातरुगोमयेषुतुंडंविघर्षन्नवलोकितोऽग्रे
आहारमन्यस्यतथाददानोददातिभोज्यंबलिभुग्विचित्रं

॥ टीका ॥ ८३

अन्नाद्यवर्चइति अन्नाद्यवर्चैः फलमूलपुष्पमांसादिभिः पूर्णमुखः काकः दृष्टमात्रः सदैवाभिमतार्थसिद्ध्यैस्यात् तथामिष्टान्नभोज्याय मुदेचभवति ८१ नारीति नारीशिरःपूर्णघटास्थितस्य काकस्य शब्दैर्वनिताधनाप्तिःस्यात् शय्याधिरूढस्य तु तस्यशब्दैः स्वजनेनसार्द्धंवनितासमागमः स्यात् ८२ गोपृष्ठइति गोपृष्ठदूर्वातरुगोमयेषुतुंडंविघर्षन् अग्रेऽवलोकितः तथान्यस्याहारंददानः बलिभुग्विचित्रंभोजनं ददाति ८३ ॥ छ॥ ॥ छ॥

॥ भाषा ॥

नवीनगोवरपे बेठे होय वडकूं आदिले दूधवान् रक्षपे स्थित होय बोले तो भोजनपान वांछित करे जो बींट करतो होय तो अवश्य भोजनादिक करे ॥ ८० ॥ अन्नाद्यवर्चइति ॥ अन्नादिक फल मूल पुष्प मांसादिकन करकें मुख भरो होय तो काक दीखवे मात्रसूं ही वांछितसिद्धी करे ओर मिष्टान्नभोज्यपदार्थ हर्ष होंय ॥ ८१ ॥ नारीति ॥ स्त्रीके मस्तकपे ओर भरे हुये घटपे जो काक स्थित होयकर बोले तो स्त्रीकी ओर धनकी प्राप्ती करे ओर शय्याके ऊपर बेठके बोले तो स्त्रीसमागम होय ॥ ८२ ॥ ॥ गोपृष्ठइति ॥ गौकी पीठकूं आदिले पीठनपे दूर्वापे रक्षपे गोवरपे बेठ चोंच घिसतो जाय अगाडीकूं देखरह्यो होय ओरकूं आहार देवे तो काक चित्रविचित्र भोज्यपदार्थ देवे ॥ ८३ ॥

धान्यंपयोवादधिवाप्यवाप्यविरौतिपश्यन्निधिला-
भकारी करोतिलाभंपुरतःसदृष्टोयस्यास्तिवक्त्रेतृ
णमप्यशुष्कम् ८४ वृक्षेषुरम्यांकुरपत्रपुष्पछा
याफलाढ्येषुसकृत्प्रजस्य शब्देनसिद्ध्यंत्यस
कृन्नराणांसदैवसर्वाणिसमीहितानि ८५ प्रशां
तनादःशिखरेतरूणांस्त्रीसंगसौख्यंकरटोविधत्ते
धान्यादिकूटेषुतथान्नलाभंगोपृष्ठगोगोवनिताधना
प्तिम् ८६ ॥छ॥

॥ टीका ॥

धान्यमिति धान्यंपयोवादधिवाप्यऽवाप्य विरौति पश्यन्वाविरौति सनि-
धिलाभकारीस्यात् यस्यवक्त्रेअशुष्कतृणमस्ति सपुरतःदृष्टःसन्लाभंक
रोति ८४ वृक्षेष्विति रम्यांकुरपत्रपुष्पछायाफलाढ्येषु स्थितस्यसकृ
त्प्रजस्यकाकस्य शब्देननराणां असकृत्पुनःपुनः सदैवसर्वाणि समीहि
तानिसिद्ध्यन्ति ८५ प्रशांतइति तरूणांशिखरे स्थितः प्रशांतशब्दः
करटःस्त्रीसंगसौख्यंविधत्ते तथाधान्यादिकूटस्थः अन्नलाभं करोति त
थागोपृष्ठगः गोवनिता धनाप्तिं धेनुस्त्रीद्रव्याणांप्राप्तिं विधत्ते ८६

॥ भाषा ॥

॥धान्यमिति॥ धान्य दूध दही इनपे वेठकर वोलतो जाय ओर देखतो जाय तो धन की प्राप्तीकरे ओर जा काकके मुखमें विना सूको तृण होय ओर अगाडीकूं देखतो होय तो लाभ करे ॥८४॥ वृक्षेष्विति॥ मनोहर अंकुर पत्र पुष्प छाया फल इनकर युक्त वृक्षनमें काक वोले तो मनुष्यनके सर्व कार्य वांछित सिद्ध होंय ॥८५॥ प्रशांतइति॥ वृक्षनके ऊपर काक शांत शब्द वोले तो स्त्री संग सौख्य करे ओर धान्यादिकनके समूहमें प्रशांतशब्द वोले तो अन्नलाभ करे ओर गौकी पीठपे शांत वोले तो गोवनिता धन इनकी प्राप्ती होंय ॥८६॥ ॥छ॥

क्षेमंविधत्तेकरभस्यपृष्ठेखरस्यपृष्ठेरिभयंवधंच -
क्रोडस्यपृष्ठेधनमर्थलाभं तस्यैवपृष्ठेह्यनलग्नपंके ८७
सद्योज्वरंसौरभपृष्ठसंस्थोमृतांगसंस्थोमरणंकरोति
कार्यक्षतिंरिक्तघटाऽश्मसंस्थः काकः कलिंकाष्ठम-
धिष्ठितश्च ८८ योदक्षिणंकूजतिदक्षिणेनप्रया
ति यश्चाभिमुखोभ्युपेति प्रयातिपृष्ठेप्रतिलोमग-
त्याकृतारवः पातयतेसरक्तम् ८९

॥ टीका ॥

क्षेममिति तथा करभस्य उष्ट्रस्य पृष्ठे स्थितः क्षेमंविधत्ते खरस्यपृष्ठेस्थितः अरिभयंबंधंच करोति क्रोडस्यसूकरस्य पृष्ठेस्थितः धनमर्थलाभंच करोति अनलग्नपंके तस्यैवपृष्ठेस्थितःकाकः सद्योज्वरंवक्ति ८७ सद्यइति सौरभपृष्ठसंस्थः मृतांगसंस्थश्चकाकः मरणंकरोति रिक्तघटाश्मसंस्थः रिक्तघटस्थोश्मस्थश्च कार्यक्षतिं कार्यनाशं करोति तथा काष्ठमधिश्रितः काकः कलिंकरोति ८८ यइति यः काकः दक्षिणंकूजति दक्षिणेनप्रयाति यश्चाभिमुखोभ्युपेति कृतारवःसन् प्रतिलोमगत्यापृष्ठे प्रयाति सरक्तंपातयति ८९ ॥छ॥

॥ भाषा ॥

॥क्षेममिति॥ उंटकी पीठपे शांत वोले तो क्षेम करे खरकी पीठपे शांत वोले तो धन-अर्थलाभ करे और गाडीके लगोहुयो कीच तापे वा कीच जाके लगरह्यो होय ता शूकरकी पीठपे स्थितकाक तत्काल ज्वर करे ॥८७॥ सद्यइति ॥ वैलकी पीठपे वैठे काक तत्काल ज्वर कहे है और मरेके अंगपे वैठे काक मरण करे और रीते घडापे पाषाणपे वैठो काक कार्यक्षती करे और काष्ठपे वैठे काक कलह करावे ॥८८ ॥यइति॥ जो काक दक्षिणमाऊं शब्द करे और दक्षिणमाऊं गमन करे और पीछैं सन्मुख आवे और सन्मुख वोल फिर प्रतिलोमगतीकरकें पीठपीछैं चलो जाय-

वामोरवोदक्षिणतस्ततःस्यादनर्थहेतुर्बलिभोजनस्य
वामप्रदेशेप्रतिलोमयानंविघ्नायलाभोगृहएवतेन ९०
प्रयातिपृष्ठेयदिदक्षिणेनकृतारवस्तद्रुधिरश्रुतिःस्यात्
वल्लीवरत्रादिचयोगृहीत्वा प्रदक्षिणंयातिसमर्प्यभी-
त्यै ९१ गोपुच्छवल्मीककृतास्पदश्चरुवन्भवेत्
सर्पविलोकनाय स्यान्मृत्यवेंगारचितास्थिसंस्थः
काकः प्रकुर्वन्कचकर्षणं च ९२

॥ टीका ॥

वामइति बलिभोजनस्यपूर्ववामः ततः दक्षिणतः योरवः स्यात्स अनर्थहेतुर्भवति तथा वामप्रदेशे प्रतिलोमयानं विघ्नायस्यात् अतः तेनगृहे एवलाभः स्यात् ९० प्रयातीति यदि दक्षिणेनकृतारवः पृष्ठेप्रयाति तर्हि रुधिरश्रुतिः रुधिरवार्ताश्रवणंस्यात् तथायःकाकः वल्लीवरत्रादि गृहीत्वा प्रदक्षिणंयाति सःसर्पभीत्येस्यात् ९१ गोपुच्छेति गोपुच्छ वल्लीककृतास्पदो रुवन्शब्दायमानः ससर्पविलोकनायस्यात् तथा अंगारचितास्थिसंस्थः कचकर्षणंचप्रकुर्वन् काको मृत्यवेस्यात् ९२

॥ भाषा ॥

तो वो रक्तपात करे॥८९॥वामइति॥ बलिभोजन कर्ताकाकको वामरव प्रथम होय फिर दक्षिण वोले तो अनर्थको हेतु होय और वामप्रदेशमें प्रतिलोम गमन करे तो विघ्नके अर्थ होय और ताकरकें घरमेंही लाभ होय ॥९०॥ प्रयातीति ॥ जो काक दक्षिणमाऊं वोलकर पीठपीछें चलो जाय तो रुधिरकी वार्ता सुने जो लता जेवडी मुखमें लेकें जेमने माऊं आवे तो सर्पको भय करे॥९१॥ गोपुच्छेति॥ गौकी पूंछ और सर्पकी बंबै इनपे वेठके वोले तो सर्पको दर्शन होय और अंगार चिता हाड इनपे वेठो होय औरकेश खेंचरह्यो होय तो मृत्यु होय ॥९२॥ ॥ छ॥

रुवन्पुरोहानिरुजौकरोतिमृत्युंपुनर्निष्ठुरपृष्ठशब्दः प्रसार्यरिक्तंवदनंय आस्तेसर्वत्रनिंद्योबलिभोजनोसौ ९३ वामोप्यसृक्पातभयंमृतिंवासंताडयन्नीरसदारुखंडम् चंच्वास्थिभंजन्ध्रुवमस्थिभंगंबंधंवधंजल्पतियुध्यमानः ९४ वामोतिरोगंकुरुतेविशुष्के तिक्तेचवृक्षेकलिकार्यनाशौ पक्षौविधुन्वान्विरुवन्स रूक्षंसकंटकेमृत्युमुपादधाति ९५

॥ टीका ॥

रुवन्निति काकः पुरोरुवन् हानिरुजौ करोति निष्ठुरपृष्ठशब्दः पुनः मृत्युं करोति यश्चरिक्तंवदनंप्रसार्य आस्तेऽसौबलिभोजनः सर्वत्रनिंद्यः स्यात् ९३ वामइति नीरसदारुखंडं संताडयन् काकः वामोपि असृक् पातभयंमृतिंवाकुरुते चंच्वाअस्थि भंजन् ध्रुवंनिश्चयेनास्थिभंगंवक्ति तथा युध्यमानो बंधंवधंजल्पति ९४ वामइति वामःकाकः विशुष्केवृक्षे स्थितः अतिरोगंकुरुते तिक्तेचवृक्षेस्थितः कलिकार्यनाशौ तथा सकंटके वृक्षेस्थितः पक्षौ विधुन्वन् रूक्षंविरुवन् मृत्युमुपादधाति ९५

॥ भाषा ॥

॥रुवन्निति॥ जो काक अगाडी वोले तो हानी रोग करे फिर पीठमाऊं कठोर शब्द करे तो मृत्यू करे जो खाली मोढो फेलाय कर वेठो होय तो काक सदा निंदित हे ॥ ९३ ॥ वामइति ॥ सूके काष्ठके टूककूं ताडना करे चोंचसूं और वामभागमें वी होय तो रुधिरपातको भय और मृति करे और चोंचकर हाडकूं उखाड पछाडकरतो होय तो हाड को भंग और वंधन कहेहे और युद्ध करतो होय काक तो वध करे ॥ ९४॥ वामइति ॥ वामभागमें शुष्कवृक्षपे वेठो होय तो अतिरोग करे और खाली वातीखे वृक्षपे वेठो होय तो कलह और कार्यको नाश करे और जो कांटेके वृक्षपे वेठकर पंखनकूं कंपायमान करत रूखो शब्द वोले तो मृत्यू करे ॥ ९५॥ ॥छ॥

बन्धोभवेत्भूरुहिभग्नशाखेबंधोलताभिःपरिवेष्टि
तेस्यात् रम्येतरौकंटकवृक्षयुक्ते सदाभवेतांकलि-
कार्यसिद्धी ९६ छत्राधिरूढेसखेनयायात्प्रया
तिचेत्स्यात्खलुएवपातः अवस्करांभस्तृणका
ष्ठकूटभस्मादिसंस्थोविनिहंतिकार्यम् ९७ युग्मं वल्ली
वरत्राकचशुष्ककाष्ठचर्मास्थिजीर्णांबरवल्कलानि
अंगाररक्तोल्मुककर्प्पराणिदृष्टानिचेत्काकमुखेत-
दानीम् ९८ ॥ छ ॥

॥ टीका ॥

बंधइति भग्नशाखे भूरुहि काके स्थिते बधोभवेत् तथा लताभिः परिवेष्टितेभूरुहिकाकेस्थिते बंधएवस्यात् कंटकवृक्षयुक्ते सकंटकवृक्षेणयुक्ते रम्येतरौ स्थितेकलिकार्यसिद्धी स्याताम् ९६ छत्रइति सखेकाके छत्राधिरूढेसति नयायात् चेत्प्रयाति तदाखलुनिश्चयेन वज्र पातःस्यात् अवस्करांभस्तृणकाष्ठकूटभस्मादिसंस्थइति तत्रावस्करः ऊकरडोइति लोके प्रसिद्धः अंभः पानीयंतृणानिप्रतीतानि काष्ठंप्रतीतं कूटंयूपादि भस्मप्रतीतं आदिशब्दादन्येषांनिंद्यवस्तूनां परिग्रहः तत्रसंस्थः काकः कार्यं विनिहंति ९७ युग्मं वल्लीतिपुण्यक्षयइतिच चेत्काकमुखे एतानि

॥ भाषा ॥

॥वंधइति॥ भग्नशाखाजा वृक्षकी तापे वेठो होय तो वंधन करे और लतानकर वेष्टितवृक्षपे वेठो होय तो वंधन करे और कांटेनकर युक्त सुंदरवृक्षपे वेठो होय तो कलह और कार्यकी सिद्धी करे॥ ९६ ॥ छत्रइति ॥ छत्रपेवेठकर वोले काक तो यात्रागमन न करे जो गमन करे तो निश्चयकर वज्रपात होय और कूडेक जोडे पटकवेकी ठेडपे वा जलपे वा तृणकाष्ठके समूहपे वा भस्मपे वा और कोई निंदित वस्तूपे वेठके वोले तो कार्यकूं नाश करे॥ ९७॥ युग्मं ॥ वल्लीति पुण्यक्षयइतिच ॥ लता वेलरी जेवडी केश सूको काष्ठ चामहाड फटो पुराणो क-

पुण्यक्षयः पापसमागमश्चमहाभयंरोगसमुद्भवश्च
बन्धोर्वधः सर्वधनापहारइत्यादिकंस्यात्पथिमंदिरे
वा ९९ ऊर्द्धाननश्चंचलपक्षयुग्मः काकःकुनादो
विदधातिमृत्युम् छायायुधछत्रघटास्थियानवा-
दित्रकाष्ठादिककुट्टनाच्च १०० ॥ छ॥

॥ टीका ॥

दृष्टानि भवंति तदानीं पुण्यक्षयः पापसमागमश्च तथा महाभयं रोग समुद्भवश्च बंधोर्वधः सर्वधनापहारः इत्यादिकं दुष्टफलं पथिमंदिरे वा स्यात् एतानिकानीत्यपेक्षायामाह वल्लीति वल्ली वीरुद्वरत्रां चर्मरज्जुं कचाः केशाः शुष्ककाष्ठंप्रतीतं चर्मप्रतीतं अस्थिशरीरावयवः जीर्णांबरं जीर्णवासः वल्कलानिवृक्षत्वचः अंगारः प्रतीतः रक्तंप्रसिद्धंउल्मुकं अंचु आमुडइति प्रसिद्धं कर्परं पूर्वोक्तं एतानि ९८ । ९९ - ऊर्द्धाननइति ऊर्द्धाननः चंचलपक्षयुग्मः कुनादः काकः मृत्युंविदधाति छायायुधछत्रघटास्थियानवादित्रकाष्ठादिककुट्टनाच्चेति तत्र छायाप्रतीता आयुधंप्रहरणं छत्रमातपवारणं घटः कुंभः अस्थिपूर्वोक्तं यानंवाहनंवादित्रं तूर्यं काष्ठं प्रसिद्धं आदिशब्दादन्येषांपरिग्रहः एतेषां चंच्वाकुट्टनात्प्रहारदानात् मृत्युं विदधाति इत्यर्थः १००

॥ भाषा ॥

पडा वल्कल अंगारकीच वा रुधिरयुक्तवस्तु जलती लकडी खोपडीको टूक इतनीवस्तु जो काककेमुखमेंदीखें तो पुण्यको क्षय और पापको समागम और महाभय रोगकी उत्पत्ती बंधूको वध और सर्वधनको हरण ये सब मार्गमें वा घरमें होंय ॥ ९८ । ९९॥

॥ऊर्द्धाननइति॥ ऊपरकूं मुख करें होय चंचल दोनो पांखकी पंख जाकी होय कुनाद करतो होय तो काक मृत्यु करे छाया आयुध छत्र घडा हाड वाहन बाजो काष्ठ औरवी इनकूं चोंचकर कूटे वा प्रहार करे तो मृत्यु करे॥ १००॥ ॥ छ॥

आकुंचितैकांघ्रिरपेतचित्तोदीप्तस्वरोभास्करमीक्षते
च काष्ठादिकं कुट्टयतीहयोवायुद्धादिकानर्थकरः
खगोसौ १ तुंडेनपुच्छंविलिखन्स्वरेण तीव्रेणयो
रौतिनिरीक्षतेऽर्कम् एकेनपादेनतथोपविष्टोब्रूतेस
बन्धंपुरतोजनस्य २ विट्गोमयेन्यस्यातियस्यमूर्द्ध्नि
तस्यातुलत्रासरुजौभवेताम् यस्यास्थिखंडंविसृज
त्यसौतुप्रयातितूर्णंनगरींयमस्य ३

॥ टीका ॥

आकुंचितइति आकुंचितएकोंघ्रिर्येन सतथा अपेतचित्तइति अपेतंचंचलं चित्तंयस्य सतथा दीप्तस्वरइति दीप्तःस्वरोयस्यसतथा तथायः भास्करं ईक्षते तथायः काष्ठादिकं कुट्टयाति सोऽसौखगःयुद्धादिकानर्थकरः स्यात् १०१ तुंडेनेति तुंडेनसुखेन पुच्छंविलिखन् तीव्रेणस्वरेण योरौति पुनरर्कंनिरीक्षते तथा एकेनपादेनउपविष्टः सपुरतोजनस्य बन्धं ब्रूते १०२ विट्गोमयेति काकः यस्यमूर्द्ध्नि विट्गोमयेन्यस्याति तस्य अतुलत्रासरुजौ अनुपमत्रासरोगौ भवेतां तथा यस्यमूर्द्ध्नि अस्थिखंडं विसृजति असौनरः यमस्यनगरीं तूर्णंप्रयाति मृत्युंप्राप्नोतीत्यर्थः १०३

॥ भाषा ॥

॥आकुंचितइति॥ एक पाम जानेसमेंट लियो होय ओर चंचलचित्त जाको होय दीप्तस्वर होय ओर सूर्यकूं देखतो होय ओर काष्ठादिकनकूं कूटतो होय तो काक युद्धादिक अनर्थ करे ॥ १०१ ॥ तुंडेनेति ॥ सुखकरकें पूंछकूं ताडन करे ओर तीव्रस्वर करकें बोले फिर सूर्यकूं देखतो होय ओर एकपामकर बेठो होय तो अगाडीतें अगाडी काऊ जनको बंधन करे ॥ १०२ ॥ विट्गोमयेति ॥ जाके मस्तकेपे काक विट्गोबर पट्क देवे तो वा पुरुषकूं वोहोत त्रास ओर रोग होय ओर जाके मस्तकपे हाडको टूक पटक देवे तो वो पुरुष शीघ्रही मृत्यूकूं प्राप्त होय ॥ १०३ ॥ ॥ छ॥

ब्रह्मप्रदेशेविरुवन्यियासोः कलत्रदोषंजनयत्यवश्यं
मनुष्यमातंगतुरंगमाणांशिरोधिरूढोनिधनायतेषाम्
४ नदीतटेवाथरटन्नटव्यांखरस्वरैर्व्याघ्रभयायगंतुः
नैवातुरः क्वापिमतोहितायनहृष्टचेष्टः क्वचिदेवदुष्टः
५ यात्रोद्यमेसैन्यवधायकाकोदृष्टोरथेभाश्वनृमस्त
केषु आयातियस्याभिमुखोबलस्ययुद्धोद्यमेतस्य
पराजयः स्यात् ६ ॥ छ॥

॥ टीका ॥

ब्रह्मेति यियासोर्गंतुमिच्छोर्नरस्य ब्रह्मप्रदेशे मस्तकोपरि आकाशे विरुवन्काकः अवश्यंकलत्रदोषं जनयति तथा मनुष्यमातंगतुरंगमाणां शिरोधिरूढः तेषां मनुष्यादीनां निधनाय भवति १०४ नदीति नदीतटे अटव्यां वा खरस्वरैरटन् काकः गंतुः व्याघ्रभयाय भवति तथा क्वापि यत्रकुत्रापि आतुरः काकः गंतुर्हितायनमतः अपिच हृष्टचेष्टः क्वचिदेव क्वचिदपिनदुष्टः १०५ यात्रोद्यमइति यात्रोद्यमे युद्धप्रयाणोद्यमे रथेभाऽश्वनृमस्तके काकः दृष्टश्चेत् सैन्यवधाय भवति तथा यस्यबलस्याभिमुख आयाति तस्य युद्धोद्यमेपराजयः स्यात् १०६ ॥छ॥

॥ भाषा ॥

॥ब्रह्मेति॥ गमनकर्ताके मस्तकके ऊपर आय आकाशमें स्थित होय वोले तो स्त्री दोष प्रगट करे ओर मनुष्य हाथी घोडा इनके मस्तकपे वेठे तो इनकेही नाशके अर्थ होय ॥१०४॥ नदीति॥ नदीके तटपे वा मार्गमें काक तीव्र स्वर वोले तो गंता पुरुषकूं व्याघ्रको भय होय ओर जो आतुर पुरुष होय तो कदापि हित नहीं होय॥ ॥१०५॥ यात्रोद्यमइति॥ यात्राके उद्यममें जो काक रथ हाथी घोडा मनुष्य इनके मस्तकनपे वेठो दीखे तो सेनाको वध होय ओर जा सेनाके सन्मुख काक आवे तो ताको युद्धमें पराजय होय ॥१०६॥ ॥छ॥

सगृध्रकंकैः कटकेनृपस्यकाकैः प्रविष्टैःपिशितंविनापि संयुध्यमानैररिभिः समंस्यान्महाहवःसंधिरयुध्यमानैः ७ चिह्नध्वजच्छत्रकृताधिरोहः समुद्यतंशत्रुबलंप्रपश्यन् आजौजयंजल्पतिभूमिपानांकृतध्वनिः क्षीरतरौचकाकः ८ गतिस्वरौवायससंप्रयुक्तौप्राच्यांफलायोदितवैपरीत्यात् एवंजनोप्याचरतिप्रभूतोयथोदितंतत्रतथागमार्थः ९

॥ टीका ॥

सगृध्रकंकैरिति सगृध्रकंकैःकाकैर्नृपस्यकटके पिशितंविनापिमांसंविनापि प्रविष्टैः सगृध्रकंकैः काकैःसद्भिः संयुध्यमानैः अरिभिः समं महाहवः स्यात् तथा युध्यमानैस्तैररिभिः संधिःस्यादित्यर्थः १०७ चिह्नेति चिह्नध्वजछत्रेति तत्रचिह्नंशस्त्रादि ध्वजः प्रतीतः छत्रमातपवारणं एतेषुकृतः अधिरोहोयेनसतथा एवंविधःकाकः समुद्यतं शत्रुबलंप्रपश्यन्भूमिपानामाजौ युद्धेजयंजल्पति तथाक्षीरतरौकृतध्वनिर्जयंवक्ति १०८ गतीति वायससंप्रयुक्तौ काकप्रेरितौगतिस्वरौ प्रा-

॥ भाषा ॥

॥सगृध्रइति॥ राजाकी सेनामें मांस विना गीधकंक काकये प्रवेश करें तो युद्ध कर रहे वैरीनकरकें महान् संग्राम होय और जो युद्धकरते होंय तो मिलापहोय जाय ॥१०७॥ चिह्नेति ॥ शस्त्रादिक ध्वजा छत्र इनपे वेठो होय उद्यत हुई शत्रूनकी सेना माऊंकूं देखतो होय तो राजानकूं जय कहे है और दूधके वृक्ष वटादिकनपे वोले तो जय होय ॥ १०८ ॥ गतीति ॥ पूर्व दिशामें काककी गती स्वर पहलें कह्या ये उनसें विपरीत होंय तो फलके अर्थ जानने ॥१०९॥

दिग्यामचक्रेऽपिशुभाशुभानिफलानियानिप्रतिपा
दितानि प्रतिष्ठमानस्यतथाविधानिभवंतितानीह
वदंतिसंतः ११० इतिकाकरुतेयात्राप्रकरणं ४
स्थानास्थितानांकथयंतिकाकाश्चेष्टाविशेषेणशुभाऽ
शुभानि प्रचोदिताःप्राक्तनकर्मभिर्ये तल्लक्षणाय
क्रियतेऽत्रयत्नः ११ निष्कारणंसंमिलितारुवंतो
ग्रामान्ननाशायभवंतिकाकाः रोधंचचक्राकृत
योवदन्तिसव्यापसव्यभ्रमणाद्भयंच १२

॥ टीका ॥

च्यांदिशिउदितवैपरीत्यात्फलायभवतः तत्रयथाऽऽगमार्थस्तथोदितंप्रभूतोपिसर्वो पिजनःएवं आचरतीत्यर्थः ११० दिग्यामेति दिग्यामेचक्रेतु यानिशुभाशुभा निफलानिप्रतिपादितानि तानि इह एतच्छास्त्रेप्रतिष्ठमानस्य विश्वासकर्तुः तथाविधान्येवभवंतीतिसंतः वदंतीतितात्पर्यार्थः ११० इतिश० वसं० टी० काकरुतेयात्राप्र०४ स्थानइति येकाकाः प्राक्तनकर्मभिः प्रचोदितास्संतः चेष्टाविशेषेणस्थानस्थितानां ग्रामादि एकस्थानस्थितानांबहुजनानां शुभाऽशुभानि कथयंति तल्लक्षणाय तत्ज्ञानाय अत्र यत्नः क्रियतं १११ निष्कारणमिति निष्कारणं कारणव्यतिरेकेण मिलितारुवंतः काकाः

॥ भाषा ॥

॥दिग्यामेति॥ दिग्याम चक्रमें जे शुभ अशुभ फल कहेहें तेसेंही ते फल होंय हें शास्त्रज्ञ या प्रकार कहेहें ॥ ११० ॥ इतिवसंतराजभाषाटीकायां काकरुतेयात्राप्र०॥४॥

॥स्थानइति॥ जो काक पूर्वजन्मके कर्मनकरकें प्रेरेहुये अपनी चेष्टा करकें स्थानपे बेठे हुये पुरुषनकूं शुभ अशुभ करेंहें ताके जानवेके अर्थ प्रयत्न करनो ॥ १११ ॥

॥निष्कारणमिति॥ जो काक निष्कारण मिलेहुये बोलें तो ग्राम अन्न इनको नाश करे जो टेढी आकृतीवाले होंयतो निरोध करें और जेमनो वांयो भ्रमण करता हो

विघातमाहुर्बहुवर्गसंस्थारात्रौरुवंतोजनताविनाशं लोकंचचंचूचरणप्रहारैरुद्वेजयंतः परचक्रवृद्धिम् १३ यः स्नातिधूल्यांबुविलोक्यरौतिवृष्टिंसमाशंसतिवायसोऽसौ जलस्थलप्राणविपर्ययेणवर्षासुवृष्टिर्भयमन्यदातु १४ मध्यंदिनेवेश्मनियस्यकाकोविरौतिरौद्रंविधुनोतिचांगं हरंतिचौराद्रविणानितस्यध्रुवंतथान्योभवतिप्रमादः १५ ॥६७॥

॥ टीका ॥

ग्रामान्न नाशायभवंति चक्राकृतयोरोधंवदंति सव्यापसव्यंभ्रमणाद्भयं वदंति ११२ विघातमिति बहुवर्गसंस्थाः विघातंविनाशमाहुः बहवएकीभूताइत्यर्थः रात्रौरुवंतोजनताविनाशंजनसमूहनाशमाहुः चंचूचरणप्रहारैः लोक मुद्वेजयंतो दुःखदातारः परचक्रवृद्धिमाहुः ११३ यइति यःधूल्यारजसा स्नाति अंबुविलोक्यरौति असौवायसः वृष्टिंसमाशंसति जलस्थलप्राणविपर्ययेण सुवृष्टिर्भवति अन्यदातुभयंभवति ११४ मध्यमिति यस्यवेश्मनिमध्यंदिनेकाकः रौद्रं विरौति अंगंविधुनोति च तस्यचौराद्रविणानिहरंति तथाध्रुवमन्यःप्रमादोऽनर्थःस्यात् ११५

॥ भाषा ॥

य तो भय कहेहै ॥११२॥ विघातमिति ॥ वोहोतसे इखट्टे होंय तो विघात करें और रात्रीमें वोले तो जनसमूहको नाश करे और चोंच और चरण इनको प्रहार करतो होय तो लोककूं उद्वेग करे और शत्रूनकी सेनानकी वृद्धी करे ॥११३॥ जो काक धूलमें स्नान करे जलकूं देखकर शब्द करे तो वृष्टी करे और जल थल प्राण इनकी विपरीतता करकें अर्थात् जलमें न्हाय करकें थलमें देखकें शब्द करे तो सुवृष्टी होय और प्रकार भय होय ॥११४॥ मध्यमिति ॥ जाके घरमें मध्यान्ह समयमें काक रौद्रशब्द करे अंगकूं कंपायमान करे तो तापुरुषके चौर धन हरण करे तैसेंही प्रमाद होय ॥११५

रुवन्नहृष्टस्तृणपर्णवक्त्रोहुताशभीतिंकरटः करोति
स्यात्प्रस्थितस्याप्यथवास्थितस्यदुःखंप्रभूतंदिवस
त्रयेण १६ छायासुलाभंभुविभूमिलाभंविघ्नंज
लेग्रावणिकार्यनाशं करोतिकाकोविरुवन्नरस्य
प्रस्थायिनःस्थानस्थितस्यवापि १७ द्वारप्रदेशेरु
धिरानुलिप्तोविरौतिकाकःशिशुनाशनाय पक्षौवि
धुन्वन्विरुवन्विरूक्षंशांतेप्रदीप्तेचभवेन्नशस्तः १८

॥ टीका ॥

रुवन्निति तृणपर्णवक्त्रः रुवन् नहृष्टः करटः हुताशभीतिं करोति तथाविधेकरटे प्रस्थितस्य वा स्थितस्यापिजनस्यदिवसत्रयेणप्रभूतंविपुलं दुःखंस्यात् ११६ छायेति प्रस्थायिनःस्थानस्थितस्य वापि नरस्यकाकः छायासुविरुवन् लाभं भुवि विरुवन् भूमि लाभंजलेविरुवन् विघ्नं ग्रावणि विरुवन् कार्यनाशं करोति ११७ द्वारइति रुधिरानुलिप्तः काकोद्वारप्रदेशे यदा विरौति तदा सद्यशिशुनाशनाय स्यात् पक्षौ विधुन्वन् विरूक्षंविरुवन् काकः शांतेप्रदीप्तेचदिग्विभागेशस्तोनभवेत् ११८

॥ भाषा ॥

॥रुवन्निति॥ तृण पत्तौच्या ये मुखमें होंय तो काक अग्निकी भीति करे जो प्रस्थानकरकें चल्यो होय वा कहूं स्थित होय तापुरुषकूं तीन दिवसमें वोहोत दुःख होय ॥११६॥ छायेति॥ गमनकर्त्ताकूं वा स्थानमें वेठो होय ताकूं जो काक छायामें शब्द करे तो लाभ करे ओर पृथ्वीमें वोले तो भूमीको लाभ करे जलमें करे तो विघ्न होय ओर पाषाणमें वेठकरकें वोले तो कार्यको नाश करे ॥११७॥ द्वारइति॥ जो काक रुधिरकरकें लिप्त होय द्वारमें जो वोले तो बालकके नाशके अर्थ होय ओर जो पंखनकूं कंपायमान करत रूखो बोले शांत दिशामें वा दीप्त दिशामें तो शुभ नहीं ॥११८॥ ॥७॥

भ्रमन्नथोर्ध्वौप्रविधायपक्षौकाकः कुनादः प्रलयं
करोति क्रुद्धोधिरूढः करटांतरंचरोगेणमृत्युंकु
रुतेनराणाम् १९ द्रव्येहृतेचापहृतेखगेन विनाश
लाभावपितादृशस्य रुक्मस्यपीतेरजतस्यशु-
क्लेचैलस्यकार्पासमयेभवेताम् २० प्रश्नेकृतेरोग-
विनाशबुद्ध्याहंत्याऽऽशुरोगंसुरवः प्रदीप्ते शांतप्र
देशेकरटश्चिरेणरम्यारवोरोगमुपाकरोति २१

॥ टीका ॥

भ्रमन्निति पक्षौ ऊर्ध्वौ प्रविधाय काकः कुनादः भ्रमन् प्रलयंकरोति
तथा क्रुद्धस्सन् करटांतरं अधिरूढश्चेन्नराणां रोगेण मृत्युं करोति ११९
द्रव्यंइति खगेनहृते द्रव्ये अपहृते त्यक्तेचसति तादृशस्यवस्तुनः विनाश
लाभावपिभवेतां पीतेवस्तुनि रुक्मस्यशुक्लेरजतस्य कार्पासमये चैल-
स्य विनाशलाभौस्यातां १२० प्रश्नेइति रोगविनाशबुद्ध्याप्रश्नेकृतेप्र
दीप्तसुरवः आशु रोगंहंति शांतप्रदेशेरम्यारवः रम्यश्चासौ आरवश्च स्थि
रेण रोग मपाकरोति १२१ ॥छ॥

॥ भाषा ॥

॥भ्रमन्निति ॥ पंखनकूं ऊपर करकाक कुनाद करत भ्रमतो हुयो प्रलय करे
और काक क्रुद्ध होय दूसरे काकपे चढजाय तो मनुष्यनकूं रोगकरकें मृत्यु क-
रे ॥ ११९ ॥ द्रव्येति ॥ जो काक द्रव्य हरण कर ले जाय या पटक जाय तो वे
सी वस्तूको विनाश लाभ होय पीत वस्तु होय तो सुवर्णको लाभ होय -
और शुक्लवस्तु होय तो रजतको लाभ होय और कर्पासमय वस्तु होय तो
वस्त्रको लाभ होय ॥ १२० ॥ प्रश्नेइति ॥ रोगविनाश होयवेकी बुद्धी करकें प्र
श्न कियो होय और जो काक प्रदीप्तदिशामें सुंदरशब्द करतो होय तो शीघ्ररो-
गकू दूर करे जो शांत देशमें शुभ बोलतो होय तो देर में रोगकूं दूर करे है ॥१२१॥

प्रश्नेश्शुभेशांतदिगाश्रयस्थः शांतस्वरोवस्तुशुभंदधानः योवायसस्तंश्शुभदंवदंतितद्व्यत्ययेव्यत्ययहेतुरुक्तः २२ विरौतिकुंभेमणिकेथवायसःस गर्भवत्याःसुतजन्महेतुः उड्डीयतेकंटकिनींचशाखामादायराजागमनायकाकः २३ अन्नाज्य विष्ठापिशितादिभिर्यः पूर्णाननोभीष्टफलप्रदोसौ मंत्रादिसिद्धौवणिजादिलाभेशस्तोविवाहादिविधौ चकाकः २४

॥ टीका ॥

प्रश्नेइति शुभेप्रश्ने शांतदिगाश्रयस्थः शांतस्वरः शुभंवस्तुदधानः यो वायसः तंश्शुभदं वदंति तद्व्यत्ययो व्यत्ययहेतुरुक्तः अशुभंददातीत्यर्थः १२२ विरौतीति कुंभेमणिकेबृहत्प्रमाणेजलभाजनविशेषेयदाकाकः विरौति तदागर्भवत्याःसुतजन्महेतुर्भवति कंटकिनींचशाखामादायउड्डीयते काकः तदाराजागमनायस्यात् १२३ अन्नइति अन्नाज्य विष्ठापिशितादिभिर्यः पूर्णाननः असौ अभीष्टफलदःस्यात् मंत्रादिसिद्धौवणिजादिलाभेविवाहादि विधौचकाकःशस्तः १२४

॥ भाषा ॥

॥ प्रश्नेइति॥ शुभप्रश्न कियो होय जो काक शांतदिशामें बेठो होय और शांतस्वर करतो होय और शुभवस्तु धारण करें होय तो शुभको देवेवारो जाननो ॥१२२ ॥विरौतीति ॥ कुंभपे और बोहोत प्रमाणको जलपात्र कोठी हंडावडे इनपे बेठकर बोले तो गर्भवतीके सुत जन्मको देवेवारो जाननो और जो कांटेकी शाखाकूं लेकरकें उडजाय तो राजाके आगमनके अर्थ जाननो ॥१२३॥ अन्नइति। अन्नघृत विष्ठा मांस इत्यादिकनकरकें जो भरो हुयो मुख होय तो ये अभीष्ट वांछितफल देवे ॥ और मंत्रादिक सिद्धीनमें वणिजादिकनके लाभमें विवाहादिक

इष्टार्थदोऽश्वादिषुवाहनेषु छत्रादिसंस्थस्तदवाप्ति-
कारी वध्वागमंजल्पतितोरणादौहृद्यार्थदोहृद्यत
रुस्थितश्च २५ वायसःकुलुकुलुध्वनिर्यदाव्याह
रेद्भुवनसन्मुखस्तदा अभ्युपैतिपथिकस्तदाध्वनिं
सर्वकार्यसुखदंवदंत्यमुं २६ इदंत्विहोत्पातयुगं
पृथिव्यांमहाभयंशाकुनिकावदंति तद्वायसोमैथु
नसन्निविष्टोदृश्येतयद्वाधवलःकदाचित् २७

॥ टीका ॥

इष्टार्थदइति अश्वादिकवाहनेषुस्थितःसन् इष्टार्थदः तथा छत्रादिसंस्थस्तदवाप्तिहेतुर्भवति तोरणादौवध्वागमंजल्पति हृद्यतरुस्थितःप्रियकारकःयः तरुः तस्मिंश्चहृद्यार्थदः १२५ वायसइति यदाभुवनसन्मुखंवायसः कुलकुलध्वनिंव्याहरेत् तदा पथिकोभ्युपैति अमुंध्वनिंसर्वकार्यसुखदंवदंति १२६ इदमिति इहास्मिन् लोके उत्पातयुगं उत्पातैर्युक्तं महाभयंशाकुनिका वदंति यत् वायसोमैथुनसंनिविष्टो दृश्येत यद्वा कदाचित् धवलो दृश्येत तदित्यर्थः १२७ ॥छ॥

॥ भाषा ॥

विधीमें काक शास्त्रनाम शुभहे ॥१२४॥इष्टार्थइति॥ अश्वादिक वाहनपे स्थितकाक इष्ट अर्थको देवेवारो ओर छत्रादिकनमें स्थित होय तो छत्रादिनकी प्राप्ती करे ओर तोरणादिकनपे वेठे तो स्त्रीको आगम कहे वोहोत सुंदर वृक्षपे वेठो होय तो मनोरथकूं देवे ॥१२५॥ वायसइति॥ जो घरके सन्मुखकाक कुलुकुलु ध्वनी करे तो कोई मार्गको चल्यो आवे ओर ये ध्वनी सर्व कार्य ओर सुखकूं देवे ॥ १२६॥ इदमिति॥ या लोकमें दोय उत्पात हें सो शकुनी पृथ्वीमें याकूं महाभयवान् कहेहें कोनसे उत्पात जो कांक मैथुन करतो दीखे वा श्वेत काक दीखे तो ॥१२७॥

॥छ॥ ॥छ॥

उद्वेगविद्वेषभयप्रवासबंधुक्षयव्याधिधनापहाराः
बुद्धिप्रणाशाः कुलतापवादानृणांभवंत्यद्भुतदर्श
नेन २८ शमायतत्सूचितदुःखराशेः स्नानंबहि
स्तत्क्षणमेवकुर्यात् आत्मीयशक्त्याचसदक्षि
णानिद्विजायदद्याद्वसनानितानि २९ नयेदह्नः
शेषमपुण्यहान्याशयीतभूमावकृतान्नभक्ष्यः
स्नात्वाप्रभातेविदधीतशांतिंदद्यात्स्वशक्त्याद्रविणं
गुरुभ्यः ३० ॥छ॥

॥ टीका ॥

उद्वेगेति अद्भुतदर्शनेन उद्वेगविद्वेष भयप्रवास बंधुक्षयव्याधि धनापहाराः बुद्धिप्रणाशाः कुलतापवादाश्च नृणां भवंति १२८ शमायेति सूचितदुःख राशेः शमाय तत्क्षणमेव बहिः स्नानं कुर्यात् तथा आत्मीयशक्त्या सदक्षिणानि तानिवसनानि द्विजायदद्यात् १२९ नयेदिति अह्नः शेषं नयेत् कया अपुण्यहान्या पुण्यहानिर्यथानभवति तथेत्यर्थः तथाऽकृतान्नभक्षः भूमौ शयीत पुनः प्रभाते स्नात्वा शांतिं विदधीत गुरुभ्यः स्वशक्त्या द्रविणंदद्याच्च १३० ॥छ॥

॥ भाषा ॥

॥उद्वेगेति॥ उद्वेग विद्वेष भय प्रवास नाम परदेश बंधूक्षय व्याधि और धनको चौर करकें हरण और बुद्धीको नाश कुलकी ताप और विवाद ये सब पहले उत्पात देखवेवारे मनुष्यनकूं होंय ॥१२८॥ शमायेति ॥ इतने दुःखनकी शांतीके लियें पूर्वक है जे दोनो उत्पात तिनकूं देखतें ही तत्क्षण बहिस्नान करे ता पीछें अपनी शक्ती पूर्वक दक्षिणा सहित वस्त्र ब्राह्मणके अर्थ दान करे ॥ ॥१२९॥ नयेदिति ॥ शेष दिन रहे ताय पुण्यादिक करकें व्यतीत करे और अन्नादिक भोजन न करे फिर रात्रिकूं पृथ्वीमें शयन करे फिर प्रातःकाल होय-

हविष्यभोजीनभजेच्चनारींदिनानिसप्तत्रिगुणानियावत् आकाकपातव्रतमादधीतबलिंचदद्याद्बलिभोजनेभ्यः ३१ देशेतुयत्राद्भुतमेतदुग्रमालोक्यते तत्रसमापतंति अवृष्टिदुर्भिक्षभयोपसर्गचौराग्निशत्रूद्भवधर्मनाशाः ३२ कर्माणितस्योपशमायराजाप्रवर्त्तयेच्छांतिकपौष्टिकानि अन्नाज्यगोभूमिवसूनिदद्याद्युद्धंविदध्याच्चनयावदब्दं ३३ इतिकाकरुतेस्थानस्थितप्रकरणंपंचमम् ५

॥ टीका ॥

हविष्येति सप्तत्रिगुणानि एकविंशति दिनानि यावत् हविष्यभोजीभवेत् नारींनभजेत् आकाकपातंव्रतं आदधीत बलिभोजनेभ्योबलिंदद्यात् १३१ देशेत्विति यत्रदेशे एतदुग्रमद्भुत मालोक्यते अवृष्टिदुर्भिक्षभयोपसर्गचौराग्निशत्रूद्भवधर्मनाशा आपतंति १३२ कर्माणीति तस्याद्भुतस्योपशमायराजा शांतिकपौष्टिकानि प्रवर्तयेत् अन्नाज्यगोभूमिवसूनि दद्यात् यावदब्दं अब्दपर्यंतं युद्धं नविदध्यात् १३३ इतिश० वसंतराजटीकायां काकरुतेस्थानास्थित प्रकरणं पंचमम् ५

॥ भाषा ॥

जव स्नान करकें शांती करे अपनी शक्ती लायक गुरूनके अर्थ धन देवे ॥१३०॥ ॥हविष्येति॥ इक्कीस दिन तांई हविष्यभोजन करे और स्त्रीसेवन नकरे आकाकपात व्रत करे और काकनकूं बलिदान देवे ॥१३१॥ देशोत्त्विति॥ जा देशमें ये अद्भुत देखे ता देशमें वर्षा नहोय और दुर्भिक्ष भय भूतादि चौर अग्नि लगनो शत्रूनकी प्रगटता धर्मको नाश ये होंय ॥१३२॥ कर्माणीति॥ ता अद्भुत देखेकी शांतीके लियें राजा शांतिक पौष्टिक करे और अन्न घृत गौ पृथ्वी धन इनको दान करे और राजा वर्ष दिन तांई युद्ध न करे॥१३३॥ इतिव० भा० टी० का० स्थानस्थितप्र०॥५

अथस्वरविचारः क्वांक्वामितिक्षेमविधौविरावःकींकीमितीष्टाशनपानहेतुः करोतिकूंकूमिति वार्थलाभंक्वंक्वंध्वनिः कांचनलाभमाह ३४ केंकेमिति स्त्रीतिचयोषिदास्येभोगाय कोंकोमितिशब्दितंस्यात् अपत्यलाभंकुकुइत्यनेनगंतुःफलंकेकवइत्यनेन ३५ क्रोंक्रोमितीदंसुखलाभकारीकुंकुंनिनादःप्रियसंगमाय क्रूंक्रूमितिक्रूमितिचत्रयोऽमीक्रांक्रामितिद्वौचरवौरणाय ३६

॥ टीका ॥

अथस्वरविचारः क्वांक्वामिति क्वांक्वामितिक्षेमविधौविरावः स्यात् किंकिमिति इष्टाशनपानहेतुर्भवति कुंकुमिति शब्दोऽर्थलाभं करोति क्वंक्वं इति ध्वनिः कांचनलाभमाह ३४ केंकेमिति केंकें इति शब्दः स्त्रीतिच योषिदास्येभवति कोंकोमितिशब्दितं भोगायस्यात् कुंकु अनेनापत्यलाभः स्यात् केकवइत्यनेनगंतुः इष्टं फलंभवति ३५ क्रोंक्रोमिति क्रोंक्रों इतिनादः सुखलाभकारीस्यात् कुंकुंनिनादः प्रियसंगमायस्यात् क्रूंक्रूमितिक्रूमितिच अमीत्रयः शब्दाः क्रांक्रामितिचद्वौरणायस्युः ३६

॥ भाषा ॥

॥अथस्वर विचारः॥ क्वांक्वामिति॥ क्वांक्वां एसो वोले तो कल्याण होय और जो काक किंकिं एसो वोले तो वांछितभोजनपान ये होंय और कूंकूं या प्रकार वोले तो अर्थलाभ करे और क्वंक्वं या प्रकार ध्वनी करे तो कांचन लाभ होय॥१३४॥ केंकेमिति॥ केंकें या प्रकार कागली वोले तो स्त्रीकी प्रासी करे और कोंकों ये शब्द वोले तो भोगभोगे और कुकु या प्रकार वोले तो अपत्यको लाभ होय और केकव एसो वोले तो गमनकर्त्ताकूं फल होय ॥१३५॥ क्रोंक्रोमिति॥ क्रोंक्रों ये शब्द सुख लाभ कारी होय और कुंकुं ये शब्द वोले तो प्रियसंगम करे -

क्रांक्रामितिक्रोरितिचद्विरुक्तंक्रूंक्रूमितिक्रोकुकुहू
रितीदं रुतंप्रदिष्टंमरणायनृणांगंतुर्विनाशंकुरुतेख
गाख्यः ३७ क्रींक्रीमितीष्टार्थविनाशनायज्वल-
ज्वलेत्यग्निभयायशब्दः किकीतिकौकाविंतियः
कथंचिन्मुहुर्मुहुःस्यात्समतोवधाय ३८ स्यात्क्का
इतीदंविफलंसदैवमित्राप्तयेक्कक्कइतीदृशंच काका
इतीदंचविघातकारिकवेतिकाकोवदतिस्वतुष्ट्यै ३९

॥ टीका ॥

क्रांक्रामिति क्रांक्रामितिक्रोरितिच द्विरुक्तं क्रूंक्रूमिति क्रोकुकुहुरितीदंरुतंनृणांमरणायप्रदिष्टं एतादृशंरुतंरुवन् खगाख्योगंतुर्विनाशंकुरुते १३७ क्रींक्रीमिति क्रींक्रीमिति स्वार्थविनाशनाय भवति ज्वलज्वलेति शब्दःअग्निभयायस्यात् किकीति कौकौइतिकथंचित् मुहुः मुहुः शब्दः स्यात् सवधायमतः १३८ स्यादिति क्काइतीदंविफलंसदैव स्यात् क्कक्कईदृशंचमित्राप्तयेस्यात् काकाइतीदंचविघातकारि कवेतिकाकःस्वतुष्ट्यैवदति १३९ ॥ छ॥

॥ भाषा ॥

क्रूंक्रूं क्रूं ये तीन शब्द बोले तो और क्रांक्रां ये दोय शब्द बोले तो संग्राम करावे ॥१३६॥ ॥क्रामिति॥ क्रां क्रां क्रोक्रो क्रूं क्रूं क्रो कुकु हुः ये शब्द बोले तो मनुष्यनकूं मरणके अर्थ जाननो जो पक्षी एसे शब्द बोले तो गमन कर्त्ताकूं विनाश करे ॥१३७॥ क्रीमिति॥ क्रीं क्रीं ये शब्द स्वार्थको विनाश करेहे और ज्वल ज्वल ये शब्द अग्निको भय करेहे और किकि ये शब्द कौकौ ये शब्द कदाचित् वारंवार बोले तो वधके अर्थ जाननो ॥१३८॥ जो काक क्का शब्द बोले तो निष्फल जाननो और क्कक्क एसो बोले तो मित्रकी प्राप्ती होय और काका एसो बोले तो विघातकारी होय और कव एसो शब्द बोले तो अपनी तुष्टीके अर्थ जाननो ॥१३९॥

आहारदोषायचकाकटीतिस्यात्टाकुटाकुध्वनितं
रणाय केकेध्वनिष्टाकुचिचिंटिकीति त्रयंत्विदंस्या
त्पुरुदूषणाय ४० यत्क्काइतित्रिस्तदनुद्विरेतच्छ
ब्दद्वयंस्यान्महतेफलाय कोगित्ययंवाहननाशनं
चददातिहर्षंकुरुकुर्वितीदम् ४१ यःक्काइतीदंवि
रुतंसुदीर्घप्लुतस्वरेणोच्चरतिप्रमोदात् उत्साहही-
नःश्रमदैन्ययुक्तःसवायसःकार्यविनाशनाय ४२

॥ टीका ॥

आहारेति काकटीतिशब्दः आहारदोषायभवति टाकुटाकुइतिद्विवारं ध्वनितं रणाय भवति केके टाकुचिचिंटिकीति त्रयंत्विदंपुरुदूषणायस्यात् दोषबाहुल्यायेत्यर्थः १४० यदिति क्काइतित्रिस्तदनु द्विः द्विर्वारमुक्तं शब्दद्वयंमहते फलाय स्यात् कोगित्ययंशब्दः वाहननाशनं करोति कुरु कुर्वितीदंध्वनितंहर्षंददाति १४१ यइति यःकाकः क्काइतीदंविरुतंसुदीर्घप्लुतस्वरेणप्रमादात् उच्चरति तथा यउत्साहहीनः श्रमदैन्ययुक्तः सवायसः कार्यविनाशनाय भवति १४२

॥ भाषा ॥

॥ आहारेति ॥ काकटी एसो शब्द वोले तो आहारके दोषके अर्थ जाननो औरटाकुटाकु एसो वोले तो संग्रामके अर्थ जाननो और केके टाकु टिकी ये तीनो शब्द वोले तो वोहोत दूषणके अर्थ जाननो ॥१४०॥ यदिति ॥ जो काक क्का ये शब्द तीनपोत वोले तोपीछें के के एसो शब्द वोले तो महान् फलके अर्थ जाननो और कोग् या प्रकार शब्द वोले तो वाहननाशके अर्थ जाननो और कुरु कुरु ये शब्द हर्ष करे ॥१४१ ॥यइति॥ जो काक क्का एसो शब्द दीर्घकाल प्लुतस्वरकरकें प्रमादतें वोले और उत्साहहीन होय और श्रमकरकें दीनता करकें युक्त होय वो काक कार्यकूं विनाश करे ॥ १४२॥ ॥ ६॥

सामिषंकवकवेतिभोजयेद्वारयेत्कतिकतीतिचाशनं
अभ्युपेतिखररूक्षभाषितेप्रोषितः शवशवेतिचशब्दः
४३ स्यात्कलिः कर करध्वनौनृणांजायतेकणकण
ध्वनौज्वरः आव्रजेत्कुलकुलध्वनौप्रियः सौदनंक
टकटध्वनौदधिः ४४ एवंप्रकाराबहवोपरेऽपिप्र
शांतदीप्ताबलिभोजनानां भवंतिशब्दाः खलुतेषुके
चिदस्माभिरुक्ताः सुखलक्षणीयाः ४५ इतिवसंत
राजशाकुनेकाकरुतेस्वरप्रकरणम् षष्ठम् ६

॥ टीका ॥

सामिषमिति कवकवेतिशब्देसामिषंभोजनंभोजयेत् कतिकतीतिशब्दोऽशनंकारयेत् खररूक्षभाषितेप्रोषितोऽभ्युपैति शवशवेतिशब्देजाते कश्चित् पंचत्वंप्राप्नोतीत्यर्थः १४३ स्यादिति करकरध्वनौजातेसति नृणांकलिः स्यात् कणकणध्वनौ ज्वरः जायते कुलुकुलुध्वनौ प्रियः आव्रजेत् कटकट ध्वनौसोदनंदधिप्राप्यते १४४ एवमिति बलिभोजनानां काकानामित्यर्थः अपरेपिबहवः प्रशांतदीप्ताः शब्दाभवंति तेषुखलु निश्चयेनयत् किंचित्सुखलक्षणीयंतदस्माभिरुक्तं १४५ ग्रंथांतरेप्येवं तद्यथा

॥ भाषा ॥

॥सामिषमिति॥ कवकव एसो शब्द बोले तो आमिषसहित भोजन करे ओर जो कतिकति शब्द बोले तो भोजन करावे जो रूखो शब्द बोले वा खुरुखुरु एसो बोले तो परदेश गयो घर शीघ्र आवै ओर शवशव एसो शब्द बोले कोईकी मृत्यु प्राप्त होय ॥१४३॥ ॥स्यादिति॥ करकर एसो बोले तो मनुष्यनको कलह होय ओर कलकल ध्वनि करे तो ज्वर होय ओर कुलु कुलु शब्द करेतो कोई प्रिय आवे ओर कटकट एसो बोले तो भातसहीत दही प्राप्त होय ॥ १४४॥ एवंप्रकारेति ॥ या प्रकार काकनके ओरबी बोहोतसे प्रशांत ओर दीप्तशब्द हैं उनमेंसूं हमनें निश्चयकर शुभलक्षण

॥ टीका ॥

चिरजीविनोद्वात्रिंशद्भाषावदंति तद्यथा कौलो कौलो इतिचेद्वदति तदप्पुत्कारः धान्यराशिःस्यात् १ कुंकुंकुमितिजल्पति तदालाभापत्तिः २ कोयंकोयंइतिचेद्वदति तदा राज्ञोमृत्युमाख्याति ३ केयंकेयमितिशब्देन भृशंहानिमृत्यूभवेतां ४ कुरलुकुरलुइतिशब्देनश्रेयःसमाख्याति ५ कःकुकुमितिशब्देनशवंदर्शयति ६ क्लेनंक्लेनमितिशब्देनसुहृन्निधनमाख्याति ७ कुरुतंकुरुतंइतिशब्देनयुद्धंदर्शयति ८ कुयंकुयमितिशब्देन परस्वेभ्यः पंचत्वमाख्याति ९ कोछुकोछुइतिशब्देनशरीरहानिः १० कैकै इतिशब्देनसत्याः भार्यायाः समागमनमाख्याति ११ कांकामितिशब्देनलाभोभवति १२ कःकः इतिशब्देनराजकीयाः भृत्याः किंवदंतीतिवदति १३ कुलुकुलु इतिशब्देन मृत्युः समादिशति १४ क्ककइतिशब्देनमंगलमाख्याति १५ क्रेंक्रेंक्रेंइतिशब्देनबाढंद्रव्यलाभंवदति १६ कौंकौंकौंइतिशब्देनग्रामवासीतस्कराद्भयंसमादिशति १७ क्रींक्रींइतिशब्देनसुन्दर्याः प्राप्तिःस्यात्१८

॥ भाषा ॥

जिनके ते कहेहें ॥१४५॥ जो और ग्रंथांतरमें वत्तीसभाषा कहीहै तिनेंवी याप्रकार हम यहां कहेंहें ॥ जो कोलकोल एसी वाणी वोले तो धान्यराशी प्राप्त होय १ जो कुंकुंकुं ये वाणी वोले तो लाभकी प्राप्ती करे २ जो कोयंकोयं एसी वाणी वोले तो राजाकी मृत्युजाननी ३ केयंकेयं याशब्दकरकें अत्यंत हानी मृत्यू होय ४ कुरलुकुरलु या शब्दकरकें कल्याण करे ५ कःकुंकुं याशब्द करकें शवजो मुरदा ताकूं दर्शन करावे ६ क्लेनंक्लेनं या शब्दकर कें सुहृज्जनको नाश कहेहे ७ कुरुतंकुरुतं याशब्दकरकें युद्धकूं दिखावे ८ कुयंकुयं याशब्दकर परधनतें मृत्यु होय ९ कोछुकोछु या शब्दकर शरीरकी हानी होय १० कैकै याशब्दकर सतीको समागम होय ११ कांकां या शब्दकर लाभ होय १२ कःकः याशब्दकर वोले तो राजभृत्य क्या कहे १३ कुलुकुलु या शब्दकरकें मृत्यु जानना १४ क्कक याशब्दकरकें मंगल कहेहें १५ क्रेंक्रेंक्रें याशब्दकरकें अत्यंत

॥ टीका ॥

कोवंकोवमितिशब्देनप्रियलक्ष्म्याः पशूनांचनाशोभवति कुलंकुलमितिशब्देन वधबंधनपूर्वकंराजतोभयंदर्शयति २० कोईकोईइतिशब्देन भद्रंभवति २१ क्लेतंक्लुतमितिशब्देनवलाहकवृष्टिंवदति २२ क्रोंक्रोंक्रोइतिशब्देन मांगल्यकौतुके दर्शयतः २३ कैंकंकैकमितिशब्देन प्राघूर्णिकः समायाति २४ कोरंकोरमितिशब्देन धनधान्यसमृद्धिंवदति २५ कुरुटंकुरुटंइतिशब्देन निष्कंटकंराज्यंवदति २६ करकंकरकमितिशब्देन बहूनांदर्शनंभवति २७ करकोकरकोइतिशब्देनकलिः स्यात् २८ केतंकेतमितिशब्देन रत्नहानिर्भवति २९ कुरुनु करुनुइतिशब्देन श्रियःसमागमोभवति ३० कुलकुलइतिशब्देन वस्त्रलाभोभवति ३१ कैंकंकेइति शब्देन सुहृदागममारव्याति ३२ इतिशत्रुंजयकरमोचनादिसुकृतकारिमहोपा० श्रीभानुचंद्रगणिभिर्विरचितायांवसंतराजटी०काकरुते स्वरप्रकरणंषष्ठं ६

॥ भाषा ॥

द्रव्य लाभ होय १६ कौंकौं कौं याशब्दकरकें ग्रामवासी चौरतें भय कहेंहै १७ क्रीक्रीक्री या शब्दकरकें सुंदरीकी प्राप्तीहोय १८ कोवंकोवं या शब्द करकें प्रियलक्ष्मीकोओरपशूनको नाश होय १९ कुलंकुलं या शब्द करकें वधबंधसहित राजाको भय होय २० कोईकोई याशब्द करकें कल्याण होय २१ क्लुतं क्लेतं येवाणी बोले तो मेघवृष्टी जाननी २२ क्रोंक्रोंक्रों या शब्दकरकें मांगल्य कौतुक दिखावे २३ कैकं कैकं याशब्द करकें खेतनाशकूं प्राप्त होयजाय २४ कोरंकोरं या शब्दकरकें धनधान्यसमृद्धी कहैहै २५ कुरुटं कुरुटं या शब्द करकें निष्कंटक राज्य मिले २६ करकं करकं याशब्द करकें बोहोतनको दर्शन करावे २७ करकोकरकोयाशब्द करकें कलह होय २८ केतंकेतं याशब्द करकें रत्नकी हानी होय २९ कुरुनु कुरुनु याशब्द करकें श्रीको समागम होय ३० कुलकुल या शब्दकरकें वस्त्रको लाभ होय ३१ कैकं के या शब्दकरकें सुहृज्जननको आगमन कहैहै ॥३२॥ इतिवसंतराजभाषाटीकायां काकरुतेस्वरप्रकरणंषष्ठम् ॥६॥ ॥छ॥

हितंनरेभ्योमुनिभिःपुराणैर्ज्ञानंयदुक्तंबलिपिंडयुक्त्या तदुच्यतेसंप्रतियेनकाकावदंतिसत्यंबलिलाभतुष्टाः ४६ अदक्षिणस्यांदिशियत्रकाकैर्युक्तोभवेत्क्षीरतरुःप्रभूतैः गत्वानिवृत्तेहनितत्रकाकानिमंत्रणीयाबलिपिंडभोज्यैः ४७ प्रातस्ततःक्षीरतरोरधस्ताद्विशोध्यलिंपेन्नवगोमयेन भूमिप्रदेशंचतुरस्रमस्यमध्येर्च्चयेद्ब्रह्ममुरारिभानून् ४८

॥ टीका ॥

हितमिति मुनिभिः पुराणैः बलिपिंडयुक्त्या नरेभ्योहितंयदुक्तंसंप्रति तदुच्यते येन बलिलाभतुष्टाः काकाः सत्यंवदंति १४६ अदक्षिणस्यामिति यत्रअदक्षिणस्यांदिशि प्रभूतैःकाकैर्युक्तः क्षीरतरुर्भवेत् निवृत्तेहनि तत्रगत्वाबलिपिंडभोज्यैः काका निमन्त्रणीयाः १४७ प्रातइति ततःप्रातः क्षीरतरोरधस्तात् भूमिप्रदेशं विशोध्यनवगोमयेन लिंपेत् अस्यमध्येचतुरस्रंमण्डलं कुर्यात् तत्रब्रह्ममुरारिभानूनर्चयेत् १४८ ॥७॥ ॥७॥

॥ भाषा ॥

॥हितमिति॥ सनातन मुनीनें वलिपिंडकी युक्ती करकें जो ज्ञान कह्यो हे ताय कहें हैं जा करकें वलिपिंडके लाभकर तुष्ट हुये काक सत्य कहेंहैं ॥१४६॥ अदक्षिणस्यामिति ॥ दक्षिण दिशाविना ओर दिशामें काकन करकें युक्त होय दूध जामेंसुं निकसत्तो होय तहां सायंकालकूं जाय बलिपिंड देकरकें काकनको निमंत्रण करे ॥१४७॥ प्रातइति ॥ ता पीछें प्रातःकाल दूध जामेसूं निकसे वा वृक्षके नीचें नवीन गोवरसूं पृथ्वीकूं पहलें बुहारी देकर फिर लीपे वाचो कामें चतुरस्र मंडल करै मंडलमें ब्रह्माविष्णु सूर्य इनको पूजन करे ॥१४८॥ ॥७॥

इंद्राग्निवैवस्वतयातुधानजलेशवायुद्रविणेशशंभून् अभ्यर्चयेदष्टसु दिक्षु भक्त्याक्रमेणचाष्टावपिलोकपालान् ४९ नमोयुतैःसप्रणवैश्चसर्वान्निजाभिधानैःप्रयतोमनुष्यः अर्घासनालेपनपुष्पधूपैर्नैवेद्यदीपाक्षतदक्षिणाभिः १५० आवाह्यकाकांस्तरुसन्निविष्टानभ्यर्चयेत्प्राक्तनमंत्रशक्त्या ततस्तदर्थं बलिमाज्यसिक्तं मंत्रेणदद्याद्दधिभक्तपिंडं ५१ मंत्रः ॐ इंद्रायनमः ॐ यमायन॰ ॐ वरुणायन॰ ॐ धनदाय॰ ॐ भूतनाथाय॰ वायसबलिंगृह्णंतु मे स्वाहा ॥

॥ टीका ॥

इंद्राग्नीति अष्टसु दिक्षु भक्त्याइंद्राग्निवैवस्वतयातुधानजलेशवायुद्रविणेशशंभूनष्टावपिलोकपालानभ्यर्चयेत् १४९ नमोयुतैरिति प्रयतोमनुष्यः अर्घासनालेपनपुष्पधूपैर्नैवेद्यदीपाक्षतदक्षिणाभिः नमोयुतैः सप्रणवैः निजाभिधानैः सर्वानभ्यर्चयेत् १५० आवाह्यइति तरुसन्निविष्टान्काकान् आवाह्य प्राक्तनमंत्रयुक्त्याऽभ्यर्चयेत् ततस्तदर्थंदधिभक्तपिंडमाज्यसिक्तं बलिमंत्रेणदद्यात् १५१ मंत्रः ॐ इंद्राययमायवरुणायधनदायभूतनाथायबलिंगृ-

॥ भाषा ॥

॥इंद्राग्नीति॥ फिर आठों दिशानमें क्रमकरकें इंद्र १ अग्नि २ यमराज ३ यातुधान ४ वरुण ५ वायु ६ कुबेर ७ शंभू ८ ये आठ लोकपाल देवतानको पूजन करे ॥१४९॥ ॥नमोयुतैरिति॥ मनुष्य सावधान होय प्रणवसहित नमः अंतमें बीचमें नाम ॐ इंद्रायनमः यारीतसूं सबको अर्घ आसन चंदन पुष्प धूप दीप नैवेद्य अक्षत दक्षिणा इनकरकें पूजन करे ॥१५०॥ आवाह्यइति॥ दुग्धवान् वृक्षमें स्थितजे काक तिनें आवाहन करकें पूर्वकहे जोमंत्र तिनकरकें तापीछें काकके अर्थ घृत मिलवा दहीभातको पिंड मंत्र बोलकरकें बली देवे ॥१५१॥ मंत्रः ॐ इंद्रायनमः ॐ यमायनमः ॐ वरुणायनमः ॐ

उदीर्यकार्यंस्वमथापसत्यततःप्रदेशात्करटस्यचेष्टां
स्पष्टीकृतागामिशुभाशुभार्थांसलक्षयेन्निश्चलपाणि
पादः ५२ पूर्वेणखादन्सुखचित्तवृद्धिंकरोतिवह्ने
र्दिशिवह्निभीतिं काकोन्ननाशंदिशिदक्षिणस्यां
नैर्ऋत्यगोविड्वरकृत्प्रदिष्टः ५३ जलेशदेशेभि
मतार्थवृष्टीवायोर्दिशीतिप्रभवाल्पवृष्टी सौम्येसु
खारोग्यसमीहितार्थानीशानदेशेवितरत्यभीष्टं ५४

॥ टीका ॥

उदीर्येति प्रथमं स्वंस्वकीयंकार्यमुदीर्य ततःप्रदेशात् अपसृत्य निश्चल पाणिपादः करटस्यचेष्टांस्पष्टीकृतागामिशुभाशुभार्थामिति स्पष्टीकृताः आगामिशुभाऽशुभार्थाः यया तांसंलक्षयेत् १५२ पूर्वेणेति पूर्वेणखादन् सुखेनचित्तवृद्धिं करोति वह्नेर्दिशिआग्नेय्यांदिशिवह्निभीतिं करोति दक्षिणस्यांदिशिकाकः अर्थनाशंकरोति नैर्ऋत्यगः विड्वरकृत्प्रदिष्टः १५३ जलेइति जलेशदेशेप्रतीच्यांदिशिअभिमतार्थवृष्टीस्याताम् वायोर्दिशिइति प्रभवाल्पवृष्टीस्यातां सौम्येउदीच्यांदिशि सुखारोग्यसमीहितार्थान् करोति ईशानदेशेऽभीष्टंवितरति १५४

॥ भाषा ॥

धनदायनमः ॐ भूतनाथायनमः वायसबलिंगृह्णंतुमेस्वाहा ॥ उदीर्येति ॥ प्रथम अपनो कार्य कह करकें पीछें वा स्थानसूं पीछो आय निश्चल होय काककी चेष्टा शुभ अशुभकी कहवेवाली ताय लक्षणाकरे ॥१५२॥ पूर्वेणेति॥ पूर्वदिशामें जो काक खावतो दीखे तो सुखचित्त कीवृद्धीकरे अग्निकोणमें दीखे तो अग्नीको भय करे दक्षिणदिशामें दीखे तो अन्नको वा अर्थको नाश करे औरनैर्ऋत्य कोणमें दीखे तो धनवान् करे ॥ १५३ ॥ जलेशेति ॥ वरुणदिशामें दीखेतो वांछित्त अर्थवृष्टी करे वायुकोणमें दीखे तो अल्पवृष्टी होय उत्तरदिशामे दीखे तो

बलौविलुप्तेकरटैः समंतात्कार्यंविमिश्रंप्रविभावनीयं
बलिंविकीर्यापिन भक्षयंतियदातदानीं भयदाभवंति ५५
क्षीरद्रुमारामचतुष्पथेषुसरित्समीपत्रिदशालयेषु दे
योबलिर्भूतदिनाष्टमीषुकुल्माषदध्योदनतंडुलाद्यैः
१५६ इतिकाकरुते पिण्डप्रकरणंसप्तमम् ७

॥ टीका ॥

बलाविति करटैःसमंताद्बलौ विलुप्ते विमिश्रंकार्यं परिभावनीयं बलिंविकीर्यापिचेत्काकानभक्षयंति तदाभयदा भवंति १५५ क्षीरइति क्षीरद्रुमारामचतुष्पथेष्विति क्षीरद्रुमावटप्रभृतयः आरामउपवनं चतुष्पथं चवाठ इतिलोकभाषायांप्रसिद्धं सरित्समीपत्रिदशालयेष्विति सरिद्वाहिनी तस्याः समीपंतीरं त्रिदशालयः देवगृहं तेषु भूतदिनाष्टमीष्विति भूतदिनं चतुर्दशी अष्टमी प्रतीता तासु कुल्माषदध्योदनतंदुलाद्यैः पूर्वोक्तासुतिथिषु पूर्वप्रतिपादितस्थलेगत्वाबलिर्देयइत्यर्थः १५६ इतिवसंतराजशाकुनेकाकरुते पिंडप्रकरणं सप्तमं समाप्तम् ७

॥ भाषा ॥

सुख आरोग्य वांछित अर्थ करे और ईशान दिशामें दीखे तो वांछित अर्थ करें ॥१५४॥ ॥ बलाविति ॥ जो काकनकरकें च्यारोंमेसूंबलिपिंड लुप्त होय जांय तो कार्य मिलवां विचारनो योग्य है और जो बलिपिंडकूं बिखेरदें भक्षण नहीं करें तो भयके देवेवारो जाननो ॥१५५॥ क्षीरद्रुमेति ॥ जामें दूध होय एसे वृक्ष जे वटकूं आदिलेकें और उपवन चोरायो और वहती नदीके समीप तीर और देवमंदिर इन स्थाननमें और चतुर्दशी अष्टमी इन तिथीनमें जाय करकें रंधे हुये जो की घुघुरी दहीभात चांवल इनकरकें बलि पिंड देवै ॥१५६॥ ॥ इतिश्रीवसंतराजभाषाटीकायां काकरुते पिंडप्रकरणं सप्तमं समाप्तम् ॥७॥ ॥ ७॥

पिंडत्रयस्याथविधानमेतदाख्यायतेयत्किलनारदाद्यैः
दिष्टंमुनींद्रैरशुभंशुभंचयथावदस्मिन्कथयंतिकाकाः
५७ गत्वाशुभेह्नःप्रहरेचतुर्थेदेशेषुपूर्वप्रति
पादितेषु नरेणपिंडत्रयभोजनार्थंकाकाःप्रयत्नेननि
मंत्रणीयाः ५८ ततःप्रभातेप्युपलिप्यभूमिंतस्यां
चपूर्वोदितमंत्रयुक्त्या ब्रह्माच्युताहर्पतिलोकपालाः
काकाश्चपुंसाक्रमतोर्चनीयाः ५९ .दध्योदनाद्यैर्वि-
हितंनिवेश्यपिंडत्रयंमण्डलकस्यमध्ये ॥

॥ टीका ॥

पिंडत्रयइति पिंडत्रयस्य एतद्विधानंमया आख्यायते यन्नारदाद्यैर्मुनिभिर्दिष्टंकथितं
अस्मिन्काकाः शुभाशुभंयथावत्कथयंति१५७ गत्वेति अह्नः
शुभे चतुर्थप्रहरे पूर्वप्रतिपादितेषुदेशेषु गत्वा पिंडत्रयभोजनार्थं नरेणकाकाः
निमंत्रणीयाः १५८ ततइति ततः प्रभाते भूमिं अभ्युपलिप्य तस्यांच
पूर्वोदितमंत्रयुक्त्या ब्रह्माच्युताहर्पतिलोकपालाः ब्रह्माविष्णुसूर्याः अष्टलो
कपालाश्च काकाश्चपुंसा शाकुनिकेनक्रमतोर्चनीयाः १५९ दध्योदनाद्येरिति
मंडलकस्यमध्ये दध्योदनाद्यैः विहितंपिंडत्रयं निवेश्ययत्नपरोमनु-

॥ भाषा ॥

॥ पिंडत्रयइति ॥ नारदादिक मुनीनें कह्यो जो पिंडत्रयको विधान सो में कहूंहूं यामें काक
शुभ अशुभ सब यथायोग्य कहेंहें ॥१५७॥ गत्वेति ॥ शुभदिनके चोथे प्रहरमें पहलें
कहे जे स्थान देश उनमें जाय करकें पिंडत्रयके भोजनके लियें काकनको निमंत्रण
करे अर्थात् नोत आवे ॥१५८॥ ततइति ॥ तापीछें दूसरे दिन प्रभात समयमें पृथ्वी
लीपकरकें ता पृथ्वीमें मंडल मांडकर तामें पूर्व कहे जे मंत्र उनकर कें ब्रह्माविष्णु
सूर्यनारायण लोकपाल देवता काक इनको शाकुनी पूजन करे ॥ १५९॥ दध्योदनाद्येरिति
॥ ता मंडलके मध्यमें दही भात घी इनके करेहुये तीनो पिंड धरकरकें यत्नमें प-

अभ्यर्चयेदक्षतपुष्पधूपैर्मनोहरैर्यत्नपरोमनुष्यः १६०
तेषुक्षिपेत्प्राग्दिगनुक्रमेणपिंडेषुहैमंप्रथमंद्वितीये
रूप्यंतथालोहलवंतृतीयेशेषंचकुर्याद्बलिपिंडतुल्यम्
६१ त्रिःसप्तकृत्वोविनिवेश्यमंत्रंपिंडान्निवेद्याबलिभो
जनेभ्यः मंत्रोक्तमावाहनतोषितेभ्यः कार्यंविचार्याप
सरेत्ततस्तु ६२ मंत्रः ॐ इरिटिमिरिटिकाकचंडाली-
स्वाहा इतिपिंडाभिमंत्रणमंत्रः ॐ ब्रह्मणेविश्वायकाक
चांडालायस्वाहा इतिकाकाह्वानमन्त्रः ॥

॥ टीका ॥

ष्यः मनोहरैरक्षतपुष्पधूपैरभ्यर्चयेत् १६० तेष्विति प्राग्दिगनुक्रमेण पूर्वादिशानुक्रमेण तेषुप्रथमेपिंडेहैमंद्वितीयेपिंडेरूप्यं तृतीयेलोहलवंक्षिपेत् शेषं बलिपिंडतुल्यंकुर्यात् १६१ त्रिःसप्तइति त्रिःसप्तकृत्वः एकविंशतिवारंमंत्रंविनिवेश्यासमंताद्बलिभोजनेभ्यः पिंडान्निवेद्य कथंभूतेभ्यः मंत्रोक्तमावाहनतोषितेभ्यइतिमंत्रोक्तैर्यदावाहनं आह्वानं तेनतोषितेभ्यः कार्यंविचार्य ततोऽपसरेत् १६२ मंत्रः ॐ इरिटिमिरिटी काकचंडालीस्वाहा इतिपिं॰ मं॰ ॐ ब्रह्मणेविश्वायकाकचांडालायस्वाहा इतिकाकाह्वानमंत्रः

॥ भाषा ॥

रायण होय मनुष्य सुंदर पुष्पाक्षत धूपदीपक इनकरकें अर्चन करे १६० ॥ तेष्विति ॥ पूर्वादिक दिशानके क्रमकरकें प्रथमपिंडमें सुवर्ण धरे द्वितीय पिंडमें चांदी धरे तृतीयपिंडमें लोहेकोटूक धरे शेष बलिपिंडकी तुल्य करे ॥१६१॥ त्रिःसप्तइति ॥ इक्कीसपोत मंत्र पढकरकें काकनके अर्थ पिंड निवेदन करे या मंत्रसूं आवाहन करकें प्रसन्न हुये काकनके अर्थ अपनो कार्य विचार करकें आप पीछो हट आवे ॥१६२॥ मंत्रः ॐ इरिटि मिरिटि काकचांडाली स्वाहा ॥ ये मंत्र पिंडनकूं अभिमंत्रण करवेको हे ॥ ॐ ब्रह्मणे विश्वाय काकचाण्डालाय स्वाहा ॥ ये मंत्र काकनके आव्हानको हे ॥ ॥ ७॥

काकेनभुक्तेसहिरण्यपिंडे ज्ञेयंनरैरुत्तममात्मकार्यं
भुक्तेसरूप्येखलुमध्यमंस्याल्लोहेनयुक्तेत्वधमंप्रदिष्टम् ६३
विवादवाणिज्यविवाहवृष्टिक्षेमार्थचिंताकृषिभोगरोगाः संग्रामसेवानृपकार्यदेशाइत्यादयोऽस्मिन्परिभावनीयाः ६४
चेष्टामवामांविदधातियातिप्रदक्षिणंदक्षिणपक्षमुच्चैः ग्रीवांतथोच्चैः कुरुते सुशब्दः स्थानंमनोज्ञंश्रयतेद्रुमंवा ६५

॥ टीका ॥

काकइति सहिरण्यपिंडे काकेनभुक्तेसति उत्तममात्मकार्यंनरैर्ज्ञेयं सरूप्ये भुक्तेसति मध्यमंकार्यंस्यात् लोहेनसहितेभुक्ते त्वधमंकार्यंप्रदिष्टं १६३ विवादेति विवादवाणिज्यविवाहवृष्टिक्षेमार्थचिंताकृषिभोगरोगाः संग्रामसेवानृपकार्यदेशाइत्यादयोऽस्मिन्पिंडेपरिभावनीयाः विचारणीयाइत्यर्थः १६४ चेष्टामिति यदिचेष्टामवामांविदधातिदक्षिणंपक्षंमुच्चैः कृत्वाप्रदक्षिणंयाति तदासुशब्दः समस्तंकार्यंकुरुते यदिग्रीवामुच्चैः कृत्वा मनोज्ञं स्थानंद्रुमंवाश्रयतिचेत् समस्तंकार्यंकुरुतेइतिज्ञेयम् १६५

॥ भाषा ॥

॥ काकेनेति ॥ जो काक सुवर्णसहित पिंडकूं भक्षण करे तो अपनो कार्य उत्तम जाननो ओर जो चांदी सहित पिंडकूं भक्षण करे तो मध्यम कार्य जाननो जो काक लोहेको टूक जामें ता पिंडकूं भक्षण करे तो कार्य अधम जाननो ॥ १६३ ॥ विवादेति ॥ विवाद वाणिज्य विवाह वृष्टिक्षेम धनचिंता कृषी भोग रोग संग्राम सेवा राजकार्य देश ये सब या पिंडमें विचारकरनो योग्यहे ॥ १६४ ॥ चेष्टामिति ॥ जो काक दक्षिणअंगकी चेष्टा करे ओर दक्षिण पंखकूं ऊंचे करकें दक्षिणभागमें चल्यो जाय सुंदरशब्द बोले तो समस्तकार्य करे ओर जो ग्रीवाकूं ऊंची करकें सुंदरशब्द बोले सुंदरस्थान पे जाय बेठे अथवा वृक्षपे जाय बेठे ॥ १६५ ॥

एवंविधांयोविदधातिचेष्टांपिंडंसमादायशुभःखगोसौ
अभीष्टकार्यादधिकंकरोतिचेष्टाविपर्यासतयाऽन्यथा
त्वं ६६ पिंडंसमादाययदिप्रधानांशांतांदिशंगच्छ-
तिकाकपक्षी पूर्णफलंतत्कुरुतेनराणांचिकीर्षितेव
स्तुनियत्रतत्र ६७ काकोगृहीत्वायदिमुख्यपिंडंप्र
यातिदीप्तांककुभंतदानीं अत्युत्तमंकार्यफलंप्रद-
र्श्यततःसमस्तंविनिहन्त्यवश्यम् ६८ द्वितीयकंय
द्यपहृत्यपिंडमुड्डीयतेशान्तदिगाश्रयेण ॥

॥ टीका ॥

एवमिति पिंडंसमादाय एवंविधांयः चेष्टां विदधाति सशुभः खगः अभीष्टकार्यादधिकं करोति चेष्टाविपर्यासतयाऽन्यथात्वंवैपरीत्यंभवति १६६ पिंडमिति यदि काकपक्षी पिंडंसमादाय प्रधानांदिशं गच्छति तदा नराणां यत्रतत्र चिकीर्षितेवस्तुनि समस्तंपूर्णफलं कुरुते १६७ काकइति यदि काकः मुख्यपिंडंगृहीत्वा दीप्तांककुभंप्रयाति तदानीं अत्युत्तमंकार्यफलं प्रदर्श्य ततः समस्तं अवश्यं विनिहंति १६८ द्वितीयकमिति यदि द्वितीयकं पिंडमपहृत्य शांतदिगाश्रयेण उड्डीयते तदा कार्यिकाणां शुभंफलंजाप्यं

॥ भाषा ॥

॥ एवमिति ॥ जो काक पिंड लेकरकें एसी एसी चेष्टा करे वो शुभ पक्षी वांछित कार्यसूं अधिक कार्य करे ओर जो इन चेष्टासूं विपरीत चेष्टा करे तो विपरीत कार्य होय ॥ १६६ ॥ पिंडमिति ॥ जो काक पक्षी प्रधान जो मुख्य पिंड तायले करकें शांता दिशाकूं चल्यो जाय तो मनुष्यनकूं जा काऊ कार्यमें समस्त पूर्ण फल करे ॥ १६७ ॥ काकइति ॥ जो काक मुख्य पिंड लेकरकें दीप्तदिशामें चल्यो जाय तो अतिउत्तम कार्य फल दिखाय करकें तापीछें समस्त कार्यकूं अवश्य नाश करे ॥ १६८ ॥ ॥ द्वितीयकमिति ॥ जो काक दूसरो पिंड लेकरकें शांत दिशाको आश्रय लेकर उड-

फलंतदानीमशुभंनराणांजाप्यंखगोजल्पतिकार्यिकाणां
६९ काकेसमादायजघन्यपिंडंयातेप्रदीप्तांककुभंवदं
ति कार्यंजघन्यादधिकंजघन्यंस्यान्मध्यमंमध्यमपिं
डभागे १७० इतिवसंतराजशाकुनेपिंडत्रयप्रकरणं ८
महर्षयोवायसशाकुनस्यवदंतिसारादतिसारभूतं पिं
डाष्टकंयत्तदशेषमेतदाख्यायतेकार्यविनिश्चयार्थं ७१
शुभेह्निकाकानधिवास्यसायंपिंडाष्टाकंभोक्तुमथप्रभाते
तत्कालयोग्यानिसमस्तवस्तून्यादाययायाद्बहिरप्रमत्तः ७२

॥ टीका ॥

मनोभीष्टंखगोजल्पति १६९ काकेइति काकेजघन्यपिंडंसमादायप्रदीप्तांककुभंयातेसति कार्यंजघन्यादधिकंजघन्यंस्यात् मध्यमपिंडभागे मध्यमंकार्यंस्यादित्यर्थः १७० इतिवसंतराजटी० काकरुतेपिंडप्रकरणमष्टमम् ८ महर्षयइति महर्षयोमुनयोवायसशाकुनस्य सारादतिसारभूतंपिंडाष्टकं यद्वदंति तदशेषंकार्त्स्न्येनकार्यविनिश्चयार्थं आख्यायते १७१ शुभेऽन्हीति शुभेअह्नि पिंडाष्टकंभोक्तुंसायं काकानधिवास्य अथप्रभातेतत्कालयोग्यानिसमस्तानिवस्तून्यादायाप्रमत्तः बहिर्यायात् १७२

॥ भाषा ॥

जाय तो कार्यवान् पुरुषनकूं शुभ फल करे ॥ १६९ ॥ काकेइति जो काक लोहयुक्त निकृष्ट पिंड लेकरकें प्रदीप्त दिशामें चल्यो जाय तो कार्यमें निकृष्टसूंवी निकृष्टता करे मध्यमपिंडमें मध्यम कार्य होय ॥ १७० ॥ इतिवसंतराजभाषाटीकायां काकरुते पिंडप्रकरणं ॥ ८ ॥ महर्षयइति ॥ महर्षी जन काकके शाकुनकूं सारनेंवी अतिसारभूत श्रेष्ठ कहेंहें कार्यके निश्चयके अर्थ जो ये पिंडाष्टक कह्यो सो अब समस्त विधिपूर्वक वर्णन करेंहें ॥ १७१ ॥ शुभेन्हीति ॥ शुभदिन होय तादिना सायंकालकूं पिंडाष्टक भोजनकरवेकूं काकनकूं पूजन निमंत्रण कर आवे फिर दूसरे दिन प्रभातसमयमें सवपूजनसाहित्य लेकरकें सावधानहोय वहार वनमें जाय ॥ १७२ ॥

एकांतदेशेतरुपार्श्वभूमौमृत्गोमयाभ्यामुपलेपितायां
सत्पंचगव्येनसमुक्षितायांरम्योपहारैरुपशोभितायां
७३ विधायपूजांकुलदेवतानांमध्येततोष्टास्वपिदिक्षु
देयं भक्तेनसर्पिर्दधिमिश्रितेनपिंडाष्टकंप्राग्दिगनुक्र
मेण ७४ पक्षीन्द्रवह्न्यन्तकराक्षसेन्द्रान्विष्णुंवि
रिंचिंधनदंमहेशम् पूर्वादिकाष्ठाक्रमयोजितेषुन्य
सेत्क्रमादष्टमपिण्डकेषु १७५

॥ टीका ॥

एकांतइति एकांतदेशेतरुपार्श्वभूमौमृद्गोमयाभ्यामुपलेपितायामिति
मृत्मृत्तिका गोमयं छंगणं ताभ्यामुपलेपितायां लिप्तायामित्यर्थः सत्पंच
गव्येनसमुक्षितायामिति सत्शोभनंयत्पंचगव्यं पंचामृतं तेनसमुक्षि
तादत्तछटा तस्यांरम्योपहारैरुपशोभितायामिति रम्यायेउपहाराबलयस्तै
रुपशोभितायां तत्रगत्वाइतिशेषः पूरणीयः १७३ विधायेति कुलदेवता
नांपूजांविधाय ततोमध्येष्टसु दिक्षु सर्पिर्दधिमिश्रितेनभक्तेन प्रागदिग
नुक्रमेण पिंडाष्टकं देयं १७४ पक्षीति पूर्वादिकाष्ठाक्रमयोजितेषु अष्टसु
पिंडेषु पक्षींद्रवन्ह्यन्तकराक्षसेंद्रान् विष्णुं विरिंचिं धनदं महेशं क्रमात्
न्यसेत् १७५ ॥ छ॥ ॥ छ॥

॥ भाषा ॥

॥एकांतइति॥ एकांतदेशमें वृक्षकेपास पृथ्वी गोवर मृत्तिकासूं लीपकर सुंदर पंचामृतके
छिंटा देकर फिर पूजनकी सामग्री सवधर देवै ॥१७३॥ विधायेति॥ फिर प्रथम कुल
देवतानको पूजनकरकें ता मंडलके मध्यमें आठों दिशानमें घी दहीभात इनकरकें पू-
र्वदिशाकूं आदिले क्रमकरकें पिंडाष्टक देवै॥ १७४॥ पक्षींद्रेति ॥ पूर्वकूं आदिले
आठो दिशानमें युक्त किये जे आठ पिंड तिनमें क्रमसूं पक्षींद्र वह्नी अंतक राक्षसेंद्र विष्णु
विरिंची धनद महेश इन आठ देवतानकूं स्थापन करे॥ १७५॥

नमोयुतैःसप्रणवैश्चसर्वांस्ततोर्चयेत्तान्निजनाममंत्रैः
अर्घासनालेपनपुष्पधूपनैवेद्यदीपाक्षतदक्षिणाभिः ७६
अभ्यर्चितेभ्योविधिनोदितेनपिंडाष्टकंतत्तदनुद्विजेभ्यः
मंत्रेणसंमंत्र्यनिवेदनीयंकार्यंविचिंत्यापसरेत्तुकिंचित्
७७ मंत्रः ॐ नमःखगपतयेगरुडायस्वाहा ॥
द्रोणाष्टकमसुंपिंडंगृहाणत्वमशंकितः यथादृष्टंनि
मित्तंचकथयाद्यस्फुटंमम १७८

॥ टीका ॥

नमइति ततोनिजनाममंत्रैर्नमोयुतैः सप्रणवैः तान्सर्वान् अर्चयेत् काभिः अर्घासनालेपनपुष्पधूपनैवेद्यदीपाक्षतदक्षिणाभिः व्याख्या पूर्ववत् १७६ अभ्यर्चितइति तत्पिंडाष्टकं विधिनोदितेनाभ्यर्चितेभ्योद्विजेभ्यः अनुपश्चात् मंत्रेण संमंत्र्यकार्यं विचिंत्य निवेदनीयं ततः किंचिदपसरेत् १७७ मंत्रः ॐ नमःखगपतयेगरुडायस्वाहा द्रोणेति त्वं अशंकितः द्रोणाष्टकमसुं पिंडं गृहाण च पुनर्यथादृष्टं निमित्तं अद्यमम स्फुटंकथय १७८ ॥ छ ॥ ॥ छ ॥

॥ भाषा ॥

॥नमइति॥ आदिमें प्रणव अंतमें नमः बीचमें नाम ॐ विष्णवेनमः या रीतसूं मंत्रनकरकें संपूर्ण देवतानको अर्घ आसन चंदन पुष्प धूप दीपक नैवेद्य अक्षत दक्षिणा इनकरकें पूजन करे ॥१७६॥ अभ्यर्चितइति ॥ पक्षीनको पूजन कर ता पीछें मंत्रसूं पिंडाष्टककूं अभिमंत्रण करकें अपनो कार्य विचार करवो पिंडाष्टक पक्षीनके अर्थ निवेदन करकें कछूकपेंड पीछो हट आवै ॥१७७॥ ॐ नमःखगपतये गरुडायस्वाहा ॥ ये मंत्र अभिमंत्रनको है ॥ द्रोणेति॥ हे काक तुम याअष्टकपिंडकूं निःशंक ग्रहण कर फिर जेसो कार्य होन हार होय तेसो मोकूं निश्चय कहो ॥ १७८॥

काकेनपिंडेप्रथमेगृहीतेतिष्ठन्व्रजेन्नाऽपिभवेत्कृतार्थः
उद्वेगशोकौविफलःप्रवासोहानिःकलिर्वाभवतिद्वितीये ७९ याम्येरुगाऽऽपद्भयमृत्यवःस्युः
पिण्डेचतुर्थेविजयोरणेषु स्याद्वैष्णवेऽभीष्टमकष्टसाध्यंभवेत्प्रवासोविफलश्चषष्ठे १८० नास्तीहतन्निश्चितमेवकार्यंभुक्तेनयत्सिद्ध्यतिसौम्यपिंडे संतापशोकौविफलाचयात्रापिण्डाष्टमेवायसभक्षितेतु ८१

॥ टीका ॥

काकेनेति काकेनप्रथमेपिंडेगृहीतेतिष्ठन्व्रजेन्नापुरुषःकृतार्थःस्यात् द्वितीयेपिण्डेगृहीतेउद्वेगशोकौस्यातां प्रवासः यात्राविफलःस्यात् हानिः कलिर्वाभवति१७९ याम्येइति याम्येतृतीयेपिंडेगृहीतेरुगापद्भयमृत्यवः रुक्रोगः आपत् आपत्तिः भयमृत्यूप्रसिद्धौ एतेस्युः चतुर्थेपिंडेगृहीतेरणेषुविजयःस्यात् वैष्णवेपिंडेगृहीतेऽभीष्टंअकष्टसाध्यंस्यात् षष्ठेपिंडेविफलःप्रवासोभवेत् १८० नास्तीति सौम्यपिंडेभुक्तेइहतन्निश्चितमेवकार्यंनास्ति यन्नसिद्ध्यतिवायसभक्षितेपिंडेष्टमेसंतापशोकौ

॥ भाषा ॥

॥ काकेनेति ॥ जो काक प्रथमपिंडकूं ग्रहणकर स्थिन रहे वाउडजाय तो पुरुष कृतार्थ होय अर्थात् सर्वकार्य होंय और द्वितीयपिंडकूं ग्रहण करे तो उद्वेगशोक होंय और यात्रा विफल होय और हानि कलह होय ॥ १७९ ॥ याम्येइति ॥ तीसरे पिंडकूं ग्रहण करे तो रोग आपदा भय मृत्यू ये होंय और चोथे पिंडकूं ग्रहण करे तो संग्राममें विजय होय जो पांचमो पिंड ग्रहण करे तो कष्ट करैविना अभीष्टकी सिद्धी होय और छटो पिंड ग्रहण करै तो यात्रा विफल होय ॥ १८० ॥ नास्तीति ॥ सातमो पिंड भक्षण करै तो निश्चय ही कार्यनही होय और जो काक आठमो पिंड भक्षण करे तो संताप शोक होंय और

पिण्डंनगृह्णात्यथवानभुंक्तेचंचूनरैर्वाविक्षपतिक्षितो
यः कार्येषुसर्वेषुनसप्रशस्तोब्रवीतिघोरंसमरंचपुं
साम् १८२ इतिवसंतराजशाकुनेकाकरुतेपिंडाष्ट
प्रकरणंसंपूर्णम् ९ आद्येपंचशताद्वाभ्यांवृत्तैर्दि
क्चक्रमीरितम् काकालयपरीक्षाचद्वितीयेदशभि
स्त्रिभिः १ वृत्तैस्त्रिभिस्तृतीयेचकाकांडकपरी-
क्षणम् द्विचत्वारिंशताद्वृत्तैर्यात्रातुर्येप्रकीर्तिता २

॥ टीका ॥

भवतः फलदाचयात्रानस्यात् १८१ पिंडमिति यःकाकः पिंडनगृण्हाति अथवा नभुंक्ते उतचक्षितौ चंच्वानरवैश्च इतस्ततोविक्षपतिसः सर्वेषु कार्येषु नप्रशस्तः चपुनः पुंसां घोरं समरंब्रवीति १८२ इतिशत्रुंजयकरमोचनादिस्फुरत्कारिमहोपा० श्रीभा० गणिभिर्विरचितायांवसंतराजटीकायांकाकरुतेपिंडाष्टकप्रकरणंनवमं ९ आद्यइति आद्येः पंचशताद्वाभ्यामधिकेनवृत्तैः दिक्चक्रमीरितं द्विनीये दशभिः स्त्रिभिः त्रिंशच्छ्लोकैः काकालयपरीक्षाउक्ता १ वृत्तैरिति तृतीये त्रिभिर्वृत्तैः काकांडविचारणं तुर्ये द्विचत्वारिंशताद्वृत्तैर्यात्रा प्रकीर्तिता कथिता २

॥ भाषा ॥

यात्रा फलकी देवेवारी नहीं होय ॥१८१॥ पिंडमिति ॥ जो काक पिंडकूं ग्रहण नहीं करे भक्षणवी नहीं करै और चोंच नखनकरकें पृथ्वीमें विखेर देवे तो वोउत्तम नहीं जाननो पुरुषनको घोरसंग्राम करावे ये जाननो ॥१८२॥ इनिवसंतराजभा० टी० काकरुतेपिंडाष्टकप्रकरणं न० ॥ ९॥ आद्यइनि ॥ प्रथमप्रकरणमें वामनश्लोकनकरकें दिक्चक्र कह्यो हे द्वितीयमें तेरह श्लोकनकरकें काकालयकी परीक्षा कही है ॥ १ ॥ वृत्तैरिनि ॥ नृतीयमें तीनश्लोकनकरकें काकांडकी परीक्षा कहीहै चोथेमें वैंचालीस श्लोकन करकें यात्रा कही हे ॥ २॥

॥ ५॥ ॥ ५॥

वृत्तानिविंशतिस्त्रीणिस्थानस्थाख्येचपंचमे स्वरप्रक
रणंषष्ठंवृत्तैर्द्वादशभिस्ततः ३ एकादशभिराख्यातं
बलिसंज्ञंचसप्तमं पिंडत्रयविधानायचतुर्दशभिरष्टमं
४ पिंडाष्टकाभिधानार्थंनवमंयदुदाहृतं अंत्यंप्रकर-
णंतत्रवृत्तान्येकादशैवहि ५ नवप्रकरणान्येवमा
हुर्बलिभुजोरुते सामस्त्येनचवृत्तानामेकाशीत्यधिकं
शतं ६ इतिवसंतराजशाकुनेद्वादशोवर्गः स० १२

॥ टीका ॥

वृत्तानीति स्थानस्थाख्येचपंचमेविंशतिस्त्रीणिवृत्तानिस्युः ततोवृत्तैर्द्वादशभिः स्वरप्रकरणंषष्ठमुक्तंभवति ३ एकादशेति सप्तमंबलिसंज्ञमेकादशभिर्वृत्तैराख्यातं अष्टमंचतुर्दशभिर्वृत्तैःपिंडत्रयविधानायभवति ४ पिंडेष्टकेति पिंडाष्टकाभिधानार्थं नवमं अंत्यप्रकरणंयदुदाहृतं तत्रवृत्तान्येकादश भवंति ५ नवइति एवममुनाप्रकारेणबलिभुजोरुते नवप्रकरणान्याहुः विपश्चितइतिशेषः सामस्त्येनच वृत्तानां एक शीत्यधिकंशतंमतं ६ वसंतइति वसंतराजशाकुनेविचारितोत्रवायसः शेषाणि विशेषणानिपूर्ववत् इतिश० व०टी० काकरुते द्वादशोवर्गः समाप्तः १२

॥ भाषा ॥

॥ वृत्तानीति ॥ पंचममें तेईस श्लोकनकर स्थानस्थित कहेंहें छठेमें द्वादशश्लोकनकरकें स्वरको प्रकरण कह्यो हे ॥३॥ एकादशेति ॥ सातमो एकादशश्लोकनकरकें बलिसंज्ञक प्रकरण कह्यो हे ॥४॥ पिंडाष्टकेति ॥ पिंडाष्टकके नामके अर्थ अंत्यको नवमो प्रकरण एकादशश्लोकनकरकें कह्यो हे ॥५॥ नवइति ॥ या प्रकार काकरुतमें नो प्रकरण कहेंहे तिनमें समस्त श्लोक एकसो इक्यासी हें ॥६॥ ॥ इतिश्रीवसंतराजभाषाटीकायां काकरुते द्वादशोवर्गः समाप्तः ॥१२॥ ॥छ॥

निशाचरः पत्ररथः पृथिव्यांयः पिंगलेतिप्रथिताभिधानः उत्पादिताश्चर्यपरंपराणि निरूपयामः शकुनानि तस्य १

॥ टीका ॥

निशाचरइति तस्यशकुनानिवयंनिरूपयामः कीदृशानि उत्पादिताश्चर्यपरंपराणीति उत्पादिताः प्रकटीकृता आश्चर्यंचित्रं तस्यपरंपराः श्रेणयोयैस्तानि योनिशाचरः पत्ररथः पक्षी पृथिव्यां पिंगलइतिप्रसिद्धाभिधानोवर्त्तते १ पूर्वंकपिलमुनिनाचंडिका आराधिता साज्ञानंकथितवती तेनतज्ज्ञानंकलियुगेकदाचिदसत्यंनभवति तत्रप्रथममधिवासनप्रकरणं द्वितीयंशांतदीप्ताख्यं तृतीयंस्वरमात्रज्ञानंचतुर्थंस्वरगृहाख्यं पंचमंशत्रुमित्रेउदासीनताभिधं षष्ठंधेनुगर्भबंधाख्यं सप्तमंकेवलंस्वरभावाख्यं अष्टमं द्विसंयोगाख्यं नवमं त्रिसंयोगाख्यं दशमंचतुः संयोगाख्यं एकादशंसंकीर्णप्रकरणं द्वादशंचेष्टाज्ञानं त्रयोदशंयात्राप्रकरणं एवंत्रयोदशप्रकरणानि भवंति तत्राद्यंप्रकरणंप्रतिपादयन्नाह ॥छ॥ ॥छ॥

॥ भाषा ॥

॥निशाचरइति॥ जो रात्रीमें विचरेहे पंख जाके रथ और पृथ्वीमें पिंगल या नामकर प्रसिद्ध हे ता पिंगलपक्षीके चित्रविचित्र आश्चर्यपरंपराकूं प्रगट करवेवाले शकुन हम निरूपण करेंहें ॥१॥ पहलें कपिलमुनिननें चंडिकाको आराधन कियो तव वो चंडिकाज्ञान कहती हुई ताकरकें वो ज्ञान कलियुगमें कदाचित् असत्य नहींहे तामें पहलो अधिवासनप्रकरण १ दूसरो शांतदीप्त नाम २ तीसरो स्वरमात्रज्ञान ३ चोथो स्वरग्रहनाम ४ पांचमो शत्रुमित्रमें उदासीनता ५ छटो धेनुगर्भबंधनाम ६ सातमो केवल स्वरभावनाम ७ आठमो द्विसंयोग नाम ८ नोमो त्रिसंयोग नाम ९ दशमो चतुःसंयोग नाम १० ग्यारमो संकीर्णप्रकरण ११ वारमो चेष्टा ज्ञान १२ तेरमो यात्रा प्रकरणं १३ याप्रकार त्रयोदश प्रकरणहें तिनमेंसूं प्रथम अधिवासन प्रकरण कहेंहें ॥ ॥छ॥

तत्रतावदधिवासनेविधिःकथ्यतेयदधिवासनेकृतेतोषमेतिशाकुनाधिदेवतातेनसाभवतिसत्यवादिनी २ विमर्शकःशाकुनशास्त्रदक्षोसदाविशुद्धःसतताभियुक्तः यथार्थवादीशुचिरिंगितज्ञोभवेदिहाचार्यपदाधिकारी३ यदादिनर्क्षग्रहलग्नशुद्धिस्ताराबलंचंद्रमसोबलंच पुंसांतदाभीप्सितकार्यसिद्ध्यैपिंगेक्षणायाःशकुनंनिरीक्ष्यम् ४ क्षीणचंद्रतिथिदुःसहानिलंदूषितंधरणिकंपनादिना सर्ववज्जलदसंकुलांबरंवर्जयेच्छकुनदर्शनेदिनम् ५

॥ टीका ॥

तत्रेति तत्रतस्मिन्पिंगलाप्रकरणेतावदादौ अधिवासनेशाकुननिमंत्रणेविधिः कथ्यते प्रतिपाद्यते यदधिवासनेकृतेशाकुनाधिदेवताशाकुनाधिष्ठात्रीसुरीतोषमेति सासुरीतेनतोषेणहेतुना सत्यवादिनी स्यात् २ विमर्शकइति अत्रापिपूर्वप्रतिपादितएवाधिकारीज्ञेयः३ यदेति क्षीणइति पूर्वंव्याख्यातं ४।५

॥ भाषा ॥

॥ तत्रेति ॥ पिंगलाके प्रकरणमें जो प्रथम अधिवासन तामें शकुननिमंत्रणकी विधि कहेंहैं अधिवासन करेसुं शकुनकी अधिष्ठाता देवी प्रसन्न होय है वो प्रसन्न हुयेसूं सत्यवादिनी होयहै ॥ २ ॥ विमर्शकइति ॥ विचारको करवेवालो होय शकुनशास्त्रमें चतुर होय सदा शुद्ध रहतो होय योग्य होय सत्यवादी होय सब चेष्टानकूं जानतो होय एसो शकुनको देखवेवारो अधिकारी होय ॥ ३ ॥ यदेति ॥ जब दिन नक्षत्र ग्रहलग्न शुद्धी ताराबल चंद्रमाकोबल येपुरुषके अनुकूल होंय तबवांछित कार्यकी सिद्धीके लियें पिंगलको मुहूर्त देखनो योग्यहै ॥ ४ ॥ क्षीणचंद्रेति ॥ जा दिन क्षीणचंद्र होय पवन जामें दुःसह चल रह्यो होय भूकंपनादिक करकें दूषित होय मेघनकरकें व्याप्त आकाश होय एसो दिन शकुन देखवेमें वर्जित है ॥ ५ ॥ ॥ छ ॥

क्षीरिणंसफलपुष्पपल्लवंसर्वदोषरहितंसुभूमिजं पिंग
लायुगलनिश्चिताश्रयंशस्तमाहुरधिवासनेद्रुमम् ६

॥ टीका ॥

क्षीरिणमिति एतादृशंद्रुमंअधिवासनेशस्तमाहुः कीदृशंक्षीरिणंक्षीरयुक्तं सफलंपुष्पपल्लवमिति फलंप्रतीतंपुष्पंकुसुमंपल्लवाः नवीनपत्राणितैर्युतं सर्वदोषरहितमिति सकलदोषनिर्मुक्तं सुभूमिमिति शुद्धभूमौसमुत्पन्नंपिंगलायुगुलं निश्चिताश्रयमिति पिंगलायुगलस्यनिश्चितः आश्रयोयस्मिन् तथा ६ तत्रायंविशेषः प्रथमंजलादिनाक्षेत्रप्रसिंचनं पश्चाद्वृक्षपक्षिणांज्ञानंकर्तव्यं तत्रगोस्थानंगजस्थानंउष्ट्रसमूहस्थलं मनुष्यकोलाहलयुतंबहिर्भूमिस्थलं अस्थिसमूहाकुलंश्मशानमेतानि स्थानानिवर्जनीयानि तथा वृक्षंपरितः कंटकाकुलंशुष्कज्वलितभंगाश्च तथाउद्वसंदेवगृहजीर्णगृहपतितदुर्गभित्तयश्च ग्रामस्ववृक्षः एतत्स्थलस्थितपिंगलापि त्याज्याजीर्णशल्योपगतत्रोटितज्वलितवायुपतितोत्पाटितखंडितविघ्नितावृक्षास्त्या-

॥ भाषा ॥

॥क्षीरिणमिति॥ जामें दूधनिकलतो होय फल पुष्पपल्लव नवीनपत्र इनकरकें युक्त होय सर्वदोष रहित होय शुद्धभूमीमें उत्पन्न हुयो होय और पिंगलाको युगल नाम जोडा जामें रहतो होय एसो वृक्ष अधिवासनमें लीनो हे ॥६॥ तामें विशेषकरकें वृक्षकी परीक्षा और पक्षीकी परीक्षा कहेंहें॥ प्रथम तो जलादिक करकें क्षेत्रकूं सिंचले पीछें वृक्ष और पक्षीनको ज्ञानकरनो योग्य हे जहां गोस्थान होय गजस्थान ऊंटनको समूह होय मनुष्यनको कोलाहल शब्द होतो होय जहां जंगल फिरतें होंय हाडनको समूह होय श्मशान होय ये स्थान वर्जित हें तेसें ही वृक्ष कहेंहें॥ कांटेनको होय और सूको जलो टूटो होय और तेसेंही फूटो देवमंदिर होय जीर्णघर होय दुर्ग और भींत ये गिरपडे होंय उजडो ग्राम होय पडोहुयो वृक्ष होय इनस्थलनमें स्थितपिंगलपक्षी त्यागके योग्यहे और जीर्णवाणकरकें छेदन कियो होय जलो होय पवनकरकें उरवड्यो होय

॥ टीका ॥

ज्याः तथावृक्षवेष्टितोवल्लीवेष्टितश्च त्याज्यः तथा यस्योपरि शकुनिकोलूकश्येनदुष्टपक्षिणां निवासः सोपित्याज्यः वा नरशिशुसर्पाक्रांतश्च वर्जनीयः इतिवृक्षपरीक्षा अथपक्षीपरीक्षा तालवटबिल्वकपित्थस्थः पक्षीवैश्यः निंबपिप्पलपिप्पलीकरीरजंबूकदंबस्थः क्षत्रियः आम्रमधूकखर्जूरीस्थः शूद्रः विप्रः सर्वगस्तथादीर्घरूक्षवर्णः स्थूलनादः क्षत्रियः मधुरभाषीपिंगलवर्णः वैश्यः अल्पपुच्छोवर्तुलशीर्षोऽस्थायिनादः श्यामवर्णःशूद्रः एतद्व्यतिरिक्तोब्राह्मणस्तथाऽस्थायिशरीरः अल्पनादः सपुरुषः अल्पशब्दमहच्छरीरा सा स्त्रीपुरुषोघर्घरकंठः पीतवर्णः महच्चंचुश्चेष्टाहीनः आलस्यवान्ज्ञेयः बहुद्विगुणस्वरवादीवृद्धोज्ञेयः अल्पपुच्छः ताम्रचंचुः स्वल्पांगः पुरुषस्वरवादीभेकवद्गामी जृंभायुक्तः सबालः धूसरवर्णामहज्जंघादीनस्वरकारिणी सागर्भिणी एवंविधाशनैर्गच्छति या सा प्रसविता पूर्वोक्ताकोपतः तीक्ष्णस्वरवादिनीवंध्यास्वस्ववर्णास्त्रियायुक्तः शुभः वैपरीत्येवैपरीत्यम् ॥छ॥ ॥छ॥

॥ भाषा ॥

कच्यो होय खंडित होय एसे वृक्ष त्यागके योग्य हें वृक्षकर वेष्टित वल्ली वल्लीकर वेष्टितवृक्ष त्यागके योग्य हे और जा वृक्षके ऊपर घूघू शिखरा दुष्टपक्षीनको निवास जामें सोवी त्याग करवेके योग्य है ॥ इतिवृक्षपरीक्षा ॥ अथपक्षीपरीक्षा ॥ तालवटविल्वकपित्थ इन वृक्षनपे स्थित पक्षी होय ताकी वैश्य संज्ञा और निंव पिप्पलपिप्पली करीर जम्बु कदंव इनपे स्थित पक्षीकी क्षात्रि संज्ञा हे और आम्र मधुक खजूर इनपे स्थितको शूद्रवर्ण हे इनतें अन्य सब वृक्षनपे स्थित होय तो ब्राह्मण और दीर्घ होय रूखो वर्ण जाको होय स्थूल नादजाको होय वो क्षत्रिय जाननो और मधुरभाषी होय पिंगलजाको वर्ण होय वो वैश्य जाननो और अल्प पूंछ जाकी होय वर्तुलाकार जाको मस्तक होय अस्थिर जाको नाद होय श्यामवर्ण जाको वो शूद्र जाननो इनतें व्यतिरिक्त

स्नातः शुचिः पांडुरवस्त्रधारीयत्नेनकृत्वापितृदेवकार्यम् आचार्यमित्रानुचरैः समानंसायंव्रजेद्वर्णितवृक्षमूलम् ७

॥ टीका ॥

स्नातइति पुमान् वर्णितवृक्षमूलं सायंव्रजेत् कीदृक् स्नातः कृतस्नानः शुचिरिति पवित्रः पांडुरवस्त्रधारीति पांडुराणिश्वेतानिवस्त्राणिधारयतीत्येवंशीलः सतथा किंकृत्वा पितृदेवकार्यं केनयत्नेन आदरपूर्वकमित्यर्थः कथंसमानंसह कैः आचार्यमित्रानुचरैः तत्रआचार्यः शकुनज्ञानोपदेष्टा मित्रंसुहृत् अनुचराः सपर्याकारिणः ७ ॥छ॥

भाषा

अर्थात् न्यारो होय वो ब्राह्मण जाननो और अस्थिर शरीर जाको अल्पनाद जाको वो पुरुष जाननो और अल्पशब्द जाको महान् शरीर जाको सो स्त्री जाननी और पुरुष होय घर्घर कंठ जाको होय महान् वडी जाकी चोंच होय चेष्टाहीन होय वो आलस्यवान् जाननो और वो वोहोत द्विगुणो स्वर वोले वो वृद्ध जाननो और अल्प पूंछ जाकी ताम्रकीसी चोंच जाकी वोहोत अल्प अंग होय कठोर स्वर वोले मेंडकी कोसो गमन करे जंभाई युक्त होय वो वालक जाननों धूसरो वर्ण जाको महान् जंघा जाकी दीनस्वर करवेवाली होय वो गर्भिणी जाननी और एसी होयकें होले होले चले तो प्रसवती जाननी पहलें कहे लक्षण होंय कोपकर तीक्ष्ण स्वर वोले तो वंध्या जाननी अपने वर्णकी स्त्रीकरकें युक्त होय तो शुभ जाननो और विपरीत धर्म होंय तो विपरीत जाननो ॥ स्नातइति॥ पुरुष स्नानकर पवित्र होय श्वेतवस्त्र धारण कर शीलस्वभाव होय पितृ देव कार्यकरकें शकुन ज्ञानके उपदेष्टा गुरु सुहृत् अनुचर इनकरकें सहित सायंकालकूं पहलें वर्णन कर आये जिनवृक्षनकी मूलमें जाय ॥७॥ ॥छ॥

गोचर्ममात्रामवनिंचतत्रविशोध्यलिंपेन्नवगोमयेन
तस्मिन्विदध्याद्विततंविचित्रंपिष्टांतकेनाष्टदलंसरो
जम् ८ मृदादिनोर्ध्वास्यमथप्रकल्प्यनिवेशयेत्पिंग
युगंसरोजे तथैवचंडीमपिवक्ष्यमाणध्यानाकृतिं-
पिष्टमृदादिसृष्टां ९ क्रमेणकाष्ठासुदशस्वपीहनिवे
शनीयादशलोकपालाः इंद्राग्निकालास्त्रपपाशिवा-
युर्यक्षेश्वराऊर्द्धमजोऽच्युतोऽधः १०

॥ टीका ॥

गोचर्ममात्रामिति तत्रवृक्षमूलादौगोचर्ममात्रामवनिं विशोध्य कर्करादिदूरेक्षिप्त्वा नवगोमयेन लिंपेत् तस्मिन्लिप्तप्रदेशे पिष्टांतकेन भाषायां रांगोलीइतिख्यातेन अष्टदलंसरोजंकमलं विततंविस्तीर्णं विचित्रंविविधवर्णं विदध्यात् कुर्यात् ८ मृदादिनेति अथऊर्ध्वास्यमूर्ध्वमुखं पिंगयुगं पक्षिमिथुनं मृदादिना प्रकल्प्य सरोजे निवेशयेत् तथा वक्ष्यमाणध्यानाकृतिं पिष्टमृदादिसृष्टांचंडीमपि निवेशयेदित्यर्थः ९ क्रमेणेति क्रमेणदशसु काष्ठासुइंद्राग्निकालाऽस्त्रपपाशिवायुयक्षेश्वराभिधानालोकपालाः तत्र निवेशनीयाः तत्रइंद्रप्रसिद्धः अग्निर्वैश्वानरः कालोयमः अस्त्रपोराक्षसः पाशिर्वरुणः वायुःसमीरणः यक्षःकुबेरः ईश्वरोभगवान् तथाऊर्द्धंअजः ब्रह्मा

॥ भाषा ॥

॥गोचर्ममात्रामिति॥ वा वृक्षके नीचें गोचर्ममात्र पृथ्वी शोधकर अर्थात् बुहारी लगाय कंकर कांटे दूर करकें नवीन गोवरसूं लीपकर लिपी पृथ्वीमें चून लेकर चित्रविचित्र नाना वर्णके रंगसहित अष्टदल कमल करे ॥ ८ ॥ मृदादिनेति ॥ मृत्तिकादिक करकें ऊंचो मुख जाको एसो एक पिंगलको जोडा वनाय वा कमलमें वैठाय दे और अगाडी ध्यानकी आकृति कहेंगे वैसी चूनकी वा मृत्तिकादिककी वनी हुई चंडीकूं वी स्थापन करे ॥ ९ ॥ क्रमेणेति ॥ क्रमकरकें दशों दिशानमें इंद्र अग्नि यम राक्षस वरुण वायु कुबेर रुद्र ऊपर ब्रह्माजी -

नमोच्युतैः सप्रणवैश्चसर्वैः स्वनाममंत्रैः क्रमतोर्चनीयाः अर्घासनालेपनपुष्पधूपनैवेद्यदीपाक्षतदक्षिणाभिः ११ अथमंत्रः वृक्षस्थानायनमः इत्यासनमंत्रः ॐ ह्रीं श्रींक्रेंचामुंडेहुंनमोऽस्मिन्वृक्षे अवतर २ स्वाहा अनेनमंत्रेणचंडींवृक्षेऽवतारयेत् ॐ पिंगलेमेरवलेरेवति रात्रिचारिणिब्रह्मपुत्रिसत्यमेतद्ब्रूहिमेस्वाहा इत्याह्वानमंत्रः ॐ क्रोंह्रींहूंचिलि २ वौषट् इतिपूजाजाप्यहोममंत्रः ॐ सिद्धिचामुण्डेकृष्णापिंगलेस्वाहा ॐ नमो भगवतिकालरात्रिमंत्रमूर्तिमहेश्वरिचामुंडेप्रजापालिनि योगेश्वरि आगच्छ २ एह्येहितिष्ठ २ ॐ ह्रींचिलि २ शब्दायस्वाहा इत्यधिवासनमन्त्रः ॥ छ ॥

॥ टीका ॥

अधः अच्युतश्चनिवेशनीयः १० नमइति पूर्वमेवव्याख्यातत्वादुपेक्षितं अथमंत्रः ॐ वृक्षस्थानायनमः इत्यासनमंत्रेणासनाभिमंत्रणं ॐ ह्रींश्रींक्रेंचामुंडे नमोस्मिनवृक्षेऽवत्तर अवनर स्वाहा अनेनमंत्रेण चंडीं वृक्षेऽवतारयेत् ॐ पिंगले मेरवलेरेवति रात्रिचारिणि ब्रह्मपुत्रि सत्यमेतद्ब्रूहि मेस्वाहा इत्याह्वानमंत्रः अनेनमंत्रेणपक्षिण आह्वानं ॐ क्रोंह्रींश्रींहूंचिलि चिलिवौषट् इतिपूजाजाप्यहोममंत्रः ॐ सिद्धिचामुंडेकृष्णापिंगलेस्वाहा नमो भगवतिकालरात्रिमंत्रमूर्तिमहेश्वरिचामुंडे प्रजापालिनि योगेश्वरि आगच्छागच्छ एह्येहितिष्ठतिष्ठॐ ह्रींचिलिचिलिशब्दायस्वाहेत्यधिवासनमंत्रः ११

॥ भाषा ॥

नीचें अच्युत ये दशलोकपालदेवता स्थापन करै ॥१०॥ नमइति ॥ ॐ इंद्रायनमः यारीतसूं नाम मंत्रनकर क्रमसूं अर्घ आसन चंदन पुष्पाक्षत धूपदीपनैवेद्यदक्षिणानकरकें पूजन करै ॥११॥ ये आसनमंत्रकूं आदिले अधिवासन तांईके मंत्रमूलमें हैं ईयातें टीकामें नहीं लिखे मूलमेंसूं जानलेनो.

गुरूपदेशात्समवाप्यमंत्रंज्ञातंजपेत्तस्यकृतावधानः होमोदशांशेनचमंत्रजाप्यात्कृतोविधेयोमधुनासमिद्भिः १२ उदुंबराश्वत्थपलाशशाखवादूर्वाप्रकामाग्रदलोद्भवाभिः हुत्वासमिद्भिर्मधुनाघृतेनध्यानंविदध्याद्विहितावधानः १३ शवाधिरूढांनृकपालहस्तांशूलायुधांभूतिसुतांगयष्टिं उलूकचिह्नांनरमुंडमालांनिर्मांसदेहांरुधिरंपिबंतीं १४ असृग्वसाचर्चितकृष्णकायांकरींद्रपंचाननचर्मवस्त्राम् विभीतकस्थामतिभीमरूपांचंडींस्मरेत्पिंगलिकांप्रपूज्य १५ वृक्षंचतंचर्चितमर्चितंचप्रवेष्टयेत्पाण्डुरवस्त्रसूत्रैः ॥

॥ टीका ॥

गुरूपदेशादित्यादि भोजयेदिति अष्टभिः श्लोकपर्यंतं पूर्वव्याख्यातत्वात् न व्याख्यातम् १९

॥ भाषा ॥

॥ गुरूपदेशादिति ॥ गुरूनके उपदेशतें मंत्र प्राप्त होय फिर सावधान होयकर मंत्रको जप यथाशक्ति कर फिरदशांश हवन करै ॥१२॥ उदुंबरेति ॥ गूलर पीपल पलाश इनकी शाखा ओर दूर्वा समिधा सहित घृत इनको दशांश हवन करकें फिर एकाग्र चित्त होय ध्यान करै ॥१३॥ शवाधिरूढामिति ॥ शवके ऊपर वेठी हुई मनुष्यको कपाल जाके हाथमें त्रिशूल जाके आयुध भस्मकरकें श्वेत अंग जाको घुघूको चिन्ह जाके नरमुंडकी माला धारण करे मांस रहित देह जाको रुधिर पान कर रही ॥१४॥ असृग्वसेति ॥ रुधिर सहित मांसकरकें चर्चित कृष्ण देह जाको श्रेष्ठ हाथी ओर सिंह इनके चर्मको वस्त्र जाको वहेडेके वृक्षपे स्थित अतिभयंकर रूप जाको एसी चंडी जो पिंगलिका ताको स्मरण करे या प्रकार पिंगलिकाको पूजन करकें ॥१५॥ वृक्षमिति ॥ चंदनकर चर्चित अर्चनकियो गयो वृक्ष ताकूं पिंगलिकाकूं श्वेतवस्त्रसूत्र पहराय देनो या प्रकार अर्चन करकें प्रसन्न हुये

यथावदभ्यर्चनतोषितायपूजांसमस्तांगुरवेप्रदद्यात्१६ आराध्यदेवींविधिनेदृशेन प्रयोजनंस्वंविनिवेद्यतस्यै पृष्ठप्रदीप्तांककुभंविधायवीक्षेततच्चेष्टितमेकचित्तः १७ बद्धांजलिर्भूमिनिविष्टजानुः प्रणम्यभक्त्याशिरसासमस्तान् आवर्तयन्मंत्रमथात्मगेहंव्रजेत्स्मरन्पिंगलिकांमनुष्यः १८ भोजयेदथगुडाज्यपायसैःश्रद्धयाकतिपयाःकुमारिकाः आत्मनोपिविदधीतभोजनंतद्गुरुस्वजनबंधुभिःसमं १९ शयीतपश्चाद्विजनेरजन्यांयामत्रयंयावदथप्रबुध्यात् स्वप्नंस्मरेद्यो भवतीहलब्धंतंसत्यमाहुःशकुनागमज्ञाः २०

॥ टीका ॥

शयीतेति पश्चाद्रजन्यां यामत्रयंयावत् विजनेशयीत अथप्रबुध्यस्वप्नं स्मरेद्यल्लब्धं भवति यतःशकुनागमज्ञाः तंसत्यमाहुः २० ॥छ॥

भाषा

गुरूनके अर्थ पूजा निवेदन करे ॥ १६॥ आराध्येति ॥ या विधीकर देवीको आराधन करकें अपनो प्रयोजन निवेदन कर दीप्तदिशाकूं पीठ पिछाडी करकें एकाग्र चित्त होय फिर वाकी चेष्टाकूं देखै ॥ १७॥ बद्धांजलिरिति ॥ मनुष्य हाथ जोड पृथ्वीमें जानू टेक मस्तक नमायकर भक्तिपूर्वक नमस्कार करकें मंत्र बोलतो हुयो पिंगलिकाकूं स्मरण करत अपने घरकूं गमन करे ॥१८॥ भोजयेदिति ॥ घर आयकरकें गुड घृत खांड क्षीर इन करकें श्रद्धापूर्वक कन्याकुमारी भोजन करावै फिर आपवी गुरु स्वजन बंधू इन करकें सहित भोजन करै ॥ १९॥ शयीतेति ॥ ता पीछें रात्रीमें निर्जन स्थानमें तीन प्रहर रात्रीपर्यंत शयन करे फिर प्रहरके तडकें ऊठ करकें स्वप्नकूं स्मरण करे जो प्राप्त होय ताय शकुन जानवेवारे सत्य कहें हैं ॥ २०॥

तत्रैवतुर्येप्रहरेरजन्यांगत्वापुनस्तस्यतरोः समीपं प्रपूज्यदेवींशपथांश्चदत्वाउच्चैर्वाचाकार्यमुदीरयेत्स्वं २१ नीतंनदीप्तादिविचारकोटिंयत्पिंगलायाविरुते ऽत्रकिंचित् तद्ब्रह्मपुत्रीविरुतादशेषंविशेषतः शाकुनिकोऽवगच्छेत् २२ इतिपिंगलिकारु० अ० प्र० प्र० १

॥ टीका ॥

तत्रैवेति तुर्येप्रहरे-चतुर्थप्रहरे तत्रैवतरोस्तलेमूलेगत्वादेवींप्रपूज्य शपथांश्चदत्वा उच्चवाचास्वकार्यमुदीरयेत् २१ नीतमिति अत्रपिंगलायारुते विरुतेदीप्तादियत्किंचित् विचारकोटिंननीतं ब्रह्मपुत्रीविरुतादशेषंविशेषतः शाकुनिकः अवगच्छेत् २२ इतिव० टी० पिंगलारुतेऽधिवा० प्र० १ यत्पिंगलाभिधानः रात्रिचरः पतत्री वर्तते तस्य अत्रशांतदीप्तस्वरूपं अनुक्तमपिपूर्ववज्ज्ञेयं तद्यथा प्रथमं पृथ्वीजलतेजांसिशांतस्वराणि तत्र तेजसउभयरूपत्वात् शांतेनसहसंगतः शांतः दीप्तेनसहसंगतोदीप्तः वाय्वाकाशौ शांतस्वरौ शांतदीप्तौ तथोच्चसन्मुखदक्षिणगामिनीगतिः शुभास्ववृक्षान्महद्वृक्षगामिनीशुभा फलंपुष्पंभक्ष्यमाणायाः पिंगलायागतिः

॥ भाषा ॥

॥ तत्रैवेति ॥ रात्रीके चोथे प्रहरमें वाही वृक्षके नीचें फिरजाय देवीको पूजन कर सोगन देकरकें फिर ऊंचीवाणी कर अपनो कार्य कहै ॥ २१ ॥ नीतमिति ॥ या पिंगलाके रुतमें दीप्तादिक विचार कछूवी नहीं हे या ब्रह्मपुत्रीके शब्दसूं शकुनी विशेष करकें समझजाने हें ॥ २२ ॥ इतिव० भा० टी० पिंगलिकारुतेऽधिवासनप्र० प्रथमं ॥ १ ॥ जो पिंगल नाम पक्षी रात्रीमें विचरे ताको यामें शांतदीप्त स्वरूप नहीं कह्यो हे तोहू पूर्वकी सीनाई जाननो पृथ्वीजल तेज ये शांत स्वर हें तामें तेजके दोय रूप हे शांत सहित मिलवां होय तो शांत और दीप्तकर सहित होय तो दीप्त और वायु आकाश ये दोनो शांतस्वर हे और शांतदीप्तवी हे जो पिंगला ऊंची सन्मुख दक्षिण गमन करे तो गती शुभ और अपने

॥ टीका ॥

शुभाशांतेत्यर्थः अधोमुखं वाममुखंच कृत्वा उड्डयनं करोति दीप्तावामगामिनी चंचलाच गतिर्दीप्ता उपरिशाखातोऽधः शाखाश्रयणीगतिः महच्छाखाश्रयणीगतिः महच्छाखातो लघुशाखाश्रयणीच गतिर्दीप्ता तथाकंटकवृक्षाश्रयणीच इति शांतदीप्तगतिः प्रथमप्रहरे दक्षिणाकर्दमी नैऋत्यदिग्वारुणी पश्चिमासौभागिनी वायव्यासगुणी उत्तराधगिता ईशानी धूमिता पूर्वालोहिता आग्नेयीप्रज्वलिता अथ द्वितीयप्रहरे नैर्ऋतिः कर्दमी पश्चिमा वारुणी वायव्यासौभागिनी उत्तरासगुणी ईशानी धगिता पूर्वाधूमिता आग्नेयी लोहिता दक्षिणाप्रज्वलिता अथ तृतीयप्रहरे पश्चिमाकर्दमिता वायव्यावारुणी उत्तरासौभागिनी ईशानीसगुणी पूर्वाधगिता आग्नेयी धूमिता दक्षिणा लोहिता नैर्ऋतिः प्रज्वलिता अथ चतुर्थप्रहरे वायव्या कर्दमी उत्तरावारुणी ईशानी सौभागिनी पूर्वासगुणी आग्नेयी धगिता दक्षिणाधूमिता नैर्ऋतिर्लोहि

॥ भाषा ॥

वृक्षपेतें महान् वृक्षपे गमन करे तो शुभफल और पुष्प भक्षण करती होय ताकी गती शुभा और शांता और नीचो मुख करें वा वाममुख करकें उड जाय तो दीप्ता और वामगमन करे और चंचला होय तो गती दीप्ता और ऊपरकी शाखातें नीचेंकी शाखापे आय जाय वा महान् शाखापे जाय बेठे और महान् शाखापेसूं छोटी शाखापे आय बेठे तो ये गती दीप्ता जो कांटेके वृक्षपे जाय बेठे तो दीप्तागती जाननी ॥ इतिशांतदीप्तगतिः ॥ प्रथमप्रहरमें दक्षिण दिशा कर्दमा नैऋत्य दिशा वारुणी पश्चिम सौभागिनी वायव्य सगुणी उत्तराऽधिगता ईशानी धूमिता पूर्वा लोहिता आग्नेयी प्रज्वलिता ॥ अथ दूसरे प्रहरमें ॥ नैर्ऋती दिशा कर्दमी पश्चिमा वारुणी वायव्या सौभागिनी उत्तरा सगुणी ईशानी धगिता पूर्वा धूमिता आग्नेयी लोहिता दक्षिणा प्रज्वलिता ॥ अथ तीसरे प्रहरमें ॥ पश्चिमा कर्दमिता वायव्या वारुणी उत्तरा सौभागिनी ईशानी सगुणी पूर्वा धगिता आग्नेयी धूमिता दक्षिणा लोहिता नैर्ऋति प्रज्वलिता ॥ अथ चोथे प्रहरमें ॥ वायव्या कर्दमी

॥ टीका ॥

ता पश्चिमाप्रज्वलिता अथ पंचमप्रहरे उत्तराकर्दमी ईशानी वारुणी पूर्वा सौभागिनी आग्नेयी सगुणी दक्षिणा धगिता नैर्ऋति धूमिता पश्चिमा लोहिता वायव्याप्रज्वलिता षष्ठप्रहरे ईशानीकर्दमी पूर्वा वारुणी आँग्नेयी सौभागिनीदक्षिणासगुणी नैर्ऋतिधगिता पश्चिमाधूमितावायव्या लोहिता उत्तराप्रज्वलिता सप्तमप्रहरे पूर्वाकर्दमी आग्नेयीवारुणी दक्षिणासौभागिनी नैर्ऋतिः सगुणीपश्चिमाधगिता वायव्याधूमिता उत्तरालोहिताईशानीप्रज्वलिता अष्टमप्रहरे आग्नेयीकर्दमी दक्षिणा वारुणी नैर्ऋतिः सौभागिनी पश्चिमासगुणी वायव्याधगिता उत्तराधूमिता ईशानी लोहिता पूर्वाप्रज्वलिता इतिशांतदीप्तदिक्प्रकरणम् आसांगुणाः प्रथमप्रहरे दक्षिणस्यां संतोषः

॥ भाषा ॥

उत्तरा वारुणी ईशानी सौभागिनी पूर्वा सगुणी आग्नेयी धगिता दक्षिणा धूमिता नैर्ऋति लोहिता पश्चिमा प्रज्वलिता ॥ अथ पंचम प्रहरमें ॥ उत्तरा कर्दमी ईशानी वारुणी पूर्वा सौभागिनी आग्नेयी सगुणी दक्षिणा धगिता नैर्ऋति धूमिता पश्चिमा लोहिता वायव्या प्रज्वलिता ॥ छठे प्रहरमें ॥ ईशानी कर्दमी पूर्वा वारुणी आग्नेयी सौभागिनी दक्षिणा सगुणी नैर्ऋति धगिता पश्चिमा धूमिता वायव्या लोहिता उत्तरा प्रज्वलिता ॥ सातमें प्रहरमें ॥ पूर्वा कर्दमिता आग्नेयी वारुणी दक्षिणा सौभागिनी नैर्ऋति सगुणी पश्चिमा धगिता वायव्या धूमिता उत्तरा लोहिता ईशानी प्रज्वलिता॥ आठमें प्रहरमें॥ आग्नेयी कर्दमी दक्षिणा वारुणी नैर्ऋति सौभागिनी पश्चिमा सगुणी वायव्या धगिता उत्तरा धूमिता ईशानी लोहिता पूर्वा प्रज्वलिता ॥ ॥ इति शांतदीप्तदिक्प्रकरणम् ॥ ॥ अब इनदिशानके गुण कहेंहें ॥ पहले प्रहरमें दक्षिण दिशामें संतोष होय नैर्ऋत्यदिशामें लाभ पश्चिम दिशामें चिंतितकार्यकी सिद्धी वायव्यदिशामें धनलाभ उत्तर दिशामें हानि ईशानदिशामें भय पूर्वदिशामें चिंता आग्नेयी दिशामें कलह॥ या प्रकार और पूर्व दिशा कहीहें उनकोबी फल जाननो ॥ सुंदर स्थान होय शुभ होय और वट पिप्पल आम

॥ टीका ॥

नैर्ऋत्यदिशिलाभः पश्चिमदिशिचिंतितकार्यसिद्धिः वायव्यदिशिधनलाभः उत्तरस्यांहानिः ईशान्यांभयं पूर्वस्यांचिंता आग्नेय्याम् कलिरेवमन्यत्रापि ज्ञेयं रम्यंस्थानंशुभंवटःपिप्पल आम्रः जंबूसुस्थलवृक्षः महान्वृक्षःअत्यंतोच्चवृक्षश्चतालस्तमालः खर्जूरीत्यादिस्थलंशांतं तथाशुष्कवृक्षपीडितोत्पाटितज्वलितरक्षाखर्परास्थिकंकटगृहभित्तिदुर्गभित्तिवृक्षकडुकंटकवृक्षोद्वसदेशदेवालयानि दीप्तसंज्ञानि दक्षिणचेष्टाः उभौपक्षौप्रसार्यमस्तकोपरिस्थापनं अंगमर्दनं दक्षिणविभागदर्शित्वंनिर्वातस्थलेषुनिश्चिंततयाशुभचेष्टाकारित्वंपरस्परंकंडूयनमैथुनानि वाद्रष्टुः सन्मुखदर्शित्वंसन्निहितसन्मुखागमनंच दक्षिणांगकंडूयं उन्मीलितनयनत्वंपक्षोदरकंठनेत्रचंचुनासिकाशिरसांदक्षिणभागेकंडूयनकारित्वंशुभंयावत्योवामचेष्टास्तावत्योऽशुभाः तथा पलायनंमौनकर्तृत्वं गृहीतभक्ष्यत्यागः अन्यपक्षिमुखेभक्ष्यार्पणंनेत्रयोर्मीलनंद्रष्टुः पराङ्मुखगामित्वं अन्यपक्षिभिः सहयुद्धकारित्वंविण्मूत्रकारित्वं अधोदर्शित्वमित्यादि दीप्तं अथैषांफलम्

॥ भाषा ॥

जांबुन इनके वृक्ष ओर संदरस्थलमें वृक्ष होंय सो महान्वृक्ष अत्यंत ऊंचो वृक्ष तालको तमालको खिजूरको ये वृक्ष एसे एसे स्थान शांत हें ओर सूको वृक्ष पवनादिक करकें पीडित उखडो हुयो जो जलोहुयो वृक्ष राख भस्म मृत्तिकाके ठीकरा हाड कांटे घरकी भीत कोट किल्लाकी भींत ओर कडु ओकांटेंको वृक्ष ऊजडो हुयो देशग्राम देवमंदिर इन सवनकी दीप्तसंज्ञा है ओर दक्षिणमाऊं चेष्टा करती होय दोनो पंखनकूं फैलाय करकें मस्तकके उपर धरै ओर अंगमर्दन करती होय दक्षिण विभागमें देखती होय पवन न होय एसे स्थानमें निश्चिंत होय शुभचेष्टा करती होय वा परस्पर खुजाय रही होय मैथुन करती होय देखवेवारेके सन्मुख देखती होय निकट आयजाय वा सन्मुख आय जाय जेमने अंगकूं खुजाय रही होय खुले

॥ टीका ॥

दीप्तस्वरेणकलिः दीप्तगत्यागमनेनउद्वेगः दीप्तदिशाकष्टं दीप्तस्थानेनस्थानभ्रंशः दीप्तचेष्टया विग्रहः दीप्तपंचकेनबंधने मरणंच शांतेतद्विपर्ययः इतिशांतप्रकरणं अत्रान्यद्विशेषोपिज्ञेयः यथा एकाशांतदृष्टिः दीप्तदृष्टिश्च तत्रसन्मुखंसरलं दक्षिणमुच्चप्रदेशं सूर्यंवा विलोकयती शांतदृष्टिः अथवा शांतफलं तदुपरिपक्षा पूर्वरम्यस्थानावलोकिनीच तथाऽशुभस्थलावलोकिनीअधोमुखदृष्टिश्चदीप्ता तथापक्षिद्वयं भिन्नस्थानावस्थायि दृश्यते तच्छांतंपरस्परं अंगस्पर्शंकुर्वन्यत्र दृश्यते तद्दीप्तम् इतिवसंतराजटीकायां शाकुने पिंगलारुतेऽधिवासनप्रकरणंप्रथमं ॥ १ ॥

॥ भाषा ॥

हुये नेत्र होंय और पंख उदर कंठ नेत्र चोंच नासिका शिर इनके जेमने भागमें खुजाय रही होय ये सब शुभ हैं और जितनी याकी वांई चेष्टा हैं वे सब अशुभ हैं और भाग जाय वा मौन धारण करें होय ग्रहण करें होय ता भक्ष्यवस्तूको त्याग करदे वा और पक्षीके मुखमें भक्ष्यवस्तूको अर्पण करती होय· नेत्रनकूं मीचें होय देखवे वा लेके विमुखगमन करती होय और पक्षीनकरकें सहित युद्धकरती होय विड्मूत्रकरती होय नीचेंकूं देखती होयइनलक्षण युक्त पिंगला दीप्तजाननी ॥ अबइनकेफलकहेंहें ॥ दीप्तस्वरकरकें कलह करावे गमनमेंदीप्तजायकर उद्वेगकरावे दीप्तदिशामें कष्टकरावे दीप्तस्थानमेंहोयतो स्थानभ्रंशकरावें दीप्तचेष्टा करकें विग्रह करावे ये पांचोही दीप्त होय तोबंधनमें मरण होय और शांता होय तोइनफलनकूं विपरीत जानने ॥ इतिशांतप्रकरणम् ॥ यामें और विशेषवी जाननो ॥ एक शांतदृष्टि एक दीप्तदृष्टि जो सन्मुख सरल जेमनेमाऊं केदेशमें सूर्यकूं इनेदेखती होयतो शांतदृष्टि जाननी-याको शांतही फल जाननो और सुंदरस्थानकूं देखरही होय वा अशुभ स्थलकूं देखरही होय नीचें मुख और दृष्टि होय तो दीप्तादृष्टि जाननी और दोपक्षी न्यारे न्यारे स्थानमें होंय दीखने होंयतो शांत और परस्पर अंगकूं स्पर्श करत होंयदीखे तोदीप्तजाननी शांतको शांतफल दीप्तको दीप्तफल हे ॥ इतिपिंगलारुतेऽधिवासनप्रकरणं प्रथमं ॥ १ ॥ ॥ ७ ॥

यादृक्स्वरज्ञानमिहोपयुक्तं तादृक्नचेष्टाद्युपयोगमेति यत्पिंगलोरात्रिचरः पतत्री तेनस्वरांस्तावदुदाहरामः २३ यः पार्थिवोसौवडिमोय आप्यः सकौलिकोयस्त्विहतैजसोऽसौ करंगुलीयोऽनिलजः सवीसोयस्त्वांतरिक्षः किसरस्वरोसौ २४ एकमात्रउदितश्चिलितीह स्याद्द्विमात्रइहयस्तुचिलीति सत्रिमात्रइहयश्चिलिलिस्यान्मात्रिकैश्चिलिश्चिलीतिचतुर्भिः २५ ॥ छ ॥

॥ टीका ॥

यादृगिति इहास्मिन्लोके यादृक्स्वरज्ञानं उपयुक्तं तादृक्चेष्टानोपयोगमेति तेनकारणेन यः पिंगलाभिधानः पतत्रीवर्तते तस्यतावत्स्वरानुदाहरामः २३ यइति इहशास्त्रे यः पार्थिवः स्वरः असौवडिमः कथ्यते इति सर्वत्रसंबध्यते य आप्यः सकौलिको यस्तैजसः असौ करंगुलीयः यअनिलः सवीसः यस्त्वांतरिक्षः असौ किसरः २४ एकइति इहशास्त्रे चिलइतिशब्दः एकमात्रः स्वरउदितः कथितः यस्तुचिलिइतिशब्दः सद्विमात्रः यश्चचिलिलि इतिशब्दः सत्रिमात्रः तथा चतुर्भिर्मात्रिकैः चिलिचिलिइतिशब्दः स्यात् २५ ॥ छ ॥ ॥ छ ॥

॥ भाषा ॥

यादृगिति ॥ या लोकमें जेसो स्वर ज्ञान हे तेसो ओर कोईवी चेष्टा उपयोग नहीं हे ताकारणकर पिंगला नामपक्षीके स्वरनकूं कहें हें ॥ २३ ॥ यइति ॥ या शास्त्रमें जो पार्थिव स्वर हे वाकूं वडिम कहें हें ओर जो आप्यस्वर हे वाकी कौलिक संज्ञा हे वाकी करंगुलीय संज्ञा हे जो अनिलस्वर हे वाकूं सवीश कहे हें जो आंतरिक्ष हे वाकी किसरसंज्ञा हे ॥ २४॥ एकइति ॥ याशास्त्रमें चिल् ये एकमात्रस्वर कह्यो हे ओर चिलि ये दो मात्राको स्वर हे ओर चिलिलि ये तीनमात्राको स्वर हे ओर चि-

यः स्वरश्चिलिचिलिचिली त्यनुकारः पंचमात्रमिहतंकथयं-
ति एकमात्रकिलपिंगलपक्षीपंचधाश्चरतिपार्थिव
नादं २६ स्यात्स्वरः किजितिमात्रयैकयायः किची
तिसयुनर्द्विमात्रिकः स्यात्त्रिभिश्चकिचिचीतिमा-
त्रिकैरारवः किचिकिचिश्चतुर्लघुः २७ निस्वनःकि
चिकिचीच्यनुरूपः पंचमात्रउदितोमतिमद्भिः पिं
गलः खगचरोजलसंज्ञानीदृशान्वदतिपंचनिनादान्
२८

॥ टीका ॥

यइति यः स्वरश्चिलिचिलीत्यनुकारीस्यात् तमिहपंचमात्रं कथयंति एवमसुना प्रकारेण पिंगलपक्षी पंचधा पार्थिवंनादमुच्चरति २६ तत्संग्रहश्च चिल् १ चिलि २ चिलिलि ३ चिलिचिलि ४ चिलिचिलिलि ५ इतिपार्थिवः स्वरः स्यादिति मात्रैकया किच्इति स्वरः स्यात् यः किचिइतिसद्विमात्रिकः स्यात् किचिचिइति त्रिभिर्मात्रिकैः स्यात् किचिकिचिचतुर्लघुः स्यात् २७ निस्वनइति किचिकिचिचिइत्यनुरूपः मतिमद्भिः पंचमात्रउदितः खगवरः पिंगलः ईदृशान् जलसंज्ञान् पंचनिनादान्वदति तत्संग्रहश्च किच् १ किचि २ किचिचि ३ किचिकिचि ४ किचिकिचिचि ५ इत्याप्यः २८

॥ भाषा ॥

लिचिलि ये चार मात्राको स्वरहे ॥२५॥ यइति॥ चिलिचिलिलिये पांचमात्राको स्वरहे या प्रकार पिंगलपक्षी पांचप्रकारकरकें पार्थिवनाद उच्चारण करेहे इनको संग्रह कहेंहें चिल् १ चिलि २ चिलिलि ३ चिलिचिलि ४ चिलिचिलिलि ५ ये पार्थिवस्वर हें॥ २६॥ स्यादिति॥ किच् ये एक मात्रास्वर हे और किचि ये दोयमात्राको स्वर हे किचिचि ये तीनमात्रा जामें एसो स्वर हे किचिकिचि ये च्यार मात्रास्वर हे यामें च्यार लघू हें ॥ २७॥ निःस्वनइति॥ किचिकिचिचि याकी पांच मात्रा हें पक्षीनमें श्रेष्ठ पिंगल ऐसे एसे जलसंज्ञक पांचशब्द उच्चारण करे हे येइनको संग्रह ॥ किच् १ कि-

निस्वनः कुगितिमातृकमात्रोयश्चकुक्कितिसतूभयमात्रः यःकुकुक्कितिसचात्रिलघुःस्यान्मात्रिकैर्गुजगुजेतिचतुर्भिः २९ यःस्वरोभवतिपंचकुकारस्तस्यपंचलघुतांकथयंति ईदृशानिखलुपिंगविहंगःपंचतैजसरुतानिकरोति ३० मात्रिकंचिजितिनिःस्वनमाहुश्चीजितिध्वनिमिहोभयमात्रं चीचुहीत्यथलघुत्रययुक्तंचीद्वयंपुनरदीर्घचतुष्कम् . ३१

॥ टीका ॥

निस्वनइति कुगितिस्वरःमातृकमात्रःस्यात् यश्चकुकुइति सउभयमात्रः यःकुकुकुइतिसत्रिलघुःस्यात् चतुर्भिर्मात्रिकैः गुजगुजइतिशब्दःस्यात् २९ यइति यःपंचकुकारः कुकुकुकुकुइत्यनुरूपस्तस्यपंचलघुतां कथयंति खलुनिश्चयेनपिंगलापक्षीईदृशानितैजसरुतानि करोति संग्रहश्च कुग्१ कुकु२ कुकुकु ३ गुजुगुजु ४ कुकुकुकुकुं ५ इतितैजसः ३० मात्रिकमिति चिच्इतिमात्रिकंनिस्वनमाहुः चीच्इतिध्वनिरुभयमात्रमाहुः चीचुचिचुचिइतिवालघुत्रययुक्तंस्यात् चीद्वयंपुनः अदीर्घचतुष्कं चतुर्मात्रिकमित्यर्थः ३१

॥ भाषा ॥

चि२ किचिचि ३ किचिकिचि ४ किचिकिचिचि ५ येआप्यस्वर हें ॥२८॥ निःस्वन इति॥ कुग् ये एकमात्र स्वर हे और कुंकु ये दोय मात्रस्वर हे कुकुकु ये तीन लघु हे और गुजुगुजु ये शब्द च्यारमात्राको हे ॥२९॥ यइति॥ ये पांच कुकारको स्वर हे कुकुकुकुकु याकी पंच लघुसंज्ञा कहेंहें निश्चयकर पिंगलपक्षी या प्रकारतैजस शब्द करेहे ये इनको संग्रह हे कुग१ कुकु२ कुकुकु३ गुजुगुजु४ कुकुकुकुकु५ ये तैजस शब्दहें॥३०॥ मात्रिकमिति॥ चिच् ये एकमात्रा शब्द हे और चीच् ये शब्द दोयमात्रा जामें एसो हे चीचु वाचिचुचि ये लघुत्रय शब्दहे चिचिचिचि ये च्यारमात्राको स्वर हे ३१

चीकुचीगिगितथेहनिनादंपंचमात्रमृषयोनिगदंति मा
रुतानिविरुतानिविहंगः पिंगलोजगतिजल्पतिपंच ३२
सएकमात्रश्चिगिति ध्वनिर्योभवेद्विमात्रश्चिरुहीत्यपी
ह मात्रात्रयंस्यात्कुरुरुध्वनौचस्यात्किचिकिचीति
लघुचतुर्थकः ३३ अभिन्नरूपैश्चरतिस्वरैस्तुयः
पंचभिः स्यात्सतुपंचमात्रः एवंविधानवरनामधेया
न्पंचस्वरान्मुंचतिपिंगलाक्षी ३४

॥ टीका ॥

चीक्किति चीकुचीक्इतिपंचनिनादंऋषयः पंचमात्रंवदंतिनिगदंति एवं
पिंगलः मारुतानिपंचजगतिलोके जल्पति संग्रहश्च चिच् चीच् चिचि
चिचि चीकुचीक्किति ३२ एकमात्रइतिएकमात्रः चिग्इतिध्वनिः स्यात्
चिरुइत्यपिद्विमात्रः स्यात् कुरुरुध्वनौमात्रात्रयंस्यात् लघुचतुर्थकः चि
किचिकीति किश्चुइतिमतांतरेध्वनिः स्यात् ३३ अभिन्नइति अभिन्न
रूपैः पंचभिः स्वरैर्यश्चरति सपंचमात्रः स्यात् एवंविधानवरनामधेयान्
पंचस्वरान् पिंगपक्षी मुंचति

॥ भाषा ॥

चीक्किति ॥ चीकु चीग् ये पांच मात्राको शब्द हे पिंगलपक्षी या प्रकारके पांच मा
रुतशब्द कहेहे इनको संग्रह कहेंहें चिच् १ चीच् २ चीच्चु ३ वा चिचिचि ३ चिचि
चिचि ४ चीकु चीग् ५ ये पांच मारुन शब्द हें ॥३२॥ सएकमात्रइति ॥ चिग् ये एक
मात्र ध्वनी हे चिरु ये दोय मात्रावान् शब्द हे ओर कुरुरु ये तीन मात्राको शब्द हे
ओर किचिकिचि ये च्यार लघूनकरकें चतुर्मात्र शब्द हे ॥ ३३ ॥ अभिन्नरूपैरिति ॥
जो पक्षी अभेदरूप पांच स्वरनकरकें उच्चारण करे वो पंचमात्रस्वर होयहे एसे ए
से अंबर नाम पांच सरस्वतीनें पिंगलपक्षी बोलेहे ॥ ३४ ॥ ॥७॥

यः संवृतोमात्रकपंचकेनस्वरस्त्रिरुक्तःसलघुप्रदिष्टः
षोढोदितोयःकथितःसदीर्घःप्लुतःसतुस्यान्नवधोदितो
यः ३५ निस्वनैर्लघुगुरुप्लुतसंज्ञैःपिंगलेनविहितैःपु
रुषाणाम् तुच्छमध्यसकलानिफलानिस्युःक्रमादि
तिवदन्तिमहांतः ३६ हृष्टःस्वरेणक्षितिजेनपिंगःसं
लापकारीपुनरांभसेन कामातुरोजल्पतितैजसावै
शांतास्त्रयोऽमीकथिताश्वनादाः ३७

॥ टीका ॥

यः संयुतइति योमात्रिकपंचकेनसंयुतः स्वरः त्रिरुक्तः सलघुप्रदिष्टः यः षोढाषड्वारमुदितः सदीर्घः योनवधाउदितः सप्लुतः ३५ निस्वनैरिति लघुगुरुप्लुतसंज्ञैः स्वरैः पिंगलेनविहितैः पुरुषाणांतुच्छमध्यमसकलानि फलानिस्युःक्रमान्महांतःवदंति ३६ हृष्टइति क्षितिजेनस्वरेणपिंगः हृष्टः सन्संलापकारीस्यात् पुनः आंभसेनापिकामातुरः तैजसेनजल्पति अमीत्रयः नादाः शांताः कथिताः ३७

॥ भाषा ॥

॥ यः संयुतइति ॥ जो पांचमात्रा करकें संयुक्त स्वर हें तीन पोत कह्यो होय तो वाकी लघुसंज्ञा हे जो छैपोत कह्यो होय वाकी दीर्घसंज्ञा है और जो नोपोत कह्यो होयवाकी प्लुतसंज्ञा है ॥३५॥ निस्वनैरिति ॥ पिंगलपक्षीकरकें कहेहुये लघुगुरु प्लुत ये तीन संज्ञा जिनकी एसे स्वरनकरकें पुरुषनकूं तुच्छमध्यम उत्तम ये तीन प्रकारके फल होंय हें ये महांत जन कहेहें ॥३६॥ हृष्टइति ॥ पिंगलपक्षी पार्थिवस्वरकरकें प्रसन्न होत आलाप करे फिर आप्य या शब्द करकें कामातुर होय तैजसस्वरकरकें बोले तो ये तीनो नाद शांतसंज्ञक कहेहें ॥३७॥

वायव्यशब्दंकुपितः करोतिशोकार्दितोनाभसशब्दका
री शब्दाविमौद्वावपिपिंगलस्यबुधाः प्रदीप्ताविति
निर्दिशंति ३८ इतिपिंगलारुतेस्वरप्रकरणंद्वितीयम्
भूम्यंबुतेजोऽनिलखात्मकानांमात्रादिभेदः कथितः
स्वराणां बलान्यथैषांककुभांविभागैर्मित्रारिमध्य
स्थितयावदामः ३९ प्राच्यामवाच्यामपिपार्थिवा
ख्यमाप्यंप्रतीचीधनदाऽऽशयोस्तु रुतंपुनस्तैजस
मग्निकोणेवायव्यकोणेऽनिलजंप्रदिष्टम् ४०

॥ टीका ॥

वायव्यइति कुपितः वायव्यशब्दंकरोतिशोकार्दितः नाभसशब्दकारीस्यात् इमौशब्दौद्वावपिपिंगलस्यबुधाः पंडिताः प्रदीप्तावितिनिर्दिशंति ३८ इतिवसंतराजटीकायांधिंगलारुतेस्वरमात्रप्रकरणंद्वितीयम् २ भूम्यंब्विति भूम्यंबुतेजोऽनिलखात्मकानांस्वराणां मात्रादिभेदः कथितः अथ एषांककुभां काष्ठानां विभागैः मित्रारिमध्यस्थितयाबलानिवदामः ३९ प्राच्यामिति प्राच्यांपूर्वस्यां अवाच्यांदक्षिणस्यां पार्थिवाख्यंबलिष्ठंतथा प्रतीचीधनदाऽऽशयोस्त्विति प्रतीचीपश्चिमाधनदाशाउत्तरातयोः आप्यं

॥ भाषा ॥

॥वायव्यइति॥ कोपहोयकर वायव्यशब्द करे शोकार्दितहोयकर नाभस शब्द करे पिंगलके ये दोनोशब्दनकूं पंडितप्रदीप्त कहेंहैं ॥३८॥ इतिश्रीव०भा०टी० पिंगलारुतेस्वरमात्राप्र०२॥ भूम्यंबिति ॥ पृथ्वी जल तेज वायु आकाश इन स्वरनके मात्रादिक भेद कहेंहैं अब हम इन पांचोनकूं दिशानके विभागनकरकें और मित्र अरि मध्य इनमें स्थिती करकें बल कहेंहैं ॥३९॥ प्राच्यामिति॥ पूर्व दिशामे उत्तर दिशामें पार्थिव स्वर बलिष्ट हे और पश्चिम उत्तर इनमें आप्यस्वर बलवान् हे और अग्निकोणमें तैजसस्वर बलिष्टहै वायव्यकोणमें मारुतशब्द बलिष्ट है ॥ ४०॥

ईशानरक्षोऽधिपकोणयोश्चबलाधिकंनाभसशब्द
माहुः जलावनीजौसुहृदौनिनादौतयोस्तुमध्याज्ज
लजोबलीयान् ४१ पानीयतेजःप्रभवावरातीपा
नीयजःस्याद्बलवांस्तयोस्तु शब्दावरीमारुततो
यजातौश्रेयांस्तयोर्मारुतजोबलेन ४२ मध्यस्थ
वर्तीगगनाग्निजातोबलीतयोर्नाभसएवनादः व्यो
मांबुनादौनरिपूनमित्रेवरस्तयोर्व्योमचरोबलेन ४३

॥ टीका ॥

बलवद्भवति पुनस्तैजसंरुतंआग्निकोणेबलिष्ठं वायव्यकोणेऽनिलजंबलि
ष्ठं ४० ईशानेति ईशानरक्षोधिपकोणयोस्तुनाभसंशब्दंबलिष्ठमाहुः
तथा जलावनीजौनिनादौसुहृदौतयोश्चमध्याज्जलजोबलीयान् ४१
पानीयेति पानीयतेजःप्रभवौ अरातीभवतः तयोर्मध्येपानीयजः
बलवान् स्यात् मारुततोयजातौशब्दावरीशत्रूभवतः तयोर्मध्येमारुत
जोबलेनश्रेयान् ४२ मध्यस्थेति गगनाग्निजातौमध्यस्थवर्ती तयोर्नाभस
एवनादोबलीबलवान् व्योमांबुनादौनरिपूनमित्रे तयोर्मध्येबलेनव्यो
मचरोवरःश्रेष्ठः ४३

॥ भाषा ॥

॥ईशानेति॥ ईशान नैर्ऋत्यकोणमें नाभस शब्द बलिष्ट है ओर आप्यशब्द पार्थिव
शब्द दोनो सुहृद हैं इनके मध्यमें आप्यशब्द बलिष्ट है ॥ ४१॥ पानीयइति ॥ जल
तेज इनतें हुये शब्द अरी होंयहैं इनके मध्यमें जलतें हुयो शब्द बलवान् है ओर
मारुत जल इनतें हुये शब्द अरी हैं इनमें मारुततें हुयो शब्द बलकरकें श्रेष्ठहै॥४२
॥मध्यस्थेति॥ आकाश अग्नि इनतें हुये शब्द मध्यस्थवर्ती हैं इनमें सुं नाभस शब्द-
बलवान् हैं आकाश जल ये दोनो शब्दन वैरी हैं न मित्रहैं इन दोनोनमेंसूं आकाश
चारी शब्द बलवान् है ॥ ४३ ॥ ॥छ॥

सौहार्दयुक्तौक्षितिवह्निजातौबलंतयोर्भूमिरवेप्रभूतं
समीरतेजःस्वरयोःसखित्वंबलीतयोश्चापिसमीरणो
त्थः ४४ अरातिराप्योदहनोद्भवस्यशत्रुस्तथाप्य
स्यसमीरजातः स्यात्तैजसोभूप्रभवस्यमित्रंवायव्य
शब्दःसुहृदग्निजस्य ४५ वैरिणौप्रथमकालसमु
त्थौपार्थिवस्यजलमारुतशब्दौ तावपीहसमनंतर
जातौसौहृदंप्रथयतःसहतेन ४६ आकाशनादंक
थयंतिशत्रुंप्रायेणविज्ञाःसकलध्वनीनाम्

॥ टीका ॥

सौहार्देति क्षितिवह्निजातौसौहार्दयुक्तौस्तः तयोर्मध्येभूमिरवेप्रभूतंब-
लं समीरतेजस्वरयोःसखित्वंतयोर्मध्येसमीरणोत्थोबली ४४ अरातिरिति
दहनोद्भवस्य अरातिः आप्यः तथैवअस्यसमीरजातःशत्रुः तथा भूप्रभवस्य
तेजसः मित्रंस्यात् अग्निजस्यवायव्यशब्दःसुहृत् ४५ वैरिणाविति पा
र्थिवस्यजलमारुतशब्दौप्रथमकालसमुत्थौवैरिणौभवतः इहसमनंतरजा
तौरुतेनसौहृदंप्रथयतः ४५ आकाशेति सकलध्वनीनां आकाशनादं
शत्रुंकथयंति एवममुनाप्रकारेणबलंसौहृदंवैरिभावौमध्यास्थितिश्चस्वरा

॥ भाषा ॥

॥ सौहार्देति ॥ पृथ्वी अग्नीसें हुये शब्द सुहृद हें इनमें पृथ्वी शब्द वडो बलिष्ट
है मारुत तैजस स्वर मित्र हें इनमेंसूं मारुततें हुयो शब्द बलवान् हे ॥४४॥ अरा-
तिरिति॥ अग्नीतें हुयो शब्द ताको शत्रू आप्य शब्द हें ओर आप्यको मारुततें
हुयो शब्द शत्रू हे ओर पार्थिव शब्दको तैजस शब्द मित्र हे ओर तैजसको मा
रुत शब्द सुहृद हैं ॥४५॥ वैरिणाविति॥ पार्थिवके जल मारुत शब्द प्रथम कालके उ
ठे हुये वैरी हें या प्रकारमें पीछें हुये हे यातें शब्दकरकें सुहृदभावकूं विस्तार करें
हें ॥४६॥ आकाशेति॥ सबशब्दनको आकाशनाद शत्रू हे या प्रकार स्वरनके

एवंबलंसौहृदवैरिभावौमध्यस्थितिश्चाभ्युदितास्वराणां ४७ फलंसमस्तंभवनेस्वकीयेभवेत्तथामित्रगृहेफलार्द्धम् फलस्यनाशोरिपुमंदिरेषुजातैर्निनादैर्वसुधादिसंज्ञैः ४८ इतिपिंगलारुतेस्वरबलप्रकरणं ३ धेनुर्गर्भो वंध्यइत्यत्रतिस्रःप्रख्यापयंतेकालभेदेनसंज्ञाः पिंगोक्तानांपार्थिवादिस्वराणामाख्यास्यामश्चार्थसंज्ञाफलानि ४९ स्यात्पार्थिवःपूर्वककुब्विभागेधेनुर्दिनादौप्रहरद्वयेच ॥

टीका

णामभ्युदिता ४७ फलमिति वसुधादिसंज्ञैर्निनादैः स्वकीये भवने समस्तं फलं भवति तथा मित्रगृहे फलार्धं भवति रिपुमंदिरे फलस्यनाशोभवति ४८ इतिवसंतराजटीकायांपिंगलारुतेस्वरबलप्रकरणं॥३॥ धेनुरिति पूर्वोक्तानांपार्थिवादिस्वराणां धेनुः गर्भः वंध्यइति तिस्रः संज्ञाः कालभेदेन प्रख्यापयंते ततस्तेषामर्थसंज्ञाफलान्याख्यास्यामः ४९ स्यादिति पूर्वककुब्विभागे दिनादौ प्रहरद्वयेच मध्यंदिने पार्थिवः स्वरोधेनु-

॥ भाषा ॥

बल सुहृदभाव वैरीभाव मध्यस्थितभाव कहेंहैं ॥४७॥ फलमिति ॥ पार्थिवकूं आदि लेकर जे नाद तिनकरकें अपने घरमें तो समस्त फल देवें हैं और मित्रके घरमें आधो फल होय और शत्रूकें घरमें फलको नाश होय ॥४८॥ इति वसंतराजशाकुनेभाषाटीकायां पिंगला रुते स्वरबलप्रकरणंतृतीयं ॥३॥ ॥

॥धेनुरिति॥ पिंगलके कहेहुये जे पार्थिवादिक स्वर तिनकी धेनुः गर्भः वंध्यः ये तीनसंज्ञा कालभेद करकें कहेहैं और इनके अर्थसंज्ञा फल तिनैं कहेहैं ॥४९॥ स्यादिति ॥ पूर्व दिशाके विभागमें दिनकी आदिमें दोय प्रहर तांई पार्थिवस्वरकी धेनुसंज्ञा है और तृतीय प्रहरमें पार्थिव शब्दकी गर्भ संज्ञा है और

सएवगर्भः प्रहरेतृतीयेवंध्यःसएवप्रहरेचतुर्थे ५०
प्राच्यांचधेनुर्दिवसार्द्धयामात्स्याद्याममात्रंदहनस्यश
ब्दः निशाद्ययामद्वितयेसगर्भोवंध्योनिशादिप्रहरद्व-
येतु ५१ अर्द्धाधिकाद्यामयुगाद्दिनांतंयावद्भवत्यं
बुरवोऽभ्रगर्भः दिनस्यमध्येस्तमयेचधेनुः प्राच्यां
तथारव्युदयेप्रतीच्यां ५२ महानिशायांजलजश्च
वंध्योगर्भोनिभ्रजोदिनतुर्ययामे वंध्योदिनादौरज
नीतृतीययामेदिनेशास्तमयेचधेनुः ५३

॥ टीका ॥

संज्ञःस्यात् तथातृतीयेप्रहरेसएवपार्थिवोगर्भसंज्ञस्स्यात् तथाचतुर्थेप्रहरेसएववंध्यसंज्ञःस्यात् ५० प्राच्यामिति दिवसार्द्धयामाद्याममात्रंयावद्दहनस्यशब्दोधेनुसंज्ञः स्यात् निशाद्ययामेद्वितयेरात्रौप्रथमप्रहरद्वयेयः दहनशब्दःसः गर्भसंज्ञःस्यात् तथानिशांत्यप्रहरद्वयेतुसवंध्यसंज्ञःस्यात् ५१ अर्द्धाधिकादिति अर्द्धाधिकाद्यामयुगादारभ्य निशांतंसार्द्धप्रहरंयावदंबुरवः अभ्रगर्भसंज्ञःस्याद्दिनस्यमध्ये तथाऽस्तमयेचप्राच्यांधेनुसंज्ञःस्यात् तथारव्युदयेप्रतीच्यां पश्चिमायांधेनुसंज्ञःस्यात् ५२ महानिशायामिति महानिशायां निशीथेज-

॥ भाषा ॥

चतुर्थप्रहरमें पार्थिवकी वंध्यसंज्ञा हे ॥५०॥ प्राच्यामिति ॥ दिवसके अर्द्ध यामतें याममात्रतक दहनको शब्द धेनुसंज्ञक हे ओर रात्रीके प्रथम याममें ओर द्वितीय याममें दहनशब्दकी गर्भसंज्ञा हे ओर रात्रीके अंतके दोय प्रहर तिनमें दहनशब्दकी वंध्यसंज्ञा हे ॥ ५१॥ अर्द्धाधिकादिति ॥ दिवसके अर्द्धको याम युगजो मध्यान्ह तासूं लेजव तांई दिनको अंत होय तव तांई अंबुशब्दकी गर्भसंज्ञा हे ओर दिनके मध्यमें ओरसायंकालमें पूर्वदिशामें जल शब्दकी धेनु संज्ञाहे ओर सूर्यके उदयहुयेपे पश्चिमदिशामें जलशब्दकी धेनुसंज्ञा हे ॥ ५२ ॥ महानिशायामिति ॥ अर्द्ध रात्रीमें जलशब्दकी वंध्य संज्ञा हे ओर दिनके चोथे प्रहरमें आ-

धेनुर्निशायाः प्रथमे द्वितीये यामे तृतीये त्वथ गर्भसंज्ञः
वंध्यश्चतुर्थे प्रहरे प्रतीच्यां पिंगध्वनिर्मारुतनामधेयः ५४
सद्यः फलं धेन्वाभिधे स्वरे स्याच्चिरात्फलं यच्छति गर्भसंज्ञः
वंध्यस्तु वंध्यः कथितः फलेन स नोपयुक्तः क्वचिदेव
कार्ये ५५ इति पिंगलारुते धेन्वादिफलप्र० चतुर्थम् ४
धेन्वादिसंज्ञाफलमुक्तमेवं पिंगोदितानां सकलस्वराणाम्
भूतोयतेजःपवनद्युजानां ब्रूमः फलं संप्रति केवलानाम् ५६

॥ टीका ॥

लजश्च वंध्यः स्यात् तथा नभोजः नभसो जातः नभोजः दिनतुर्ययामे गर्भसंज्ञः स्यात् तथा रजनीतृतीययामे दिनेशास्त्तमये सूर्यास्त्तमये च धेनुर्भवति ५३ धेनुरिति मारुतनामधेयः पिंगध्वनिः प्रतीच्यां निशायां प्रथमे द्वितीये यामे धेनुसंज्ञः स्यात् तृतीये यामे गर्भसंज्ञः स्यात् चतुर्थप्रहरे वंध्यसंज्ञः स्यात् ५४ सद्य इति धेन्वाभिधे स्वरे सद्यः फलं स्यात् गर्भसंज्ञः चिरात्फलं यच्छति वंध्यस्तु फलेन वंध्यः कथितः क्वचिदेव कार्ये स नोपयुक्तः न उपयोगं यातीत्यर्थः ५५ इति वसंतराजटीकायां पिंगलारुते धेन्वादिप्रकरणं ४ ॥छ॥ धेन्वादीति पिंगोदिता-

॥ भाषा ॥

काश शब्दकी गर्भसंज्ञा है ओर दिनकी आदिमें आकाशकी वंध्यसंज्ञा है ओर रात्रीके तीसरे प्रहरमें ओर सूर्यके अस्त्तसमयमें आकाश शब्दकी धेनुसंज्ञा है ॥५३॥ धेनुरिति॥ पिंगलको मारुतनामशब्द ताकी पश्चिमदिशामें प्रथमद्वितीय प्रहरमें धेनुसंज्ञा है ओर तृतीयप्रहरमें गर्भसंज्ञा है ओर चोथे प्रहरमें वंध्य संज्ञा है ॥५४॥ सद्येति॥ धेनुनाम स्वरमें तो तत्काल फल होयहै ओर गर्भसंज्ञक स्वरमें वोहोत दिनमें फलकार्य होय है ओर वंध्यतो वंध्यही यामे कछूकबी होय कोई कार्यमें ये उपयोग नहीं है ॥५५॥ इति वसं० भा० टी० पिंगलारुते धेन्वादिफलप्रकरणं ॥४॥ ॥धेन्वादीति॥ पिंगलके कहे हुये संपूर्णस्वर तिनकी धेनूकूं आदिलेकर संज्ञा ओर फल या प्रकार कहे अब पृथ्वी जल तेज पवन -

असंयुतोन्येनरवः पृथिव्याः स्यात्पंचमात्रोपिफलेनही-
नः तथाविधोसौ यदिचैकमात्रस्तदीशातुल्योभयदः स-
दैव ५७ स्यादद्वितीयः फलमात्रदर्शी पूर्णो धराजोनि-
नदः कदाचित् एकाकिनोन्यांश्चतुरोपिनादान्पूर्णान
पित्रासकृतोवदंति ५८ आप्यादिशब्दैः पुनरेकमात्रै
रोगातुराणांमरणंकलिश्च एकाकिभिः स्युर्विविधा-
स्त्वनर्थामात्राद्वयाद्यैरपरेभवंति ५९

॥ टीका ॥

नांसकलस्वराणां एवंपूर्वोक्तप्रकारेणसंज्ञाफलमुक्तंसंप्रति भूतोयतोजःपवनद्युजानां तत्रभूः पृथ्वी तोयमुदकं तेजः मसिन्द्वंपवनोवायुः द्युः आकाशः तेभ्यो जातानांस्वराणांकेवलानांफलंब्रूमः ५६ असंयुतइति अन्येनपृथिव्याअसंयुतोरवः पंचमात्रोपि फलेनहीनःस्यात् यदिचैकमात्रः तथाविधोसौभवति तदाउर्वीशतुल्यः सदैवभयदोभवति ५७ स्यादिति धराजः भूमेरुत्पन्नः निनदः शब्दः अद्वितीयः कदाचित्फलमात्रदर्शीस्यात् एकाकिनः अपूर्णाः अन्यांश्चतुरोपिनादान्पूर्णानपिपंचमात्रानपित्रासकृतोवदंति ५८ आप्यादीति आप्यादिशब्दैः पुनरेकमात्रैः रोगातुराणांमरणंकलिश्चस्यात् एतैरेकाकिभिः के-

॥ भाषा ॥

आकाश इनस्वरनके केवल फल कहेंहें ॥५६॥ असंयुतइति ॥ और शब्दकरकें संयुक्त न होय पिंगलको कह्यो पृथ्वीको शब्द होय और पंचमात्रावी होय तोहू फलकरकें हीन जाननो जो एसो वी होय और एकमात्रा होय तो पृथ्वीके ईशकी तुल्यं होय सदां भयको देवेवारो होय ॥५७॥ स्यादिनि ॥ पृथ्वीको शब्द अद्वितीय होय पूर्ण होय तो फलमात्रको दिखायवेवारो होय जो एकाकी होय अपूर्ण होय तो औरवी च्यारशब्द पूर्ण पांचमात्रा जिनमें तिनेहूं त्रासको करवेवारो कहेंहें ॥५८॥ आप्यादीति॥ एक मात्रा जिनकी एसे जलादिक शब्दनकरकें रोगातुरपुरुषनकूं मरण और कलह होय जो ये उच्चारणमात्र

भौमाप्यसंज्ञौशाकुनिध्वनीयौशुभेषुकार्येषुशुभप्रदौतौ बाह्यस्तुकार्येषुतथाशुभेषुरुग्द्वेषभीबंधवधादिकेषु ६० इतिपिंगलारुतेकेवलस्वरप्रकरणंपंचमं ५ एवंस्वराणामिहकेवलानांफलंप्रदिष्टंवसुधादिजानां अथद्वियोगेन विमिश्रितानांफलान्यमीषांक्रमदोवदामः ६१ स्यातां क्रमाद्भूमिजलध्वनीचेत्संपद्यतेतत्सकलाभिलाषः तौ चेद्भवेतांविपरीतभूतौभवेत्तदास्थानधनोपघातः ६२

॥ टीका ॥

वलोच्चारितैर्विविधास्त्वनर्थाः स्युः अपरेमात्राद्वयाद्यैः पूर्वोक्तकार्यकारिणोभवंति ५९ भौमाप्येति शकुनेनिरीक्ष्यमाणेभौमाप्यसंज्ञौ ध्वनीतौशुभेषुकार्येषु शुभप्रदौभवतः तथारुग्द्वेषभीबंधवधादिकेषु अशुभेषुकार्येषुबाह्यस्त्वशुभः ६० इतिवसंतराज टीकायांपिंगलारुतेकेवलस्वरफलप्रक० ५ एवमिति एवंपूर्वोक्तप्रकारेणवसुधादिजानांकेवलानांस्वराणांफलंप्रदिष्टं अथामीषां द्वियोगेनविमिश्रितानांफलानिक्रमतोवयंवदामः ६१ स्यातामिति क्रमाद्भूमिजलध्वनीचेत्स्यातां तत्सकलाभिलाषः मनोरथः संपद्यते प्राप्नोति तौचेद्विपरीतभूतौभवेतां तदास्थानधनोपघातः स्थानस्य धनस्यचोपघातः नाशः स्यात् ६२

॥ भाषा ॥

ही शब्द होंय तो इनकरकें अनेक अनर्थ होंय जो दोय मात्रादिक शब्द हैं उनकरकें पूर्व कहे जे कार्य हैं ते होंय ॥ ५९ ॥ भौमाप्येति ॥ भौम और आप्य ये दोनो शब्द शुभकार्यमें शुभके देवेवारे हैं और अशुभ कार्य जे रोग द्वेष भय बंधन वध इत्यादिकनमें अशुभ हैं ॥ ६० ॥ इतिपिंगलारुतेकेवलस्वरफलप्रकरणं ५ ॥ एवमिति॥ पूर्वप्रकारकरकें पृथ्वीकूं आदि लेकर जे केवलस्वर तिनके फल कहे अब द्वियोगकरकें मिलवां ये शब्द तिनके फल क्रमकरकें हम कहें हैं ॥ ६१ ॥ स्यानामिति॥ जो भूमीजल ये दोनो शब्द होंय तो वा पुरुषकूं संपूर्ण अभिलाषा प्राप्त होय जो दोनो शब्द विपरीत होंय तो स्थान धनको उपघात करे ॥ ६२ ॥

अनंतरंपार्थिवशब्दतश्चेत्स्यात्तैजसस्तद्भवतीष्टसिद्धिः
ऐतौभवेतांविपरीतभावौनाशायकार्यस्यसमीहितस्य ६३
शब्दौधरामारुतजौभवेतांक्रमेणलाभायधनक्षयाय व्य
तिक्रमात्तौभवतोयदातुहानिस्तदाप्राक्पुरतोर्थलाभः ६४
भौमान्निनादात्खरवः परश्चेत्सुखंतदाप्रागसुखंचपश्चा
त् क्रमंपरित्यज्ययदाभवेतांदुःखंतदादौतदनुप्रमोदः ६५
आप्यस्यपश्चाद्यदितैजसःस्यात्कृत्वाफलंतन्निपतंनिहंति

॥ टीका ॥

अनंतरमिति पार्थिवशब्दतोनंतरंतैजसश्चेत् स्यात् तदाइष्टसिद्धिर्भवति विपरीतभावादेतौ समीहितस्यकार्यस्यनाशायस्यातां ६३ शब्दाविति यदिधरामारुतजौ भूमिवायुजातौ शब्दौ क्रमेणभवेतां तदा क्रमेण लाभाय धनक्षयाय भवतः यदा तुव्यक्तिक्रमात्तौभवतः तदाप्राक् हानिः पुरतोर्थलाभः स्यात् ६४ भौमादिति भौमान्निनादात् खरवः आकाशजोरवः परश्चेत्स्यात् तदासुखंपश्चादसुखंदुःखंस्यात् यदा क्रमंपरित्यज्य तौभवेतां तदा आदौ दुःखं तदनुपश्चात् प्रमोदः स्यात् ६५ आप्यस्येति यदि आप्यस्यउदकजातस्य पश्चात् तैजसः स्यात् तदाफलंकृत्वानियतंतन्निहंति आदौतु तैजसेजाते इहसिद्धंफलंप्रसह्यत

॥ भाषा ॥

॥ अनंतरमिति ॥ पार्थिवशब्दके पीछें जो तैजस शब्द होय तो वाकूं इष्टसिद्धी होय और जो दोनो शब्द विपरीत होय तो ये समीहित कार्यको नाश करै ॥ ६३ ॥ शब्दाविति ॥ जो पृथ्वी मारुतशब्द ये दोनो होंय तो क्रमकरकें लाभ करैं और धनको क्षय करें ॥ जो विपरीत होंय तो पूर्व हानी करें पीछें लाभ करैं ॥ ६४ ॥ भौमादिति ॥ भौमशब्दतें आकाश शब्द परें होय तो पहलें सुख होय पीछें असुख होय और विपरीत होंय तो पहलें दुःख होय पीछें सुख होय ॥ ६५ ॥ आप्यस्येति ॥ आप्यशब्दके पीछें जो तैजस शब्द होय तो पूर्व फल करकें फिर वाकूं नाश करे और जो पहलें तैजस शब्द होय पीछें आप्य शब्द होय तो

आदौतुजातेयदपीहतेजसेसिद्धंफलंतद्दहतिप्रसह्य ६६
प्रागंबुनादोनिलजस्ततश्चेत्समीहितंतत्सहसानिहंति
भयंक्षयंचद्रविणस्यतज्ज्ञास्तयोर्विपर्यासतयावदंति ६७
अंभोरवादुत्तरमांवरश्चेत्सुहृत्कलौतन्मरणंप्रदिष्टं विपर्ययात्तौरिपुसंपरायेशरीरनाशंकुरुतोनराणां ६८
शब्दौक्रमात्पावकवातजातौविघ्नंविधत्तोऽभिमतार्थसिद्धै तयोश्चजातेसतिवैपरीत्येमृत्युर्भयंवा भवति प्रभूतम् ६९ ॥ छ॥

॥ टीका ॥

दहति ६६ प्रागिति चेत्प्रागंबुनादः अनिलजः पश्चात् तत्समीहितमिच्छितंसहसानिहंति तयोः विपर्यासतयातज्ज्ञाःशाकुनज्ञाः भयंद्रविणस्यक्षयंवदंति ६७ अंभोरवादिति अंभोरवादुत्तरं आंबरः चेत्स्यात् तदासुहृत्कलो तन्मरणंप्रदिष्टं विपर्ययात्तौरिपुसंपराये युद्धे नराणां शरीरनाशंकुरुतः ६८ शब्दाविति पावकवातजातौशब्दौ क्रमाद्विघ्नं विधत्तः अभिमतार्थसिद्धै चस्यातां तयोश्चवैपरीत्येजातेसति प्रभूतंप्रचुरतरंभयंमृत्युश्चभवति ६९

॥ भाषा ॥

सिद्धहुये फलकूं बलात्कार करकें नाश करै ॥६६॥ प्रागिति॥ पहलें जल नाद होय ओर पीछें पवन नाद होय तो हुये कार्यकूं सहसा नाश करदे जो पहलें पवननाद होय पीछें जलनाद होय तो भय ओर द्रव्यको नाश करे॥ ६७॥ अंभोरवादिति ॥ पहलें जलशब्द होय पीछें आकाश शब्द होय तो सुहृदजननमें कलह ओर वाको मरण होय ओर पहलें आकाश शब्द होय पीछें जल शब्द होय तो संग्राममें मनुष्यनको नाश करे ॥ ६८॥ शब्दाविति॥ पहलें अग्नी शब्द होय पीछें पवनशब्द होय तो विघ्न करे ओर वांछित सिद्धी करे जो येशब्द विपरीत होय तो मृत्यू ओर बोहोत भयकरे ६९

Nepal Sanskrit University, Balmeekí Campus, Kathmandu

क्रमेणयद्वाक्रमवैपरीत्यात्स्यातांध्वनीतैजसनाभ-
सौचेत् तदावगच्छेन्नियमेनविद्वानत्युग्ररूपंकल
हंभयंच ७० प्राग्वातजोऽनंतरमांबरश्चेच्छब्दस्त
थावित्तविनाशमाहुः विपर्ययेणत्वनयोरवश्यंरणेन
राणांमरणंवदंति ७१ हुताशनाकाशसमीरशब्दाः
शब्दांतरादुत्तरमुद्भवंति एकाकिनोवायदितत्प्रदिष्टाः
शुभायकार्येषुशुभावहेषु ७२ अन्योध्वनिःपार्थिव
नादयोर्योमध्यस्थितोऽसौशुभदोविशेषात् यश्चान्ययोःक
श्चनमध्यवर्तीनक्वापिकार्येशुभदंतमाहुः ७३ इ॰ पिं॰ द्विसं॰ फ॰ म॰ ६

॥ टीका ॥

क्रमेणेति क्रमेणवैपरीत्याद्वातैजसनाभसौध्वनीभवतश्चेत्तदात्युग्ररूपंकलहंभयंचनियमेनभवतीतिविद्वानवगच्छेज्जानीयात् ७० प्रागिति प्राग्वातजः अनंतरं आंबरश्चेत्स्यात्तदावित्तविनाशमाहुः अनयोर्विपर्ययेणावश्यंरणेनराणांमरणंवदंति ७१ हुताशनेति हुताशनाकाशसमीरशब्दाःशब्दांतरादुत्तरचेद्भवंति यदि एकाकिनोवाभवंति तदाशुभेषुकार्येषुशुभायप्रदिष्टाः ७२ अन्योध्वनिरिति अन्योध्वनिःपार्थिवनादयोर्योमध्यस्थितः असौविशेषात्शु-

॥ भाषा ॥

॥क्रमेणेति॥ जो तैजस और नाभस ये दोनो शब्द क्रमकरकें होंय वा विपरीतकरकें होंय तो निश्चयकरकें अतिउग्ररूप कलह और भय प्राप्त होय ॥७०॥ प्रागिति॥ पहलें पवनतें हुयोशब्द होय पीछें आकाशको शब्द होय तो वित्तको नाश करे जो इनको विपरीत करकें शब्द होय तो अवश्य मनुष्यनको मरण करै॥७१॥ हुताशनाकाशेति॥ अग्नी आकाश पवन ये तीनो शब्द और कोई शब्दांतरसूं उत्तर होंय वा इकलेई होंय तो शुभ कार्यनमें शुभके देवेवारे जानने॥७२॥ अन्योध्वनिरिति॥ और कोई ध्वनी पार्थिव नादनके मध्य में स्थित होय तो ये विशेषकरकें शुभको देवेवारो है जो और ध्वनीनमें पार्थिवनाद म-

एवंद्वियोगानिनदायथावत्फलंचतेषांकथितंसमस्तं अ
थत्रिसंयोगसमुद्भवानांब्रूमःफलंपिंगलजल्पितानां ७४
मध्यतोभवतिपार्थिवाप्ययोर्वातजोगगनजोऽथवारवः स्या
त्तदाप्रसवतां धनक्षयोनिश्चयेनमरणंचदेहिनां ७५ भूज
लानलरवायदिक्रमात्स्युस्तदाभवतिसंपदुत्तमा अंबु
भूमिदहन स्वनैः पुनःस्याच्चिरेणफलमीप्सितंनृणां ७६
तेजसाप्यवडिमास्त्रयोरवाः स्त्रीप्रयोजनविधौसुखावहाः

॥ टीका ॥

भदोभवति अनयोर्यःकश्चनमध्यवर्तीतंक्कापिकार्येशुभदंनआहुः ७३ इतिव० टी० पिंगलारुतेद्विसंयोगस्वरप्रकरणंषष्ठं ॥ एवमिति एवममुनाप्रकारेणद्विसंयोगानिनादा यथावत्फलंचतेषांसमस्तंकथितं अथपिंगलजल्पितानांत्रिसंयोगसमुद्भवानांफलंब्रूमः ७४ मध्यतइति पार्थिवाप्ययोर्मध्यतः वातजः अथवा गगनजोरवः स्यात्तदाप्रसवतांउत्पन्नशीलानांदेहिनांनिश्चयेनधनक्षयः मरणंच स्यात् ७५ भूजलेति यदिक्रमाद्भूजलानलरवाः स्युः तदाउत्तमासंपत्संपत्तिः भवति पुनरंबुभूमिदहनस्वनैश्चिरेणनृणामीप्सितंफलंभवति ७६ तेजसेति तेजसाप्यवडिमास्त्रयोरवाः स्त्रीप्रयोजनविधौसुखावहाभवंति तेपुनः

॥ भाषा ॥

ध्यवर्तीहोय तो ये कोई कार्यमें शुभको देवेवारो नहीं कहेहैं ॥ ७३ ॥इतिपिं० द्विसंयोगफलप्रकरणंषष्ठं ॥ ६॥ एवमिति ॥याप्रकारकरकें द्विसंयोगशब्दनके फल समस्त कहे अव पिंगलपक्षीके कहेहुये त्रिसंयोगकरकें हुयेजेस्वर तिनके फल कहेंहें ॥७४॥ मध्यतइति॥ पार्थिव आप्य इनशब्दनके मध्यमें वाततें हुयोशब्द होयवा गगनतें हुयोशब्द होय तो प्रसवना प्रबालक जिनके हुये होंय उनके धनको क्षय होय और देहधारीनको मरण निश्चयहोय॥७५॥ भूजलाइति॥ जोक्रमतें भूजल अनल येशब्द होंय तो उत्तम संपदा होय फिरजलभूमी अग्नी इनशब्दनकरकें मनुष्यनकूं चिरकालमें वांछित फल होय॥७६॥ तेजसेति ॥ तेजस आप्य वडिम ये

मध्यमाःस्युरपरत्रतेपुनर्भंगपूर्वजयदास्तथारणे ७७
भूमिवातगगनस्वनायदिव्याहृताःशकुनिनाक्रमात्तदा
लभ्यतेप्रथममीप्सितंफलंतस्यहानिरसुखंततोभवेत् ७८
वातवारिवियतांरुतानिचेदुच्चरत्यनुचितानिपिंगला ई
प्सितेसतिशुभप्रयोजनेदर्शयत्यतिशयेनतद्भयं ७९
व्योमवातवसुधाभिधारवैर्दीर्घदुःखधनहानिदायिनी पू
र्वमेवतदनंतरंपुनःपिंगलाभवतितुच्छलाभदा ८०
इतिपिंगलारुतेत्रिसंयोगस्वरफलप्रकरणंसप्तमम् ७

॥ टीका ॥

अपरत्रप्रयोजनेमध्यमाःस्युः तथारणेभंगपूर्वाजयदाःस्युः ७७ भूमीति यदिभूमिवातगगनस्वनाः शकुनिनाक्रमेणव्याहृताःस्युः तथाप्रथममीप्सितं फलंलभ्यतेततस्तस्यहानिरसुखंचभवेत् ७८ वातेति चेद्यदिवातवारिवियतांरुतानिअनुचितानिपिंगलाउच्चरति उत्पूर्वकश्चरधातुर्भाषणेप्रसिद्धः तदाशुभयोजनेईप्सितेसति अतिशयेनभयंदर्शयति ७९ व्योमेति व्योमवातवसुधाभिधारवैःपिंगलापूर्वमेवदीर्घदुःखधनहानिदायिनीस्यात् तदनंतरंतुच्छलाभदा अल्पलाभदाभवति ८० इ॰पिं॰त्रिसंयोगस्वरप्रकरणं ७

॥ भाषा ॥

तीनशब्द स्त्रीनके प्रयोजनमें तो सुखकरवेवाले हैं ओर प्रयोजनमें मध्यम हैं ओर रण में पहलें भंग करें पीछें जय देवेवारे होंय ॥७७॥ भूमिवानेति ॥ भूमी वात गगन ये शब्द पिंगलनें क्रमतें कहे होंय तो पहलें तो वांछितफल प्राप्त होय पीछें वा फलकी हानी ओर असुख होय ॥७८॥ वातेति ॥ वात जल आकाश इनके शब्द पिंगला अनुचित उच्चारण करे तो शुभ प्रयोजनमें वांछित होयपन अधिककरकें भय दिखावे ॥७९॥ व्योमेति ॥ आकाश वात पृथ्वी इनशब्दनकरकें दीर्घ दुःख ओर धनकी हानी देवै पहलें ओर पीछें पिंगला तुच्छ लाभकी देवेवारी होय ॥८०॥ इति पिंगलारुतेत्रिसंयोगस्वरफलप्रकरणम् सप्तमं ॥७॥

इतित्रिसंयोगवतांस्वराणांफलानिसम्यक्परिकीर्तितानि
चतुःसमायोगवतामिदानीमुदाहरामःकियतामपीह ८१
भूमिजलानलमारुतनादान्योवदितुंचतुरश्चतुरोसौ पिं
गखगःसकलाभिमतेषुश्रीजयकीर्तिसुखानिददाति ८२
पार्थिववारुणवाय्वनलोत्थान्वक्तिरवान्यदिपिंगलपक्षी
यच्छतितद्धिजयंयुधियात्रासिद्धिमपेक्षितलाभसमृद्धिं ८३
भूमिहुताशपयोगगनानांपिंगखगेनकृतेषुरुतेषु स्यात्
परदेशसमुच्चलितानांवांछितसिद्धिरथागमनंच ८४

॥ टीका ॥

इतीति इतिसमासोत्रिसंयोगवतांस्वराणांफलानिसम्यक् परिकीर्तितानिइदानींचतुःसंयोगवतांकियतांइहोदाहरामः ८१ भूमीति भूमिजलानलमारुतनादान्योवदितुंगदितुंचतुरः असौपिंगखगः सकलाभिमतेषुश्रीजयकीर्तिसुखानिददाति ८२ पार्थिवेति यदिपिंगलपक्षीपार्थिववारुणवाय्वऽनलोत्थान् रवान्वक्ति तदायुधितद्धिजयंयच्छति. तथायात्रासिद्धिं अपेक्षितलाभसमृद्धिं चददाति ८३ भूमीति पिंगखगेनभूमिहुताशपयोगगनानांरुतेषुकृतेषुपरदेशसमुच्चलितानांवांछितसिद्धिरथागमनंचस्यात् ८४

॥ भाषा ॥

॥इतीति॥ तीन संयोग जिनके एसे स्वरनके फल कहे अब या प्रकारमें च्यार संयोगवान् स्वरनके फल कहेंहें ॥८१॥ भूमीति॥ भूमी जल अग्नी पवन इनके नादनकूं कहनेकूं जो चतुर होय वोही चतुर जाननो ये पिंगलपक्षी संपूर्णवांछित फलनमें श्रीजय कीर्ति सुख इनेंदेवेहै ॥८२॥ पार्थिवेति॥ जो पिंगलपक्षी पार्थिव वारुण वायु अनल इनतें हुये शब्दनकूं कहै तो संग्राममें विजय करे और यात्रामें सिद्धी और वांछित लाभकी समृद्धी देवे ॥८३ ॥ भूमीति॥ पिंगलपक्षीनें भूमी अग्नी जल आकाश इनको शब्द कियो होय तो परदेशगये मनुष्यनकूं वांछा सिद्धी और आगमन होय ॥८४॥ ॥ छ॥

भूपवनांबुहुताशनशब्दाःस्युःक्रमशोयदिपिंगलिकायाः
तन्नियमेनजयोयुधिराज्ञांसिध्यतिचान्यदभीष्टमकस्मा-
त् ८५ भूम्यनिलाऽनलनीरनिनादान्पिंगखगोयदिमुं
चतितेन मोचयतेदृढबंधनबद्धंयच्छतिचास्यवसूनि
बहूनि ८६ वारिभूमिदहनश्वसनानांनिस्वनान्विदधती
परिपाट्या कन्यकांबरधनप्रभुलाभंपिंगलाप्रकुरुते
पुरुषाणां ८७ अंबुभूमिवियदग्निनिनादान्पिंगलोच्च
रतिचेत्क्रमगत्या तत्प्रसीदतिनृपःखलुयात्रासिद्धि-
मेतिपुनरागमनंच ८८

॥ टीका ॥

भूपवनेतियदिपिंगलिकायाः भूपवनांबुहुताशनशब्दाः क्रमतःस्युः तन्नियमेनयु-
धिराज्ञांजयोभवति अन्यादपीष्टंअकस्मात्सिध्यति ८५ भूमीइति यदिपिंगख
गः भूम्यनिलानलनीरनिनादान्मुंचतितेनतस्यदृढबंधनबद्धं मुंचति अस्यबहूनिव
सूनियच्छति ८६ वारीति वारिभूमिदहनश्वसनानांनिःस्वनान्परिपाट्याक्रमे-
णविदधती पिंगलाकन्यकांबरधरप्रभुलाभंपुरुषाणां प्रकुरुते ८७ अंबिति
पिंगलोंऽबुभूमिवियदग्निनिनादान्क्रमगत्याउच्चरतिचेत् तदानृपःप्रसीदति ख-

॥ भाषा ॥

॥भूइति॥ जो पिंगलपक्षीके भूमीपवन जल अग्नी इनके शब्द क्रमकरकें होंयतो नियमकर-
कें संग्राममें राजानको जय होय और वी वांछित अकस्मात् सिद्ध होय ॥८५॥ भूमीति॥
जो पिंगलपक्षी भूमीपवन अग्नी जल इनके नाद उच्चारण करे तो दृढबंधन करकें बंधरह्यो
होय ताय छुडायदे और वाकूं वोहोत सो धन देवै ॥८६॥ वारीति॥ जो पिंगला जल भू-
मी अग्नी पवन इनके शब्दनकूं क्रमकरकें करे तो पुरुषनकूं कन्या वस्त्र धन वोहोत सो
लाभ करे॥८७॥ अंबिति॥ जो पिंगलपक्षी जल भूमी आकाश अग्नी इनके निनाद क्रमकर
कें उच्चारण करे तो राजा प्रसन्न होय निश्चय यात्रामें सिद्धी होय और फिर आगमन होय॥८८

वारिवह्निपवनाऽवनिशब्दान्वामतोयदिकरोतिनरस्य
कन्यकाधनसुखादिकलाभं त द्दाति विदधात्यथविघ्नं
८९ पिंगलावदनजानियदिस्युर्वारिवाय्ववनिवह्निरुता-
नि विग्रहाद्युवति धान्यधनादिप्राप्यतेनरवरेणतदाशु
९० वारिवातदहनावनिवाचः पिंगलावदतिचेत्क्रमग
त्या वित्तकीर्त्तिविजयान्लभतेतद्विग्रहेणमहतींचसमृ
द्धिं ९१ तेजोधरावारिसमीरशब्दाभवंतिपिंगस्ययदिक्र
मेण ध्रुवंतदानींसुहृदागमेनप्रधानयोषिद्विषयःक
लिः स्यात् ९२

॥ टीका ॥

लुनिश्चयेनयात्रासिद्धिर्भेति पुनरागमनंचभवति ८८ वारीति यदिगच्छतोनरस्यवारिवह्निपवनावनिशब्दान्करोति तदाकन्यकाधनसुखादिकलाभंददाति अथविघ्नंविदधाति ८९ पिंगलेति वारिवाय्ववनिवह्निरुतानिपिंगलावदनजानियदिस्युः तदाविग्रहान्नरवरेण आशुशीघ्रंयुवतिधान्यधनादिप्राप्यते ९० वारीति क्रमगत्यावारिवातदहनावनिवाचः पिंगलावदतिचेत्तदावित्तकीर्त्तिविजयान्लभते विग्रहेणमहतींसमृद्धिंलभतेइत्यर्थः ९१ तेजइति चेत्क्रमेण

॥ भाषा ॥

॥ वारीति ॥ जो पक्षी गमनकरवेवाले पुरुषकूं जल अग्नी पवन पृथ्वी इनके शब्द वामभागतें करे तो कन्या धनसुखादिकनको लाभ देवे या पीछें विघ्न करें ॥ ८८ ॥ पिंगलेति ॥ पिंगलाके मुखतें निकसे हुये जल वायु पृथ्वी अग्नी ये शब्द होंय तो विग्रहतें मनुष्यकूं शीघ्रही स्त्री धान्य धनाधिक प्राप्त होंय ॥ ९० ॥ वारीति ॥ जो क्रमगती करकें जल वात अग्नी पृथ्वी इनके शब्द पिंगला करे तो वित्तकीर्त्ति विजय इनें प्राप्त होय और विग्रह करकें महान् समृद्धी होय ॥ ९१ ॥ तेजइति ॥ जो क्रमकरकें पिंगलेके तेज पृथ्वी जल पवन ये शब्द होंय तो निश्चय सुहृदको आगमन प्रधान स्त्रीकरकें सहित कलह होय ॥ ९२ ॥

तेजोमहीमारुतवारिसंज्ञैः शब्दैः शकुंतेनकृतैः क्रमेण
पूर्वंभवेद्वांछितवस्तुलाभोयोषित्समुत्थः कलहस्ततः
स्यात् ९३ वन्ह्यंबुवातावनिजान्निनादान्यदिक्रमा
ज्जल्पातिपिंगलाख्यः आदौकलिःस्यान्महतोविरो
धान्महार्थलाभस्तदनंतरंच ९४ तेजोजलोर्वीप
वनाभिधानेरुतानिपिंगेनयदीरितानि तद्भूमिहेतोः
कलहंमहान्तंमहार्थलाभंचवदंतिसंतः ९५

॥ टीका ॥

पिंगलस्यतेजोधरावारिसमीरशब्दाः भवंति तदानीं ध्रुवंसुहृदागमेनप्रधानयोषिद्विषयः कलिः स्यात् ९२ तेजोमहीति शकुंतेनतेजोमहीमारुतवारिसंज्ञैः क्रमेणरुतैः सद्भिः पूर्वंवांछितवस्तुलाभोभवेत् ततोयोषित् समुत्थः कलहः स्यात् ९३ वन्हीति यदि पिंगलाख्यःक्रमात् वह्न्यंबुवातावनिजान् निनादान् क्रमाज्जल्पाति तदा आदौ कलिःस्यात्तदनंतरंचमहतो विरोधात् महार्थलाभः स्यात् ९४ तेजोजलेति यदि तेजोजलोर्वीपवनाभिधानि पिंगेन ईरितानि भवंति तदाभूमिहितोः महांतंकलहं महार्थलाभंचसंतोवदंति ९५ ॥छ॥

॥ भाषा ॥

तेजोमहीति॥ पिंगलकरकें उच्चारण किये गये तेज मही मारुत वारिसंज्ञक शब्द इनकरकें पहलें तो वांछित वस्त्र वा वस्तूको लाभ होय तापीछें स्त्रीतें उठो हुयो कलह होय॥ ९३॥ वन्हीति॥ जो पिंगल वह्नी जल वात पृथ्वी ये शब्द क्रमतें उच्चारण करे तो पहलें तो कलह होय तापीछें महान् विरोधसूं महार्थ लाभ होय॥ ९४॥ ॥तेजोजलेति॥ जो पिंगलके कहे हुये तेज जल पृथ्वी पवन ये शब्द होंय तो पृथ्वी हेतु महान् कलह होय फिर महार्थ लाभ होय॥ ९५॥

हुताशवातांबुमहीरवेषुपिंगेक्षणेनोच्चरितेषुसत्सु सुहृद्विरोधोनधनस्यलाभोयशश्चदिक्षुप्रथतेप्रभूतं ९६ समीरपृथ्वीजलवह्निनादैर्महाबलोभ्येत्यचिराद्विरोधी रोधंविधत्तेसतुसर्वदिक्षुयात्रासुमेघोऽर्द्धपथेतथास्यात् ९७ समीरणांभोवनिपावकानांशब्दैः समायातिगृहंप्रवासी ततश्चयोषिद्विषयः कलिःस्यात्स्यातांकुमारीद्रविणागमौच ९८ पिंगेक्षणोमारुतवह्निवारिभूम्यात्मकैर्जल्पतिचेन्निनादैः

॥ टीका ॥

हुताशेति पिंगेक्षणेनोच्चरितेषुहुताशवातांबुमहीरवेषुसत्सु सुहृद्विरोधःस्यात् नधनस्यलाभः स्यात् दिक्षुयशश्चप्रभूतंप्रथते ९६ समीरेति समीरपृथ्वीजलवह्निनादैः महाबलोविरोधी अचिरादभ्येति तुपुनः सर्वदिक्षु रोधं विधत्ते तथा यात्रासु अर्द्धपथेनमेघःस्यात् ९७ समीरणेति समीरणांभोवनिपावकानां शब्दैः प्रवासीगृहंसमायाति ततश्चयोषासहकलिःस्यात् विजयश्चकुमारी द्रविणागमौचस्यातां ९८ पिंगेक्षणइति चेत्पिंगेक्षणः

॥ भाषा ॥

॥हुताशेति॥ जो पिंगलपक्षी अग्नी पवन जल पृथ्वी इनशब्दनकूं उच्चारण करे तो सुहृदजननको विरोध होय और धन लाभ नही होय और यश दिशानमें बोहोत होय ॥९६॥ समीरेति॥ पिंगलके समीर पृथ्वी जल वह्नी इन शब्दन करकें महाबलवान् विरोधी शीघ्रही आवे और आपकरकें सर्व दिशानमें च्यारों मेरसूं रोक लेवे और यात्रानमें आधे मार्गमें मेघ आवे ॥ ९७॥ समीरणेति॥ पिंगलपक्षीके पवन जल पृथ्वी अग्नी इनशब्दनकरकें परदेशमें होय सो घर आवे ता पीछें स्त्रीकरकें सहित कलह होय और विजय होय कुमारी धन इनको आगमन होय ॥९९॥ पिंगेक्षणइति॥ जो पिंगेक्षणा मारुत वन्ही वारी भूमी इनशब्दनकरकें बोलती होय तो उद्धत पुरुष

युद्धं प्रवर्त्तेत तदुद्धतानां वैवाहिकं द्रव्यमवाप्यते च ९९
वाय्वग्निपृथ्वीसलिलोद्भवानि करोति चेत् पिंगखगो रुतानि
तच्चित्तभेदः सुहृदा सह स्याल्लाभो हिरण्यस्य च विग्रहेण
१०० वातानलांभोवसुधाध्वनीनां पिंगो विधाता यदि विग्र-
हस्तत् नारीनिमित्तः सुहृदा सह स्यात् पराजयस्तत्र
च निश्चयेन १०१ भूम्याऽऽप्यहौताशननाभसाख्यैः-
स्यातां रुतैर्लाभसुहृद्विरोधौ लाभः प्रवासे कलहः स-
हायैः सहाक्षिरोगो यदि वा समस्तैः १०२

॥ टीका ॥

मारुतवह्निवारिभूम्यात्मकैः शब्दैर्जल्पति तदा उद्धतानां युद्धं प्रवर्त्तेत वैवाहिकं द्रव्यं अवाप्यते च ९९ वाय्वग्नीति चेत् पिंगखगो वाय्वग्निपृथ्वीसलिलोद्भवानि रुतानि करोति तदा सुहृदा सह चित्तभेदः सविग्रहेण हिरण्यस्य च लाभः स्यात् १०० वातेति यदि पिंगः वातानलांभोवसुधाध्वनीनां विधाता वक्ता भवति तदा नारीनिमित्तं सुहृदा सह विग्रहः स्यात् तत्र विग्रहे निश्चयेन पराजयः स्यात् १०१ भूमीति भूम्याप्यहौताशननाभसाख्यैः रुतैर्लाभसुहृद्विरोधौ स्यातां प्रवासे लाभः सहायैः सह कलहः यदि वा समस्तैः सह आक्षिरोगः १०२

॥ भाषा ॥

नको युद्ध होय और विवाहको द्रव्य प्राप्त होय ॥९९॥ वाय्वग्नीति ॥ जो पिंगलपक्षी वायु अग्नी पृथ्वी जल इनतें हुये शब्द करे तो सुहृदजननकरकें सहित चित्तकूं भेद होय और विग्रह करकें सुवर्णको लाभ होय ॥ १०० ॥ वातेति ॥ जो पिंगल वात अग्नी जल पृथ्वी इनके शब्दनको कर्ता होय तो स्त्रीके निमित्त सुहृज्जननकरकें सहित विग्रह होय और ता विग्रहमें निश्चयकर पराजय होय ॥१०१॥ भूमीति ॥ पिंगलके भूमी जल अग्नी आकाश इन शब्दनकरकें लाभ और सुहृदनको विरोध होय और परदेशमें लाभ और सहायीनकरकें कलह वा समस्तनकरकें कलह और नेत्रनमें रोग ये होंय ॥१०२

भूवारिजाकाशहुताशशब्दान्यथाक्रमंचेद्विदधातिपिंगः धनानिसिद्ध्यंतितदीप्सितानिनारीनिमित्तंकलहंतथाहुः ३ क्षोणीहुताशांबरवारिनादामित्राद्धनाप्तिंरतिकार्यखेदं यात्रासुसिद्धिंविजयंरणेषुपुंसांप्रयच्छंतिचराज्यलाभम् ४ धरानभोंभोग्निरवैश्चतुर्भिः पिंगेक्षणेनाभिहितैः क्रमेण यात्रासुसिद्धिर्विजयोरणेषुश्रेयोभवत्यन्यसमीहितेषु ५ धरांबुवातांबरजानिनादाः कुर्वन्तिलब्धस्य धनस्यनाशम्

॥ टीका ॥

भूवारीति चेत् पिंगः भूवारिजाकाशहुताशशब्दान् भूश्चवारिच ताभ्यां जातौ तौचतौ आकाशहुताशशब्दौचतान् विदधाति तदाधनानितदीप्सितानि सिद्ध्यंति नारीनिमित्तंकलहंतदाहुः १०३ क्षोणीति क्षोणीहुताशांबरवारिनादाः मित्राद्धनाप्तिंरतिकार्यखेदं यात्रासुचसिद्धिं रणेषुविजयंपुंसां प्रयच्छंति तथाराज्यलाभं १०४ धरेति धरानभोंभोग्निरवैः चतुर्भिः क्रमेणापिंगेक्षणेन अभिहितैः प्रतिपादितैः यात्रासुसिद्धिर्भवति रणेषुविजयश्चान्यसमीहितेषुश्रेयः १०५ धरांब्विति धरांबुवातांबरजानिनादाः लब्धस्यधनस्यनाशं

॥ भाषा ॥

॥भूवारीति॥ जो विहंग पक्षी पृथ्वी जल आकाश अग्नी इनशब्दनकूं क्रमकरकें करेतो वांछितधनप्राप्त होय और स्त्रीके निमित्त कलह होय॥ १०२॥ क्षोणीति॥ जो पिंगलके पृथ्वी अग्नी आकाश जल ये शब्द होंय तो मित्रतें धनकी प्राप्ती और रतिकार्यमें खेदहोय और यात्रानमें सिद्धि संग्राममें विजय और राज्यको लाभ ये पुरुषनकूं होंय ॥१०४॥ ॥धरेति॥ पिंगलके क्रमकरकें कहेहुये पृथ्वी आकाश जल अग्नी ये च्यारशब्द तिनकरकें यात्रानमें सिद्धि रणमें विजय और कार्यनमें श्रेय होंय ॥१०५॥ धरांब्विति॥ जो पिंगल पृथ्वी जल पवन आकाश ये शब्द करे तो प्राप्तहुये धनको नाश करे और पृथ्वी

भूम्यंबुजौद्वौनभमारुतौद्वौलाभात्परंदुःखमुपानयंति ६ धरासमीरांबुनभोरवैस्तुस्त्रीभ्यः शुभंस्यात्कलहाच्चसिद्धिः भूमारुतव्योमजलोत्थशब्दैर्लाभः कलेर्गेहमुपैति रोगी ७ महीमरुद्व्योमहुताशशब्दैरायात्यरातिः समरस्तथास्यात् भूव्योमतेजोमरुतांरवैः स्यात्सविग्रहंबंधनमाग्रहेण ८ क्षोणीसमीरांबुहुताशनाद्यैर्युद्धेनसेनापतिमृत्युमाहुः अंभोग्निवातांबरजैर्भवेतांपरस्यकार्येणविरोधमृत्यू ९

॥ टीका ॥

कुर्वन्ति भौमांभसौद्वौचरवौ तथानभोमारुतौद्वौ लाभात्परंदुःखमुपानयंति १०६ धरासमीरेति धरासमीरांबुनभोरवैः स्त्रीभ्यः शुभंस्यात् कलहाच्चसिद्धिः भूमारुतव्योमजलोत्थशब्दैः कलेर्लाभःस्यात्तथारोगीगेहमुपैति १०७ महीति महीमरुद्व्योमहुताशशब्दैः अरातिः शत्रुः आयाति तथासमरः स्यात् भूव्योमतेजोमरुतांस्वैराग्रहेणसविग्रहंबंधनंभवति १०८ क्षोणीति क्षोणीसमीरांबुहुताशनाद्यैः शब्दैः युद्धेनसेनापतिमृत्युमाहुः अंभोग्निवातांबरजैः परस्यकार्येणविरोधमृत्यूभवेताम् १०९ ॥छ॥

॥ भाषा ॥

जल ये दोनो ओर आकाश मारुत ये दोनो होंय तो प्रथम तो लाभ करावें तापीछें दुःख करावें ॥१०६॥ धरासमीरेति॥ पिंगलके पृथ्वी पवन जल आकाश इनशब्दनकरकें स्त्रीनतें शुभ होय ओर कलहतें सिद्धी होय ओर पृथ्वी मारुत आकाश जल इनतें हुये जे शब्द इनकरकें कलहमें लाभ होय ओर रोगी घरकूं आवै ॥१०७॥ महीति॥ पृथ्वी पवन आकाश अग्नी इनशब्दनकरकें वैरी आंवे ओर संग्राम होय ओरपृथ्वी आकाश तेज पवन इनके शब्दनकरकें विग्रहसहित आग्रहकरकें बंधन होय ॥१०८॥ क्षोणीति॥ पृथ्वी पवन जल अग्नी इन शब्दनकरकें युद्धमें सेनापतीकी मृत्यू होय ओर जल अग्नी वात आकाश ये शब्द

आप्यानिलाग्नेयवियत्स्वरैः स्याद्युद्धेजयः पश्चिमयुद्ध
कर्तुः अंभोनलाकाशसमीरशब्दैरणंगरीयोभवतिस्व
भृत्यैः ११० अंभोऽनिलोवह्निवियद्द्रुतैश्चद्रुतंरणेस्या
न्मरणंप्रयाणात् पयःसमीरांबरवह्निनादैः प्रभोर्द्विष-
द्भिःसहमृत्युमाहुः ११ पयोविहायोऽग्निसमीरजातैरं
भोवियद्वातहुताशजैर्वा महाहवेनेहमहीपतेःस्युर्वैरिक्ष
यक्षेमजयार्थलाभाः १२ भूतोयतेजोमरुदंबराख्यैर्भूते
रवैः शांतकृतास्थितिर्यैः

॥ टीका ॥

आप्येति आप्यानिलाग्नेयवियत्स्वरैर्युद्धंस्यात् तथा पश्चिमयुद्धकर्तुर्जयः स्यात् अंभोनलाकाशसमीरशब्दैः गरीयोमहद्रणंस्वभृत्यैर्भवति ११० अंभ इति अंभोनिलोवह्निवियद्द्रुतैस्तु प्रयाणाद्द्रुतंरणेमरणंस्यात् पयःसमीरांबरवह्निनादैर्द्विषद्भिः सह प्रभोर्मृत्युमाहुः १११ पयइति पयोविहायोग्निसमीरजातैः अंभोवियद्वातहुताशजैर्वा इह महीपतेर्महाहवेनवैरिक्षयक्षेमजयार्थलाभाःस्युः ११२ भूतोयेति भूतोयतेजोमरुदंबराख्यैरवैःशांतकृत

॥ भाषा ॥

पिंगलके होंय तो परायेके कार्यकरकें विरोध और मृत्यू होय ॥ १०९॥ आप्येति ॥ जो पिंगलके जल पवन अग्नी आकाश इन स्वरनकरकें युद्ध होय और पिछाडीपे जो युद्ध करे ताको जय और जल अग्नी आकाश पवन इनशब्दनकर अपने भृत्यनकरकें सहित घोर संग्राम होय ॥ ११०॥ अंभइति ॥ पिंगलके जल पवन अग्नी आकाश इनशब्दनकरकें संग्राममें जातें ही शीघ्र मरण होय और जल पवन आकाश अग्नी ये शब्द बोले तो वैरीनकरकें सहितस्वामीकी मृत्यू होय ॥ १११ ॥ पयइति ॥ जल आकाश अग्नी पवन इनतें हुये शब्द होंय वाजल आकाश पवन अग्नी इनतें हुयो होंय तो राजाकूं महान् संग्रामकरकें वैरीको क्षय होय और क्षेम जय अर्थलाभ होंय ॥ ११२॥ भूतोयेति । शांत दिशामें-

महायशोराशिभृतांतरालदिक्चक्रवालंसददातिराज्यं
११३ कृत्वाविहंगःशुभदान्भिनादांस्ततोऽशुभौचेद्विदधाति
नादौ सिद्धिंतदागच्छतिकार्यमादौभवेद्द्रुतं तस्यततः
प्रणाशः ११४ शब्दावशस्तौप्रथमंकरोतिततःप्रशस्ता
न्विदधातिनादान् यःपिंगलोसौविनिहत्यकार्यंसमीहि-
तादप्यधिकंविधत्ते ११५ सर्वैरवैःपार्थिवपूर्वकैःस्या
त्फलंप्रशस्तंननुतेनहीनैः पंचापिशब्दाःक्रमतोय-
दिस्युर्लाभोऽधिकोर्थस्यभवत्यभीष्टात् ११६

॥ टीका ॥

स्थितिर्योब्रूतेसमहायशोराशिभृतांतरालदिक्चक्रवालंराज्यंददाति ११३ कृत्वेति विहंगःशुभगान्भिनादान्कृत्वा ततोऽशुभौनादौचेद्विदधाति तदाऽऽदौ कार्यसिद्धिंगच्छति ततोद्रुतंतस्यप्रणाशःस्यात् ११४ शब्दाविति अशस्तौशब्दौप्रथमंकरोति ततः प्रशस्तान्नादान् विदधाति असौ कार्यंविनिहत्य अधिकमपिसमीहितंविधत्ते ११५ सर्व्वैरिति पार्थिवपूर्वकैः सर्वैः रवैः प्रशस्तंफलंस्यात् ननु तेनपार्थिवेनहीनैः यदि क्रमतः पंचापिशब्दाःस्युः तदाऽभीष्टात्इच्छाविषयीकृतादर्थादधिकस्यलाभः स्यात् ११६

॥ भाषा ॥

स्थित पिंगल पृथ्वी जल तेज पवन आकाश ये शब्द बोले तो महान् यशको समूह जामें भरोहुयो एसो दिग्मंडल जामें एसो राज्य देवे ॥११३॥ कृत्वेति॥ जो पिंगल शुभके देवेवारे शब्द करके फिर अशुभ शब्द करे तो प्रथम कार्यकी सिद्धी करे ता पीछें वा कार्यको शीघ्रही नाश करे ॥११४॥ शब्दाविति॥ प्रथम तो अशस्त नाद करे ता पीछें प्रशस्त नाद करे तो पिंगल पहलें कार्यकूं विगाड करकें पीछें वांछितसूंवी आधिक कार्य करे ॥११५॥ सर्वैरिति॥ पार्थिवकूं आदि ले सर्व शब्दन करकें फल प्रशस्त होय पीछें पार्थिवशब्दविना क्रमपूर्वक पांचों शब्द होंय तो अभीष्टसूंवी अधिक अधिक अर्थको लाभ होय ॥११६॥

पार्थिववारुणतैजसशब्दाःस्युर्यदितत्फलमस्तिसमस्तं
पार्थिवतोयदतैजसनादःसिद्धिमुपैतिफलंतदभीष्टं १७
भौमान्नभोजोऽनिलजोथवास्यादाशांमदइर्यंप्रतिहंति
कार्यम् भवंतिभौमाप्यविनाकृतानिशस्तानिवाय्व-
ग्निनभोरुतानि १८ कार्येस्त्रियाशोभनमग्निजातम
नग्निजाद्यौमरुदंबरोत्थौ शंसंति कार्येषुशुभेषुशांता
न्दीप्तान्भयादौशुभदान्वदंति १९

॥ टीका ॥

पार्थिवेति यःपिंगलः यदिपार्थिववारुणतैजसशब्दाः स्युः तान्यदिउच्चरति तदासमस्तंफलं भवतियदिपार्थिवस्तोयदस्तैजसःनादः स्यात्तदाऽभीष्टंफलंसिद्धिमुपैति ११७ भौमादिति अथभौमान्नभोजः अनिलजोवास्यात् तदा आशां मदइर्यकार्यंप्रतिहंति भौमाप्यविनाकृतानि भौमाप्यशब्दरहितानि वाय्वग्निनभोरुतानिशस्तानिभवंति ११८ कार्येइति स्त्रिया कार्येऽग्निजातंशोभनंभवति मरुदंबरोत्थौ अनग्निजाद्याविति अनग्निजः अग्निव्यतिरिक्तःस्वरःसएव आद्योययोस्तौस्वनौकार्येशोभनावित्यर्थः शुभेषुकार्येषु शांतान् शंसंति भयादौदीप्तान् शुभदान्वदंति ११९

॥ भाषा ॥

॥पार्थिवेति॥ जो पिंगलके पार्थिव वारुण तैजस शब्द होंय तो समस्त फल होंय और पार्थिव जल तैजस ये नाद होंय तोवी अभीष्ट फल सिद्धीकूं प्राप्त होय ॥ ११७ ॥ भौमादिति॥ भौमशब्दसूं आकाशनको और पवनको शब्द होय तो आसादि खाय करकें कार्यकूं नाश करे पिंगलके भौम आप्यविना पवन अग्नि आकाश ये शब्द किये हुये होंय तो शस्त जाननें ॥ ११८ ॥ कार्येइति॥ स्त्रीके कार्यमें अग्नीतें हुयो शब्द शोभन हे और अग्नी शब्द आदिमें नहीं होय पवन आकाश इनतें हुये शब्द होंय तो कार्यमें शुभ हे और शुभकार्यनमें शांतशब्दनकूं श्लाघा करें हें और भयादिक कार्य-

शांतस्वरौपार्थिववारुणाख्योदीप्ताभिधौपावननाभसौ तु स्यात्तैजसस्तु द्वितयावलंबीयेनान्वितस्तस्यफलंददाति १२० अतिप्रभूतायदमीविमिश्राः शब्दायथासंभवमुच्यमानाः तेनात्रदिङ्मात्रकमेवतेषामुक्तंस्वरज्ञैः स्वयमन्यदूह्यम् २१ यःशब्दानांह्रस्वदीर्घप्लुतत्वंभेदिन्यंभोवह्निवातांबरत्वं भिन्नंरधंबुध्यतेनिश्चयेनज्ञानंतस्मिन्शाकुनंसत्यमास्ते २२ इ०पिं०च०सं०फ०प्र०८

॥ टीका ॥

शांतेति पार्थिववारुणाख्यौशांतस्वरौपावननाभसौदीप्ताभिधौभवतः तैजसस्तु द्वितयावलंबीस्यात् येनान्वितः तस्यफलं ददाति १२० अतीति यद्यस्मादमी विमिश्राः शब्दायथासंभवमुच्यमाना अतिप्रभूताभवंति तेन कारणेनतेषांस्वराणां दिङ्मात्रकमेवउक्तं अन्यत्स्वरज्ञैः स्वयमूह्यं १२१ य इति यःशब्दानांह्रस्वदीर्घप्लुतत्वंभेदिन्यंभोवह्निवातांबरत्वंचनिश्चयेनभिन्नंभिन्नंबुध्यते तस्मिन्ज्ञानंशाकुनंसत्यमास्ते १२२ इ०पिं०च०सं०फ०प्र० ८

॥ भाषा ॥

नमें दीप्तस्वर शुभके देवेवारे कहेहें ॥११९॥ शांतइति ॥ पिंगलके पार्थिव वारुण ये दोनो शांतस्वर हें और पवनको आकाशको ये दोनो दीप्त स्वर हें और तैजस स्वर तो दोनोनकूं अवलंबनकरे हे तैजस जा स्वरकरकें युक्त होय ताको फल देवेहे ॥१२०॥ अतीति ॥ ये मिलवां शब्द हैं जो पिंगल यथायोग्य क्रमपूर्वक वोले तो वोहोत फल देवे हें यासूं या प्रकरणमें उन स्वरनके दिशामात्र क्रम कहें हें और विशेष स्वरकूं जाने उनपुरुषनकरकें आपही विचार करनो योग्य हे ॥१२१॥ यइति ॥ जो पिंगलके शब्दनको ह्रस्वदीर्घप्लुतभेद जानतो होय और पृथ्वी जल अग्नी पवन आकाश इनके भेद न्यारेन्यारे जानतो होय वा पुरुषमें शाकुनको ज्ञान सत्य रहेहै ॥१२२॥ इतिवसंतराजभाषाटीकायां पिंगलारुतेचतुःसंयोगफलप्रकरणमष्टमंसमाप्तम् ॥८॥ छ ॥

अथसंकीर्णप्रकरणं प्रकथ्यते ॥ अथसंकीर्णप्रकरणसारः क्रियतेपरिहृतविस्तरसारः यन्नावगतेभवतिस्पष्टंपिंगलमतमिदमतिशायकष्टं २३ अभ्यर्चितः पिंगखगोद्रुमाग्रमारुह्यभौमाप्यरवोब्रुवाणः राज्याभिषेकेपरदेशयानेसमीहितेऽन्यत्रचासिद्धिदायी २४ मध्यप्रदेशेयदिपादपस्यस्कंधप्रदेशेयदिवाविहंगः भौमाप्यशब्दोकुरुतेयदातुमध्यंनिकृष्टंचफलंददाति १२५

॥ टीका ॥

अथेति स्वरकथनानंतरं संकीर्णप्रकरणसारः क्रियते कीदृक् परिहृतविस्तरसारइति परिहृतोत्यक्तोयोविस्तरस्तेनसारः प्रधानः यस्मिन्नवगते ज्ञातेसति पिंगलमतमतिशायकष्टंस्पष्टंभवति १२३ अभ्यर्चितइति अभ्यर्चितः पूजितः पिंगखगः द्रुमाग्रमारुह्य भौमाप्यरवो ब्रुवाणः राज्याभिषेके परदेशयानेऽन्यत्रसमीहितेचासिद्धिदायी स्यात् १२४ यदिपादपस्य मध्यप्रदेशे यदि स्कंधप्रदेशे स्थितोविहंगोभौमाप्यशब्दो कुरुते तदा क्रमेण मध्यं निकृष्टफलं ददाति १२५

॥ भाषा ॥

॥ अथेति ॥ स्वरनके कहेके अनंतर अब संकीर्णप्रकरणको सार करूं हूं संक्षेपकरकें सार जामें एसे या प्रकरणकूं जान जाय तो अधिक कष्ट जामें एसो ये पिंगलमतसो स्पष्ट हो जाय ॥१२३॥ अभ्यर्चितइति ॥ पूजन जाको हुयो वो पिंगल वृक्षके अग्रभागपे चढकरकें भौम आप्य ये शब्द वोले तो राज्याभिषेकमें परदेशगमनमें और कोई वांछित कार्यमें सिद्धी करे ॥१२४॥ मध्येति ॥ जो पिंगल वृक्षके मध्यदेशमें स्थित होयकर वा वृक्षकी डालनमें स्थित होयकर पृथ्वी जल ये शब्द करे तो मध्यफल अथवा निकृष्ट फल देवे ॥१२५॥ ॥७॥

भक्ष्यपूर्णवदनः शुभशब्दोरम्यदेशनिरतोविहगोयः
संपदंप्रवितरत्यतिबर्द्धींतान्निहंतिपुनरुज्झितभक्ष्यः
२६ त्यक्त्वार्चितंपादपमन्यवृक्षेदृश्येतयः शोभनशब्द
कारी अभीष्टदेशादपरत्रदेशेसोचिंतितांयच्छतिका
र्यसिद्धिं २७ भूरिकोटरयुतेपरिशुष्केपादपेजरति
मोटितशाखे अंबरेणकुरुतेयदिशब्दंमृत्युदस्तदचिरेणपतत्री २८
कोटरमध्यगतोयदिपक्षी कूजतिपा
र्थिववारुणनादैः ॥

॥ टीका ॥

शब्द करे तो वाको स्वामी सर्वसुख प्राप्त होय ॥ १४ ॥ इत्यजाजौ ॥ मेषैडकाविति॥ बकरा और मेंढा ये दोनो जेमने अंगमें चेष्टा करते होंय तो शुभकार्यनमें शुभ कहेहें और वाम अंगमें चेष्टा करते होंय तो अशुभ कार्यनमें प्रशस्त हें ॥ १६ ॥ इतिमेषैडकौ॥ ५ ॥ उष्ट्रस्येति ॥ ऊंटको वामभागमें मधुरशब्द शुभ हे कठोर शब्द गमन में अशुभ हे और चकचूंदर मूषिका ये दुखी होंय नहीं वामभागमें स्थित होंय इनके शब्द करकें सिद्धी होय ॥१७॥ इति उष्ट्र छु छुंदरीमूषिकाः ॥ ६॥ शस्तइति जो विडाल मांस मुखमें भर्यो होय और बोले तो शुभ हे और खाली मुख होय

रुतेक्षणेग्रामबलीसुखस्य जयायनामग्रहणंभयाय
इष्टागतिर्दक्षिणतोनचेष्टाव्यासंगकारीगमनोद्यतानाम् १९ इतिवानरः

॥ टीका ॥

आमिषपूर्णवक्त्रोमार्जारः शस्तः रिक्ताननोनादकृत् अप्रशस्तः स्यात्नानाप्रकारैर्विरुतैरुपेतोयुध्यमानोविडालोनिंद्यः स्यात् १८ ग्रंथांतरेत्वेवं रात्रावुपरिष्टात्पतति तदाषण्मासमध्येमरणमेति चरणौजिघ्रति तदारोगोत्पत्तिः मस्तकं लिहति तदाराज्ञोभयंवक्ति यदा तमुल्लंघ्ययाति तदामृतिः यदास्त्रीशिरोलिहति तदाभर्तुर्मृतिः यदा स्त्रीहृदयंलिहति तदापुत्रमृतिः यदिस्त्रीचरणौ लिहति तदाश्वश्रूमृतिः यदाभक्षणं करोति तदा मरणमुत्पद्यते यदा त्वरितगत्यागृहाद्बहिर्याति तदारोगनाशः शत्रुनाशश्च इतिमार्जारः रुतेक्षणेइति ग्रामबलीसुखस्यवानरस्य रुतेक्षणे जयायस्यातां नामंग्रहणंभयायस्यात् तस्यगतिः दक्षिणतइष्टानचेष्टा

॥ भाषा ॥

शब्द करे तो अशुभ हे और विलाव नाना प्रकारके शब्द बोलते होंय और युद्ध करते होंय वो निंदाके योग्य हें ॥ १८ ॥ और ग्रंथमें एसो लिखो हे ॥ रात्रीमें ऊपर आयपडे विलाव तो छेमहिनामें वो मनुष्य मरजाय जो विलाव पामसूं घेतो रोगकी उत्पत्ती होय जो मस्तककूं चाटे तो राजाको भय होय जा मनुष्यकूं उल्लंघन कर जाय तो वो पुरुष मरजाय जो स्त्रीके मस्तककूं चाटे तो वाके भर्तारकी मृत्यूकरे जो स्त्रीके हृदयकूं चाटे तो पुत्रकी मृत्यू होय जो स्त्रीके चरणकूं चाटे तो सासू मरे जो भक्षण करे तो मरण करे जो शीघ्र गती करकें विलाव घरसूं बहार चल्यो जाय तो रोगको नाश और शत्रूको नाश करे ॥ इतिमार्जारः ॥ ७ ॥

॥ रुतेक्षणेइति ॥ गमनमें उद्युक्त होय रहे उनपुरुषनकूं वानरको शब्द देखनो जयके अर्थ और नाम लेनो भयके अर्थ वानरकी दक्षिणगती योग्य हे और मैथुनचेष्टा

अनेकरूपेणचतुष्पदानांग्रामस्थितानांशकुनंनिरूप्य ब्रूमोऽधुनारण्यसमाश्रितानांयथोदितंशुक्रबृहस्पतिभ्यां २० पुण्येनगत्यागमयोरयुग्माः प्रदक्षिणंगौरमृगाः प्रयांति समानशस्तानचवामयाताः कृष्णैर्विमिश्रानभवंतिदुष्टाः २१ प्रदक्षिणेनापिमृगः पुमांसमावेष्टयन्वक्तिविनाशमेव अयुग्मसंख्या अपि कृष्णसारा अवामयाता अपिनप्रशस्ताः २२

॥ टीका ॥

यतोगमनोद्यतानांसव्यासंगकारीस्यात् १९ इतिवानरः अनेकेति ग्रामस्थितानांचतुष्पदानां अनेकरूपेणशकुनंनिरूप्य अधुनारण्यसमाश्रितानांशुक्रबृहस्पतिभ्यांयथोदितंतथाब्रूमः २० पुण्येनेति गत्यागमनयोः गमने आगमनेचगौरमृगाः अयुग्माः पुण्येनप्रदक्षिणंप्रयांति तत्रसमा नशस्ताः तथावामगताः ते मृगाः कृष्णैर्विमिश्रानदुष्टाः २१ प्रदक्षिणेनेति प्रदक्षिणेनापिमृगः पुमांसं आवेष्टयन् विनाशंवक्ति अयुग्मसंख्याअपिकृष्णसाराः अवामयाताअपिनप्रशस्ताः स्युः २२

॥ भाषा ॥

योग्य नहीं ॥१९॥ इतिवानरः ॥८॥ अनेकेति ॥ ग्रामके रहवेवारे चोपदानके अनेकरूपकरकें शकुन कहे अब वनके रहवेवाले चोपदानके शुक्राचार्य बृहस्पति इन्ने जेसे शकुन कहेहें तेसेंही हम कहें हें ॥ २० ॥ पुण्येनेति ॥ गमन आगम इनमें युग्म न होंय एसे गौरमृग बडे पुण्य करकें दक्षिणभागमें आवेंहें उनकी समान कोई नहीं और वामभागमें शुभ नहीं जो श्याम मृगकरकें मिले हुये होंय तो दूषित नही सुभ जानने ॥ २१ ॥ प्रदक्षिणेनेति ॥ जेमृग प्रदक्षिण होय करकें पुरुषकूं आवेष्टन कर लें तो विनाश कहेंहें एसो जाननो जो अयुग्म संख्या नामऊनावी होंय- श्याममृगहोंय और जेमनेवी होंय तोवी अशुभकर्ता होंय प्रशस्त नहीं जाननो ॥२२

कंडूतिकंपौशिरसोनिषेधंमूत्रंपुरीषंचभयंतनोति
मध्येपथोग्रेक्षतयेमृगाणांविलोकनंलाभकरंतुपृष्ठे२३
पुरोव्रजन्वक्तिमृगोतिदूरंविदेशयानंकुशलंचयातुः
प्रदक्षिणीकृत्यविवृत्यपश्यन्मृगीद्वितीयोऽपिमृगो
र्थसिद्ध्यै २४ आकारशब्दादपरंविरावंक्षुतंचकुर्व
न्नहितःकुरंगः युद्धाययुद्धोद्यतचित्तवृत्तिःसौ-
ख्यायसंजातरतप्रवृत्तिः २५

॥ टीका ॥

तदुक्तमन्यत्र एकस्तुकृष्णासारः पथिदृष्टः कृष्णसर्पसमचेष्टः नेष्टागतिः अस्यनृणामावेष्टनमस्यमरणायेति कंडूतिकंपाविति शिरसःकंडूतिकंपौनिषेधंवक्ति मूत्रपुरीषंचचौरव्याघ्रप्रभवंभयं तनोति विस्तारयति तथापथोमध्येऽग्रेचमृगाणांविलोकनं क्षतये भवति तथा पृष्ठेलाभकरंस्यात् २३ पुरइति मृगःपुरोव्रजन्यातुरतिदूरं विदेशयानं कुशलंचवक्ति तथाप्रदक्षिणीकृत्यविवृत्येति नेत्रेप्रसार्यमृगीपश्यन् तथामृगोपिअर्थसिद्ध्यैस्यात् २४ आकारेति आकारशब्दादपरंविरावंक्षुतंचकुर्वन्कुरंगोनहितः युद्धोद्यतचित्तवृत्तिः युद्धायस्यात् संजातरत-

॥ भाषा ॥

॥ कंडूतिकंपाविति ॥ जो मृग मस्तककूं खुजावतो होय वा कंपायमान करतो होय तो कार्यको निषेध जाननो जो मूत्र पुरीष करें तो भय करै जो मार्गके मध्यमें वा अग्रभागमें मृग देखते होंय तो नाश वा क्षतके अर्थ जाननो पीठपीछैं देखे तो लाभ करे ॥ २३ ॥ पुरइति ॥ जो मृग अगाडी गमन करे तो गमनकर्ताकूं अति दूर विदेशगमन और कुशल करे जो मृगी प्रदक्षिणा होयकर नेत्र फाड करकें देखे तेसें ही मृगवी देखे तो अर्थ सिद्धी करे ॥ २४ ॥ आकारेति ॥ आकारशब्दतें और शब्द वा छींक लेवे तो मृग हितकारी नही जाननो और युद्ध करवेकूं जाको -

छिक्कारकाणांरुरुकर्कटानां यानंरुतंदक्षिणतःप्रशस्तं वामंपृषच्चित्तलरोहितानांतथापरेषांखुरिणांबहूनां २६ इतिमृगाः प्रशस्यतेदर्शनकीर्त्तनाभ्यां ग्राम्यस्तथारण्यगतोवराहः शस्तोधिकंकर्दमलिप्तगात्रोविशुष्कपंकावयवोऽतिनिंद्यः २७ इतिवराहः वामस्वरावामगताःप्रयासेतद्वैपरीत्यान्नखिनःप्रवेशे

॥ टीका ॥

प्रवृत्तिःसौख्यायस्यात् २५ छिक्कारकाणामिति छिक्कारकाणांरुरूणांकर्कटानां मृगविशेषाणांयानंगमनंरुतंचदक्षिणेनप्रशस्तंस्यात् पृषत्चित्तलरोहितानां तथापरेषां खुरिणांबहूनां वामंगमनंरुतंचप्रशस्तंस्यात् २६ इतिमृगाः प्रशस्यतइति ग्राम्यस्तथारण्यगतःवराहः दर्शनकीर्तनाभ्यां प्रशस्यते तथापिकर्दमलिप्तगात्रः अधिकंशस्तः विशुष्कपंकावयवः अतिनिंद्यःस्यात् २७ इति वराहः वामेति प्रयासेवामस्वराः वामगताः प्रवेशे तद्वैपरीत्याच्चनखिनः शस्ताभवंति तथा

॥ भाषा ॥

चित्त लग रह्यो होय तो युद्ध करावे संभोगमें जाकी प्रवृत्ति होय तो सौख्य करे ॥ २५॥ छिक्कारकाणामिति ॥ छिक्कारकनको रुरूनको कर्कटनको गमन शब्द दोनो दक्षिणभागमें शुभ हें ओर पृषत् चित्तल रोहित इनको ओर जे खुरवारे वोहोतसे जीव हें तिनको वाम भागमें गमन शब्द शुभ हें छिक्कारक रुरू कर्कट पृषत् चित्तल रोहित ये नाम मृगभेदमें हें ॥ २६॥ इति मृगाः॥ ९॥ प्रशस्यतइति ॥ ग्रामको शूकर होय वा वनको शूकर होय इनको दर्शन नामको उच्चारण शुभहे जो कीचमें ल्हीस रह्यो होय पनगीलो होय तो वोहोत अधिक शुभ जाननो जो कीचको सनो सूको होय तो अति निंदाके योग्य हे ॥ २७॥ इतिवराहः ॥ १०॥ ॥वामेति॥ गमनमें नखवान् पशू वामस्वर वाममें गमन करतो होय ओर-

भवंतिशस्ताप्रतिषेधकास्तुपृष्ठेपुरस्तादपिभाषमाणाः २८ नानुव्रजंतोनाखिनः प्रशस्तानसन्मुखंचापिसमापतंतः अग्रेसराः शत्रुवधोद्यतानांभवंत्यवश्यंविजयायपुंसां २९ अभ्याहतेप्राक्तनपुण्यकोशेमृगेंद्रगुंजारवदुंदुभौये प्रयांतितेंऽभोऽधिमतीत्यनूनंविभीषणस्यापिपदंहरंति ३० मृगाधिपद्वीपितरक्षुवन्यमार्जारभल्लूकशशप्लवगाः

॥ टीका ॥

पृष्ठेपुरस्तादपिभाषमाणाः प्रतिषेधकाः स्युः २८ नान्विति अनुव्रजंतोनाखिनः प्रशस्तानसंभवंति संमुखंचापि समापतंतः नप्रशस्ताः शत्रुवधोद्यतानामग्रेसराः पुंसां विजयाय अवश्यंभवंति २९ अभ्याहतइति मृगेंद्रगुंजारवलक्षणेदुंदुभौ अभ्याहतेवाद्यमानेसति कीदृशेप्राक्तनंयत्पुण्यंतस्यकोशोभांडागारः तस्मिन्प्रचुरपुण्यवतामेव एतादृग्शाकुनसामग्र्याः संभवात् येनराः प्रयांति तेनूनंपयोधिमतीत्यविभीषणस्यापिपदंहरंति ३० मृगाधिपेति मृगाधिपाः

॥ भाषा ॥

प्रवेशमें दक्षिणस्वर दक्षिण गमन होय तो शुभ ओर पीठपीछें अगाडी वोले तो निषेध कर्त्ता जाननो ॥२८॥ नान्विति ॥ नखी पशू गमनकर्त्ताके पीछें गमनकरे तो ओर संमुख आवे तो शुभ नहीं ओर शत्रूनके वधमें उद्युक्त होयरहे होंय उनके अगाडी आवे तो अवश्य विजयके अर्थ जाननो ॥ २९ ॥ अभ्याहतइति ॥ जे मनुष्य गमन करें वा समयमें मृगेंद्र गेल नगाडे इनके शब्द होंय तो निश्चयसमुद्रकूं उल्लंघनकर लंकाकोवी राज्य लेलै ये शकुन वोहोत पुण्यवाननकूं होंयहें ॥ ३० ॥ मृगाधिपइति॥ सिंहद्वीपि नाम चित्रक तरक्षुनाम कुक्कर कीसी आकृती काली रेखा जाके मृग खर्गोसकूं खाय हे ओर ग्रामको वा वनको

व्याघ्रादयोस्मिन्नखिनः प्रदिष्टाबिलेशयास्तेष्वपि
जंबुकाद्याः ३१ येलोमशीजंबुकपूतिकेशागोधेर
गोधाकृकलासकाद्याः श्वाविच्छृगालीशशशल्ल
काद्याः सिंहादितुल्याः शकुनेमतास्ते ३२ शशाहि
पल्लीकृकलासगोधाः प्रोल्लंघ्ययांतः पदवींनराणाम्
कार्याणिसिद्धान्यपिनाशयंतिश्रेष्ठंतुतत्कीर्तनमामनंति ३३

॥ टीका ॥

सिंहाः द्वीपिनः चित्रकाः तरक्षः शशादनः ग्राम्यमार्जारोवन्यबिडालः भल्लुकः श्रृगालः शशोवनचर विशेषः प्लवंगः कपिः व्याघ्रादयश्च एतेऽस्मिन्शास्त्रे नखिनः प्रदिष्टाः तेष्वपिजंबूकाद्याबिलेशयाः कथिताः ३१ येइति यालोमशी लुंकडी जंबूकः श्रृगालः पूतिकेशावनचरविशेषाः गोधेयः गोधायाः पुमानपत्यंगोधाप्रतीता कृकलासः शरठकरकांटिआ इतिलोके प्रसिद्धः श्वाविदिति श्याह इतिप्रसिद्धः श्रृगाली-शिवा शशः प्रतीतः शल्लकः श्वावित्सदृशजंतुविशेषः तएनेशकुने सिंहादितुल्यामताः प्रतिपादिता इत्यर्थः ३२ शशाहीति शशः प्रतीतः अहिः सर्पः पल्ली गृहगोधा कृकलासः शरठः गोधाप्रतीताः

॥ भाषा ॥

विलाव श्रृगाल शश नाम खर्गोस वानर ये व्याघ्रकूं आदि ले सब नखी हैं और श्रृगालकूं आदि ले बिलेमें रहेंहें यासूं इनकूं विलेशय कहेंहें ॥३१॥ येइति ॥ लोमशी ये लूंकडी नाम कर प्रसिद्ध हे और श्रृगाल चमरी गौ गोहको पुत्र और गोह किरकेंटा श्वानकूं अपने केश करकें बांधे श्याह नाम कर प्रसिद्ध श्रृगाली शश शल्लुक ये सब शकुनमें सिंहादिकनकी तुल्य हें ॥३२॥ शशाहीति ॥ खर्गोस सर्प पल्ली किरकेंटा गोह ये मार्गकूं उल्लंघन करकें चले जांय तो मनुष्यनके कार्य सिद्ध हुये विनाशकूं प्राप्त होय जांय यातें इनको नाम उच्चार श्रेष्ठ हे ॥३३॥ मरुत्स्थ

क्षेत्रंव्रजन्पश्यतियः शशादींस्तस्यान्ननाशोनियतं
प्रदिष्टः एतेतुयस्योन्नतमारुहंतोदृग्गोचरेसोलभ
तेऽतिदुःखं ३४ यद्यन्यजीवाःशशकादिकेभ्यः क्षेत्र
स्थितादृष्टिपथंव्रजंति क्षेत्रंतदुप्तंपरिपक्वसस्यंसंप
त्परीतंनियमेनभावि ३५ शशादयःशब्दविलोकना
भ्यांनिघ्नंत्यवश्यंकरणीयमर्थम् ऋक्षःसदृक्षःश
शकादिकानांशस्तोपिशस्तोनिशिवामशब्दः ३६ इ॰श॰

॥ टीका ॥

एताः पदवींमार्गंप्रोल्लंघ्य यांतः नराणां सिद्धान्यपिकार्याणि नाशयंति तत्तस्तत्कीर्तनं बुधाः श्रेष्ठंश्रेयस्करमामनंति कथयंति ३३ तदुक्तमन्यत्र शशशरटभुजगजाहगमार्जारैर्लंघितेपथिनयायादिति क्षेत्रमिति क्षेत्रंसस्योत्पत्तिस्थानंव्रजन् शशादीन् पश्यति तस्यान्ननाशः नियतं निश्चयेनप्रदिष्टः कथितः एते तुउन्नतंस्थलं आरुहंतः यस्यदृग्गोचरेभवंति असौअतिदुःखंलभते ३४ यदीति यदि शशकादिकेभ्यः अन्यजीवाः क्षेत्रस्थिताः दृष्टिपथंव्रजंति तदा क्षेत्रं तदुप्तं परिपक्वसस्यं नियमेनसंपत्परीतंभावि ३५ शशादयइति शशादयः पूर्वोक्ताः शब्दविलोकना-

॥ भाषा ॥

ठीमें कह्यो है खर्गोस किरकेंटा सर्प जाहग विल्ली ये मार्गकूं उल्लंघन कर जांय तो गमन नहीं करनो ॥ ३३ ॥ क्षेत्रमिति ॥ जो मनुष्य खेतकूं जातो होय इन शशादिकनकूं देखे तो अन्नको नाश निश्चय करै जा ऊंचे स्थानपे चढते दीखै तो प्राणी दुःखभोगे ॥ ३४ ॥ यदीति ॥ जो पहलें कहे शशादिक इनतें और जीव खेतमें ठाडे होंय नेत्रनसूं दीखें तो अन्न बोयो खेत होय तो निश्चय पके हुये अन्नकी संपदाकर युक्त खेत होय ॥ ३५ ॥ शशादयइति ॥ पहलें कहे जे शशादिक इनको शब्द देखनो अवश्य करवेके योग्य कार्यकूं नाश करैं हैं शशादिकनकी तुल्य

॥ टीका ॥

ध्यामवश्यं करणीयं अर्थनिघ्नंति शशकादिकानां तुल्यो ऋक्षः ज्ञेयः शशोपिनिशिवामशब्दः शस्तः ३६ ग्रंथांतरेत्वेवं पूर्वदेशेशशकस्याभिधानं षढोइति मरुस्थल्यां दांतिउइति प्रसिद्धः नवीनग्रामवासेशशक दर्शनेयायात् दृष्टिः प्रसरति तावद्ग्रामस्यवासोभवति ग्रामस्यदुर्गस्यवा भित्तिनिमित्तं काष्ठादौनीयमाने शशकदर्शने तत्र कदाचित् पराभवोनभवति ग्रामेगच्छतांनृणामादौयदिपोदकी तथा शृगालः तित्तिरःवालेयोगर्दभो वाएषामन्यतमोवामः स्यात् तदुपरिचेत्शशकोवामः स्यात्तदाकार्यसिद्धिकृत्स्यात् प्रथमंशशकोवामः स्यात् तदागमनंनक्रियते सुखासीनस्य शशकः चेत्जल्पति तदाऽशुभंकिंवदंतीतिश्रुतिःस्यात् तदाउद्वाहार्थंगच्छतां शशकः तारयागच्छति

॥ भाषा ॥

ऋछहे और खर्गोसको रात्रीमें वांयो शब्द शुभ हे ॥३६॥ ग्रंथांतरमें ॥ एसो कह्योहे पूर्व देशमें शशकको नाम षढो कहेंहें खर्गोसवी कहेंहें मारवाडमें दांतिउ कहेंहें जो नवीन ग्रामवसायो चांहें वा समेमें शशक दीखे तो शशकके दीखवेमें जहां तांई दृष्टि फैले तहां तांई ग्रामको वास होय और ग्राम वा दुर्गकोट किल्ला इनकी भींतके लियें काष्ठकूं आदिले जो वस्तू लाते होंय वा समयमें जो शशक दीख जाय तो वामें कदाचित्वी तिरस्कार नहीं होय और ग्राममें गमन करतो होय वा पुरुषकूं प्रथम पोतकी वा शृगाल वा तित्तिर गर्दभ इनसूं और जो वामभागमें आंयजांय तापीछें शशक वाममें आवे तो कार्यकी सिद्धी होय जो प्रथम शशक वाम भागमें आवे तो गमन नहीं करनो सुखपूर्वक बेठ्यो पुरुष होय वाकूं शशक बोले तो ये कहा अस्सुभ कहेहे और विवाहके अर्थ जातो होय वा पुरुषकूं शशक जेमने भागमें गमन करे तो वा व्याही स्त्रीके प्रथम गर्भ नहीं जीवे जो ग्रामके घातकरवेकूं जाते होंय उनपुरुषनकूं शशक वामभागमें होय तो उनको पराजय होय

एकोपिदृष्टःसरटः सदैवनिहंतिकार्याणिसमीहितानि यदिद्वितीयोयदिवातृतीयोदृश्येततत्स्याद्धन जीवनाशः ३७ कुर्वंतिह्युच्चैरधिरुह्यचेष्टांस्नानेन शुद्धिः सरटंनिरीक्ष्य पतत्यकस्मात्तुसयस्यमूर्ध्निशिवायतस्याद्भुतशांतिरुक्ता ३८ इ॰ कृक॰

॥ टीका ॥

तदा उद्वाहितायाः प्रथमगर्भोनजीवति ग्रामघातार्थंगच्छतांवामःशशकःस्यात् तदापराजयः दक्षिणः प्रतियाति तदाशुभकृत् यदि चौरः चौर्यंकृत्वायाति धनिकः पृष्ठगोभवति तस्य यदिशशकः वामःस्यात् तदासैन्याधिपतिहस्ते समायाति दक्षिणः तादृशो नइतिशशकादयः एकोपीति एकोपिशरटोदृष्टःसन् सदैवकार्याणिसमीहितानि निहंति यदि द्वितीयः यदि वा तृतीयो दृश्येत तदाधनजीवनाशःस्यात् ३७ कुर्वंतीति उच्चैः अधिरुह्य यदिचेष्टांकुर्वन्ति तदा शरटं निरीक्ष्य स्नानेन शुद्धिः कथिता सशरटः अकस्मात् यस्यमूर्द्धनि पतति तस्याशिवायाऽद्भुतशांतिरुक्ता ३८ ॥ छ ॥

॥ भाषा ॥

जो दक्षिणभागमें आवे तो शुभ करवेवालो जाननो जो चौर चौरी करकें चल्यो वाके पीछें धनी जाय वाकूं शशक वामभागमें आय जाय तो सेनाके अधिपतीके हाथ आवे जो दक्षिण भागमें शशक आवे तो सेनाधिपतीके हाथबी नहीं आवे ॥ इति शशकादयः ॥ एकोपीति॥ सरट जो किरकेंटा जो एकबी दीखै तो सबकार्यनाश करे जो दूसरो तीसरो दीखै तो धन जीवको नाश करे॥ ३७॥ कुर्वंतीति॥ ऊंचेपे चढकें चेष्टा करतो होय तो वाकूं देख करकें स्नान करे तो शुद्धी होय वो किरकेंटा अकस्मात् जाके मस्तकपे गिरपडे वाके कल्याणके लियें वाकी शांती बडीउग्र करे॥ ३८ ॥ इतिकृकलासः ॥ १२॥ ॥ छ ॥

कीर्तनेक्षणरवानकुलानांसाधयंतिकरणीयमशेषं दक्षिणेननखिनामपिचेष्टांश्रेयसीखलुगतिर्विषमाणां ३९ इतिनकुलः अनर्थहेतुर्गतिशब्दहीनः सदाशृगालःखलुदृष्टमात्रः शस्ताह्निवामागतिरस्यशस्तोवामोनिनादोनिशियोबहूनां ४० विहायवामांदिशमन्यदिक्षुशब्दायमानानशुभाः शृगालाः गत्यारवौग्रामपुरप्रवेशेशस्तावुवामौमृगधूर्तकानाम् ४१

॥ टीका ॥

कीर्तनेति नकुलानां कीर्तनेक्षणरवा अशेषं करणीयं साधयंति खलुनिश्चयेन नखिनामपि चैषां विषमाणां श्रेयसीगतिर्भवति ३९ तदुक्तमन्यत्र नकुलानामपि धन्यं विषमाणांप्रदक्षिणं गतं यातुरिति इतिनकुलः अनर्थहेतुरिति गतिशब्दहीनः सदां शृगालोदृष्टमात्रः अनर्थहेतुर्भवति अह्नि अस्यवामागतिः शस्तानिशिबहूनांयोवामो निनादः सशस्तः ४० विहायेति वामांदिशं विहाय अन्यदिक्षुशब्दायमानाः शृगालाः नशुभाः मृगधूर्तकानां ग्रामपुरप्रवेशे गत्यार

॥ भाषा ॥

॥ कीर्तनेक्षणेति ॥ नकुल जे न्योला तिनको दर्शन शब्द नाम कीर्तन ये संपूर्ण कार्यकूं साधन करेंहें नखवारेनको ओर ये जो विषम कहें हें इनकी गती कल्याणकी करवेवाली हे कहूं इनकी दक्षिणागती गमनकर्ताकूं धन्य कहीहे ॥३९ ॥इतिनकुलः॥ १३॥ अनर्थ हेतुरिति ॥ शृगालगतीकरकें शब्द करकें हीन होय केवल दीखजाय तो सदां अनर्थको हेतु जाननो ओर शृगालकी दिनमें वांईगती शुभ हे ओर रात्रीमें वोहोतनको वांयो शब्द शुभ हे ॥ ४०॥ विहायेति ॥ वामदिशाकूं छोडकर ओरदिशामें शृगाल वोले तो शुभ नहीं ग्रामपुर इनके

हुंबाहुवेति प्रथमंततस्तु हाहेतिदीर्घः स्ततरांरवोयः
स्याज्जंबुकानांसमतः प्रशांतस्तदन्यरूपः कथितः
प्रदीप्तः ४२ शृगालशब्दोभवनेनिशायामुच्चाटना
र्थेदिशिपश्चिमायां प्राच्यांभयायोत्तरतः शिवाय
भवत्यवाच्यांभयनाशनाय ४३ इति शृगालः
सिद्ध्यैसदासर्वसमीहितानांस्याल्लोमशीदर्शनमात्रमेव
राजप्रसादंकथयंत्ययुग्मा दृष्टा ध्रुवंलोमशिकाश्वपृष्ठे ४४

॥ टीका ॥

वौ अवामो शस्तौ ४१ हुंबेति प्रथमंहुंबाहुवेतिशब्दः ततोहाहेतिसुतरां
दीर्घोरवः स्यात् सजंबुकानांप्रशांतोमतः तदन्यरूपइति तद्विपरीतः
प्रदीप्तः कथितः ४२ शृगालेति भवनेस्थितस्य निशायांपश्चिमायां
शृगालशब्दः उच्चाटनार्थंभवति प्राच्यांपूर्वस्यांभयायभवति
उत्तरतःशिवायभवति अवाच्यांदक्षिणस्यांभयनाशायस्यात् ४३
इतिशृगालः सिद्ध्यैइति लोमशीदर्शनमात्रमेवसर्वसमीहितानां-
सिद्ध्यैभवति अयुग्मलोमशिकाश्वपृष्ठेदृष्टा राजप्रसादं कथयंति ४४

॥ भाषा ॥

प्रवेशमें शृगालनकी गती और शब्द ये दक्षिण भागमें शुभ हें ॥४१॥ हुंबेति ॥
पहलें हुंवाहुंव येशब्द वोलेपीछे हाहा ये शब्द दीर्घ वोले तो शृगालनको ये शांत
शब्द योग्य हे यातें विपरीत जो शब्द करे वो प्रदीप्त कह्यो हे ॥ ४२ ॥ शृगालेति॥
अपने स्थानमें स्थित होय वाकूं रात्रीमें पश्चिमदिशामें शृगालको शब्द उच्चाटनके
अर्थ हे जो पूर्वदिशामें वोले तो भयके अर्थ और उत्तरमें वोले तो कल्याणके अर्थ
दक्षिणमें शृगालको शब्द भयके नाशके अर्थ जाननो ॥ ४३ ॥ इति
शृगालः ॥ १४ ॥ सिद्ध्यैइति ॥ लोमशीको दर्शनही सर्व मनोरथनकी सिद्धी करे

सव्यापसव्या च गतिः सदासां नृपादरस्त्रीधनलाभहेतुः खिरवीति शब्दादपरो विरावो दीप्तो भवेल्लोमशिका प्रयुक्तः ४५ याने प्रवेशे च यथाक्रमेण सव्यापसव्या च गति र्गतिज्ञैः शुभोदिता ब्राह्मणिका प्रयुक्ता तद्व्यत्यये व्यत्ययकृच्छुभस्य ४६

॥ टीका ॥

सव्येति आसां लोमशिकानां सव्यापसव्या गतिः वामदक्षिणगमनं नृपादरस्त्रीधनलाभहेतुः नृपादरो राजसन्मानंःस्त्रीयोषित् धनं द्रव्यं एतेषामितरेतरद्वंद्वः तेषांयो लाभः प्राप्तिः तस्य हेतुः कारणो भवति तथा खिरवीति शब्दात् अपरो विरावः लोमशिका प्रयुक्तः दीप्तोभवेत् ४५ तत्रायंविशेषः कालपुछाभयादौ दक्षिणाशुभा श्वेतपुछाराजसेवादौ दक्षिणाशुभा चेत् वामा भवति तदा अशुभप्रदास्यात् युद्धादौ एषा वामा स्यात् तेषां मध्ये योधिपः तद्विनाशयित्री भवति इति लोमशिका लुंकडीइति प्रसिद्धा यानेइति याने प्रवेशे च यथा क्रमेण ब्राह्मणिका प्रयुक्ता

॥ भाषा ॥

हे जो लोमशी विषम नाम उंना पीठपीछें दीखे तो निश्चयकर राजाको अनुग्रह होय लोमशीको दर्शन ओर गमन दोनो शुभ हें ॥ ४४ ॥ सव्येति ॥ इन लोमशीनको वामदक्षिण गमन राजाको सन्मान ओर स्त्रीधन इनको लाभ करावे जो खिखि शब्दसूं दूसरो शब्द बोले तो दीप्तशब्द जाननो जो लोमशी काली पूंछकी होय दक्षिणभागमें आवे तो भयकूं आदिले जे कार्य उनमें शुभ हे जो सफेद पूंछकी होय तो राजकी सेवा चाकरीकूं आदिले जे कार्य तिनमें दक्षिणभागकी शुभ हे जो ये वामभागमें आवे तो अशुभ करै युद्धादिकनमें जिनकूं वामभागमें आवे उनके मध्यमें जो अधिपती होय वाको नाशकरे लोमशीकूं लुंकडी कहेंहें ॥ ४५ ॥ यानेइति ॥ गमनमें ओर प्रवेशमें पहलें कह्यो जो क्रम ता करकें ब्राह्मणिकाकी वांई जेमनी गती शुभ कही हे जो विपरीत ओर-

आरण्यसत्वा मिलिता रुदंतो ग्रामोपकंठे भयदा भवंति ग्रामः पुनस्तैः परिवेष्ट्यमानो विवेष्यते वैरिजनेन नूनम् ४७ ग्राम्या भियेऽरण्यचरानुनादा रोधायते ग्राम्यचरानुशब्दाः परस्परांनुस्वननेन भीतिं वदंति बंधग्रह संप्रयुक्तां ४८

॥ टीका ॥

सव्यापसव्या वामदक्षिणा गतिः गतिज्ञैः शुभा उदिता प्रतिपादिता तद्व्यत्ययः तद्वैपरीत्यं शुभस्य व्यत्ययकृद्भवति ४६ इति ब्राह्मणिका रक्तपुछीति लोके प्रसिद्धा आरण्येति ग्रामोपकंठे ग्रामसमीपे आरण्यसत्वा वन्यजीवाः मिलिता रुदंतः रोदनं कुर्वन्तः भयदा भवंति तैः पुनः ग्रामः परिवेष्ट्यमानः नूनं वैरिजनेन ग्रामो विवेष्यते उपकंठांतिकाभ्यर्णाभ्यग्रा अप्यभितो व्ययमित्यमरः ४७ ग्राम्याइति ग्राम्याः ग्रामेभवाः ग्राम्याः सत्वा इतिशेषः अरण्यचरानुनादाः अरण्यचरशब्दो येषां ते तथोक्ताः भिये भवंति ते अरण्यचरा ग्राम्यचरानुशब्दाः रोधाय भवंति परस्परानुस्वननेन ग्राम्यचरशब्दानंतरं शब्दो येषां ते तथोक्ता बंदिग्रह संप्रयुक्तां भीतिं वदंति अन्योन्य सार्द्धजल्पनेन मिथो-

॥ भाषा ॥

सूं ओर गती होय तो शुभकार्यको नाश करे ब्राह्मणिका नाम जाकी लाल पूंच्छ होय वाको हे ॥४६॥ इति ब्राह्मणिका॥ १५॥ आरण्येति ॥ ग्रामके समीप वनके जीव मिले हुये रुदन करें तो भय देवे फिर उन जीवन करकें ग्राम आवेष्टन होय जाय तो वो ग्राम वैरी जनकरकें निश्चय घिरजाय ॥४७॥ ग्राम्याइति॥ पहलें वनके जीव शब्द बोलें तापीछें ग्रामके जीव बोले तो भयके अर्थ जाननो जो पहलें ग्रामके जीव बोलें तापीछें वनके जीव बोले तो रोधके अर्थ जाननो जो फिर ग्रामके बोलें तो पीछें वनके जीव बोलें तो बंदीखाने करकें सहीत भय होय ॥ ४८ ॥

ग्रामे पुरे वा यदि वन्यसत्वा रात्रौ प्रविष्टा दिवसे
च दृष्टाः यदा तदाऽऽशूद्वसतामुपैति स्युर्मृत्य-
वे तत्र मृतप्रसूताः ४९ गृहागता गेहपतेर्भया-
य पुरस्य रोधाय तु गोपुरस्थाः स्युर्वन्यसत्वाः
शाकुनानि तेषामुद्भावनीयान्यऽपराणि चैवं ५०
इति वसंतराजशाकुने चतुर्दशो वर्गः समाप्तः १४

॥ टीका ॥

न्योन्यं परस्परमिति केशवः केचित्तु आरण्यचराणां सदृशः शब्दो येषां ते अरण्यचरानुनादाः ग्राम्यचराणां सदृशः शब्दो येषांते ग्राम्यचरानुनादा इति व्याख्यायंते ४८ ग्रामेइति वन्यसत्वाः वन्यपशवः ग्रामे पुरे वा रात्रौ प्रविष्टाः प्रवेशं कृतवंतः यदा दिवसे च दृष्टाः स्युः तदा शीघ्रं तन्नगरं उद्वसतां उपैति गच्छति तत्र ग्रामे पुरे वा मृतप्रसूताः मृताश्च प्रसूताश्चेति द्वंद्वः जनानां मृत्यवे स्युः ४९ गृहाइति वन्यसत्वाः गृहागताः गृहप्रविष्टाः गृहपतेर्भयाय भवंति तथा गोपुरस्थाः नगरस्थाः पुरस्य रोधाय आवरणाय स्युः एवममुना प्रकारेण तेषां वन्यसत्वानां अपराणि शकुनानि उद्भावनीयानि ज्ञातव्यानि पूर्द्वारे गोपुरं रथ्याप्रतोली विशिखाःसमाइतिहैमः ५० इ॰ व॰ टी॰ विचा॰ च॰ चतुर्दशोवर्गः

॥ भाषा ॥

॥ग्रामेइति॥ वनके पशू ग्राममें वा पुरमें रात्रीमें प्रवेश करजांय जो दिवसमें दीखजांय तो शीघ्रही वो ग्रामपुर नाशकूं प्राप्त होय जांय ता ग्राममें वा पुरमें मनुष्यनके मृत्यूके अर्थ जाननो ॥ ४९ ॥ गृहाइति ॥ वनके पशू घरमें आय जांय तो घरके पतीकूं भयके अर्थ होय जो नगरके द्वारेपे स्थित होंय तो वा नगरकूं शत्रू आय करकें रोक लें जेसें ये कहेंहें तेसें ही वनके जीवनके शकुन और वी जानवेकूं योग्य हें ॥ ५० ॥

इतिवसंतराजभाषा टीकायां चतुष्पदानां प्रकरणे चतुर्दशो वर्गः ॥ १४ ॥ ॥ छ ॥

चतुष्पदानां शकुनप्रभावो यथावदित्थं कथितोऽथ सत्वाः ये षट्पदाद्याः शकुनानि तेषामाश्चर्यरूपाणि निरूपयामः १ श्रूयेत वामो यदि मंजुगुंजन् दृश्येत वा वामदिशं प्रसर्पन् आस्वादयन्वा कुसुमं प्रशस्तं भृंगस्तदास्यात्सुमहान् प्रमोदः २ यो वृश्चिकः कोंष्टककारिकायः यो गुंजरावश्च कुलीरसंज्ञः अन्यापरे संति च षट्पदा ये यात्रासु ते वामगताः प्रशस्ताः ३

॥ टीका ॥

चतुष्पदानामिति चतुष्पदानां पूर्वोक्तानां मया शकुनप्रभावः इत्थं पूर्वोक्तप्रकारेण यथावत्कथितः अथ ये षट्पदाद्याः सत्वास्तेषां शकुनानि आश्चर्यरूपाणि वयं निरूपयामः १ श्रूयेतेति यदि भृंगः मंजु मनोज्ञं गुंजन् वामः श्रूयेत वामदिशं प्रसर्पन् गच्छन् वा दृश्येत प्रशस्तं कुसुमं आस्वादयन् वा वामदिशं दृश्येत तदा सुमहान्प्रमोदः स्यात् २ यइति यः वृश्चिकः कोष्टककारिकायः यो गुंजरावश्च कुलीरसंज्ञः वृश्चिकजातीयजंतुविशेषः तथा अपरे च ये षट्पदाः संति ते यात्रासु वामगताः प्रशस्ताः शोभनाः ३ ॥छ॥

॥ भाषा ॥

॥ चतुष्पदानामिति ॥ ये चोपाये पसूनके शकुनको प्रभाव मेनें यथायोग्य पूर्वक कह्यो अब भ्रमरानकूं आदिलेकर जीव तिनके शकुन आश्चर्यरूप हें उनें में वर्णन करूं हूं ॥ १ ॥ श्रूयतेति ॥ जो भ्रमर सुंदर गुंजारशब्द करतो हुयो वामभागमें श्रवण करे वा वामदिशामें गमन करतो दीखे वा सुगंधवान् पुष्पकूं सूंगतो हुयो वामदिशामें दीखे तो महान् हर्ष होय ॥ २ ॥ यइति ॥ जो वीछू और कुलीर खेकडावी कहेंहें करलेंकरक येवी नाम हे और भ्रमरा ये सब यात्रानमें वांये सुभ हें ॥ ३ ॥ ॥छ॥

अष्टापदो यः शरभः प्रसिद्धो वामेन सर्पन् निनदंश्च
वामः एकातपत्रं स ददाति राज्यं गतो निवृत्तो
तु तदन्यरूपः ४ मार्गार्गलाया रचितोर्णनाभैः
सूत्रेण पृष्ठे पुरतोऽथवासौ मताप्रयाणे
प्रतिषेधयित्री वामोर्णनाभस्य गतिः शुभाय ५ ॥छ॥

॥ टीका ॥

इति षट्पदाः अष्टापदइति यः शरभः अष्टापदइति प्रसिद्धः गतो यात्रायां वामेन सर्पन् गच्छन् वामेन निनदंश्च शब्दं कुर्वन् स एकातपत्रं राज्यं ददाति निवृत्तो तु पश्चाद्वलने तु तदन्यरूपः तद्विपरीतरूपः दक्षिणेन गच्छन् दक्षिणेन शब्दं च कुर्वन् एकातपत्रं राज्यं ददातीत्यर्थः ४ इति शरभः मार्गेति प्रयाणे गमने ऊर्णनाभैः गुर्जरे कोली आवडोइति प्रसिद्धस्य सूत्रेण पुरतः अग्रतः अथवा पृष्ठे पृष्ठभागे मार्गार्गला मार्गे अर्गला या रचिता असौ प्रयाणप्रतिषेधयित्री प्रतिषेधकारिका मता गच्छतो यात्राकर्तुः वामा ऊर्णनाभस्य गतिः शुभाय स्यात् ५ इत्यूर्णनाभः

॥ भाषा ॥

॥ अष्टापदइति ॥ आठ पाम जाके एसो शरभ जो यात्रामें वांयो गमन करे ओर वांयो शब्द बोले तो शरभ एकातपत्र राज्य देवे निवृत्तीमें अर्थात् प्रवेशमें दक्षिण माऊं गमन करे ओर दक्षिण माऊं शब्द करे तो चक्रवर्ती राज्य देवे ॥४ इतिशरभः ॥ मार्गेति ॥ गमनेमें ऊर्णनाभि जो मकडी गुर्जरदेशमें कोली आवडो कहें हें वो अपनें सूत्रकरकें अगाडी वा पिछाडी मार्गमें जालपूर देतो यात्राकी निषेध कर्ता जाननो गमनकर्ताकूं मकडीकी वांई गती शुभके अर्थ हे ॥५॥ इत्यूर्णनाभः ॥३॥ ॥छ॥

अश्वादिलाभं जघनोरुभागे कंठेच भोज्याभरणा
दिलाभं छत्रादिलाभं शिरसि त्वभीष्टमारोहणा
न्मर्कटिका करोति ६ पुंसां समारोहति यद्यदंगं
शुभार्थिनी मर्कटिका सदैव फलानि तेषामुपभो
गभांजि भवंत्यवश्यं सुमनोहराणि ७ यात्रासु
खर्जूरककर्णसूच्योर्वामेन यानं फलदं वदन्ति ॥

॥ टीका ॥

अश्वेति मर्कटिका जघनोरुभागे जघनंचऊरुश्चेति द्वंद्वः तयोर्भागे प्रदेशे आरोहणात् अश्वादिलाभं तथा कंठेआरोहणात् भोज्याभरणादिलाभं भोज्यंच आभरणंच तयोर्लाभं प्राप्तिं शिरसि आरोहणात् छत्रादिलाभं एवं अभीष्टं करोति ६ पुंसामिति शुभार्थिनी मर्कटिका पुंसां यद्यदंगं समारोहति तेषां उपभोगभांजि उपभोगं भजंते तान्युपभोगभांजि सदैव सर्वदा सुमनोहराणि फलानि भवंति यः सकृद्भुज्यते भोगः उपभोगोंगनादिकइति ७ इत्यष्टापदाः॰ यात्रास्विति यात्रासु प्रयाणेषु खर्जूरककर्णसूच्योः वामेन यानं फलदं वदंति अमूभ्यां छिन्नेउल्लंघिते पथि कार्योत्सुकेनापि नरेण यात्रा नैव कार्या गमनं कर्तव्यमित्यर्थः क-

॥ भाषा ॥

॥अश्वादीति॥ जो मकडी जंघा ऊरु इनपे चढजाय तो अश्वादिकनको लाभ करे जो कंठपे चढजाय तो भोजन आभरणादिकनको लाभ करै जो मकडी मस्तक पे चढजाय तो छत्रादिकनको लाभ और अभीष्ट करे ॥६॥ पुंसामिति॥ शुभ अर्थके देवेवाली मकडी पुरुषनके जाजा अंगपे चढै उनउन अंगनके भोग भोगे सदां सर्वदां सुंदरफल अवश्य होंय ॥७॥ इत्यष्टापदाः॥ यात्रास्विति ॥ यात्रामें खान खिजूरो कानाशिलाई ये वामभागमें शुभ फलके देवेवारे हैं जो कार्यकूं जातो होय वा पुरुषके ये दोनो मार्गकूं उल्लंघन करजाय अर्थात् रस्ता काटजा-

छिन्ने त्वसूभ्यां पथिनैव कार्या कार्योत्सुकेनापि नरेणयान्ना ८ सर्पस्य नामैव भवत्यभीष्टं दुष्टानि गत्यारवचेष्टितानि गोनाशदर्वीकरराजिलाद्या जात्येवं सर्वे भयदा भुजंगाः ९ विलोक्य सर्पं पथि निर्विकल्पं निवृत्य विश्रम्य शुभं विचिंत्य पाषाणसंस्तंभित कंटकेषु दत्वा पदं यांति विनष्टविघ्नाः सर्प्पेषु यो धन्वन नामधेयः प्रयाणकाले सतु वामभागे

॥ टीका ॥

र्णसूची कानशिलाईउइति लोके प्रसिद्धः ८ इत्यनेकपदेषु खर्जूरककर्णसूच्यो सर्पस्येति सर्पस्य नामैवअभीष्टं भवति तस्य गत्या रवचेष्टितानि गतिश्चआरवश्चचेष्टितंचेति द्वंद्वः दुष्टानि भवंति गोनाशदर्वीकरराजिलाद्याः एते सर्वे भुजंगाः जात्येव भयदा भवति ९ विलोक्येति पुमांसः पथि सर्पं विलोक्य निर्विकल्पं संदेहरहितं निवृत्य पश्चाद्वलयित्वा विश्रम्यच शुभं विचिंत्य पाषाणसंस्तंभित कंटकेषु पदं क्रमं दत्वा येयांति ते विनष्टविघ्नाभवंति विनष्टं विघ्नंयेषां ते तथोक्ताः १० सर्पेष्विति सर्पेषु यो धन्वननामधेयो वर्तते धमणिइति प्रसिद्धः सतु प्रयाणकाले प्रयाणसमये वामभागे दृष्टः

॥ भाषा ॥

यतो गमन नहीं करनो ॥ ८ ॥ इत्यनेकपदेषुखजूरककर्णसूच्यो ॥ सर्पस्येति ॥ सर्पको नामही अभीष्ट देवे हे और सर्पकी गती शब्द चेष्टा ये तीनो अशुभ हें गोनाश दर्वीकर राजिल ये सर्पके नाम हें इनकूं आदि ले संपूर्ण सर्पजाति करकें ही भयके देवेवारे हें ॥ ९ ॥ विलोक्येति ॥ पुरुष मार्गमें सर्पकूं देखकरकें निः संदेह पीछो चल्यो आवे फिर विश्रामले करकें शुभविचारकरकें पाषाणपे वा स्तंभपे वा काष्ठपे क्रमसूं पाम धरकें फिर गमन करे तो उनके विघ्न नष्ट होय जांय ॥ १० ॥ सर्पेष्विति ॥ सर्पनमें जो धन्वननाम सर्प जाकूं धमनी स्यांप कहें हें वो गमन समयमें वाम-

दृष्टः शुभः सिद्धिकृदुन्नताग्रस्तिष्ठत्यथोर्द्ध्वोयदि राज्यलाभः १२ आलंभनामग्रहणेक्षणानि मीनस्यशस्तानि भवंति तुल्याः विलेशयाः कच्छपनक्रमुख्या जलौकसो दुंदुभकाश्च सर्प्पैः १२ उत्तानसंस्थामविनष्टदेशे कपर्दिकां वीक्ष्यसमादधीत वंदेतमूर्द्धापरमप्रमोदाद्ददाति सिद्धिं सकलोद्यमेषु १३ इत्यपदाः इ॰ व॰ रा॰ शा॰ पंचदशोवर्गः १५

॥ टीका ॥

शुभः श्रेष्ठः उन्नताग्रभागं उन्नतः अग्रभागो येनस तथातिष्ठन् सिद्धिकृत् स्यात् अथऊर्द्ध्वः ऊर्ध्वदमः यदि तिष्ठति तदाराज्यलाभः स्यात् ११ इति सर्पः आलंभेति आलंभनामगृहणेक्षितानि वधनामकथनविलोकितानि आलंभश्चनामग्रहणंच ईक्षितंचेति द्वंद्वः मीनस्य सर्वदा शुभानि भवंति आलंभपिंजाविशरघातोन्माथवधावपीत्यमरः तथा विलेशयाः बिलवासिनः कछपनक्रमुख्याः जलौकसाः जलवासिनः दुंदुभकाश्च एतेसर्वेसर्पैस्तुल्या भवंति अलगर्दोजलव्यालः समौराजिलदुंदुभौ इतिहेमः १२ उत्तानेति अविनष्टदेशेशुभस्थाने उत्तानसंस्थां ऊर्ध्वमुखास्थितां कपर्दिकांवीक्ष्य समादधीत गृह्णीत समादधीतेत्यपि

॥ भाषा ॥

भागमें दीखे तो शुभ हे जो फनकूं ऊंचो करे दीखै तो सिद्धीको करवेवालो जाननो जोऊंचेपे बेठो होय तो राज्यको लाभ होय ॥११॥ इतिसर्पः ॥६॥ आलंभेति ॥ मीनको वधनाम ग्रहण देखनो ये तीनो शुभ करे ओर बिलेनमें रहेंहें वे कछपमकर इनकूं आदिले जलवासी डुंडुभक जो सर्प ये सब सर्पकी तुल्य हें ॥१२॥ उत्तानेति शुभस्थानमें ऊपर जाको मुख एसी कोडी जाकूं ओंधीपडी कहें हें ओर चित्त पडी कहें हें वा कोडीकूं देखकरकें ग्रहण करले फिर वाकूं हर्षसूं मस्तक नमाय

श्रेयोऽशुभं वाऽवितथं यथेह पिपीलिकानां शकुनेन लोकः जानाति सम्यक् मुनिसम्मतेन ब्रूमस्तथा संप्रति सारभूतं १ अत्यर्थपूर्णे जलकुक्कसाभ्यां ग्राह्यं गृहेनेष्टमथाप्यनिष्टं स्तोकस्थितावस्करनीरदेशे पिपीलिकानां शकुनं गवेष्यं २ स्थूलास्तथायाः कपिलाः कदाचिद्दृग्गोचरं यांतिघृतेटिकाख्याः

॥ टीका ॥

पाठः परमप्रमोदात् मूर्द्ध्ना वंदेत सा सकलोद्यमेषु सकलकार्येषु सिद्धिं ददाति दत्ते प्रत्यक्षसिद्धिं सकलोद्यमेष्वित्यपि पाठः १३ इत्यपदाः इति वसंतराजशाकुनेविचारिताः षट्पदादयः पंचदशो वर्गः १५ श्रेयइति सांप्रतं इह लोके पिपीलिकानां शकुनेन लोकः श्रेयः शुभं अशुभं वा अवितथं सत्यं सम्यक् यथा जानाति तथा वयं सारभूतं ब्रूमः कीदृशेन शकुनेन मुनिसम्मतेन मुनिप्रणीतेन १ अत्यर्थेति जलकुक्कसाभ्यां पानीयतुषाभ्यां अत्यर्थपूर्णेगृहे इष्टंशुभं अथाप्यनिष्टंअशुभंशकुनं नग्राह्यं स्तोकस्थितावस्करनीरदेशे स्तोकस्थितः अवस्करः अवकरकचरोइतिप्रसिद्धः नीरंचजलंचयत्रएवंविधेदेशे पिपीलिकानां की कानां शकुनं गवेष्यंगवेषणीयं २ स्थूलाइति या स्थूलास्तथा कपिलाः पिंगलाः घृतेटिकाख्याः

॥ भाषा ॥

नमस्कार करै तो वो कोडी संपूर्णउद्यमनमें सिद्धी करे ॥१३॥ इत्यपदाः ॥८॥ इतिश्रीव० भा०टी० षट्पदादीनां पंचदशोव० १५ ॥ श्रेयइति ॥ या लोकमें मनुष्य मुनीन्नें कह्यो ऐसो पिपीलिकानको शकुन ता करकें शुभ वा अशुभ येसत्य जानें तैसेंही हम सारभूत कहें हें पिपीलिकानाम कीडी वाचेटी इनको हे ॥ १ ॥ अत्यर्थेति॥ जल और तुष इनकरकें अत्यंत भरोहुयो घर वामें शुभ अशुभ शकुन नहीं देखनो और थोडी जगेमें कूडो कचरो जलये होंय तहां कीडीनको शकुन देखनो योग्य हे ॥ २॥ स्थूलाइति॥ स्थूल होय क-

विज्ञेन तासां शकुनं गवेष्यं पिपीलिकानामिह नापरासां ३ विनिर्गताः प्राग्गृहगर्भभूमेः कुर्वंति शून्यंभवनं घृतेट्यः अग्नेर्विभागेस्वजनागमाय भवंति वृद्ध्यै दिशि दक्षिणस्यां ४ पयोधरो वर्षति यातुधान्यां योषिद्धनाप्तिर्दिशि पश्चिमायां विहाय गेहं गृहिणी प्रयाति विनिर्गताभिर्दिशि मारुतस्य ५

॥ टीका ॥

घीमेलिइति आख्याअभिधानं यासां ताः तथोक्ताः कदाचित् दृग्गोचरं यांति विज्ञेन पंडितेन तासांपिपीलिकानामिह शकुनं गवेष्यं अपरासां नगवेष्यमित्यर्थः ३ विनिर्गताइति घृतेट्यः प्राक् पूर्वस्यांदिशि गृहगर्भभूमेः गृहमध्यभूमेःविनिर्गताः निसृताः भवनं शून्यं कुर्वन्ति अग्नेर्विभागे आग्नेय्यां गृहस्येति शेषः निर्गताः स्वजनागमाय भवंति गृहस्य दक्षिणस्यां दिशि निसृताः वृद्ध्यै भवंति ४ पयोधरइति यातुधान्यां नैर्ऋत्यां विदिशि विनिर्गताभिः पयोधरो मेघो वर्षति पश्चिमायां दिशि विनिर्गताभिः योषिद्धनाप्तिः योषिच्च धनंच तयोः आप्तिः प्राप्तिः भवति मारुतस्य वायोर्दिशि विनिर्गताभिः घृतेटीभिः गृहिणी गेहं विहाय त्यक्त्वा प्रयाति ५

॥ भाषा ॥

पिल वर्ण जाको होय घृतेटिका या घीमेलि ये जिनके नाम एसी दीखजांय तो उन टीडीनको शकुन ढूंडनो योग्यहे ॥ ओरनको शकुन नहीं देखनो ॥३॥ विनिर्गताइति॥ घृतेटिका घरकी मध्यभूमीसूं पूर्व दिशामें निकसे तो सूनो घर करे जो घरके अग्नीकोणमें निकसे तो स्वजन जनको आगम करे ओर घरके दक्षिण दिशा में निकसे तो वृद्धी करे॥ ४॥ पयोधरइति॥ घरके नैऋत कोणमें निकसे तो मेघवर्षा करें पश्चिम दिशामें निकसे तो स्त्री ओर धन इनकी प्राप्ती करें ओर-

कुर्वंतिताः संपदमुत्तरस्यांदेशस्यभंगंककुभीशव
त्यां ब्रह्मप्रदेशे दिनसप्तकेन लाभं पृथिव्याउतयो
गसिद्धिं ६ तल्पाश्रयास्तल्पवतो घृतेटयो मृत्यु
रुजं वा जनयंति दीर्घं उत्पत्तयेनर्घपरंपरायाःस्युर्
देहली देशाविलोक्यमानाः ७ केदाररथ्या
नृपदेवगेह चैत्यद्रुम द्यूतसभांतरेषु ॥

॥ टीका ॥

कुर्वंतीति ताः घृटेटयः उत्तरस्यां विनिर्गताः संपदः कुर्वंति ईशवत्यां ककुभि ईशान्यां दिशि निःसृताः देशस्यभंगंकुर्वंति ब्रह्मप्रदेशेऊर्ध्वप्रदेशेमस्तके इतियावत् तासां विनिर्गमने दिनसप्तकेनपृथिव्याः लाभं कथयंति उत अथवा योगस्य सिद्धिं कथयंतीत्यर्थः ६ तल्पाश्रयाइति तल्पाश्रयाःशय्याश्रया विनिर्गता घृतेटयः तल्पवतः तल्पस्वामिनः मृत्युं दीर्घां रुजं वाजनयंति तथा देहली देशाविलोक्यमानाः देहल्याः उंबरस्य प्रदेशे दृश्यमानाः अनर्घपरंपरायाः उत्पातश्रेण्याः उत्पत्तयेस्युः गृहावग्रहणी देहल्यंबरो दुंबरोंबुराः इतिहैमः ७ केदारेति केदारः वप्रः रथ्या मार्गः नृपगृहं राज्ञोगृहं देवगृहंप्रासादः चैत्यद्रुमबद्धपीठो वृक्षः द्यूतसभा दुरोदरपर्षदाः एतेषामितरेतरद्वंद्वः एतदंतरेषु एतेषां

॥ भाषा ॥

वायव्य कोणमें निकसे घृतेटिका तो घरकी मालकेनी घरकूं छोडकरकें चली जांय॥ ५॥ ॥कुर्वंतीति॥ जो घृतेटिका चेंटी उत्तरदिशामें निकसे तो संपदा करै ओर ईशान दिशामें निकसे तो देशको भंग करे ऊर्द्ध प्रदेशमें मस्तकके ऊपर निकसें तो सात दिनमें पृथ्वीको लाभ अथवा योगकी सिद्धी करे॥ ६॥ तल्पाश्रयाइति॥ जो घृतेटी शय्यामेंसूं निकसे तो शय्याके स्वामीकूं मृत्यू वा दीर्घ रोग करे देहलीमें निकसी हुई दीखें तो अनेक उत्पातनकूं प्रगट करे॥ ७॥ केदारेति॥ खेतं मार्ग राज घर देवमंदिर यज्ञमें

दृष्टा घृतेट्यः खलुचत्वरादौ देशस्यभंगंजनयंत्य
वश्यं ८ यदि प्रविश्याज्यघटे घृतेट्यास्तिष्ठंत्य-
होरात्रकृताधिवासाः स्वल्पैरहोभिः कृतसंधिपा
तंमुष्णंति चौरा भवनं तदानीं ९ बह्व्योगृहस्योप
रिनिःसरंति रक्तापिपील्योयदि सर्वमर्थम् हरंति
चौरामरणं भयंवातज्जायतेऽवश्यमहोभिरल्पैः १०

॥ टीका ॥

मध्येषु तथा चत्वरादौ बहुमार्गिच-चत्वरमिति हैमः इत्यादौदृष्टाः घृतेट्यः अवश्यं देशस्य भंगंजनयंति क्षेत्रे तु वप्रः केदारइति हैमः ८ यदीति यदि घृतेट्यः आज्यघटे घृतकुंभे प्रविश्य अहोरात्रकृताधिवासाः अहोरात्रं यावत्कृतः अधिवासो याभिस्ताः तिष्ठंति तदानीं स्वल्पैरस्तोकैः अहोभिः दिवसैः चौराः भवनं गृहं मुष्णांति कीदृशं कृत संधिपातं कृतो विहितः शस्त्रादिना संधिपातः खात्रं यस्मिन् तत् ९ बह्व्यइति यदि रक्ताः पिपील्यो बह्व्यो गृहस्योपरिनिःसरंति बहिः प्रकटीभवंति तदा सर्वमर्थं चौरा हरंति मरणं तथा भयं वा अर्थाद्गृहाधिपतेः अल्पैरहोभिः अवश्यं जायते १० ॥छ॥

॥ भाषा ॥

बड़ पीठ वृक्ष जूवा खेलवेकी सभा इनके मध्यमें और चौरायेकूं आदि ले मार्गनमें घृतेटिका दीखे तो अवश्य देशको भंग करे ॥ ८ ॥ यदीति ॥ जो लाल कीडी घीके कुंभमें प्रवेश करकें एक दिनरात्री वामें स्थित रहें तो थोड़ेसे दिवसमें चौर घरमें शस्त्रसूं खोद संधीकर द्रव्य चुराय ले जांय ॥ ९ ॥ ॥ बह्व्यइति ॥ जो लालकीडी वोहोतसीसी घरके ऊपर निकलें तो सब धनचोर लेजांय अथवा घरके स्वामीकूं थोडेसे दिनमें भय वा मृत्यू अवश्य होय ॥ १० ॥ ॥छ॥ ॥छ॥

तुल्या निदाघेन भवंति वर्षा विनिर्गतास्त्वंबुघटस्य
मूलात् धान्यस्य मध्यात्पुनरुद्गतासु धान्यार्घ
पातोऽरुणकीटिकासु ११ आरनालघटमूलगाः
शुभं धान्यवृद्धिमपि धान्यमध्यगाः सूचयंतिच
महानसोद्गता गेहदाहमचिराद्घृतेटिकाः १२ तो
यपूर्णकलशोज्झितालयाद्भक्तपूर्णपिठराच्चनिर्गताः

॥ टीका ॥

तुल्याइति यदा घृतेट्यः अंबुघटस्य मूलात् विनिर्गताः तदा वर्षा निदाघेन ग्रीष्मेण तुल्याः समानाः भवंति तु पुनः धान्यस्य मध्यात् उद्गतासु निसृतासु अरुणकीटिकासु धान्यार्घपातः स्यात् मूल्यहानिः स्यादित्यर्थः ११ आरनालेति घृतेटिकाः आरनालघटमूलगाः आरनालघटस्य मूलं गच्छंति ता आरनालघटमूलगाः शुभं कुर्वंति तत्र आरनालं कांजिकं धान्यमध्यगाः पुनः अरुणकीटिकाः धान्यस्य वृद्धिं कुर्वंति महानसं पाकस्थानं तत्रोद्गताः निर्गताः पुनः अचिरात्स्वल्पदिनैरेव गेहदाहं सूचयंति पाकस्थानं महानसमिति हैमः १२ तोयेति तोयपूर्णैः कलशैः उज्झितो वर्जितो यः आलयो गृहं तस्मात् भक्तपूर्ण पिठराच्च भक्तं ओदनं तेनपूर्णं यत् पिठरं भाजनविशेषः स्थाल्युखा

॥ भाषा ॥

॥ तुल्याइति ॥ जो लालकीडी जलके घडाके नीचेंसूं निकसें तो वर्षा ग्रीष्म ऋतूकी समान होय फिर धान्यके मध्यमेंसूं निकसे तो धान्यको अर्घपात होय अर्थात् मोलकी हानी होय ॥ ११ ॥ आरनालेति ॥ जो लालकीडी कांजीके घडाके नीचें होंय तो शुभ करें फिर धान्यमें होंय तो धान्यकी वृद्धी करें जो रसोईमें निकसें तो थोडेसे दिनमें घरमें दाह आंच लगे ॥१२॥ तोयेति ॥ जलके भरे कलश जहां नहीं होय वा घरमेंसूं वा चांवलके भरेपात्रमेंसूं निकसी हुई

निर्दिशंति कपिलाः पिपीलिका द्रव्यवृद्धिमचिरेण भूयसीं १३ स्वर्णरत्नधनमध्यतो यदाः संभवंति सुकृत प्रचोदिताः स्वर्णरत्नधनवृद्धिहेतवस्तद्भवंति कपिलाः पिपीलिकाः १४ अथेतरारक्तपिपीलिकाभ्यो निर्यातिंचेद्बाधकमंतरेण अंडान्युपादायपयः पयोदो मुंचत्तदेति प्रवदंति वृद्धाः १५ इ॰ व॰ पि॰ षो॰ व॰ १६

॥ टीका ॥

पिठरमितिहेमः कीठीगड्डुइति प्रसिद्धं तस्माच्चविनिर्गताः निसृताः कपिलाः पिपीलिकाः अचिरेण स्तोककालेन-भूयसीं द्रव्यवृद्धिं निर्दिशंति कथयंति १३ स्वर्णेति यदा स्वर्णरत्नधनमध्यतः सुकृतप्रचोदिताः कपिलाः पिपीलिकाः संभवंति तदा स्वर्णरत्नधनवृद्धिहेतवस्ता भवंति कडारः कपिलः पिंगपिशंगौ कद्रुपिंगलौ इत्यमरः १४ अथेति अथरक्तपिपीलिकाभ्यः इतराः कीटिकाः बाधकमंतरेण कारणव्यतिरेकेण अंडान्युपादायचेत् निर्यांति तदा पयोदो मेघः पयः पानीयं मुंचेत् इति वृद्धाः प्रवदंति १५

ईशानकूणि युद्धकहई ८	पूर्वदिशिप्रहर ४ भयकहई १	अ॰ अ॰ ४।२ अग्निभयकूरई.
उत्तरादिशि स्फरयकहइ ७	कीटिका शाकुनम्	दक्षिणदिशि लाभकहइ ३
वायव्यकूणि ईधनकहइ ६	पश्चिमदिशि श्रीकहइ ५	नैर्ऋत्यकूणि वस्त्रलाभक॰ ९

॥ भाषा ॥

काली कीडी थोडेसे कालमें वोहोतसी द्रव्यकी वृद्धी करे ॥ १३ ॥ स्वर्णेति ॥ जो काली कीडी स्वर्णरत्न धन इनके मध्यमेंसूं कोई पुन्यके प्रभाव कर निकसें तो स्वर्णरत्न धन इनकी वृद्धी करें ॥ १४ ॥ अथेति ॥ लालकीडीनसूं और कीडी कोई कारणविना अंडा लेके निकसे तो मेघजलकी वर्षा करे ये वृद्धनको वाक्य हें ॥ १५ ॥ ग्रंथांतरमें किडीनको दिग्विभागको फल यात्राके ऊपरपे चक्र लिखोहे ॥ इ॰ व॰ षो॰ वर्गः १६

कुड्यमत्स्य इतियोभिधीयते पल्लिकेति गृहगोधिकेतिच कालदिक्क्रमवशेन निर्मितं तस्यशाकुनमुदीर्यतेऽधुना १ सूर्योदयेपूर्वदिशि ब्रुवाणा पल्लीभयं जल्पति भूमिपालात् हुताशभीतिः प्रहरप्रदेशेमध्यंदिने दूतमुखेन वार्त्ताम् २ धनागमः स्यादपराह्णकाले दिनावसानेंपि फलं तदेवं आहारकाले विहितस्वरायां पल्ल्यांभवत्यागमनं नृपस्य ३

॥ टीका ॥

ग्रंथांतरेत्त्वेवं पिपीलिकायाः दिग्विभागं फलं तस्ययात्रोपरि इदम् इतिश्री वसंतराजटीकायां विचारिता पिपीलिका प्रकरणे षोडशो वर्गः १६
अधुनेति अधुना तस्य शकुनंउदीर्यते अभिधीयते कीदृशंशकुनं कालदिक्क्रमवशेन निर्मितं कालश्चादिक्च तयोः क्रमवशेन अनुक्रमवशेन संपादितं यत्तयोर्नित्याभिसंबंधात् तस्यकस्येत्याह यः कुड्यमत्स्यइति पल्लिकाइति गृहगोधिकाइति चअभिधीयते कथ्यते १ सूर्योदयेति सूर्योद्गमेसति पूर्वदिशि ब्रुवाणापल्ली भूमिपालाद्राज्ञः भयं जल्पति प्रहरप्रदेशे पूर्वस्यां दिशि हुताशभीतिं अग्निभयं तथा पूर्वस्यामेव मध्यं दिने मध्याह्ने दूतमुखेन वार्तां जल्पतित्यस्य सर्वत्रसंबंधः २ धनागमइति अपराह्णकाले मध्याह्नोत्तरकाले तृतीयप्रहरे विहितस्वरायां

॥ भाषा ॥

॥ अधुनेति ॥ अब पल्लीको शकुन कालदिशा इनके क्रमकरकें कह्योहुयो हम कहेंहें १ ॥ सूर्योदयेति ॥ सूर्यके उदय समयमें पूर्व दिशामें पल्ली वोले तो राजातें भय होय फिर प्रथम प्रहरमें पूर्वदिशामें बोले तो अग्नीको भय होय और पूर्व दिशामें दूसरे प्रहरमें वोले तो दूतके मुखसूं कोई वार्ता सुने ॥ २॥ धनागमइति ॥ तृतीय प्रहरमें पल्ली बोले तो धनको आगमन कहेंहें एसो जाननो चोथे प्रहरमें वोले तोवी धनको आगम-

निधानलाभो निशि पूर्वयामे द्वितीययामेऽभिमतार्थ
सिद्धिः युवत्यवाप्तिश्च तृतीययामे तुर्येऽर्थहानि-
र्विरुतेनपल्ल्याः ४ आद्ये दिनस्य प्रहरेऽग्निभागेप्र
मीतवार्ता प्रहरे द्वितीये मिष्टान्नलाभो गृहगोधिका-
या रुतेन लाभो वसुनोपराह्णे ५ सुखं दिनांते वि
रुतेन पल्ल्या आहारकालेऽभिमतान्नलाभः

॥ टीका ॥

पल्ल्यां धनागमः स्यात् दिनावसानेऽपि संध्यायामपि कृतस्वरायां तदेव फलं भवति आहारकाले विहितस्वरायां पल्ल्यां नृपस्यागमनं भवति ३ निधानेति निशि पूर्वयामे प्रथमप्रहरे पल्ल्याविरुतेन निधानलाभः स्यात् द्वितीययामे द्वितीयप्रहरे पल्ल्या विरुतेन अभिमतार्थसिद्धिः स्यात् तृतीययामे पल्ल्या विरुतेन युवत्यवाप्तिर्भवति तुर्ययामे पल्ल्याः विरुतेन अर्थ हानिः स्यात् ४ आद्येइति दिनस्याद्ये प्रथमे प्रहरेऽग्निदिशि पल्ल्याविरुतेन प्रमीतवार्ता मृतवार्तास्यात् द्वितीयप्रहरे मिष्टान्नलाभः स्यात् अपराह्णे तृतीययामे गृहगोधिकायाः रुतेन जल्पितेन वसुनो धनस्य लाभस्स्यात् ५ सुखमिति दिनांते दिनावसाने पल्ल्याः विरुतेन

॥ भाषा ॥

न जाननो ओर भोजन करती समयमें बोले तो राजाको आगमन जाननो ॥३॥ निधानेति॥ ओर रात्रीके प्रथमप्रहरमें बोले तो द्रव्यको लाभ होय दूसरे प्रहरमें पल्ली बोले तो वांछित अर्थकी प्राप्ती होय तीसरे प्रहरमें बोले तो स्त्रीकी प्राप्ती होय चोथे प्रहरमें बोले तो अर्थकी हानी होय ॥४॥ आद्यइति ॥ दिनके प्रथम प्रहरमें अग्निकोणमें पल्ली बोले तो मरेकी वार्ता होय दूसरे प्रहरमें अग्निकोणमें बोले तो मिष्टान्नको लाभ होय तीसरे प्रहरमें बोले तो धनको लाभ होय ॥५॥ सुखमिति॥ चोथे प्रहरमें बोले तो सुख होय भोजनकी समें बोले तो वांछित अन्नको लाभ

स्यादग्निभीतिः प्रहरे द्वितीये यामेतृतीये द्रविणस्य
लाभः ६ चतुर्थयामे दिशिपावकस्य कृतस्वरः किं
चिदपूर्वरूपं नैमित्तिकानामिह कुड्यमत्स्यः कुतू
हलं दर्शयाति क्षणेन ७ प्रभातकाले दिशि दक्षिण
स्यां कार्यंशुभं स्याद्विरुतेन पल्ल्याः बंध्वागमःस्या
त् प्रहरे दिनस्य मध्यं दिने पण्यसमागमः स्यात् ८

॥ टीका ॥

सुखं भवति आहारकाले अभिमतान्नलाभः स्यात् द्वितीये प्रहरे अग्निभीतिः स्यात् तथा तृतीये यामे द्रविणस्य धनस्य लाभः स्यात् ६ चतुर्थयामेइति चतुर्थयामे तुर्यप्रहरे पावकस्य दिशि आग्नेय्यां कृतस्वरः कुड्यमत्स्यः नैमित्तिकानि किंचिदपूर्व रूपं कुतूहलं क्षणेनदर्शयति माणिक्याभित्तिकापल्ली कुड्यमत्स्योगृहोलिका गोधिका गोलिके गृहादिति हैमः ७ प्रभातकालेइति प्रभातकाले दक्षिणस्यां दिशि पल्ल्याविरुतेन कार्यंशुभंस्यात् प्रहरे दिनस्य प्रथम प्रहरे बंध्वागमः बंधूनां गोत्रिणां आगमनं स्यात् मध्यं दिने मध्याह्ने पल्ल्याविरुतेन पण्यसमागमः स्यात् पणितव्यंतुविक्रेयंपण्यंसत्यापनंपुनरितिरितिहैमः ८

॥ भाषा ॥

होय ओर रात्रीके दूसरे प्रहरमें या दूसरे प्रहर तांई बोले तो अग्नीको भय होय तीसरे प्रहरमें बोले तो धनको लाभ होय ॥ ६ ॥ चतुर्थयामइति ॥ रात्रीके चोथे प्रहरमें अग्निकोणमें बोले तो कोई निमित्तसूं अपूर्व आश्चर्य दीखे ॥ ७ ॥ प्रभातेति ॥ प्रभातकालमें दक्षिण दिशामें पल्ली बोले तो शुभ कार्य होय दिनके प्रथम प्रहरमें बोले तो बंधू जननको आगमन होय दूसरे प्रहरमें बोले तो व्यवहारसूं विक्रयके योग्यवस्तूको समागम होय ॥ ८ ॥

योषापराह्णे समुपैति कापि दिनावसाने परदारसंगः
आहारकाले सुचिरंगतस्य स्यात् क्षेमवार्ता प्रियबां-
धवस्य ९ यामे द्वितीये स्वजनैर्विरोधं तृतीययामे
द्रविणस्य लाभं कृतस्वरो जल्पति कुड्यमत्स्यो यामे
चतुर्थे कलहं महांतं १० पल्ली दिनादौ दिशि राक्षसा
नां कृतस्वरा शंसति कार्यसिद्धिम् विप्रागमं प्राक्तन
यामभागे दूतागमं चापि दिनस्य मध्ये ११

॥ टीका ॥

योषेति अपराह्णे तृतीयप्रहरे कापि योषा स्त्री समुपैति दिनावसाने परदारसंगः स्यात् आहारकाले सुचिरं गतस्य प्रियबांधवस्य क्षेमवार्ता कुशलवृत्तिः स्यात् ९ यामेइति द्वितीये रजन्याः यामे स्वजनैर्विरोधं-जल्पति तृतीययामे द्रविणस्य लाभं जल्पति चतुर्थे यामे कृतस्वरः कुड्यमत्स्यः महांतं कलहं जल्पति १० पल्लीति राक्षसानां दिशि नैर्ऋत्यकोणे दिनादौ प्रभाते कृतस्वरा पल्ली कार्यसिद्धिं शंसति प्राक्तनयामभागे प्रथमप्रहरे पल्ली कृतरवा विप्रागमं तथा दिनस्य मध्ये दूतागमंच शंसतीत्यस्योभयत्र संबन्धः ११

॥ भाषा ॥

॥ योषेति ॥ तीसरे प्रहरमें बोले तो कोई स्त्री आवे चोथे प्रहरमें दक्षिण दिशामें बोले तो पराई स्त्रीको संग होय भोजनके समयमें दक्षिणमें बोले तो बोहोत दिनके गये बंधूकी कुशल वार्ता होय ॥ ९ ॥ यामइति ॥ रात्रीके दूसरे प्रहरमें वा दूसरे प्रहरतक दक्षिणमें बोले तो स्वजन जनन करकें विरोध होय तीसरे प्रहरमें बोले तो धनको लाभ होय चोथे प्रहरमें बोले तो महान् कलह होय ॥ १० ॥ पल्लीति ॥ प्रभातकालमें नैर्ऋत्यकोणमें पल्ली बोले तो कार्यकी सिद्धी जाननो प्रथम प्रहरमें नैर्ऋत्यमें बोले तो ब्राह्मणको आगमन होय दूसरे प्रहरमें बोले तो दूतको आगमन जाननो ॥ ११ ॥

रक्षां तृतीयेप्रहरे दिनस्य दिनावसानेच विशेषवार्त्तां
प्रस्वापकाले कलहं रटंती यामेच पांथागमनं ब्रवीति
१२ द्वितीययामे रुधिरप्रपातो मृत्युस्तृतीये प्रहरे
निशायाः व्याधिश्चतुर्थे दिशि यातु धान्यां कृतस्व
रायां गृहगोधिकायाम् १३ प्रभातकाले ककुभि
प्रतीच्या माचार्यवर्यः समुपेत्यपूर्वः शांतिर्दिन-
स्य प्रहरप्रदेशे पल्लीरुते मध्यदिनेऽर्थहानिः १४

॥ टीका ॥

रक्षामिति दिनस्य तृतीये प्रहरे रटंती पल्ली रक्षां ब्रवीति च पुनरर्थे दिनावसाने रटंती विशेषवार्त्तां ब्रवीति प्रस्वापकाले रटंती कलहं ब्रवीति तथा निशायाः आद्ययामे पांथागमं गतस्यागमनं ब्रवीतीत्यर्थः १२ द्वितीयेति निशायाः द्वितीये यामे गृहगोधिकायां कृतस्वरायां रुधिरप्रपातः स्यात् तृतीयप्रहरे कृतस्वरायां पल्ल्यां मृत्युर्मरणं स्यात् चतुर्थे प्रहरे कृतस्वरायां गृहगोधिकायां व्याधिस्यात् इति प्रत्येकं संबध्यते १३ प्रभातकालेइति प्रभातकाले प्रतीच्यां पश्चिमायां ककुभि दिशि पल्लीरुते अपूर्वः आचार्यवर्यः समुपैति दिनस्य आद्यप्रहरेप्रदेशे

॥ भाषा ॥

॥ रक्षामिति ॥ दिनके तीसरे प्रहरमें नैर्ऋत्यमें वोले तो रक्षा जानंनी चोथे प्रहरमें वोले तो विशेष वार्ता होय सोवती समयमें वोले तो कलह होय और रात्रीके प्रथम प्रहरमें नैर्ऋत्य कोणमें वोले तो गये पुरुषको आगमन होय ॥ १२॥ द्वितीयेति॥ रात्रीके दूसरे प्रहरमें नैर्ऋत्यमें वोले तो रुधिरको पात होय तीसरे प्रहरमें नैर्ऋत्यमें वोले तो मृत्यू होय चोथे प्रहरमें नैर्ऋत्य कोणमें वोले तो व्याधी होय ॥ १३ ॥ प्रभातेति॥ प्रभातकालमें पश्चिम दिशामें पल्ली वोले तो अपूर्व आचार्यनमें श्रेष्ठ आमें दिनके प्रथम प्रहरमें पश्चिममें वोले तो शांती होय दूसरे प्रहरमें पश्चि

आयाति रौद्रः पुरुषोपराह्णे कुमारिकाभ्येति विका
लकाले भुजिक्रियायां नृपतिप्रसादः पल्लीरुते व
ह्निभयं प्रदोषे १५ यामे द्वितीये पृथिवीशवार्ता
निधानलाभः प्रहरे तृतीये स्यात्कुडयमत्स्ये र
टति प्रतीच्यां निशावसानेवपुषोवसानम् १६

॥ टीका ॥

शांति र्भवति मध्यादिने पल्लीरुतेऽर्थहानिः स्यात् १४ आयातीति अपराह्णे पल्लीरुते रौद्रः पुरुषः आयाति विकालकालेच पल्लीरुते कुमारिकाभ्येति दिनावसानमुत्सूरो विकालशबली अपीतिर्हैमः तथा भुजिक्रियायां भोजनकाले पल्लीरुते नृपतिप्रसादः स्यात् प्रदोषे रजनीमुखे पल्लीरुते वह्निभयं भवति प्रदोष प्रथमप्रहरे रजन्याइत्यर्थः प्रदोषोयामिनीमुखमिति हैमः १५ यामेइति निशाया द्वितीये यामे कुडयमत्स्ये प्रतीच्यां रटति सति पृथिवीशवार्तास्यात् तथा तृतीये प्रहरे कुडयमत्स्ये पश्चिमायां रटति निधानलाभः स्यात् कुडयमत्स्ये दिनावसाने प्रतीच्यांरटत्यांसत्यां वपुषः अवसानं विनाशः स्यात् १६

॥ भाषा ॥

ममें बोले तो अर्थकी हानी होय ॥१४॥ आयातीति ॥ तीसरे प्रहरमें पश्चिममें बोले तो कोई क्रूर पुरुष आवे चोथे प्रहरमें पश्चिममें बोले तो कुमारिका आवे भोजन कालमें पश्चिममें बोले तो राजाको अनुग्रह होय प्रदोषकालमें पश्चिममें बोले तो अग्नीको भय होय प्रदोष नाम रात्रीके प्रथम प्रहरकोई है ॥१५॥ ॥यामेइति॥ रात्रीके दूसरे प्रहरमें पश्चिममें बोले तो राजाकी वार्ता होय और तीसरे प्रहरमे पश्चिममें बोले तो धनको लाभ होय चोथे प्रहरमें पश्चिममें बोले तो देहको नाश होय ॥१६॥ ॥७॥

स्याच्चोरवार्ता दिशि मारुतस्य रुतैः प्रभाते गृहगो-
धिकायाः अभ्येति भृत्यः प्रहरे प्रवृत्ते मध्यंदिने
भूपतिरभ्युपैति १७ विद्वान्समभ्येत्यपराह्नकाले
विघ्नात्परं दूतउपैति सायं वृद्धिः प्रदोषे प्रहरे द्विती
ये सिद्ध्यत्यभीष्टं रटितेन पल्ल्याः १८ यामे तृती
ये नियतं निशायाः शुभावहा काप्युपयाति वार्त्ता
निशावसानेभिमतार्थलाभः स्यात् कुड्यमत्स्या
रटितेन पुंसाम् १९ ॥ छ ॥

॥ टीका ॥

स्यादिति प्रभाते प्रगे मारुतस्य दिशि वायुकोणे गृहगोधिकायाः रुतैः शब्दैः चौरवार्तास्यात् तथा प्रहरे प्रवृत्ते मारुतस्यदिशि गृहगोधिकायाः रुतैर्भृत्यः सेवकः अभ्येति समायाति मध्यं दिने मारुतस्य दिशि गृहगोधिकायारुतैः भूपतिरभ्युपैति १७ विद्वानिति अपराह्नकाले तृतीयप्रहरे मारुतस्य दिशि पल्ल्या रटितेन विद्वान् कश्चित्पंडितः समभ्येति सायं संध्यायां मारुतस्य दिशि पल्ल्या रटितेन विघ्नात्परं विघ्नानंतरं दूतः उपैति आगच्छति प्रदोषे मारुतदिशि पल्ल्यारटितेन वृद्धिर्भवति रजन्याः प्रहरे द्वितीये मारुतदिशि पल्ल्यारटितेन अभीष्टं सिद्ध्यति १८ यामेइति

॥ भाषा ॥

॥स्यादिति॥ प्रभातकालमें वायुकोणमें पल्ली बोले तो चौरकी वार्ता होय दिनके प्रथमप्रहरमें वायुकोणमें बोले तो चाकर सेवक आवै दूसरे प्रहरमें मारुतकोणमें बोले तो राजा आवै ॥१७॥ विद्वानिति ॥ तीसरे प्रहरमें वायव्य दिशामें बोले तो कोई पंडित विद्वान् आवे सायं संध्यामें वायव्यकोणमें बोले तो पहलें विघ्न होय पीछैं कोई दूत आवे और रात्रीके प्रथम प्रहरमें वायव्यकोणमें बोले तो वृद्धी होय रात्रीके दूसरे प्रहरमें वायव्य कोणमें बोले तो वांछित सिद्धी होय ॥१८॥ यामेइति ॥ रात्रीके तीसरे प्रह-

दिश्युत्तरस्यामुदिते दिनेशे पल्ली रटंती द्रविणागमाय
मित्रागमाय प्रथमे च यामे हुताशभीत्यै दिवसस्य म-
ध्ये २० अथोपराह्णेभिमतोभ्युपैति प्रियोजनो
भ्येति च वासरांते निशामुखे शिष्टसमागमः स्या
द्यामे कलिः स्याद्विरुतेन पल्ल्याः २१

॥ टीका ॥

निशायाः तृतीये यामे मारुतदिशि पल्ल्या रटितेन शुभावहा नियतं कापि वार्ता उपयाति निशावसाने मारुतदिशि पुनः कुड्यमस्त्यारटितेन - पुंसामभिमतार्थलाभः स्यात् १९ दिशीति उदिते दिनेशे उत्तरस्यां दिशि पल्ली रटंती द्रविणागमाय भवति प्रथमेच यामे उत्तरस्यां रटंती पल्ली मित्रागमाय स्यात् तथा दिवसस्यमध्ये मध्याह्नकाले उत्तरस्यां रटंती पल्ली हुताशभीत्यै अग्निभयाय भवति २० अथेति अथ अपराह्णे तृतीयप्रहरे उत्तरस्यां पल्ल्याः विरुतेन अभिमतः अभ्युपैति वासरांते च सायमुत्तरस्यां दिशि पल्ल्या विरुतेन प्रियो जनः अभ्युपैति तथा निशामुखे प्रदोषे उत्तरस्यां पल्ल्या विरुतेन शिष्टसमागमः स्यात् निशायाः आद्ये यामे उत्तरस्यां पल्ल्याः विरुतेन कलिः स्यात् २१

॥ भाषा ॥

रमें वायव्यकोणमें बोले तो कोई शुभकी करनेवाली वार्ता आवे चौथे प्रहरमें वायव्य कोणमें बोले तो पुरुषनकूं वांछितफलको लाभ होय ॥१९॥ दिशीति॥ सूर्यके उदय समयमें पल्ली उत्तरदिशामें बोले तो द्रव्यको आगम होय दिनके प्रथम प्रहरमें उत्तरमें पल्ली बोले तो मित्रको आगमन होय दूसरे प्रहरमें उत्तरमें बोले तो अग्नीको भय होय ॥२०॥ अथेति॥ तीसरे प्रहरमें उत्तरमें बोले तो वांछित पुरुष आवे चौथे प्रहरमें उत्तरमें बोले तो प्यारो जन आवे और प्रदोषसमयमें उत्तरमें बोले तो उत्तम जनको आगमन होय रात्रीके प्रथम प्रहरमें उत्तरमें बोले तो कलह होय ॥२१॥ ॥छ॥

निधानलाभः प्रहरे द्वितीये स्याच्चौरभीतिः प्रहरे तृतीये निशावसानेपिच भाषमाणे स्यात्कुड्यमत्स्ये विपुलासमृद्धिः २२ प्रातर्दिशीशाननिषेवितायां पल्लीरुतैः सिद्ध्यति चिंतितोर्थः दिनाद्ययामे स्वजनोभ्युपैति वृद्धिर्भवेद्वासरमध्यभागे २३ रक्षापराह्णेस्तमये भ्युपैति कन्यार्थलाभो भ्यवहारकाले वृद्धिस्तथाद्यप्रहरेनिशायाः कन्यागमःस्यात्प्रहरेद्वितीये २४

॥ टीका ॥

निधानेति निशायाः प्रहरे द्वितीये उत्तरस्यां कुड्यमत्स्ये भाषमाणे निधानलाभः स्यात् निशायाः प्रहरे तृतीये उत्तरस्यां कुड्यमत्स्ये भाषमाणेचौरभीतिः स्यात् निशावसानेपि च उत्तरस्यां कुड्यमत्स्ये भाषमाणे विपुलासमृद्धिः स्यात् २२ प्रातरिति प्रातः प्रभाते ईशाननिषेवितायां दिशि ईशान्यां पल्लीरुतैः चिंतितोऽर्थः सिद्ध्यति तथा दिनाद्ययामे ईशान्यां पल्लीरुतैः स्वजनः अभ्युपैति वासरमध्यभागे मध्याह्ने देशेपल्लीरुतेर्वृद्धिर्भवेत् २३ रक्षेति अपराह्णे ईशान्यां पल्लीरुतैः रक्षास्यात् अस्तमये सायं ईशान्यां पल्लीरुतैः कन्या अभ्युपैति अभ्य-

॥ भाषा ॥

॥ निधानेति ॥ रात्रीके दूसरे प्रहरमें उत्तरमें बोले तो धनको लाभ होय रात्रीके तीसरें प्रहरमें उत्तरमें बोले तो चौरको भय होय चोथे प्रहरमें उत्तरमें बोले तो बोहोत समृद्धी होय ॥ २२ ॥ प्रातरिति ॥ प्रभात कालमें ईशान दिशामें पल्ली बोले तो चिंतितअर्थ सिद्ध होय दिनके प्रथम प्रहरमें ईशानमें बोले तो स्वजन जन आवे दूसरेप्रहरमें ईशानमें बोले तो वृद्धी होय ॥ २३ ॥ रक्षेति ॥ तीसरे प्रहरमें ईशानमें बोले तो रक्षा होय चोथे प्रहरमें ईशानमें बोले तो कन्या आवे भोजनसमयमें बोले तो अर्थको लाभ होय और रात्रीके प्रथम प्रहरमें ईशानमें बोले तो वृद्धी होय रात्रीके दूसरे प्रह-

भयं तृतीये प्रहरे निशांते रौद्रं भवत्या रुदितेन पल्ल्याः
ब्रह्मप्रदेशेभ्युदिते दिनेशे नरेशवार्त्ताश्रवणं भणंति
२५ ब्रह्मप्रदेशेऽहनि पूर्वयामे स्याद्दूतवार्त्ताकरणा
य पल्ल्याः दिनस्य मध्ये कलहाय नादः स्यादन्न
लाभाय तथापराह्णे २६ विप्रागमायाभ्यवहार
काले प्रनष्टलाभायच पूर्वयामे

॥ टीका ॥

वहारकाले ईशान्यां दिशि पल्लीरुतैः अर्थलाभः स्यात् तथा निशायाः आद्ये प्रहरे ईशान्यां पल्लीरुतैः वृद्धिः स्यात् द्वितीये प्रहरे ईशान्यां पल्लीरुतैः कन्यागमः कन्याया आगमनं स्यात् २४ भयमिति निशायास्तृतीये प्रहरे ईशान्यां पल्ल्याः आरुदितेन भयं भवति निशांते ईशान्यां पल्ल्याः आरुदितेन रौद्रं भवति तथाअभ्युदिते दिनेशे ब्रह्मप्रदेशे मूर्द्धनि पल्ल्याः रुदितेन नरेशवार्ताश्रवणं भणंति कथयंति २५ ब्रह्मप्रदेशेऽइति अहनि पूर्व यामे ब्रह्मप्रदेशे मूर्द्धनि पल्ल्याः नादः दूतवार्ताकरणायभवति तथा दिनस्य मध्ये मूर्द्धनि पल्ल्या नादः कलहाय भवति तथा अपराह्णे मूर्द्धनि पल्ल्या नादः अन्नलाभाय स्यात् २६ विप्रेति ब्रह्मप्रदेशे अभ्यवहारकाले भोजनकाले पल्ल्यानादः विप्रागमा-

॥ भाषा ॥

रमें ईशानमें बोले तो कन्याको आगमन होय ॥ २४ ॥ भयमिति ॥ रात्रीके तीसरे प्रहरमें ईशानमें बोले तो भय होय रात्रीके चोथे प्रहरमें ईशानमें बोले तो रौद्रभयानक कछू होय सूर्योदयके समयमें मस्तकके ऊपर पल्ली बोले तो राजाकी वार्ताश्रवण होय ॥ २५ ॥ ब्रह्मेति ॥ दिनके प्रथम प्रहरमें मस्तकके ऊपर पल्ली बोले तो दूतकी वार्ता होय दिनके दूसरे प्रहरमें मस्तकपे पल्ली बोले तो कलह होय तीसरे प्रहरमें पल्ली बोले तो अन्नको लाभ होय ॥ २६ ॥ विप्रेति ॥ भोजन समयमें मस्तकके ऊपर पल्ली बोले तो

मध्येच भूपस्मरणाय रात्रे रुल्काप्रपाताय तृतीय यामे २७ ब्रह्मप्रदेशे प्रहरे चतुर्थे शुभाय शब्दो गृहगोधिकायाः शुभावहा शांतदिशि प्रशांता दीप्ता प्रदीप्ते शुभदा न पल्ली २८ समागमात्संगममाह पल्ली युद्धेन युद्धं विरहं वियोगात् यच्छत्यवश्यं सुरतप्रसक्ता पुंसां वरस्त्रीरतकेलिलाभं २९

॥ टीका ॥

य स्यात् रजन्याः पूर्वयामे मूर्द्धनि पल्ल्याः नादः प्रनष्टलाभाय स्यात् रात्रेः मध्ययामे मूर्द्धि पल्लीनादः भूपस्मरणाय भवति तृतीये यामे ब्रह्मप्रदेशे पल्लीनादः उल्काप्रपाताय स्यात् २७ ब्रह्मेति चतुर्थे प्रहरे ब्रह्मप्रदेशे गृहगोधिकायाः शब्दः शुभाय स्यात् शांतदिशि प्रशांता पल्ली शुभावहा भवति प्रदीप्ते दीप्ता पल्ली न शुभदा स्यात् २८ समागमादिति समागमात्परस्पर संगमात् पल्ली संगममाह युद्धेन युद्धं वियोगात् विरहं आहेति संबंधः सुरतप्रसक्ता मैथुनासक्ता पुंसां वरस्त्रीरतकेलिलाभं वरस्त्रियः प्रधानयोषितः रतकेलिः निधुवनक्रीडा तस्याः लाभं अवश्यं यच्छति २९

॥ भाषा ॥

ब्राह्मणको आगमन होय ओर रात्रीके प्रथम प्रहरमें मस्तकपे बोले तो नष्टहुयेको लाभ होय रात्रीके दूसरे प्रहरमें बोले तो राजाको स्मरण होय रात्रीके तीसरे प्रहरमें मस्तकके ऊपर बोले तो उल्कापात होय॥ २७॥ ब्रह्मेति ॥ रात्रीके चोथे प्रहरमें मस्तकके ऊपर पल्ली बोले तो शुभ होय ओर शांत दिशामें प्रशांतपल्ली होय तो शुभ करे ओर दीप्त दिशामें दीप्त पल्ली होय तो शुभकी देवेवारी नहीं जाननी ॥ २८॥ समागमादिति ॥ जो पल्लीनको परस्पर समागम देखे तो वाकूंवी संगम होय जो युद्ध करती दीखे तो युद्ध होय जो पल्लीको वियोग दीखे वाकूं

वामः प्रयाणे यदि कुड्यमत्स्यः प्रवेशकाले यदि दक्षिणः स्यात् मनोरथादप्यधिकानि तूर्णं सिद्ध्यंति कार्याण्यखिलानि पुंसां ३० पल्लिका दिशति दक्षिणाग्रयोरर्थहानिमशुभं विलोकिता अध्वगस्य शुभलाभदायिनी वीक्षिता भवति पृष्ठवामयोः ३१ उन्नतं समधिरुह्यदक्षिणं वामतो वतरति प्रियेषिणी पल्लिका यदि तदा प्रवासिभिर्लभ्यते - झटिति राज्यमक्षयम् ३२ ॥ ६॥

॥ टीका ॥

वामइति यदि कुड्यमत्स्यप्रयाणे वामः स्यात् प्रवेशकाले च यदि दक्षिणः स्यात् तदा पुंसां मनोरथादप्यधिकानि कार्याणि अखिलानि समस्तानि तूर्णं शीघ्रं सिद्ध्यंति ३० पल्लीति पल्लिका दक्षिणाग्रयोः दक्षिणः अनुलोमप्रवेशः अग्रं पुरप्रदेशः अनयोर्द्वद्वः तयोर्विलोकिता दृष्टा अर्थहानिं अशुभं च दिशति गंतुरिति शेषः पृष्ठवामयोः वीक्षिता अध्वगस्य शुभलाभदायिनी भवति ३१ उन्नतमिति यदि पल्लिका दक्षिणंउन्नतं समधिरुह्य प्रियेषिणी वामतः वामदिग्विभागे- अवतरति तदा प्रवासिभिः झटिति शीघ्रं राज्यमक्षयमविनाशि लभ्यते ३२

॥ भाषा ॥

वी विरह होय जो पल्ली संभोगमें आसक्त होय तो पुरुषनकूं श्रेष्ठ स्त्रीसूं रतक्रीडा प्राप्त होय ॥ २९॥ वामइति॥ जो पल्ली गमन समयमें बांई होय प्रवेशसमयमें जेमनें भागमें होय तो पुरुषनकूं मनोरथसूंवी अधिक समस्त कार्यशीघ्र सिद्ध होंय॥ ३०॥ पल्लीति॥ गमनकर्त्ताकूं पल्ली जेमने भागमें वा अग्रभागमें दीखे तो अर्थकी हानि ओर अशुभ करै जो मार्गीकूं पीठपीछें वा वामभागमें दीखे तो शुभ देवै ॥ ३१ ॥ उन्नतमिति ॥ पल्ली गमन कर्त्ताकूं जेम-

॥ टीका ॥

अस्यावारादि स्पर्शनविचारस्तु ग्रंथांतरादेव ज्ञेयः तद्यथा अथातः संप्रवक्ष्यामि शृणु शौनक यत्नतः पल्लीप्रपतनंचैव शरटस्याधिरोहणं १ प्रतिपद्रोगसंप्राप्ति र्द्वितीयायां तथैवच तृतीयायां भवेल्लाभश्चतुर्थ्यां रोगएवच २ पंचम्यांचैव षष्ठ्यांच सप्तम्यांस्याद्धनागमः अष्टम्यां च नवम्यांच दशम्यां मरणं ध्रुवं ३ एकादशी पुत्रलाभो द्वादश्यां धनसंपदः त्रयोदश्यां भवेद्धानी रत्नहानिः शिवाह्नि ४ पौर्णमास्याममावास्यां बंधुहानिर्धनक्षयः सोमशुक्रबुधगुरुवाराः शुभकराः सदा ५ इति तिथिवारफलम् अश्विनी क्षेममारोग्यं भरणीरोगमेवच कृत्तिकाधनहानिंच संपदोरोहिणीमृगे ६

॥ भाषा ॥

नी दिशामें उंची चढनी दीखे तो प्रियकरे वामभागमें नीचें उतरती दीखे तो गमनकरवेवाले पुरुषकूं शीघ्रही अक्षय राज्य प्राप्त होय ॥३२॥ ॥ अब पल्लीके वारके तिथीके अंगके नक्षत्रके लग्नके स्थानके फल ओर ग्रंथसूं कहेंहें ॥ सूतजी शौनकजीसूं कहेंहें ॥ शौनक पल्ली जो छपकली वा छाप या नामसूं प्रसिद्ध है याको पडनो ओर शरट जो किरकेंटा ताको चढनो इनको फल हम कहेंहें सो तुम सुनो ॥१॥ पडवामें पल्लीको पतन रोग करे दूजमें पल्लीको पतन रोग करे तीजमे पल्लीको पतन लाभ करे चोथमें पल्लीको पतन रोग करे ॥२॥ पंचमीमें छट्टमें सप्तमीमें पल्लीको पतन धनको आगमन करे अष्टमी नोंमी दशामी इनमें पल्लीको पतन मरण करे॥ ३॥ ग्यारसमें पल्लीको पतन पुत्रलाभ करे द्वादशीमें पल्लीको पतन धनसंपदा करे त्रयोदशीमें पल्लीको पतन हानी करे चोदसमें पल्लीको पतन रत्नकी हानी करे ॥४॥ पौर्णमासी अमावास्यामें पल्लीको पतन बंधूनकी हानि धनको क्षय करे ओर चंद्रवार शुक्रवार बुधवार गुरुवार येचारवार शुभ करवेवाले सदां जाननें चाहिये ॥५॥ इति तिथिवारफलम् ॥ अथ नक्षत्रफलम् ॥ अश्विनीमें पल्ली पडे तो

॥ टीका ॥

आर्द्रामृत्युभयंकुर्यात्पुष्यंचैवपुनर्वसुः धनलाभं प्रकुरुते सार्पेचमरणंध्रुवं ७ मघाक्षेमकरीप्रोक्ता तथापूर्वोत्तरासदा हस्तचित्राभवेन्नित्यंस्वातिःशुभकरापुनः ८ विशाखाधननाशाय मैत्र्यांस्याद्राज्यमेवच ज्येष्ठाचमृत्यवेप्रोक्ता मूलंचाषाढिकाद्वयं ९ मृत्युंकराधनिष्ठाचश्रवणे राज्यमेवच शतभिषा तथाप्रोक्तापूर्वाभाद्रपदोत्तरा १० कांचनंलभते पौष्ण आयुरारोग्यमेवच पल्लीप्रपतनंयस्य शरटस्यापि रोहणि ११ इतिनक्षत्रफलं॰ लग्नेमेषेअशुभं यस्य वृषेचपशुनाशनं मिथुनेरोगसंप्राप्तिः कर्कीहैहयउच्यते ११ सिंहेसत्पुत्रलाभश्च कन्यालग्नेधनक्षयः तूलेचालौधनुष्युक्तो वस्त्रलाभोध्रुवंनृणां १२ मकरेधनलाभंचकुंभेहानिर्विनिर्दिशेत् मीनेचशोकसंतापः पल्लीप्रपाततोभवेत् १४ इतिलग्नफ॰

॥ भाषा ॥

क्षेम आरोग्य होय भरणीमें पडे तो रोग करे कृत्तिकामें पडे तो धनकी हानी करे रोहिणी मृगशिर इनमें पडे तो संपदा होय ॥६॥ आर्द्रामें पडे तो मृत्यू भय करे पुष्य पुनर्वसु इनमें पडे तो धनको लाभ करे अश्लेषामें पडे तो मरण निश्चय होय ॥७॥ मघा पूर्वा फाल्गुनी उत्तराफाल्गुनी इनमें पडे तो कल्याण करे और हस्त चित्रा स्वाति इनमें पडे तो शुभ करे ॥८ विशाखामें पडे तो धनको नाश करे अनुराधामें पडे तो राज्य होय ज्येष्ठामें पडे तो मृत्यू करै मूल पूर्वाषाढ उत्तराषाढ इनमें पडे तो मृत्यू करे ॥९॥ धनिष्ठामें पडे तो मृत्यू करे श्रवणमें पडे तो और शतभिषा पूर्वाभाद्रपद उत्तराभाद्रपद इनमें पडे तो राज्य होय ॥१० रेवती नक्षत्रमें पल्ली पडे तो आयू आरोग्य सुवर्ण इनको लाभ होय ॥११॥ इतिनक्षत्र फलं ॥ अथ लग्नफलं ॥ मेष लग्नमें पल्ली पडे तो अशुभ होय वृषलग्नमें पडे तो पशूको नाश होय मिथुन लग्नमें पडे तो रोगकी प्राप्ती होय कर्कलग्नमें पडे तो हैहयको लाभ होय ॥१२ ॥ सिंह लग्नमें पल्ली पडे तो सत्पुत्रको लाभ होय कन्या लग्नमें पडे तो धनको क्षय होय तुला वृश्चिक धन इन लग्ननमें पडे तो धनको लाभ होय ॥१३॥ मकरमें पल्ली पडे तो धन-

॥ टीका ॥

शीर्षेराज्यंश्रियोवाप्तिर्भालऐश्वर्यवर्द्धनं कर्णयोर्भूषणप्राप्तिर्नेत्रयोर्भयदर्शनं १५ नासिकायांतुसौभाग्यं वक्त्रेमिष्टान्नभोजनं कंठेनित्यंप्रियावाप्तिःस्कंधयोर्विजयीभवेत् १६ धनलाभोबाहुयुग्मे करयोस्तुव्ययस्तथा स्तनयुग्मेतु सौभाग्यं हृदिसौख्यस्य वर्धनं १७ कुक्षौसत्पुत्रलाभश्च नाभौसौख्यंप्रवर्द्धनं पृष्ठेनित्यंमहालाभः पार्श्वयोर्बन्धुदर्शनम् १८ कटिद्वयोर्वस्त्रलाभोगुह्यमित्रसमागमः जंघयोरर्थहानिःस्याद्गुदेरोगभयं भवेत् १९ ऊरुयुग्मेवाहनाप्तिर्जानुयुग्मेऽर्थसंग्रहः नीरोगीजंघयोश्चैवपादयोर्भ्रमणं भवेत् २० इतिस्थानफलं

॥ भाषा ॥

लाभ होय कुंभलग्नमें पडे तो हानी होय और मीन लग्नमें पल्ली पडे तो शोक संताप होय ॥१४॥ इतिलग्नफलं ॥ अथांगस्थानफलं ॥ मस्तकपे पल्ली पडे तो राज्य और श्री प्राप्ती होय ललाटमें पडे तो ऐश्वर्यकी वृद्धी होय कर्णोंनपे पडे तो भूषणनकी प्राप्ती होय नेत्रनमें पडे तो भयकी प्राप्ती होय ॥१५॥ नासिकापे पडे तो सौभाग्य होय सुखपे पडे तो मिष्टान्नभोजन होय कंठपे पडे तो नित्य प्रियकी प्राप्ती होय कंधापे पडे तो विजय होय ॥ १६॥ दोनो भुजानपे पडे तो धनको लाभ होय हाथपे पडे तो खरच बोहोत होय दोनो स्तननपे पडे तो सौभाग्य होय हृदयपे पडे तो सौख्य बढावे ॥१७॥ कूखपे पडे तो सत्पुत्रको लाभ होय नाभीपे पडे तो सौख्य बढावे पीठपे पडे तो महान् लाभ होय दोनो पसवाडेनमें पडे तो बंधूकों दर्शन होय ॥१८॥ दोनो कटीभागपे पडे तो वस्त्रको लाभ होय गुह्यस्थानपे पडे तो मित्रको समागम होय जंघानपे पडे तो अर्थकी हानी होय गुदापे पडे तो रोगभय होय ॥१९॥ दोनो घोंटूनपे पडे तो वाहनकी प्राप्ती होय जानू जो पीडरी तापे पडे तो धनको संग्रह होय जंघानके ऊपर पडे तो नीरोगी होय पामनके ऊपर पडे तो भ्रमण करावै ॥२०॥ इति शरीरस्थान फलम् ॥ ॥७॥

॥ टीका ॥

पुहंचकोपरि पतति राजमुद्रालाभं दिशति १० कट्याउपरिचढतीवस्त्रलाभं ब्रूते ११ उत्तमांगेनाभौ पतिता पुत्रलाभमभिधत्ते १२ वामजंघोपरि पतति पुत्रीस्यात् १३ निद्रामध्ये पतति षण्मासमध्ये मरणं ब्रूते १४ इति शरीरचेष्टा नूतनगृहे प्रविशतां मध्ये आत्मनो मृत्युमाख्याति १ अथवा मृता सती कीटिकावेष्टिता दृश्यमाना कुटुंब रोगं ब्रूते २ द्वितीयया पल्ल्या मिलंती प्रियदर्शनं ब्रूते ३ आत्मनो गृहे प्रविशती बहिर्निःसरंती भयायस्यात् ४ नीचेस्थानके गच्छती राजभयं कथयति ५ गृहे प्रविशतां अग्रे भूय चलंती निर्भयमर्थलाभं ब्रूते ६ निजस्थाने यांती अर्थहानिं ब्रूते ७ जलस्थाने यांती अग्निभयं कथयति ८ इति पल्लीगमनचेष्टाफलं

॥ भाषा ॥

पुंहचके ऊपर पडे तो राजमुद्राको लाभ होय १० कटीके ऊपर पडके चढजाय तो वस्त्रको लाभ करे ११ स्त्रीपुरुषके उत्तम अंगपे पडे तो अथवा नाभीपे पडे तो पुत्रको लाभ होय १२ वांई जंघाके ऊपर पडे तो पुत्री होय १३ जो निद्रामें सूतेके ऊपर पडे तो छै महिनाके मध्यमें मरजाय १४ ॥ इति शरीरचेष्टाफलम् ॥ जो नवीन घरमें प्रवेश करें उनकूं वा घरमें पल्ली दीख जाय तो वो अपनी मृत्यू जाननी ॥ १ अथवा मरी हुई पल्ली च्वेंटी कीडा वाके लिपट रहे होंय वो दीख जाय वा नये घरमें तो कुटुंबकूं रोग जाननो २ जो वा नये घरमें पल्ली दूसरी पल्ली करकें मिलती दीखे तो कोई प्रियको दर्शन जाननो ३ अपने घरमें प्रवेश करकें वहार निकस आवे तो वा अपुन घरमें घुसें वो वहार निकस आवे तो भयके अर्थ जाननो ४ नीचे स्थानपे गमन करती दीखे तो राजभय जाननो ५ घरमें प्रवेश करवेवालेनके अगाडी होयकें चले तो निर्भय अर्थको लाभ होय ६ नीचस्थानमें गमन करे तो अर्थकी हानी करे ७ जलस्थानमें गमन करे तो अग्नीको भय करे ८ इ॰ प॰ ग॰ चे॰

॥ टीका ॥

पल्लीवस्तुसंभालनाय गच्छतां यदि पाषाणोपरि चढती तदा तद्वस्तु पाषाणीभवति १ भित्तौ चढति वस्तु महर्घ्य भवति २ पट्टमेडाउपरि चढती पट्टबंधं कथयति ३ वस्तु अर्पयतां पृष्ठे स्वरंकरोति तदा दायक ग्राहक स्थान भवति वस्तुगोपनाय गच्छतामग्रतः स्वरं करोति तदाभव्यताभवति ४ ग्रामंगच्छतामग्रतः स्वरं करोति तदा भव्या ५ पृष्ठतः स्वरं करोति मरणाय स्यात् ६ वामभागे स्वरंकुर्वती भव्या ७ दक्षिणभागे स्वरं कुर्वति लाभं ब्रूते ८ भयउत्पन्नेऽग्रे स्वरं कुर्वती भयायस्यात् ९ पृष्ठे स्वरं कुर्वती भयं निवारयति १० गृहमध्ये प्रविशतां स्वरं कुर्वती भयं ब्रूते ११ पृष्ठे स्वरं कुर्वती भयं निवारयति १२ पुष्पपत्रफलानि गृह्णतां शृंगारंच कुर्वतां स्वरंतीभव्या १३ चिंतायांपतितानां अग्रे स्वरंती चिंतां वर्द्धयति १४ पृष्ठेस्वरंती चिंतांस्फोटयति१५

॥ भाषा ॥

जो पल्ली वस्तूकूं संभाल करवेकूं जांय उनकूं पाषाणके ऊपर चढती दीखे तो वो वस्तू पाषाणकीसी होय जाय १ जो भींतपे चढती दीखे तो वस्तूमें घी होय २ पट्टासनके ऊपर चढती दीखे तो पट्टबंध करे ३ वस्तू काऊकूं देतें होय वा समें पीठपीछें पल्ली बोले तो देवे लेवेवारे दोनोनकूं शुभ नहीं ४ वस्तूकी रक्षा करवेकूं जाते होंय उनके अगाडी पल्ली बोले तो शुभ जाननो ५ ग्रामकूं जातो होय वाके अगाडी पल्ली बोले तो शुभ जाननी ६ पीठपीछें बोले तो मरणके अर्थ जाननो ७ वामभागमें बोले तो शुभ करे ८ जेमने भागमें बोले तो लाभ करे ९ कोई भय उत्पन्न होय वा समयमें अगाडी बोले तो भय करावे १० पीठपीछें बोले तो भयकूं निवारण करे ११ घरमें प्रवेश करवेवालेकूं बोले तो भय करे १२ पुष्पपत्र फल इनें ग्रहणकरवेवालेनकूं और शृंगार करवेवालेनकूं बोले तो शुभ जाननी १३ चिंतामें पडें होंय उनके अगाडी बोले तो चिंता बढावे १४ पीठपीछें बोले तो चिंताकूं दूर करे१५

॥ टीका ॥

स्नातुं पोतिकायां परिहितायां वामभागे स्वरंती स्त्रीसंगमाख्याति १६ वस्तु अर्पयतां संमुखं स्वरंती अर्पयितुर्भव्यं करोति १७ दक्षिणतः स्वरंती सती अस्य मृतिमाख्याति १८ पृष्ठे स्वरंती स्थिरतकस्य भृतिं ब्रूते १९ गृहद्वारददतां गृहमध्ये स्वरंती निर्भयत्वं ब्रूते २० बहिः स्वरंती अग्निधाटी भयाय स्यात् २१ रात्रौ दीपं विध्याप्रयतां स्वरंती प्रदीपनकं कथयति २२ अर्द्धरात्रे गृहमोभे स्वरंती मध्ये चौरं ज्ञापयति २३ गृहांतः प्रविशतां अग्रे स्वरंती अर्थलाभं कथयति २४ जिमतां भोजनभाजने पतंती अर्थलाभाय भवति इति पल्लीविचारः

पल्लीभुजेपसव्येच मस्तके स्वामिमानदः पतंती कुरुते वामे लाभं हानिकरा करे १ करेच दक्षिणे व्याधिं हयराज्यादिलाभदा पृष्ठे उपद्रवं हंत्युदरे मिष्टान्नदा तु सा २

॥ भाषा ॥

स्नानकरकें पोतिया पहरती समें वामभागमें बोले तो स्त्रीको संगम करावे ॥१६॥ कोई वस्तू देती समयमें सन्मुख बोले तो देवेकूं शुभ जाननो १७ जेमने भागमें बोले तो संतानकी मृत्यु होय १८ पीठपीछें बोले तो मृत्यू करे १९ घरको द्वारो देरहे होंय उनके घरके मध्यमें बोले तो निर्भयता करे २० रात्रीमें दीपक जोडते होंय शब्द करे तो दीप्तता करे २१ अर्द्ध रात्रीमें घरमें बोले तो चौर आवे २२ घरमें प्रवेश करें उनके अगाडी बोले तो अर्थको लाभ करे २३ भोजन करतेनके पात्रमें थालीमें पडे तो धनको लाभ होय २४ ॥ इति पल्लीविचारः ॥ ॥ ६५॥

पल्ली जेमनी भुजापे और मस्तकपे पडे तो स्वामीसूं मान दिवावे जो वाये हाथपे पडे तो लाभको हानी करे १ जेमने हस्तपे पडे तो व्याधी हय राज्यादिकनको लाभ देवै पीठपीछें पडे तो उपद्रवकूं हरे उदरपे पडे तो मिष्टान्न देवै ॥ २॥

॥ टीका ॥

नाभौ पुत्रफलं दत्ते कटौगुह्येच रोगकृत् जानुयुग्मे सुखंस्थानं पादे हानिर्महाभयम् ३ पदांशेतु स्मृतं तज्ज्ञैश्चिंतापदांतगा भवेत् अंगंदक्षिणमारुह्य वामेनोत्तरतिस्फुटं ४ तदाहानिकरीब्रूयाद्यस्य येन तु लाभदा चरणादूर्द्ध्वगीभूय यदारोहति मस्तके ५ प्राज्यं राज्यं तदा दत्ते पल्लीश्वेताविशेषतः चिंचिताभ्यधिकं लाभं स्थिताभोजनभाजने ६ पदांगुलीषु संघातात्तदातु पदवीं वदेत् सर्वमेतत्फलं दत्ते बृहतीनासिकानुगा ७ इतिपल्ली विचारः

इतिश्री शत्रुंजयकरमोचनादि सुकृतकारि महोपाध्यायश्रीभानुचंद्रगणिविरचितायां वसंतराजटीकायां पल्लीविचारे सप्तदशो वर्गः १७

॥ भाषा ॥

नाभीपे पडे तो पुत्रफल देवै कटिपे और गुह्य स्थानपे पडे तो रोग करे दोनोजानूपे पडे तो सुख और स्थान होय पामपे पडे तो हानी और महान् भय होय ३ पामके अग्रभागपे पडे तो चिंता आपदा मृत्यूपे करे जेमने अंगपे चढे वांये अंगमाऊं उतरे तो ४ हानी करे जो वांये अंगमाऊंसूं चढकर जेमने अंगमाऊं सूं उतरे तो लाभ देवे चरणसूं ऊपर मस्तक तांई चढजाय ५ तो वोहोतसो राज्य देवे जो सुपेद पल्ली होय तो विशेष फल करे जो भोजनके पात्रमें गिरपडे तो चिंतमनसूंवी अधिक लाभ करे ६ पामनकी अंगुलीनपे पडे तो समूहसूं मार्ग चलावे जो नासिकाके अनुग होय तो ये समग्र फल देवे ७ इतिश्रीवसंतराजशाकुने भाषाटीकायां विचारिताऽत्र पल्लीविचारोनाम सप्तदशोवर्गः ॥१७॥

अथोब्रुवेश्वानरुतस्यसारं सारंसमस्तेष्वपिशाकुनेषु विस्पृष्टचेष्टंस्वरलक्षणीयंशुभाशुभंप्राक्तनकर्मपाके १ विमर्शकःशाकुनशास्त्रदक्षोविशुद्धबुद्धिःसतताभियुक्तः यथार्थवादीशुचिरिंगितज्ञो भवेदिहाचार्यपदाधिकारी २ श्वाश्वानभल्लूभषणाः कौलेयककपिलजागरूकाश्च मंडलकुक्कुरयक्षाः शुनकःसरमासुतस्याह्वाः ३

॥ टीका ॥

अथेति गृहगोधिकाकथनानंतरं श्वानरुतस्यसारं तत्वं ब्रुवे कीदृक्समस्तेष्वपि शाकुनेषु शकुनशास्त्रेषुसारं प्रधानभूतं येनश्वानरुतेन प्राक्तनकर्मपाके प्राचीनकर्मणां पाकः परिपाकस्तस्मिन् शुभाऽशुभं स्वरलक्षणीयं स्वरेण ज्ञातुंशक्यं स्यात् विस्पृष्टचेष्टं विस्पृष्टाचेष्टायत्र तत्तथा क्वचिद्विशिष्टचेष्टामित्यपिपाठः १ विमर्शकइति इदं पूर्वंव्याख्यातत्वान्नव्याख्यायते २ श्वाश्वानेति एताः सरमासुतस्यशुनः अभिधानानिस्युः श्वाश्वानः भल्लू भषणः एतेषामितरेतरद्वंद्वः कौलेयकः एतेषामपीतरेतरद्वंद्वः मंडलः कुक्कुरः यक्षः एतेषामपिद्वंद्वः शुनकइत्यादयः ३

॥ भाषा ॥

॥ अथेति ॥ पल्लीके शब्दकहेके अनंतर अब श्वानके शब्दको सार कहेहैं स्पष्ट है, चेष्टाजामें एसो येशब्द समस्तशकुनशास्त्रनमें मुख्य है याश्वानके शब्दकरके पुरुष पूर्वजन्मके कर्मनको फल तामें शुभाशुभ सुखपूर्वक जानवेकूं समर्थ होंय हैं ॥१॥ विमशाक इति ॥ शकुनी विचारको करवेवालो होय शकुनशास्त्रमें चतुर होय शुद्धबुद्धी जाकी होय निरंतर योग्य होय यथार्थ वक्ता होय पवित्र होय सबकी चेष्टानकूं जानें शकुनमें आचार्यपदको अधिकारी होय वो शकुन देखे ॥२॥ श्वेति ॥ श्वा १ श्वान २ भल्लू ३ भषण ४ कौलेयक ५ कपिल ६ जागरूक ७ मंडल ८ कुक्कुर ९ यक्ष १० शुनक ११ ये सरमाको बेटा श्वान ताके नामहैं ॥३॥

श्वेताद्विजाः क्षत्रियकाश्चरक्ताः पीताश्चवैश्याअसिताश्चशूद्राः विमिश्रवर्णाः शुनकास्तथेहभवंतिनानाविधकारुसंज्ञाः ४ स्वजातिरूपेणाविशेषतोमी सर्वेसमस्तैरपिवागवेष्याः कौलेयकास्तेषुवदंतिशस्तंकार्येषुसर्वेष्वपिकृष्णवर्णम् ५ आचार्यमानीयशुभेह्निकार्यंपैष्टंश्वयुग्मंशुचिरर्चयित्वा क्षीरेणभोज्यंभषणस्यतुष्ट्यैदद्यात्कुमारीशिशुबांधवेभ्यः ६

॥ टीका ॥

श्वेताइति श्वेताः श्वेतवर्णाः श्वानः द्विजाः ब्राह्मणाभवंति रक्ताः रक्तवर्णाः क्षत्रियकाभवंति पीताः पीतवर्णाः वैश्याः वैश्यजातीया भवंति असिताः कृष्णाः पुनः शूद्राभवंति तथा इहविमिश्रवर्णाः शुनकाः नानाविधकारुसंज्ञाभवंति नानाविधाः कारूणां चित्रकारिणां संज्ञा नामानि येषां ते तथोक्ताः ४ स्वेति समस्तैरपि अमी सर्वे कौलेयकाः स्वजातिरूपेणविशेषतो गवेष्याः तेषुसर्वकुकुरेषु पुनः कृष्णवर्णं श्वानं सर्वेष्वपिकार्येषु शस्तं वदंति ५ आचार्यमिति आचार्यं शकुनशास्त्रज्ञं आनीय शुभेह्निपैष्टं पिष्टस्यगोधूमादिचूर्णस्य इदंपैष्टं श्वयुग्मंश्वानयुग

॥ भाषा ॥

॥ श्वेताइति ॥ श्वेतवर्णके श्वानकी द्विज संज्ञा हे लालवर्णकेकी क्षत्री संज्ञा हे पीतवर्णकेकी वैश्य संज्ञा हे श्यामवर्णकेकी शूद्र संज्ञा है मिलवां वर्णकेकी कारु संज्ञाहे कारु नाम चित्राम करवेवालेको है ॥४॥ स्वेति ॥ सब करकें ये कौलेयक जाती विशेषकरकें ढूंडनो सब श्वाननमें कालो कुत्ता सर्वकार्यनमें विख्यात कहें हें ॥५॥ ॥ आचार्यमिति ॥ शुभ दिन होय वा दिना शकुनशास्त्रके ज्ञाता आचार्यकूं बुलाय कर चून लेकें श्वानको युगल स्त्रीपुरुषरूप करकें पवित्र होय पूजन करकें श्वानकी तुष्टीके लिये क्षीरान्न भोजन कुमारी बालक बांधव इनके अर्थ देवे ॥६॥

सर्वांगकृष्णः परिपूर्णकायः शांतोनिरोगस्तरुणोब
लिष्ठः अवामभागोन्नतपुच्छचेष्टो बिभर्त्तिशूद्रो
नरवविंशतिंयः ७ तंसारमेयं पुरुषोधिवास्य वि
श्वास्य धृत्वास्नपयेद्दिनांते शुक्लांबरस्तांरजनींव्रती
स्याद्यत्नेनकुर्यात्सकलं स मन्त्रम् ८

॥ टीका ॥

लं स्त्रीपुंसलक्षणं कार्यं ततः शुचिः पुमान् तमर्चयित्वा भषणस्य तुष्ट्यै कुमारीशिशुबांधवेभ्यः क्षीरान्नभोज्यं दद्यात् क्वचित् क्षीरेणभोज्यमित्य पिपाठः ६ सर्वेति यः श्वानः नरवविंशतिं बिभर्ति सशूद्रः कथ्यतेइति शेषः कीदृक् सर्वांगकृष्णः देहव्यापिकृष्णवर्णः पुनः कीदृक् परिपूर्णकायः सर्वावयवसंपूर्णः नन्यूनावयवः पुनः शांतः सौम्यप्रकृतिः पुनः निरोगः आमयवर्जितः पुनस्तरुणः उद्गतयौवनः पुनः बलिष्ठः बलयुक्तः पुनः अवामभागोन्नतपुच्छचेष्टः दक्षिणभागे उन्नतीकृतः पुच्छव्यापारः ७ तमिति पुरुषः तं सारमेयं अधिवास्याधिवासनं कृत्वा विश्वास्यविश्वासं समुत्पाद्य करेणधृत्वा गृहीत्वा दिनांते स्नापयेत् स्नानंकारयेत् शुक्लांबरः श्वेतवासाः तांरजनीं व्रतीव्रतयुक्तः स्यात् यत्नेन सकलं सर्वं समंत्रं मंत्रसहितं कुर्यात् ८ अथमंत्रः ॐ नमोभगवते शुनकोत्तमाय

॥ भाषा ॥

॥ सर्वेति ॥ जो श्वान कालो होय न्यून अंग जाको नहोय शांतरूप होय निरोगी होय युवा नहोय बलवान् होय जेमने भागमें ऊंची पूछ करें हुयो होय वीसों नरव जाके होंय वाकूं शूद्र संज्ञक कहें हें ॥ ७ ॥ तमिति ॥ ता श्वानको अधिवासन करनो वामें विश्वास करनो सायंकालकूं श्वानकूं हातसूं स्नान करावनो श्वेत वस्त्र धारण करवा रात्रीमें व्रतयुक्त रहनो यत्नसूं सब या मंत्रसहित करनो ॥ ८ ॥ अथमंत्रः ॥ ॐ नमो भगवते शुनकोत्तमाय महाशकुन गंभीर शब्दाय प्रजापतये ऋतुकालाभिगा

ततःप्रभातेनवगोमयेनत्रिहस्तमात्रं चतुरस्ररूपम्
शुचौमनोज्ञेविजनेविदध्यादिलातलेमंडलकंविशुद्धं ९ पीतःसुरेशःकपिलोहुताशःकृष्णोयमः
श्यामवपुश्चरक्षः शुक्लःप्रचेताहरितःसमीरश्चित्रोधनेशोधवलोमहेशः १० एवंविधाःपद्मदलोदरेषुक्रमेणदिक्ष्वष्टसुलोकपालाः आचार्यवाक्यानुगतेनपुंसामहार्हपूजाविधिनार्चनीयाः ११

॥ टीका ॥

महाशकुनगंभीरशब्दाय प्रजापतये ऋतुकालाभिगामिन् शीघ्रमेहिएहि बलिंगृहाण २ क्वचित्गृहणे २ इत्यपिपाठः ममचिंतितं कार्यं सत्यं ब्रूहि २ हुंफट्स्वाहा ततइति रजनीगमनानंतरं प्रभाते नवगोमयेन द्विहस्तमात्रं चतुरस्ररूपं चतुःकोणं शुचौ मनोज्ञे विशुद्धे इलातले विजने जनरहिते विशुद्धं पवित्रं मंडलकं विदध्यात् कुर्यादित्यर्थः अर्घार्चनालेपनपूष्पधूपनैवेद्यदीपाक्षतदक्षिणाभिः नमोस्तुतैः सप्रणवैः प्रयत्नान्महाप्रभावैर्निजनाममंत्रैः ९ इदं वृत्तत्रयं पूर्वव्याख्यातत्वान्नव्याख्यायंते १०।११

॥ भाषा ॥

मिन् शीघ्रं एहि एहि बलिं गृहाण गृहाण मम चिंतितं कार्यसत्यं ब्रूहि ब्रूहि हुंफट्स्वाहा ॥यामंत्रसूं सब करनो ॥ ततइति ॥ वा रात्रीके वीतें पीछें प्रातःकाल पवित्र शुद्ध निर्जनपृथ्वीमें नवीनगोवरसूं तीन हाथको चतुरस्रमंडल करे ॥ ९ ॥ पीतेति ॥पीत सुरेश कपिल हुताश कृष्ण यम श्याम वपु रक्ष शुक्ल प्रचेता हरित समीर चित्र धनेश धवल महेश ॥१०॥ एवमिति ॥ ये नाम मंडलमें क्रमसूं स्थापन करनो फिर आठ लोकपाल देवता आठों दिशानमें स्थापन कर आचार्यके वाक्यके अनुसार अर्घ पाद्य स्नान चंदन पुष्प धूप दीपाक्षत नैवेद्य दक्षिणा करकें महा प्रभावरूप निजनाम मंत्रनकर अर्चन करनो ॥११॥ ॥६७॥

यक्षोऽर्चनीयोविधिनात्रमध्येपैष्टंश्वयुग्मंचततःप्र
कुर्यात् शृतेनदेयश्चरुणोपहारो घृतप्लुतोऽभ्य-
र्चितदेवताभ्यः १२ हविःसमुद्धृत्यचरोस्तथान्य
त्तेन प्रयत्नात् प्रविधायपिंडं धृत्वार्थपार्श्वेर्चनम
स्यकार्यं नानाविधैर्मन्त्रवरैरमीभिः १३

॥ टीका ॥

यक्षइति अत्र मंडलमध्ये यक्षः श्वानः विधिना विधिपूर्वकं पूर्वं अर्चनीयः पूजनीयः ततः पैष्टं श्वयुग्मं प्रकुर्यात् ततः अभ्यर्चित देवताभ्यः दिक्पालादिभ्यः घृतप्लुत घृतेनप्लुतः शृतेन क्वथित दुग्धेनसह चरुणोपहारः देयो दातव्यः क्वचिच्चरणोपहारः इत्यपिपाठः १२ हविरिति चरोः अन्यद्धविः समुद्धृत्य तेन शृतेन प्रयत्नात् पिंडं प्रविधाय पार्श्वे धृत्वा च अमीभिः नानाविधैर्मन्त्रवरैः अस्य अभ्यर्चनं कार्यम् १३ ॐ मंडलाय स्वाहा इत्यनेनचंदनालेपनं ॐ भल्लूकायस्वाहा इत्यनेनाक्षतप्रदानं ॐ कपिलायस्वाहा इत्यनेन पुष्पप्रदानं ॐ यक्षाय स्वाहा इत्यनेन धूपोत्क्षेपः ॐ विनयवतेनमः इत्यनेन दीप प्रदानम्

॥ भाषा ॥

॥यक्षइति॥ वा मंडलमें प्रथम श्वानको विधिपूर्वक पूजन करनो तापीछें चूनको बनो हुयो श्वानको युगल ताको पूजन करे तापीछें घृतसहित दूधभातके चरू करकें पूर्व अर्चन जिनको कियो उन आठों दिक्पाल देवतानके अर्थ उपहार देनो ॥१२॥ हविरिति॥ चरूतें और शाकल्य लेकें चरूको भात ले यत्नतें पिंड बनाय करकें पास धरले फिर ये जे नाना प्रकारके मंत्र तिन करकें पूजन कर बलिदान करे॥ ॐ मंडलायस्वाहा या करकें चंदन लगानो ॐ भल्लूकायस्वाहा या करकें अक्षत चढावनो ॐ कपिलायस्वाहा याकरकें पुष्प देनो ॐ यक्षाय स्वाहा या करकें धूप खेनो ॐ त्रिनयपतेनमः या करकें दीपक जोडनो ॐ ऋतु-

अब्दायनर्तूनुतमासपक्षदिनानिकार्येष्ववधौविदध्यात् हीनावधिर्येनभवत्यसत्यः सर्वोपिलोकेशकुनोगृहीतः १४ एवंविधंभाविनवेत्तिचित्तेनिवेश्यकार्यंभषणंविमुंचेत् संभक्ष्यपिंडंस्थिरतांगतस्यचेष्टादिकं तस्य निरूपणीयम् १५ इ॰प्र॰प्रक॰१

॥ टीका ॥

ॐ ऋतुकालाभिगामिनेस्वाहा इत्यनेनफलादिढौकनं ॐ बलिभोजनायस्वाहा इत्यनेन नैवेद्यप्रदानं ॐ स्वामिभक्तायस्वाहा इत्यनेनार्घः कृतज्ञएहिएहि रात्रिजागरण एहिएहि दिव्यज्ञानिन्एहिएहि प्रत्यक्षवचन एहिएहि जिह्वाजल्पएहिएहि स्वल्पप्रियए॰ए॰ षड्गुणए॰ए॰ सुनकोत्तमए॰ए॰ इदमर्घ्यं गृहाणगृ॰ इमंबलिंगृहाणगृ॰ सत्यम्ब्रूहिब्रूहि स्वाहा इतिबलिनिवेदनमंत्रः अब्देति अब्दायनर्तून् उतमासपक्षदिनानि स्वकीयकार्येषु अवधौमर्यादायां विदध्यात्प्रकुर्यात् पुरुषःशकुनविलोकक इतिशेषः येनकारणेन लोके सर्वोपि गृहीतः शकुनो हीनावधिःसन् असत्योभवति १४ एवमिति एवं विधं कार्यं भावि नवेत्ति चित्ते मनसि निवेश्य स्थापयित्वा विचिंत्येति यावत् भषणं विमुंचेत् पिंडं

॥ भाषा ॥

कालाभिगामिनेस्वाहा याकर फलादिक देनो ॐ बलिभोजनायस्वाहा या करकें नैवेद्य देनो ॐ स्वामिभक्तायस्वाहा या करकें अर्घ देनो कृतज्ञएहि२ रात्रिजागरण एहि२ दिव्यज्ञानिन्एहि२ प्रत्यक्षवचन एहि२ जिह्वाजल्पएहि२ स्वल्पप्रियएहि२ षड्गुणएहि२ शुनकोत्तमएहि२ इदमर्घं गृहाण२ इमंबलिं गृहाण२ सत्यंब्रूहि२ स्वाहा इतिबलिदान निवेदनमंत्रः या मंत्रकरकें बलिदानकरनो ॥अब्देति॥ शकुनदेखवेवालो पुरुष अपनें कार्यमें वर्षकी वा अयनकी वा ऋतूकी वा महिनापक्षदिन इनकी अवधी करले अर्थात् मेरो येकार्य इतने वर्षमें यादिनमें होयगो एसो करले याकारणसूं संपूर्णशकुन लोकमें अवधीकरेविना मिथ्या होजांयहें ॥१४॥ एवमिति ॥

यथावदुक्तान्यधिवासनानि बलिप्रदानानि श्वनोऽधुनातु तस्यैव चेष्टाफलमीप्सितेषु राज्यादिकार्येषु निरूपयामः १६ कंडूयमानः खलु दक्षिणेन करेण लाभं भषणो ददाति प्रभावनम्रीकृतराजचक्रं राज्याभिषेकं वरपट्टबन्धम् १७

॥ टीका ॥

संभक्ष्य स्थिरतांगतस्य निराकुलतां प्राप्तस्य तस्यश्वनः चेष्टादिकं निरूपणीयं विलोकनीयं १५ इतिवसंतराजटीकायां श्वचेष्टितेऽधिवासनप्रकरणंप्रथमं १ यथेति मया श्वनः अधिवासनानि बलिप्रदानानि यथावदुक्तानि अधुना तुईप्सितेषु राज्यादिकार्येषु तस्यैवश्वनएव चेष्टादिकं फलं निरूपयामः कथयामः १६ कंडूयमानइति दक्षिणेन करेण अपसव्येन हस्तेन कंडूयमानः कंडूतिं कुर्वाणः भषणः लाभमधिकं फलं ददाति कीदृशं लाभं राज्याभिषेकं राज्यस्याभिषेकोयस्मिन् पुनः कीदृशं वरपट्टबंधं वरः प्रधानः पट्टबन्धोयस्मिन् तं पुनः कीदृशं प्रभावनम्रीकृतराजचक्रं प्रभावेणनम्रीकृतं राजचक्रं यत्र तं तथा १७

॥ भाषा ॥

एसे अपने कार्यकूं मनमें विचार करकें श्वानकूं छोडदे वो बलिपिंड भक्षण करकें स्थिर होयजाय वाकी चेष्टादिक देखनो ॥१५॥ इतिश्रीवसंतराजभाषाटीकायां -श्वानचेष्टितेऽधिवासन प्रकरणं प्रथमं ॥१॥ यथेति ॥ मेनें श्वानके अधिवासन बलिदान ये यथायोग्य कहे अब वांछित राज्यादिक कार्यमें श्वानके चेष्टादिकनके फल कहेंहें ॥१६॥ कंडूयमानइति ॥ जो श्वान जेमने हाथ करकें खुजावतो होय तो राज्याभिषेक जामें और पट्टबंधन जामें और प्रभाव करकें नम्र किये हें राजानको समूह जामें एसो लाभ देवे ॥१७॥ ॥छ॥

करेणकंडूयति दक्षिणेनयक्षोयदा वामकरंतदानीं प्रभूतमातङ्गघटासमृद्धं ब्रूते समंतात्पृथिवीपतित्वम् १८ उद्घाटयेद्दक्षिणमाक्षियक्षो हस्तेनगृह्णात्यथ दक्षिणेन यस्याभिषेके सभवेत्स्वशक्त्या क्षितीशलक्षेक्षितपादपद्मः १९ कौलेयकोदक्षिणकर्णदेशं करेणकंडूयतिदक्षिणेन यदातदाजल्पतिगीतवाद्यविनोदयुक्तंपृथिवीपतित्वं २०

॥ टीका ॥

करेणेति यक्षः श्वादक्षिणेनकरेण यदावामकरं कंडूयति तदानींसमंतात्पृथिवीपतित्वं ब्रूते कीदृशंप्रभूतमातंगघटासमृद्धं प्रभूताः प्रकृष्टाः ये मातंगाद्विरदाः तेषां घटा बहुघटनाः ताभिः समृद्धं उपचितमित्यर्थः बहूनांघटनाघटेतिहेमः १८ उद्घाटयेदिति यस्य राज्याभिषेकप्रश्ने यक्षः दक्षिणमाक्षिचक्षुः दक्षिणेनकरेणउद्घाटयेत् अथवा गृह्णाति क्वचिद्गृह्णातीति पाठः तदा स्वशक्त्याराजाभवेत् कीदृशःक्षितीशलक्षेक्षितपादपद्मः क्षितीशलक्षैः ईक्षितंपादपद्मंयस्य एतादृशस्तथा क्वचिद्राज्याभिषेको भवति स्वशक्त्येति पाठोपिदृश्यते १९ कौलेयकइति यदा कौलेयकः श्वादक्षिणकर्णदेशं दक्षिणेनकरेण कंडूयति

॥ टीका ॥

॥ करेणेति ॥ जो श्वान जेमने हाथ करकें वांयो हाथ खुजावतो होय तो बोहोतसे हाथीनकी समृद्धी जामें एसो पृथिवी पत्ती राजा करे ॥ १८ ॥ उद्घाटयेदिति ॥ राज्याभिषेकके प्रश्नमें जो श्वान जेमने नेत्रकू जेमने हाथ करकें खोलतो होय वा ग्रहण करतो होय तो अनेकन राजाके चरणकूं नमन कर दर्शन करें एसो अपनी शक्ती करकें राजा होय ॥ १९ ॥ कौलेयक इति ॥ जो कौलेयक जेमने हाथ करकें जेमने कर्णकूं खुजावतो होय तो गीत वाद्य विनोद इनकर सहित पृथ्वीको पती होय २०

कंडुयतेदक्षिणपाणिनाचेत्स्वंसारमेयोवदनंतदानीं
भक्तैः प्रभूतैः सहभूमिपाले भोज्यानि भोज्यानिचि
रंभवंति २१ वक्षोऽथकंडूयति दक्षिणेन स्वपाणि
पादेनभवेत्तदानीं तुरंगमातंगमहिष्यजादि गवा
दिसंपत्सहितं नृपत्वं २२ अवामपादप्रभवैः प्रय
त्नाद्विखेन्नखैः श्वाजठरंस्वकीयं वक्त्येवभावी
सखिबंधुभृत्यनिर्वाहशक्तोनृपतित्वयोगः २३

॥ टीका ॥

खनति तदागीतवाद्यविनोदयुक्तं पृथिवीपतित्वंजल्पति अस्थिभुग्भषणः सारमेयः कौलेयकः शुनइतिहैमः २० कंडूयतइति सारमेयः कुक्कुरः दक्षिणपाणिनाचेत् स्वंवदनंकंडूयते तदानीं भक्तैः प्रभूतैः सहभूमिपालेभोज्यानिभोक्तुं योग्यानि भोज्यवस्तूनि चिरं चिरकालं यावत् भवंति २१ वक्षाइति यदायंक्षः वक्षो दक्षिणेन स्वपाणिपादेन कंडूयति तदानीं तुरंगमातंग महिष्यजादि गवादि संपत्सहितंनृपत्वंभवेत् तत्रतुरंगाः अश्वाः मातंगादंतावलाः महिष्यः सैरभ्य अजादयः छागादयः गौःधेनुः एतेषामितरेतरद्वंद्वः ताः आदौयासां एवंविधायाः संपदः समृद्धयस्ताभिः सहितं समेतमित्यर्थः २२ अवामेति यः श्वाप्रयत्नात् अवामपादप्रभवैः दक्षि-

॥ भाषा ॥

॥ कंडूयतइति ॥ जो श्वान जेमने हस्त करकें अपनो मुखकूं खुजावतो होय तो बोहोत संभक्तनकरकें सहित राजानकरकें भोगवेकूं योग्य भोग्य वस्तू चिरकाल तांई होय ॥ २१ ॥ वक्षइति ॥ जो श्वान जेमने हाथ पामकरकें अपनो वक्षस्थल खुजावतो होय तो हाथी घोडा गौ भेंस बकरी इत्यादिकनकी संपदानकर सहित राजा होय ॥ २२ ॥ अवामेति ॥ जो श्वान जेमने पामके नखनकरकें अपने उदारकूं खुजायवेकी सीनाई करतो होय तो होनहार मित्र बंधुवर्ग इनके निर्वाहकी शक्ती राजापनेको योग येहोंय २३

प्रदक्षिणंचेष्टितमीदृशंस्यादेवंविधं तत्रफलं प्रदिष्टं पुंसोनुकूलंसकलंतदेवश्वाहंतिदृष्टः कृतवामचेष्टः २४ भवंत्यवामायदिवामतश्च चेष्टाःसमास्तन्नगुणोनदोषः कौलेयकोयास्त्वधिकाः करोति फलंतदुत्थंप्रतिपादनीयम् २५ महोदयंपंचविधेनपुंसां शान्तेनराज्यंवितरत्यवश्यम् ॥

॥ टीका ॥

णचरणोत्थैः नखैः स्वकीयं जठरं लिखेत् खनेत् एषकुंकुरः सखिबंधुवर्गनिर्वाहशक्तः नृपतित्वयोगः भाव्येववक्ति ब्रूते २३ प्रदक्षिणमिति प्रदक्षिणंचेष्टितमीदृशं स्यात् तत्रएवंविधंफलं पुंसः अनुकूलंसकलंसमस्तं प्रदिष्टं प्रोक्तं श्वा कृतवामचेष्टः दृष्टः तदेवपूर्वोक्तमेव सकलंपुंसः अनुकूलं फलं हंति २४ भवंतीति अवामा दक्षिणा यदिवामतश्च चेष्टाः समाः सदृशाः भवंति तदानगुणोनदोषः गुणदोषप्रदिपादकचेष्टयोः साम्यादित्यर्थः कौलेयकः श्वानः याश्चेष्टाः अधिकाः करोति तदा तदुत्थं तज्जन्यं फलं अधिकं प्रतिपादनीयमित्यर्थः २५ महोदयमिति यक्षः पंचविधेन शांतेन पुंसां महोदयंराज्यं अवश्यं वितरति पंचप्रकारे-

॥ भाषा ॥

॥ प्रदक्षिणमिति ॥ श्वानकी ये जेमने अंगकी चेष्टा हें इनमें याप्रकार फल पुरुषकूं अनुकूल सब कहे और जो श्वान वांये अंगकी चेष्टा करतो दीखे तो पहलें कहे जे सब अनुकूल फल तिनें नाश करे ॥२४॥ भवंतीति ॥ जो वांई जेमनी चेष्टा समान होंय तो गुणवी नहीं और दोषवी नहीं फेर श्वान जो अधिक चेष्टा करे तो वाकोही फल अधिक कहनो ॥२५॥ पांचप्रकारके शांतशकुन करकें पुरुषनकूं महान् उदय जामें एसो राज्य अवश्यदेवे फिर पांचप्रकारको दीप्तशकुनता करकें श्वान बलात्कार करकें वोही महोदय राज्य ताकूं हरण करे ॥२६॥

पंचप्रकारेण पुनस्तदेवदीप्तेनयक्षोहरति प्रसह्य २६ दीप्ताभिधाभ्यांस्थितिचेष्टिताभ्यां प्रवासराज्यक्षिति मृत्यवःस्युः शांताभिधाभ्यां भवतित्वमूभ्यां राज्यंसमृद्धंचिरकालभोग्यं २७ दिक्चेष्टितस्थानगतिस्वराख्याः पंचेहदीप्ताः खलु पंचशांताः अन्येष्वपीमेशाकुनेषुभूम्नानिमित्तविद्भिः परिभावनीयाः २८ इतिश्री· शा· श्वचे· राज्याधिकारप्र० २

॥ टीका ॥

णदीप्तेन पुनर्यक्षः प्रसह्य बलात्कारेण तदेवमहोदयं राज्यं हरति २६ दीप्तेति दीप्ताभिधाभ्यां स्थितिचेष्टिताभ्यां स्थितिः अवस्थानं चेष्टितं शरीरव्यापारस्ताभ्यां प्रवासराज्यक्षितिमृत्यवः स्युः प्रवासः परदेशगमनं राज्यक्षतिः राज्यस्यनाशः मृत्युर्मरणं एतेषामितरेतरद्वंद्वः शांताभिधाभ्याममूभ्यां स्थितिचेष्टिताभ्यां चिरकालभोग्यं समृद्धं राज्यं स्यात् २७ दिगिति दिक्चेष्टितस्थानगतिस्वराख्याः इह खलु निश्चयेन पंचदीप्ताः पंचशांताश्चभवंति तथाऽन्येष्वपि पोतक्यादि शाकुनेष्वपि निमित्तविद्भिः इमे पंचशांताः पंचदीप्ताः भूम्नापरिभावनीयाः विचिंतनीयाः २८ इतिव· टी· श्वचेष्टिते राज्याधिकारप्रकरणं द्वितीयं २

॥ भाषा ॥

॥दीप्तेति॥ दीप्तस्थिती और दीप्त देहकी चेष्टा इनकरकें परदेशको गमन राज्यको नाश और मृत्यू ये होंय और शांतस्थिती शांतचेष्टा होंय तो इनकरकें चिरकाल तांई भोगवे के योग्य समृद्धवान् राज्य होंय ॥२७॥ दिगिति॥ दिशा चेष्टा स्थान गती स्वर निश्चयकर ये पांच दीप्त हैं और पांचही ये शांत हें एसेंही और जे पोतकीकूं आदिले जे शकुन तिनमेंवि ज्ञानपुरुष करकें ये पांच शांत और पांच दीप्त विचारनो योग्य है ॥२८॥ इतिश्री वसंतराजभाषाटीकायां श्वानचेष्टिते राज्याधिकारप्रकरणं द्वितीयम्

वरस्य कन्यावरणोद्यतस्य कुमारिकायाः पतिमर्थयंत्याः आख्यायतेऽन्योन्यपरीक्षणार्थं क्रमेण चेष्टा सरमासुतस्य २९ कौलेयके दक्षिणचेष्टिते स्यात्कन्याविवाहो नतु वामचेष्टः शुन्यासमं केलिरतेसुखेनतयोढयासार्द्धमहानियांति ३० कंडूयते दक्षिणमंगभागंस्तंभेयदर्थंवरणेहृदिस्थे ऊढाभवेत्सा सुतवित्तवृन्दैर्वामांगकंडूयनमप्रशस्तम् ३१

॥ टीका ॥

वरस्येति कन्यावरणोद्यतस्य वरस्य वोढुः पतिं अर्थयंत्याः वांछयंत्याः कुमारिकायाः कन्यायाः सरमासुतस्य सरमा शुनी तस्याः सुतः श्वा तस्य अन्योन्यपरीक्षणार्थं परस्परपरीक्षाकृते चेष्टाः क्रमेण आख्यायते २९ कौलेयकइति दक्षिणचेष्टिते कौलेयके शुनि कन्याविवाहः स्यात् नतु वामचेष्टः क्वचित्कन्याविवाह्येति पाठोपि दृश्यते शुन्यासमंकेलिरतेसति मैथुनसुखेसति तयाऊढया सार्द्धंसुखेन अहानि दिनानि यांति गच्छंति ३० कंडूयतेइति यदर्थं यस्याः कृते वरणे हृदिस्थेसति श्वा दक्षिणमंगभागं स्तंभे कंडूयते तदासाऊढासुतवित्तवृन्दैर्भवेत् वा

॥ भाषा ॥

॥वरस्येति॥ कन्याके वरवेकूं वांछित होय रह्यो वाकूं ओर पतिकूं वरवेकी इच्छाकर रही वा कन्याकूं इन दोनोनकूं परस्पर परीक्षा करवेकूं सरमा नाम जो इंद्रकी कुतिया वाको बेटा श्वान ताकी चेष्टाक्रम करकें कहेंहें ॥ २९ ॥ कौलेयकइति ॥ सुनी जो कुतिया जेमने अंगकी चेष्टा करती होय तो कन्याविवाहके योग्य जाननो जो वांई चेष्टा करती होय तो वा कन्याको विवाह नहीं करनो कुतिया सहित श्वानमैथुन सुख करतो होय तो ता व्याही हुई कन्या करकें सहित सुखपूर्वक दिन व्यतीत होंय ॥ ३०॥ ॥कंडूयतइति ॥ जा कन्याके अर्थ हृदयमें विचार करलियो होय ओर श्वान जेम-

उत्क्षिप्ययक्षोयदिदक्षिणांघ्रिंकरोतिपात्रेमणिके
घटेवा मूत्रंतदानींपरिणीयतेयासास्यादवश्यंब
हुपुत्रयुक्ता ३२ अंगानिवामानिकषन्निजानिविशां
श्वशालागृहमंडपादीन् श्वावक्तिकन्यामविवाह
नीयांयत्साभवित्रीकुलदूषयित्री ३३ कौलेयको
यद्वरणोद्यतस्यत्यक्ताभिशंकोभिमुखोऽभ्युपेति

॥ टीका ॥

मांगकंडूयनं अप्रशस्तं भवति ३१ उत्क्षिप्येति यदि यक्षः दक्षिणांघ्रिमुत्क्षिप्य उच्चैः कृत्य पात्रे मणिके गर्ग्यां गदाख्ये घटे वा मूत्रं करोति क्वचित्पट्टे इति पाठः तदानीं या परिणीयते सा अवश्यं बहुपुत्रयुक्ता भवति ३२ अंगानीति वामानि निजानि अंगानि कषन् शालागृहमंडपादीन् विशांश्च श्वा कन्यां अविवाहनीयां विवाहकरणाऽयोग्यां वक्ति कथयति यत् यस्मात् कारणात् सा कन्या कुलदूषयित्रीभवित्री क्वचिद्विशांश्च लस्तद्गृहमंडपादीनित्यपि पाठः ३३ कौलेयकइति कौलेयको यदा वरणोद्यतस्य पुंसः त्यक्ताभिशंकः निर्भयः अभिमुखः अभ्युपेति तदा कुमारी कन्या विदुषा पंडितेन दूरेण हेया त्याज्या कीदृशी अनर्थदा अन-

॥ भाषा ॥

ने अंग भागकूं स्तंभमें खुजावतो होय तो वो विवाह हुये पीछें सुत धन इनकी वृद्धीके अर्थ होय और वांये अंगको खुजावनोऽशुभ हे ॥ ३१ ॥ उत्क्षिप्येति ॥ जो श्वान जेमनेपामकूं ऊंचो कर मणिकपात्रपे वा घडापे मूत्र कर दे तो जा कन्या व्याह ले वो कन्या अवश्य बहु पुत्र युक्त होय ॥ ३२ ॥ अंगानीति ॥ श्वान वांये अंगकूं खुजावत शालागृह मंडपादिक इनमें प्रवेश कर जाय तो वो कन्या विवाहके योग्य नहीं एसो कहें हैं ये जाननो वो कुलकूं दोषके लगायवेवारी जाननी ॥ ३३ ॥ कौलेयकइति ॥ जो श्वान जा कन्या वरवेकूं इच्छा करे हे वा पुरुषके निर्भय संमुख आय जाय तो वो कन्या

सानर्थदा भर्तृकुटुंबमारी दूरेण हेया विदुषा कुमारी ३४
वामांघ्रिणा कर्षति नासिकाग्रं कंडूयते वा भुवि त
त्कदाचित् वामेन यो वा कुटिलं प्रयाति वैधव्यदोऽ
सौ कपिलः कुमार्य्याः ३५ हदेत्तयो वामकटेन-
शेते वमेत्खनेत्कर्परवामलूरे अंगारभस्मा-
स्थिचयादिकं वा पंचत्वभीत्यै भषणः स कृष्णः ३६

॥ टीका ॥

र्थं दत्ते सा अनर्थदा पुनः कीदृशी भर्तृकुटुंबमारी भर्त्तुः कुटंबक्षयकारिणीत्यर्थः ३४ वामांघ्रिणेति यदिकपिलः कुक्करः वामांघ्रिणा नासिकाग्रं कर्षति वा अथवा भुवि भूमौ तन्नासिकाग्रं कदाचित्कंडूयते अथवा यो वामेन वामभागेन कुटिलं वक्रं प्रयाति असौ कपिलः कुमार्याः वैधव्यदो भवति ३५ हदेतेति यः श्वा हदेत विष्टां कुर्यात् अथवा वामकटेन शेते शयनं कुर्यात् अथवा वमेद्वांति कुर्यात् अथवा कर्पर वामलूरे कपालवल्मीकौ खनेत् अथवा अंगारभस्मास्थिचयादिकं खनेत् सभषणः पंचत्वभीत्यै मरणभिये उक्तः कथितः ३६ ॥छ॥

॥ भाषा ॥

अनर्थकूं देवेवाली और भर्तारके कुटुंबको क्षय करवेवाली जानकर विद्वान् पुरुष त्याग करदे वाकूं व्यावै नहीं ॥ ३४ ॥ वामांघ्रिणेति ॥ जो श्वान बांये पामकरकें नासिकाके अग्रकूं खुजावतो होय अथवा पृथ्वीमें ता नासिकाके अग्रकूं खुजावतो होय अथवा वामभागमें होयकर टेढो चले तो वा कन्याकूं वैधव्य देवै ॥ ३९ ॥ हदेतेति ॥ जो श्वान विष्ठा करे अथवा बांई करोंट शयन करे वा वमन नाम उलटी करे अथवा कपाल सर्पकी बंबैइनें खोदे वा अंगार भस्म हाडनको समूह इत्यादिकनकूं खोदतो होय तो मरणको भय करे ॥ ३६ ॥

यक्षः समाजिघ्राति यश्चशुन्या योनिंसकन्यांक्षतयोनिमाह स्याज्जागरूको यदिमैथुनस्थोरुचिस्तदास्यादितरेतरस्य ३७ प्रश्नेवरार्थेविहितेकुमार्याःस्याद्वामचेष्टः शुभदोनचान्यः मूत्रंचशून्या उपरिप्रकुर्वन् ब्रूते सपत्नींभषणोभावित्रीं ३८ संमार्जयन्वामकरेण जिह्वां ब्रवीति भोगप्रियतां वरस्य यक्षोलिहञ्जल्पतिवामपादं वित्तेनवृत्तिंभ्रमणार्जितेन३९

॥ टीका ॥

यक्षइति यः यक्षः शुन्याः सरमायाः योनिं समाजिघ्राति गंधोपादानं करोति सकन्यांक्षतयोनिं भग्नकौमार्यव्रतामाह यदि जागरूकः मैथुनस्थो भवति तदा इतरेतरस्य परस्परस्य कन्यावरस्येत्यर्थः रुचिः स्यात् ३७ प्रश्नेइति कुमार्याः वरार्थे प्रश्ने विहिते सति यदि वामचेष्टः श्वा स्यात् तदा शुभदः नचान्यः दक्षिणचेष्टः शुभदोन शुन्याउपरि मूत्रं च प्रकुर्वन् भषणः भावित्रीं भाविनीं सपत्नीं ब्रूते ३८ संमार्जयन्निति यक्षः वामकरेण जिह्वां संमार्जयन् विशुद्धिं कुर्वन् वरस्यभोगप्रिय-

॥ भाषा ॥

॥यक्षइति॥ जो श्वान कुतियाकी योनीकूं सूंगतो होय तो कन्यापनो जाको दूर होय गयो एसी जाननो जो श्वान मैथुनमें स्थित होय तो कन्या वर इनकी परस्पर रुचि होय॥ ३७ ॥प्रश्नेइति॥ जो कन्या भरतारके वरवेकूं अर्थ प्रश्न करे और श्वान वामचेष्टा करतो होय तो शुभ देवै दक्षिण चेष्टा शुभकी देवेवाली नहीं है जो शुनीके ऊपर मूत्र कर देवै श्वान तो वा कन्याके दूसरी सोत होयगी एसोजाननो ॥ ३८ ॥ संमार्जयन्निति॥ जो श्वान बांये हाथ करकें जिह्वाकूं मार्जन करतो होय अर्थात् पोंछतो होय तो वा कन्याके वरकूं संभोग वल्लभ वो होत होय एसो जाननो जो श्वान बांये पामकूं चाटतो होय तो वाकन्याके वरकूं भ्रमण करकें संचितहुयो धन ताकरकें आजी

मूत्रं निजं लेढि दिशांच वामां प्रयाति तत्स्याद्दयितो
नुरागी वामां लिहन् सृक्किवरस्य पूर्णे महानसे व्या
परणं ददाति ४० गलाक्षिकर्णाननभालमूर्द्ध वा
मांघ्रिणा स्पर्शनतः कुमारी राज्ञी भवेत्तस्य वरस्य
गेहे यथोत्तरं वृद्धिमती क्रमेण ४१ कार्यं कुमारी
वरणं वरेण समस्तचेष्टाभिरवामिकाभिः ॥

॥ टीका ॥

तां भोगः प्रियोवल्लभो यस्य तस्य भावस्तत्ता तां ब्रवीति कथयति यक्षः वामपादं लिहन् आस्वादयन् वरस्य भ्रमणार्जितेन वित्तेन वृत्तिं आजीविकां जल्पति ३९ मूत्रमिति यदि श्वा निजं मूत्रं लेढि आस्वादयति दिशां च वामां यदि वा प्रयाति तदा दयितः अनुरागी स्यात् वामं सृक्कि अधरस्याधः प्रदेशं लिहन् वरस्य पूर्णे महानसे व्यापरणं ददाति अन्न पाचकः स्यादित्यर्थः ४० गलेति गलाक्षिकर्णाननभालमूर्द्ध वामांघ्रिणा स्पर्शनतः कुमारी राज्ञी स्यात् तत्र गलः कंठः अक्षि चक्षुः कर्णः श्रवणः आननं मुखं भालं ललाटं एतेषामितरेतरद्वंद्वः प्राणितूर्यसेनांगानामित्येकवद्भावः तस्य वरस्य गृहे क्रमेण यथोत्तरं वृद्धिमतीस्यात् ४१ कार्यमिति वरेण कुमारीवरणं अवामिकाभिः समस्त

॥ भाषा ॥

विका जाननो ॥३९॥ मूत्रमिति॥ जो श्वान अपने मूत्रकूं आप स्वाद लेवे फिरवामदिशाकूं जाय तो भर्त्तार अनुरोगी होय जो श्वान वांई गलफाडकूं चाटतो होय तो वा कन्याको भर्त्तार रसोईकी चाकरीसूं जीविका करे॥ ४०॥ गलेति॥ जो श्वान कंठ नेत्र कर्ण मुख इनकूं स्पर्श करे तो वो कन्या राणी होय जा दिनसूं भर्त्तारके जाय वा दिनसूं वाके भर्त्तारके घरमें वृद्धी होती चली जाय॥ ४१॥ कार्यमिति॥ जो वरकन्याकूं वरवेके लियें शकुन देखे तो श्वानकी समस्त जेमनी जे

पतिंवराश्वानविचेष्टितेन सर्वेणवामेन पतिं विदध्या
त् ४२ इतिव॰ शा॰ श्वचे॰ विवाहप्रकरणं तृ॰ ३
अथाभिदध्मः सरमासुतस्य तत्तादृशं चेष्टितमप्रमे
यं यद्देशलाभादिनिमित्तभूतं हितं सदाशाकुनको
विदेभ्यः ४३ उपस्थितः प्राक्तनपुण्यपाकात्पु
रःस्थितो दक्षिणपाणिनास्वं शिरः स्पृशत्युल्लसि
तांतरात्मा यो मंडलो मंडललाभदोऽसौ ४४

॥ टीका ॥

चेष्टाभिः कार्यं कर्तव्यं पतिंवरा कन्या सर्वेण वामेन श्वानविचेष्टितेन पतिं विदध्यात् कुर्यात् ४२ इतिश्वचेष्टिते विवाहप्रकरणम् तृ॰ ३ अथेति विवाहप्रकरणकथनानंतरं सरमासुतस्य कुक्कुरस्य तत्तादृशं चेष्टितं वयं अभिदध्मः कथयामः यच्चेष्टितं शाकुनकोविदेभ्यः शकुनज्ञानपंडितेभ्यः सदा सर्वदा देशलाभादिनिमित्तभूतं हितं भवति कीदृशं हितं अप्रमेयं असंख्यं ४३ उपस्थितइति यः मंडलः प्राक्तनपुण्यपाकात् उपस्थितः स्वयमागत्य पुरःस्थितः उल्लसितांतरात्मा भवति दक्षिणपाणिनास्वंशिरः स्पृशति असौ मंडलः श्वा मंडललाभ-

॥ भाषा ॥

मनी चेष्टानकरकें वरे जो कन्या भरतारके वरवेकूं देखे तो श्वानकी वांई चेष्टानकरकें भरतार करै ॥ ४२ ॥ इतिश्रीवसंतराजभाषाटीकायां श्वचेष्टिते विवाहप्रकरणं तृ॰ ३ ॥ अथेति ॥ विवाहप्रकरणके कहेके अनंतर अव सरमाके वेटा श्वानकी असंख्य शाकुनमें पंडितउनके अर्थ सदा सर्वदा देशलाभादिकनके निमित्तभूत हितकारी चेष्टा हम कहेंहें ॥ ४३ ॥ उपस्थितइति ॥ जो श्वान पूर्वपुण्यके प्रभावसूं अपने आप आयकर आगे ठाडो होय कर प्रसन्नचित्त होय ओर जेमने हाथकर अपने मस्तककूं स्पर्श करतो होय तो मंडल जो देश ताको लाभ देवे ॥ ४४ ॥ ॥ ७ ॥

हलानिबीजान्यथवागृहीत्वा क्षेत्रेषु यांतः शुनिवामयाते निवर्तमानेष्वपसव्यभूते कृषीबलाः स्युर्नियतंकृतार्थाः ४५ चेष्टास्त्वऽवामासु शुनाकृतासु दुरोदरं क्रीडाति यो विशांकः सद्यूतकारान् सकलान् विजित्य वित्तंसमस्तं ध्रुवमाददाति ४६ उत्कासहिक्काशयनांगभंगविष्ठावामिश्वासविजृंभणानि वक्रां शुनोर्द्धोन्मिषितांच दृष्टिं द्यूते प्रशंसंति नवामचेष्टां ४७

॥ टीका ॥

दः जनपदलाभदा स्यात् ४४ हलानीति हलानि बीजानि वा गृहीत्वा क्षेत्रेषु यांतः कृषीबलाः शुनिभषणे वामयातेसति निवर्तमानेषु तेषु कृषीबलेषु अपसव्यभूतेसति दक्षिणगतेसति नियतंकृतार्थाः कृतकृत्याः स्युः ४५ चेष्टास्विति अवामासु चेष्टासु शुनाकृतासु सत्सु यः पुमान् विशांको निर्भयः दुरोदरं द्यूतं क्रीडति खेलति संसकलान् द्यूतकारान् विजित्य ध्रुवं समस्तं वित्तमाददाति गृह्णाति ४६ उत्कासेति उत् प्राबल्येन कासः हिक्का हेडकीति प्रसिद्धा शयनं स्वापः अंगभंगः गात्रमोटनं वमिः वांतिः श्वासः ऊर्द्ध्ववायोः प्राबल्यं विजृंभणं

॥ भाषा ॥

॥हलानीति॥ जो खेतीवाले हल अथवा बीज इनें लेकरकें खेतपे जाते होंय जो श्वान वांयो आय जाय और खेतसूं पीछें वगदें तब जेमनो आवे तो निश्चय किषाण कृतार्थ होंय॥४५॥ चेष्टास्विति॥ जो पुरुष जूआ खेलवेकूं जातो होय और श्वाननें जेमने भागमें जेमने अंगकी चेष्टा करी होय तो निर्भय जूवामें जाय जूवा खेले वो सब ले जूवा वारेनकूं जीतकरकें समस्त धन ग्रहण करे ॥ ४६॥ उत्कासेति ॥प्रबल खांसी हिचकी सूतो होय अंगभंग करनो अर्थात् अंग मरडनो वमन नाम उलटी करनो श्वास लेनो जंभाई लेनो आधे नेत्र खुले आधे मिचे श्वानकी इतनी चेष्टा जूवा खे-

विलासिनी संग्रहणं विदध्यादवामचेष्टे भषणे भुजंगः वेश्या पुनः कामुकवंचनाय कुर्यान्निवासं शुनि वामचेष्टे ४८ संमूत्रयन् श्वा रमणीयदेशे चेष्टामवामां ललितां प्रकुर्वन् स्याद्गर्भवत्याः सुतजन्महेतुश्चेष्टाश्च कन्या जननाय वामाः ४९ विष्ठावमिश्वास विजृंभणानि प्रस्वापकासांग विमोटितानि

॥ टीका ॥

जृंभां एतेषामितरेतरद्वंद्वः अर्द्धोन्मिषितां वक्रांच दृष्टिं शुनो भषणस्य एतानि द्यूते प्रशंसंति न वामचेष्टां ४७ विलासिनीति भुजंगः गणिकापतिः अवामचेष्टे भषणे सति विलासिनीसंग्रहणं स्वीकारं विदध्यात् भुजंगोगणिकापतिरित्यमरः वेश्या पुनः शुनि वामचेष्टे सति कामुकवंचनाय कामुकस्य भर्त्तुःवंचनं विप्रतारणं तस्मै निवासं गृहवासं कुर्यात् ४८ संमूत्रयन्निति श्वा रमणीयदेशे मनोज्ञप्रदेशे संमूत्रयन् प्रस्रवणं कुर्वन् अवामां ललितांच चेष्टां प्रकुर्वन् गर्भवत्याः सुतजन्महेतुः स्यात् अथ वामाश्चेष्टाः कन्या जननाय भवंति ४९ विष्ठेति विष्ठा विट् वमिः वांतिः श्वासः पवनः विजृंभणं जृंभा तानि प्रस्वापः शयनं कासः प्रतीतः अंगविमोटितं अंगभंगः क्वचित् अंगविलोडनानीति पाठः यद्येतानि श्वा -

॥ भाषा ॥

लवेमें शुभ हें ओर वांई चेष्टा शुभ नहीं हे ॥ ४७ ॥ विलासिनीति ॥ भुजंग शूद्र जो भषण जेमनी चेष्टा करे तो वेश्याकूं स्वीकार करे ओर वेश्या श्वान जो वांई चेष्टा करतो होय तो कामी भर्तारके ठगवेके अर्थ निवास करे ॥ ४८ ॥ संमूत्रयन्निति ॥ जो श्वान सुंदरशोभित स्थानमें मूत्र करे ओर जेमनी मनोहर चेष्टा करतो होय तो गर्भवतीके बेटा होय अथवा वांई चेष्टा करतो होय तो कन्याको जन्म होय ॥ ४९ ॥ विष्ठेति ॥ विष्ठा वमन श्वास जंभाई सोवनो खांसी अंगको मरोडनो इनचेष्टानकूं श्वान आचरण करतो

यद्याचरत्यास्तु तदा करोति श्वा गर्भवत्याः खलु गर्भ
पातं ५० क्रीडां विधत्ते शुभचेष्टितो यः सोभीष्टयो
गं विदधाति यक्षः वामां च चेष्टां विदधन्नराणा मि
ष्टेन सार्द्धं विरहं ब्रवीति ५१ शुभस्वरो यः शुभचे
ष्टितः श्वा करोति मूत्रं च शुभप्रदेशे ददात्यसावु
द्यमिनांहृदिस्थं निःसंशयं धान्यधनादिलाभं ५२
अवामगात्रं यदि दक्षिणेन पादेन कंडूयति सारमेयः
वाणिज्यकं तत्सफलं ब्रवीतिस्याद्व्यत्ययेसत्यफलं नराणाम् ५३ ॥छ॥

॥ टीका ॥

आचरति तदा आशु शीघ्रं गर्भवत्याः खलु निश्चितं गर्भपातं करोति ५०
क्रीडामिति शुभचेष्टितो यः यक्षः क्रीडां विधत्ते स नराणामभीष्टयोगं
विदधाति वामांचचेष्टां विदधन् इष्टेनसार्द्धं विरहंब्रवीति कथयति ५१
शुभेति यः श्वा शुभस्वरः शुभचेष्टितश्च शुभप्रदेशे मूत्रं करोति असौ
उद्यमिनांउद्यमवतां हृदिस्थं हृच्चिंतितं धनधान्यादिलाभं निःसंशयं ददाति ५२ अवामेति सारमेयः श्वा यदि दक्षिणेन पादेन अवामगात्रं दक्षिणांगं कंडूयति तदा नराणां वाणिज्यकं फलं ब्रवीति व्यत्यये सति अ-

॥ भाषा ॥

होय तो शीघ्र गर्भवतीको निश्चय गर्भपात होय ॥५०॥ क्रीडामिति॥ शुभचेष्टा करत
श्वान क्रीडा करे तो मनुष्यनकूं वांछित फल करे जो वांई चेष्टा करतो होय तो इष्ट प्यारे
जनन करकें वियोग करावे ॥५१॥ शुभेति॥ श्वान शुभ शब्द बोले शुभ चेष्टा करे फिर सुंदरस्थानमें मूत्र करे तो उद्यमी पुरुषनकूं जो मनमें होय सो धनधान्यादिकनको
लाभ करे ॥५२॥ अवामेति॥ जो श्वान जेमने पाम करकें जेमने अंगकूं खुजावे तो
मनुष्यनकूं वाणिज्यफल देवै जो वांये पामकर वांये अंगकूं खुजावे तो वाणिज्य निष्फल होय ॥५३॥

भृत्यस्य यः संग्रहणं विदध्यात्तथा नरो वांछति सेवितुं यः तयोः सुखं स्यादपसव्यचेष्टे दुःखं च यक्षे कृतवामचेष्टे ५४ विद्यासमारंभविधौ प्रशस्तः समंडलो दक्षिणचेष्टितो यः यो वामचेष्टः स पुनर्नराणां पूर्वार्जितामप्युपहंति विद्यां ५५ संतुष्टचित्तः सुरवः सुचेष्टः करोति सिद्धिं विवरप्रवेशो पराङ्मुखो धावति यस्तु यक्षः कृतांतरायो नस सिद्धिहेतुः ५६

॥ टीका ॥

लं स्यात् वाणिज्यं तु वणिज्यास्यादित्यमरः ५३ भृत्यस्येति यः पुमान् भृत्यस्य सेवकजनस्य संग्रहणं विदध्यात् तथा यो नरः सेवितुं वांछति समीहितः तयोः अपसव्यचेष्टे यक्षे श्वनि सुखं स्यात् कृतवामचेष्टे तु दुःखं स्यात् ५४ विद्येति यः मंडलः श्वा दक्षिणचेष्टः स विद्यासमारंभविधौ विद्यायाः समारंभः प्रारंभः तस्याविधिर्विधानं तस्मिन् प्रशस्तः स्यात् यः वामचेष्टः स पुनर्नराणां पूर्वार्जितामपि विद्यां हंति विनाशयति ५५ संतुष्टेति यः यक्षः संतुष्टचित्तः प्रसन्नहृदयः सुरवः सुशब्दः सुचेष्टः स यक्षः विवरप्रवेशो गर्तादिप्रवेशो न सिद्धिं करोति यस्तु पराङ्मुखो धावति स कृतांतरायः विहितविघ्नः सिद्धिहेतुर्न भवति ५६

॥ भाषा ॥

॥भृत्यस्येति॥ जो पुरुष सेवककूं राख्यो चांह ओर जो चाकर सेवा करवेकी वांछा करे इन दोनोनकूं श्वान जेमने अंगमें चेष्टा करतो होय तो दोनोनकूं सुख होय जो वांई चेष्टा करे तो दुःख होय॥ ५४॥ विद्येति॥ जो श्वान दक्षिण अंगकी चेष्टा करे तो विद्याके आरंभकी विधीमें शुभ है जो श्वान वामचेष्टा करे तो फिर मनुष्यनकूं पूर्वजन्मकी संचय करीवी विद्यानाशकूं प्राप्त होय जाय॥ ५५॥ संतुष्टेति॥ जो श्वान प्रसन्न हृदय होय सुंदर चेष्टा करतो होय तो गर्तादिक नाम गढेलेमें कहूं प्रवेश

दृष्ट्वाशशांकं यदिनिर्विशंकः करोति शब्दं मुदितांतरात्मा तज्जागरूको विदधाति सौख्यं जनस्यसर्वं दुरितं निहंति ५७ इति व० शा० श्वचेष्टिते देशलाभादिप्रकरणं चतुर्थम् ४ वर्षानिमित्तंश्शुनकोत्तमस्य चेष्टाविशिष्टाविधिनोपदिष्टाः याःशाकुनज्ञानविशारदैस्ताः शृण्वंतु शिष्टाः परमार्थतुष्टाः ५८ उद्घाट्यचेद्दक्षिणमाक्षिलीढे नाभिंस्वकीयामथवाधिरूढः शेते गृहस्योपरिजागरूकस्तदांबुदोंबु क्षिपति प्रभूतम् ५९

॥ टीका ॥

दृष्ट्वेति योजागरूकः कुक्कुरः शशांकं दृष्ट्वा मुदितांतरात्मा हर्षितचित्तः सन् निर्विशंको भयरहितः शब्दं करोति तदा सजागरूकः जनस्य सौख्यं विदधाति सर्वं दुरितंकष्टंनिहंति ५७ इतिव०टी० श्वचे० देशला० प्र० च० ४ वर्षाइति शाकुनज्ञानविशारदैः याः श्शुनकोत्तमस्यवर्षानिमित्तं विशिष्टाश्चेष्टाः विधिनाउपदिष्टाः परमार्थतुष्टाः शिष्टाः ताःशृण्वंतु ५८ उद्घाट्येति चेद्दक्षिणमक्षिउद्घाट्य स्वकीयां नाभिंलीढे अथवा

॥ भाषा ॥

करेकी सिद्धी करेजो श्वान विमुख होय कर दोडतो होयतो वा पुरुष विघ्न होय सिद्धी नहीं होय ॥५६॥ दृष्ट्वेति॥ जोश्वान चंद्रमाकूं देखकरकें प्रसन्नचित्त होय निर्भय शब्द करे तो मनुष्यकूं सौख्य देवै और संपूर्ण कष्टदूर करे ॥५७॥ इतिवसं० भा० टीकायां श्वचेष्टिते देशलाभादिप्रक० च०॥४॥ ॥ वर्षाइति॥ शाकुन ज्ञानमें निपुण उन्ने जे उत्तमश्वानकी विशेषचेष्टा विधिकरकें कहीहें परमार्थमें तुष्टकर्ता औरश्रेष्ठ तिने सुनो ॥५८॥ उद्घाट्येति॥ जोजेमने नेत्रकूं उघाडकरकें अपनीनाभीकूं चाटे अथवा श्वान घरके ऊपरचढकर सोयजाय तो मेघबोहोत जलवर्षावे ॥५९॥

वर्षासु वृष्टिं सलिले निमग्नाः कुर्वंति चक्रभ्रमणाद्विशेषात् अपो विधुन्वंति पिबंति तोयं पक्षांतरेन्यत्र जलागमाय ६० जृंभां प्रकुर्वन् गगनं विलोक्य यो जागरूकः कुरुतेऽश्रुपातं सजल्पति प्रावृषमंबुपूरप्लुताऽवनिं सर्वसमृद्धिसस्यां ६१ उच्चै रुवद्भिस्तृणकूटगेहप्रासादसंस्थैः श्वभि रब्दकाले आसारवर्षा जलदोन्यदा तु भवंति रोगाग्निभयप्रणाशाः

॥ टीका ॥ ६२

जागरूकः गृहस्योपरि अधिरूढः शेते तंदाः अंबुदः प्रभूतं अंबु क्षिपति विकिरति ५९ वर्षास्विति सारमेयः वर्षासु सलिले निमग्नाश्चक्रभ्रमणात् चक्रवद्भ्रमणात् विशेषाद्विशेषेण वृष्टिं कुर्वंति यदि अपः विधुन्वंति तोयं पिबंति तदा पक्षांतरेऽन्यत्र जलागमाय भवंति ६० जृंभामिति यो जागरूकः जृंभां प्रकुर्वन् गगनं विलोक्य अश्रुपातं कुरुते स अंबुपूरप्लुतावनिं सर्वसमृद्धसस्यां प्रावृषं वर्षा जल्पाति ६१ उच्चैरिति अब्दकाले मेघकाले अब्दः संवत्सरे मेघे गिरिभेदे च मस्तके इति विश्वः तृणकूटगेहप्रासादसंस्थैस्तृणकूटं तृणसमूहः गेहं गृहं प्रासादो देवभूपानां गृहं एतेषामितरेतरद्वंद्वः तेषु संस्थैः स्थितैः श्वभिः उच्चैः रुवद्भिः

॥ भाषा ॥

॥ वर्षास्विति ॥ श्वान वर्षामें जलमें डूबजाय ओर चक्रकी सीनाई भ्रमण करे तो वृष्टी करे जो जलकूं हलावे वा जलकूं पीवे तो ओरजगें जलको आगमन कहेंहें एसो जाननो ॥ ६० ॥ जृंभामिति ॥ जो श्वान जंभाई लेतो हुयो आकाशकूं देख करकें नेत्रनमेसूं अश्रुपात डारे तो समृद्धवान् अन्न जामें बोहोत जल करकें भरी हुई पृथ्वी जामें एसी वर्षा होय ॥ ६१ ॥ उच्चैरिति ॥ वर्षाकालमें तृणको समूह घर देवमंदिर राजघर इनमें स्थित होय श्वान बोले तो मेघ बडे वेगसूं वर्षै जो वर्षाकालको अभाव होय तो रोग

निर्गत्य तोयादधिरुह्य पालीं कौलेयक श्चे द्विधुनोति कायं   तं निश्चितं प्रावृषि वृष्टिमब्दः कृषीवलप्रीति करीं करोति ६३ उच्चं प्रदेशं भषणोऽधिरुह्य भषत्यभीक्ष्णंरविमीक्षमाणः   यदा तदानी मचिरेण वृष्टिरंभोदमुक्ता भवति प्रभूता ६४ न नीरदो मुंचति केनचिच्चे द्दोषेण चेष्टाप्रभवेण वृष्टिं अचिंतितास्तत्र पतत्यनर्था श्चौराग्निभीरुक्डमरप्रकाराः ६५ इतिव·शा·श्वचे॰ वृष्टिप्रकरणंपं॰५

॥ टीका ॥

जलद्भिः आसारवर्षाजलदो भवति आसारो वेगवान् वर्षैति हैमः अन्यदातु वर्षाकालाभावे रोगाग्निभय प्रणाशाः भवंति रोगश्च अग्निश्च भयं च प्रणाशश्चेतीतरेतरद्वंद्वः ६२ निर्गत्येति यदि तोयात् नीरात् निर्गत्यपालीं अधिरुह्य कौलेयकः कायं विधुनोति तदा निश्चितं अब्दो मेघः प्रावृषि वर्षाकाले कृषीवलप्रीतिकरीं वृष्टिं करोति ६३ उच्चमिति यदि भषणः उच्चं प्रदेशं अधिरुह्य रविं ईक्षमाणः अभीक्ष्णं वारं वारं भषति तदानीं अंभोदमुक्ता अचिरेण प्रभूता वृष्टिर्भवति ६४ नेति नीरदो मेघः चेष्टाप्रभवेण केनचित् दोषेण चेत् वृष्टिं न मुंचति

॥ भाषा ॥

अग्नि भय नाश ये होंय ॥६२॥ निर्गत्येति ॥ जो श्वान जलमेसूं निकसकर तटपे आयकर श्वान देहकूं कंपायमान करे तो निश्चय मेघ वर्षाकालमें किषाण की प्रीति करवेवाली वृष्टी करे ॥६३॥ उच्चमिति॥ जो श्वान ऊंचे स्थानपे चढकरकें वारंवार सूर्यकूं देखतो जाय और शब्द करे तो मेघ शीघ्र ही बोहोत वर्षा करे॥ ६४ ॥ नेति॥ श्वानकी कोई एक चेष्टासूं हुयो जो दोष ताकरकें मेघवृष्टी नहीं करे तो चौर अग्निभय रोगडमर नाम विनाशस्त्रको युद्ध

सैन्यद्वयस्येह समुद्यतस्य युद्धादिकं मंडलचेष्टितेन आचार्यवर्यो विधिवीक्षितेन योगीव भाव्यं सकलं ब्रवीति ६६ युद्धं जयो भंगइतीदृशानि निवेदयेत्वाग्विधिसिद्धपिंडे भुक्तेशुना तत्र च लक्षणीयं यद्भावि मध्याद्विनिवेशितानाम् ६७

॥ टीका ॥

तदा चौराग्निभीरुक्डमरप्रकारः अनर्थाः अचिंतिताः सन्निपतंति चौरश्च अग्निभीश्च रुक्च डमरश्चेतीतरेतरद्वंद्वः तत्र रुक् रोगः डमरः अशस्त्रयुद्धं ६५ इतिव॰रा॰टी॰भ्रचे॰ वृष्टिप्रकरणंपं॰ ५ सैन्येति आचार्यवर्यः इहविधिवीक्षितेन मंडलचेष्टितेन समुद्यतस्य सैन्यद्वयस्य भाव्यं भवितव्यं युद्धादिकं समस्तं सकलं ब्रवीति वक्ति कइव योगीव यथा योगी सकलं भाव्यं वक्ति तथेत्यर्थः ६६ युद्धमिति प्राग्विधिसिद्ध पिंडे काकरुताधिकारं प्रदर्शितविधानविहितपिंडइत्यर्थः युद्धं जयः भंगश्च अनेनयुद्धं अनेनजयः अनेनभंगः इति ईदृशानि पिंडानि यथाक्रमं परिपाट्या निवेदयेत् क्वचिन्निवेशयेत् इतिपाठः तत्र स्थापयेदित्यर्थः तत्र निवेशितानां स्थापितानां पिंडानां मध्यात् शुना भुक्ते भक्षिते पिंडे यद्भावियुद्धं जयोभंगश्चेति तल्लक्षणीयं ज्ञातव्यम् ६७

॥ भाषा ॥

ये विना चिंतमन किये हुये अनर्थ होंय॥ ६५ ॥ इतिव॰ भा॰टी॰ भ्रचे॰ वृष्टिप्रकरणं पंचमं ॥सैन्येति ॥ जो शकुनमें मुख्य आचार्य हे वे यामें विधिपूर्वक देखी हुई श्वानकी चेष्टाता करकें कोई युद्ध करवेकूं ठाडी हुई दोनो ओडकी सेनानको युद्ध जय भंगादिक होनहार सबकहेंहें जैसें योगी सब होनहारकूं कहेंहें तेसेंही ये कहेंहें ॥६६॥ युद्धमिति पहलें काकरुत प्रकरणमेंपिंडनको विधान कह्याएहें सो पिंड तीन यहां धरने याकरकें युद्ध होयगो याकरकें जय होयगो याकरकें भंग होयगो एसें युद्ध जय भंग या

जयाय यक्षः कृतशांतचेष्टः प्रदीप्तचेष्टस्तु पराजया
य दिक्स्थानचेष्टाभि रथप्रदीप्तो वधाय युद्धे निय-
मेन योद्धुः ६८ भषन्नभीको भषणः सरोषः समु
ल्लिखन् भूमिमखिन्नचित्तः रुषा स्वकीयं चरणं
च वामं प्रचर्वयन्नाहवमाह घोरं ६९ प्रसन्नचित्ते
शुनि संमुखस्थे संधिर्भवेद्युद्धसमुद्यतानाम्

॥ टीका ॥

जयायेति कृतशांतचेष्टः यक्षः जयाय भवति कृताशांता चेष्टा येन स तथोक्तः
प्रदीप्तचेष्टस्तु प्रदीप्ता चेष्टा यस्य स तथोक्तः यक्षः पराजयाय
भवति अथ दिक्स्थानचेष्टाभिः दिक्च स्थानंच चेष्टा च ताभिः प्रदीप्तः
यक्षः युद्धे नियमेन योद्धुर्वधाय भवति ६८ भषन्निति भषणः अ
भीकः भयरहितः भषन् आरटन् अखिन्नचित्तः अखेदमनस्कः सरो
षः भूमिं समुल्लिखन् रुषा प्रकोपेन स्वकीयं निजं वामं चरणं प्रचर्वयन्
घोरं आहवं संग्रामं आह ६९ प्रसन्नचित्तेइति शुनि सारमेये प्र
सन्नचित्ते संमुखस्थे सति युद्धसमुद्यतानां संधि र्भवेत् अथवा परा-

॥ भाषा ॥

प्रकार पिंड क्रमकरकें स्थापन करने उनपिंडनमेंसूं श्वान जो नसे पिंडकूं भक्षण
करे वाही पिंडको लक्षण जाननो ॥ ६७॥ जयायेति ॥ जो श्वान शांत चेष्टा करतो होय
तो जय जाननो और दीप्त चेष्टा करतो होय तो पराजय जाननो और दिशा स्थान चेष्टा
इनकरकें दीप्त होय तो श्वान युद्धमें नियमकरकें योद्धाके वधके अर्थ जाननो
॥ ६८ ॥ भषन्निति ॥ श्वान निर्भय शब्द करत प्रसन्न चित्त होय क्रोधसहित पृथ्वी
कूं खोदतो होय क्रोध करकें अपने वांये चरणकूं चर्वण करतो होय तो घोर सं
ग्राम कहेहें एसो जाननो ॥ ६९॥ प्रसन्नचित्तेइति ॥ श्वान प्रसन्नचित्त होय सन्मु
ख आय ठाडो होय तो युद्ध कर्तानके संधी होय अथवा श्वान विमुख होय भाज

पराङ्मुखे वाथ पलायमाने भंगो भटानां झटिति प्र
दिष्टः ७० युद्धार्थिनो नामयुगेन राज्ञोः पृथक् पृथ
क् यक्षयुगं प्रकल्प्य मुंचेत्तयो र्योबलि मत्ति जि-
त्वा मध्यात्तयोस्तस्य जयो नृपस्य ७१ यद्यादददाते
न बलिं गृहीत्वा स्नेहान्वितौ भक्षयतोऽथवोभौ ज
यार्थिनोः स्यान्नृपयो स्तदानी मन्योन्यसंधानविधा
नबुद्धिः ७२ यन्नामकः श्वा प्रपलायनेच्छु र्ज्ञेयः
स सत्रास इतींगितज्ञैः यन्नामधेयः पुनरस्तशं
को न तस्य राज्ञो भय मस्ति चित्ते ७३

॥ टीका ॥

ङ्मुखे पलायमाने सति झटिति भटानां भंगः प्रदिष्टः प्रोक्तः ७० युद्धेति यक्षयुगं भषणद्वितयं युद्धार्थिनोः राज्ञोर्नामयुगेन पृथक् पृथक् प्रकल्प्य यक्षयुगं मुंचेत् ततस्तयो र्यक्षयुगयो र्मध्यात् यो जित्वा बलिं अत्ति तस्य नृपस्य जयो भवति ७१ यदीति उभौ श्वानौ बलिं गृहीत्वा यदि न आददाते न गृह्णीतः अथवा स्नेहान्वितौ उभौ भक्षयतः तदानीं जयार्थिनोः नृपयोः अन्योन्यसंधानविधानबुद्धिः परस्परमेलकरण मतिः स्यात् ७२ यदिति यन्नामकः श्वा प्रपलायनेच्छुः प्रपलायनं कर्तुमिच्छुः भ

॥ भाषा ॥

जाय तो शीघ्रही योद्धारनको भंग होय ॥ ७० ॥ युद्धेति ॥ युद्धकर्ता दोनो राजानके नामसूं दोय श्वान कल्पना करकें उनकूं बलिपिंडपे छोड दे उन दोनो श्वाननमेंसूं जो जीतकरकें बलिदानकूं भक्षण करजाय वा राजाको जय होय ॥ ७१ ॥ यदीति ॥ दोनो श्वान बली लेकरकें जो नहीं ग्रहण करें अथवा दोनो बली लेकरकें स्नेहयुक्त होय भक्षण करन लगे तो दोनो राजानके परस्पर मिलाप करवेकी बुद्धी होय ॥ ७२ ॥ यदीति ॥ जा राजाके नामको श्वान भागवेकी इच्छा करतो होय वो राजा भययुक्त जा-

मुंचतो घुरघुरारवं यदा वांछतो न खलु खादितुं ब
लिं मंडलौ कृतनिजास्पदाश्रयौ वैरमेव नभवेत्त
दारणं ७४ एको विशंको बलि माददाति पलाय
ते दूरत एव चान्यः यक्षो यदा तत्प्रधनं विनैव
राज्ञोर्भवेतां जयलाभ भंगौ ७५

॥ टीका ॥

वति स राजा इंगितज्ञैः सत्रासः भयेनसहितः इति ज्ञेयः ज्ञातव्यः यन्नामधेयः श्वा पुनरस्त शंकः स्यात् तस्यराज्ञः चित्ते भयं नास्तीति ज्ञेयं ७३ मुंचतइति मंडलौ यदा घुरघुरा रवं मुंचतौ खादितुं बलिंन वांछंतौ निजकृतास्पदाश्रयौ स्वविनिर्मिताश्रमस्थायिनौ भवतः तदा वैरमेव परस्परं विरोधएव भवेत् रणं नभवेत् ७४ एकइति एकः श्वा अविशंकः निर्भयः बलिं आददाति गृह्णाति अन्यः श्वा दूरतएव च पलायते यदा एवं विधौ यक्षौ भवतः तदा प्रधानं संग्रामं विनैव राज्ञो र्जयलाभभंगौ भवेतां जयलाभश्च भंगश्चेति द्वंद्वः एकस्य जयः स्यात् अन्यस्य भंगः स्यादित्यर्थः युद्धमायोधनं जन्यं प्रधनं प्रविदारणमित्यमरः ७५ ॥छ॥ ॥छ॥

॥ भाषा ॥

ननो चहिये जा नामको श्वान निर्भय होय वा राजाके चित्तमें भय नहीं जाननो ॥७३॥ ॥मुंचतइति॥ दोय श्वान बलिदान खायवेकूं नहीं वांछा करें और आपुसमें घुरघुर शब्द करत अपने अपने स्थानमें जाय बैठें तो दोनो राजानके आपुसमें बैरविरोध ही होय संग्राम नहीं होय ॥७४॥ एकइति ॥ दो श्वाननमेंसूं एकश्वान निर्भय बलिदान ग्रहण करे दूसरो श्वान दूरतेंही देखकर भाज जाय तो संग्रामविनाई राजानको जय लाभ भंग होंय एकको जय होय दूसरेको भंग होय॥ ७५॥

न स्थानतश्चेच्चलतः कदाचित्श्वानौ विसृष्टौ बलि
भक्षणाय वैरे प्रपन्नेपि कुतोपि हेतो र्भूपालयोः
स्या न्नरणं न संधिः ७६ श्वानावुभावप्यभिभूय
साक्षाद्यक्षो परो श्नाति बलाद्बलिं चेत् ध्रुवं तदा
न्यो नृपतिर्बलिष्ठ स्तौ भूपती जेतु मुपैति तूर्णं ७७
मध्यात्तयोर्मण्डलयो स्तु येन नैवेद्य मेकेन गृहीतमु
क्तम् भुंक्ते तृतीयः प्रणयेन तस्य मिलत्यऽक-
स्माद्युधि तत्र मित्रम् ७८

॥ टीका ॥

नेति बलिभक्षणाय विसृष्टावपि मुक्तावपि श्वानौ चेत् स्थानतःस्थानात् नचलतः नगच्छतः तदा वैरे प्रवृत्तेपि प्रपन्नेपि कुतोपि हेतोः तयोः भूपालयोः न रणं न संधिः स्यातां एवमेव तिष्ठतीत्यर्थः ७६ श्वानाविति श्वानौवुभावपि अभिभूय अपरो यक्षः चेत् बलिं बलात् अश्नाति भुंक्ते तदा ध्रुवं निश्चयेन अन्यो बलिष्ठो नृपतिः तौ भूपती जेतुं तूर्णमुपैति ७७ मध्यादिति तयोर्मंडलयोर्मध्यात् येनैकेन नैवेद्यं गृहीतमुक्तं पूर्वं गृहीतं पश्चान्मुक्तं त्यक्तं यदि तृतीयः प्रणयेन भुंक्ते तदा तस्य राज्ञः अकस्मात् तत्र युधि मित्रं मिलति ७८

॥ भाषा ॥

॥नेति॥ जो बलिदानके भक्षणके लियें दो श्वान छोडे वे श्वान स्थानतें उठे चलें नहीं तो दोनो राजानके वैर प्रवृत्त होय रह्यो है तोबी उनके संग्रामबी नही होय और संधीबी नहीं होय ॥ ७६॥ श्वानाविति॥ बलिदानपे छोडे दोनो श्वान उनकूं तिरस्कार करकें और श्वान बलात्कारसूं भक्षण करे तो निश्चय कर कोई और बलिष्ठ राजा जीतवेकूं शीघ्रही आय जाय॥ ७७॥ मध्यादिति॥ दोनो श्वाननके मध्यमेंतें जा एकने नैवेद्य पहलें तो ग्रहण कर लीनो पीछें छोड दियो होय और तीसरे श्वा-

मध्याद्द्वयोरन्यतरेण येन शुना गृहीतोबलिरात्मश
क्त्या आच्छिद्य भुंक्ते भषण स्तृतीयस्तस्यापर
स्तत्र भवत्यरातिः ७९ एकेन मध्यादुभयोर्गृही
तं गृह्णाति भक्ष्यं प्रणयात्तृतीयः श्वानौ यदिद्वा
वपि तौ निहंति जयत्यरातिं स तदासमित्रं ८०
समश्नुतो यद्यविरोध भावात् समं तृतीयेन शुना
तदन्नम् श्वानौ तदानीं समुपेत्यवश्यं राज्ञोस्तयोः
संधिविधायिमित्रम् ८१

॥ टीका ॥

मध्यादिति यदि द्वयोः शुनोर्मध्यात् अन्यतरेण येन शुना गृहीतो बलिः
अन्यः तृतीयो भषणः आत्मशक्त्या स्वीयबलेन आछिद्य आकृष्य
भुंक्ते तदा तस्य राज्ञः तत्र युधि अपरः अन्यः अरातिः शत्रुर्भवति
७९ एकेनेति उभयोर्मध्यादेकेन गृहीतं भक्ष्यं यदि अन्यः तृतीयः
श्वा प्रणयात् स्नेहात् गृह्णातित्तदा सतौ द्वावपि निहंति सामित्रं अरा
तिं जयति विषयानंतरो राजाशत्रुर्मित्रमतः परमित्यमरः ८० सम
श्नुतइति यदि श्वानौ अविरोधभावात् तृतीयेन शुनासमं तदन्नं सम
श्नुतःभक्षयतः तदानीं तयोः राज्ञोः संधिविधायि मेलकारकं मित्रम्

॥ भाषा ॥

श्वाननें स्नेह करकें खाय लीनो होय तो ता राजाकूं अकस्मात् युद्धमें मित्र मिलै ॥७८
॥मध्यादिति॥ जो दोनो श्वाननके मध्यमेंसूं ओर श्वाननें बली ग्रहण कर लीनो होय
ओर तीसरो श्वान अपनी शक्ती करकें छीन करकें भक्षण करलेवे तो ता राजाके संग्राममें
ओर शत्रु होय ॥ ७९ ॥ एकेनेति ॥ दोनो श्वाननके मध्यमेसूं एकने बली भक्षण
कर्यो होय ओर तीसरो श्वान स्नेहसूं ग्रहण करले जो दोनो श्वान वाकूं मारें तो मि
त्रसहित वेरीकूं जीत लें ॥ ८० ॥ समश्नुतइति ॥ जो दोनो श्वान तीसरेसूं विरोध न करे

आदाय चेद्वल्कलरज्जुकेशलतादिकं श्वा बलिमत्ति
जित्वा श्वानांतरं तस्य निबध्य शत्रुं राजा तदीयां
भुवमाददाति ८२ ध्रुवं रणोस्तीति यदा तु पृष्टे म-
ध्याच्छुनोः कल्पितराजनाम्नोः एकोपि चेष्टां प्र
करोति शांतां युद्धं भवेत्तन्नृपयो रवश्यं ८३ दिक्
स्थानचेष्टानिनदैः प्रशांतै र्यथोत्तरं संगरवृद्धिका
री चतुर्भि रेतै र्यदि तु प्रदीप्तैः स्यात्तन्न संधि र्न च
संपरायः ८४ ॥छ॥

॥ टीका ॥

अवश्यं निश्चितं समुपैति आयाति ८१ आदायेति यदि श्वा वल्कलकेशरज्जुलतादिकं आदाय गृहीत्वा श्वानांतरं जित्वा बलिं अत्ति तदा राजा शत्रुं वैरिणं सन्निबध्य तदीयां भुवं आददाति गृण्हाति ८२ ध्रुवमिति यदा तु ध्रुवं रणोऽस्तीति पृष्टे कल्पितराजनाम्नोः शुनोर्मध्यात् एकोपि शांतां चेष्टां प्रकरोति तदा तन्नृपयो रवश्यं युद्धं भवेत् ८३ दिगिति दिक्स्थानचेष्टानिनदैः दिक् च स्थानं च चेष्टा च निनदश्चेतीतरेतरद्वंद्वः तैः प्रशांतै र्यथोत्तरं संगरवृद्धिकारी संग्रामविवर्द्धकः श्वाप्र-

॥ भाषा ॥

तीसरे सहित भोजन करें तो दोनो राजानकूं मिलापको करायवेवारो मित्र अवश्य निश्चय आवे ॥ ८१ ॥ आदायेति ॥ जो श्वान वल्कल केश जेवडी लतापतौ आ इनकूं आदिले वस्तू ग्रहण करकें दूसरे श्वानकूं जीत करकें बलीकूं भक्षण करे तो राजा शत्रूकूं बांधकरकें वाकी पृथ्वीकूं ग्रहण करे ॥ ८२ ॥ ध्रुवमिति ॥ संग्राम निश्चय होयगो एसो प्रश्न होय तब राजानके नाम धरेहुये दोनो श्वान उनके बीचमेंसूं एकवी श्वान शांत चेष्टा करे तो राजानको युद्ध अवश्य होय ॥ ८३ ॥ दिगित्ति ॥ श्वान दिशाचेष्टा स्थानशब्दये च्यारों शांत होय वे करकें संग्रामकूं वढावे जो ये च्यारों-

अक्रूरदृग्मूर्द्धनि दत्त हस्तो निमीलिताक्षोऽर्द्ध निसृ
ष्टदृष्ट्या कौटिल्यगामी निकटं व्रजित्वा प्रियंकरः
श्वानददाति योऽह्वं ८५ यक्षो भषन्नंबरमीक्षमा
णः कर्णौ धुनोत्युत्पतति प्रधावन् यो वा प्रसर्पत्य
पवृत्य गत्वा स संपरायप्रशमाय राज्ञोः ८६ प्र
दक्षिणादुत्तरमप्रदक्षिणं यदा तदा संधिरनंतरं रणात्

॥ टीका ॥

वेत् चतुर्भिरेतैः दिक्स्थानचेष्टानिनदैः प्रदीप्तैः नसंधिः मेलः नच संपरायः संग्रामः स्यात् ८४ अक्रूरेति यः श्वा अक्रूरदृग् मूर्द्धनि दत्तहस्तः निमीलिते मुद्रिते आक्षिणी चक्षुषी येन यस्य वा स तथोक्तः अर्द्ध निसृष्टा दत्ता दृग् दृष्टिर्येन वा स तथोक्तः निकटं व्रजित्वा कौटिल्यगामी स प्रियं करोपि श्वा योऽह्वं नददाति ८५ यक्षइति यः यक्षः अंबरं आकाशं वीक्षमाणः भषन् प्रधावन् द्रुतं गच्छन् कर्णौ धुनोति उत्पतति उच्चलति दताति श्वा यो वा गत्वा अपवृत्य व्याघुट्य प्रसर्पति प्रकर्षेण गच्छति स राज्ञोः संपरायप्रशमाय संग्रामनिवारणाय भवति ८६ प्रदक्षिणादिति यदा श्वा प्रदक्षिणादपसव्यादुत्तरं अग्रे

॥ भाषा ॥

दीप्त होंय तो मिलापवी न होंय संग्रामवी नही होय ॥ ८४॥ अक्रूरेति॥ शांतदृष्टी होय मस्तकपे हात धर्‍यो होय नेत्र जाके मिचे होंय आधी दृष्टीसूं देखतो हुयो बलिदानके पास जाय करकें कुटिल गमन करे अर्थात् तिरछो गमन कर जाय तो वो श्वान प्रियको करवे वालो है तोहूं युद्धकूं नहीं देवै ॥ ८५॥ यक्षइति ॥ जो श्वान शब्द करत आकाशकूं देखतो हुयो कान हलावे और दोडतो हुयो उछल पडे अथवा अगाडी जाय पीछो वगद कर फिर प्रकर्ष करकें गमन करे तो राजानके संग्रामकूं निवारण करे ॥ ८६॥ प्रदक्षिणादिति ॥ जो श्वान जेमने माऊं होयकर पीछें वाम

करोति यक्षो यदि वै व्यतिक्रमात्तदा तु संधिः प्रथमं
रणं चिरात् ८७ राज्ञो रणं नैव भविष्यतीति प्रश्ने
कृते यद्यशुभा भवंति चेष्टाः समस्ताः सरमासुत
स्य भवेत्तदानीं समरोति घोरः ८८ लोलन् ध्रुवं
लोलयते. नरेशं स वाहनामात्यपदातिदेशं यत्कांड
वेगो हदते च यो सौ ब्रवीति भंगं युधि जागरूकः ८९

॥ टीका ॥

अप्रदक्षिणं वामं गच्छति तदा रणात् संग्रामात् अनंतरं पश्चात् संधिः स्यात् यदि यक्षः व्यतिक्रमाद्वैपरीत्येन करोति तदा प्रथमं संधिः स्यात् रणं चिरात् स्यात् ८७ राज्ञइति राज्ञो रणं नैव भविष्यतीति प्रश्ने कृते यदि सरमासुतस्य वक्रवालधेः श्वानस्य समस्ताश्चेष्टाः अशुभा भवंति तदानीं अतिघोरः अतिउत्कटः समरः संग्रामः स्यात् ८८ लोलन्निति योऽलोलन् जागरूकः स ध्रुवं सवाहनामात्यपदातिदेशं वाहनंच अमात्यश्च पदातयश्च देशश्चेति द्वंद्वः तैः सहितं नरेशं लोलयते धुनोति यः कांडवेगः शरवद्द्रुतगतिः सन् हदते च असौ युधि भंगं पराजयं ब्रवीति ८९

॥ भाषा ॥

भागमें गमन करे तो प्रथम संग्राम होय पीछें मिलाप होय जाय जो वामभागमें होयकर पीछें जेमने माऊं गमन करे तो प्रथम तो मिलाप होय फिर बोहोत कालपीछें संग्राम होय ॥ ८७॥ राज्ञइति ॥ राजाको युद्ध नहीं होयगो एसो प्रश्न करे तब श्वानकी जो समस्त चेष्टा अशुभ होंय तो अतिघोर संग्राम होय ॥ ८८॥ लोलन्निति ॥ जो श्वान प्रश्नकरेपे चलतो होय या चलायमान होय तो निश्चय कर वाहन मंत्री पेदल देश इनसहित राजाकूं चलायमान कर देवै जो श्वान बाणकी सीनाई बडे वेगसूं गमन करे और विष्ठा कर देवे तो संग्राममें भंग करावे ॥ ८९॥

शुना निमित्तं द्वितयं विरुद्धं शांतप्रदीप्तं च कृतंय
दि स्यात् मध्यात्तयो र्निष्फल मादिभूतं फलान्वि
तं पश्चिममामनंति ९० युद्धं विधातुं चलितस्य
मध्यात् सैन्यद्वयस्योरुमदस्य यत्र कौलेयको
मूत्रयते ध्वजादाऽवसंशयं तस्य भवेज्जयश्रीः ९१
विनिर्यतो मंदिरतोऽपसव्यं यक्षोपकारस्य यदि
प्रयाति कुर्यात्तदा तस्य जयं नियुद्धे पराजयं
वामगति र्विधत्ते ९२ ॥छ॥

॥ टीका ॥

शुनेति यदि शुना कुक्कुरेण शांतं प्रदीप्तं च निमित्तद्वितयं विरुद्धं कृतं स्यात् तदा तयोर्मध्यादादिभूतं प्रथमं निष्फलं फलरहितं पश्चिमं पाश्चात्यं फलान्वितं फलयुक्तं आमनंति कथयंति ९० युद्धमिति युद्धं विधातुं चलितस्य उरुमदस्य सैन्यद्वयस्यमध्यात् यत्र कौलेयको ध्वजादौ मूत्रयते तस्य राज्ञः असंशयं जयश्री र्भवेत् ९१ विनिर्यतइति मंदिरतः विनिर्यतो गच्छतः पुंसः यदि यक्षः अपसव्यं प्रदक्षिणं प्रयाति तदा तस्य नियुद्धे जयं कुर्यात् वामागतिः पराजयं विधत्ते नियुद्धं बाहुयुद्धेथेत्यमरः ९२ ॥छ॥

॥ भाषा ॥

॥शुनेति॥ जो श्वाननें शांत प्रदीप्त ये दोनो विरुद्ध किये होंय दोनोनमेसूं जो पहले
कियो होय वो फलरहित जाननो जो पीछें कियो होय वो फलसहित जाननो ॥९०॥
॥युद्धमिति॥ युद्ध करवेकूं बोहोत मदयुक्त दोनो सेनाके मध्यमेंसूं जो राजाकी
सेनामें श्वान ध्वजादिकनमें मूत्र करदे वा राजाको निःसंदेह जय और श्री होय॥
॥९१॥ विनिर्यतइति॥ युद्ध करवेकूं स्थानसूं निकसे वा पुरुषकूं जो श्वान जेमनो आ
यजाय तो वाकूं भुजायुद्धमें जयकरे जो श्वान वांयो आयजाय तो पराजय करे ९२

योद्धव्यमद्यैव मयेति यातु रयात्रिकं स्याच्छुभदं निमित्तं दिनांतरे यस्तु नरो युयुत्सुः क्षेमंकरं यात्रिकमेव तस्य ९३ धुन्वन् शिरः कर्णकलेवराणि जुगुप्सितं स्थानमुपेत्य मूत्रं कुर्वन् समावेदितवामचेष्टो यात्रा निषेधं कपिलः करोति ९४ चलद्वपु र्लोलितपुच्छजिह्वः क्रीडन् ललन् सन्मुखमापतंश्च सस्नेहचित्तो विनयेन युक्तः श्वा प्रस्थितानां विदधाति सिद्धिम् ९५ इ० श्वचे० युद्धप्र० ६

॥ टीका ॥

योद्धव्यमिति अद्यैव योद्धव्यं मयाइति यातुः जनस्येति शेषः अयात्रिकं निमित्तं यात्रानिषेधकं शकुनं शुभदं स्यात् यस्तु नरः दिनांतरे युयुत्सुः योद्धुमिच्छुः तस्य यात्रिकमेव क्षेमंकरं स्यात् यात्रिकमेतदेवेत्यपिपाठः ९३ धुन्वन्निति शिरः कर्णकलेवराणि शिरश्च कर्णौ च कलेवरं चेति द्वंद्वः धुन्वन् कंपयन् जुगुप्सितं स्थानं उपेत्य च मूत्रं कुर्वन् समावेदितवामचेष्टः समावेदितानिरूपिता वामा चेष्टा येन सः कपिलः यात्रा निषेधं करोति ९४ चलदिति एवंविधः श्वा प्रस्थि-

॥ भाषा ॥

॥योद्धव्यमिति॥ मोकूं अवी युद्ध करनो हें ओर वो गमन करे तो वा पुरुषकूं यात्राके निषेध करवेवारे जे शकुन हें वे शकुन वाकूं शुभके देवेवारे हें जो मनुष्य दिनांतरमें युद्धकी इच्छा करतो होय वाकूं यात्राके जे शकुन हें वे शुभकेरवेवारे जानने ॥९३ ॥धुन्वन्निति॥ श्वान मस्तक कान देह इनें कंपायमान करत निंदित स्थानमें आयकरकें मूत्र करे ओर वांई चेष्टा करे तो यात्राको निषेध जाननो ॥ ९४ ॥ चलदिति ॥ देह जाको चंचल होय टेढी जाकी पूंछ जीह्वा होय सन्मुख आवतो होय प्रसन्नचित्त होय नम्रतायुक्त होय क्रीडा करतो हलतो चलतो एसो श्वान प्रस्थित पुरुषन

शुभाशुभज्ञाननिमित्तभूतं श्रेष्ठं पुनश्चेष्टित मेतदत्र आख्यायते ख्यात मखिन्नचित्तैः सुखाय नृणां मुनिभि र्यदाद्यैः ९६ श्वा जिह्वया दक्षिणदिग्विभागं लिहन् समस्तोद्यमसिद्धिकारी नखाग्रजिह्वारदनैरवाम मंगं स्पृशन् लाभकरः सदैव ९७

॥ टीका ॥

तानां सिद्धिं विदधाति कीदृक् चलद्वपुः चंचलकायः पुनः कीदृक् लालितपुच्छजिह्वः लालिते वक्री कृते पुच्छजिह्वे येन स तथा पुनः कीदृशः सन्मुखं आपतन्नागच्छन् पुनः कीदृक् सस्नेहचित्तः पुनः कीदृक् क्रीडन् ललन् पुनः कीदृग् विनयेनयुक्तः नम्रः ९५ इतिव० टी० श्वचे० युद्धप्रकरणं षष्ठं ६ शुभेति शुभाशुभज्ञाननिमित्तभूतं शुभंचाशुभंच तयोः ज्ञानं अवबोधः तस्य निमित्तभूतं कारणभूतं श्रेष्ठं पुनश्चेष्टितमेतादिदं अत्र प्रकरणे आख्यायते यत् चेष्टितं अखिन्नचित्तैः अश्रांतमनोभिः आद्यैः मुनिभिः पूर्वर्षिभिरित्यर्थः नृणां सुखाय सुखहेतवे आख्यातं ९६ श्वेति श्वा श्वानः जिह्वया दक्षिणदिग्विभागं लिहन् समस्तेषु उद्यमेषु सिद्धिकारी स्यात् तथा नखाग्रजिह्वारदनैरवामं अंगं स्पृशन् सदैव लाभकरः स्यात् ९७

॥ भाषा ॥

कूं सिद्धी करे ॥ ९५॥ इतिवसंतराजभाषाटीकायां श्वचेष्टिते युद्धप्र०षष्ठं ॥ ६॥ शुभेति नहीं श्रांत हें मन जिनको एसे पूर्व ऋषी तिननें मनुष्यनके सुखके अर्थ जो चेष्टा कही हें वे शुभ असुभको ज्ञान ताको कारण भूत श्रेष्ठ श्वानकी चेष्टा ये या प्रकरणमें कहें हें ॥ ९६॥ श्वेति ॥ जो श्वान जिह्वा करकें दक्षिण दिग्विभागकूं चाटे तो समस्त उद्यमनमें सिद्धी करे ओर नखनको अग्र जिह्वा दांत इनकरकें जेमने अंगकूं स्पर्श करे तो सदा लाभको करवेवालो होय ॥ ९७॥

॥ छ॥

जघनं जठरं हृदयं च शिरो भषणो यदि दक्षिणतः
स्पृशाति क्रमतः प्रकरोत्यधिकादधिकं नियतं
तदभीष्टफलं सकलं ९८ कर्तव्यवैरिव्यसनेष्वि
दं मे सिद्धिं नयास्यत्युररीकृते श्वा धुनोति कर्णौ
यदि तन्नरस्य भवेद्ध्रुवं चिंतितकार्यसिद्धिः ९९
विजृंभते यो हदतेऽलसो वा भयादि चिंतास्वऽभ
याय स स्यात् प्रयोजनेषु त्वपरेषु सोपि भयाद्य
नर्थप्रतिपादनार्थम् १०० ॥ छ ॥

॥ टीका ॥

जघनमिति यदि भषणः दक्षिणतः जघनं जठरं उदरं हृदयं स्तनांतरं
शिरश्च क्रमतः स्पृशाति तदाभीष्टफलं सकलमधिकादधिकं नियतं
निश्चयेन प्रकरोति नितंबारोहौ स्त्रीकट्याः पश्चाज्जघनमग्रतः इति
हैमः ९८ कर्तव्येति कर्तव्यवैरिव्यसनेषु कर्तव्यं वैरिणां व्यसनं
येषु तेषु कृत्येषु सत्सु इदं मे मम सिद्धिं नयास्यतीत्युररीकृते सति
यदि श्वा कर्णौ धुनोति तदा नरस्य ध्रुवं चिंतितकार्यसिद्धिर्भवेत् ९९
विजृंभतेइति योभषणः विजृंभते जृंभांकुरुते हदते पुरीषोत्सर्गं
कुरुते अलसो निरुद्यमो वा सभयादिचिंतासु अभयाय स्यात् तु

॥ भाषा ॥

॥जघनमिति॥ जो श्वान जेमनेमाऊंकी जंघा उदरहृदय वक्षस्थल शिर इनें क्रमतें स्प
र्श करे तो अभीष्ट फल सब अधिकतें वी अधिक निश्चय करे ॥९८॥ कर्तव्येति ॥
वैरी करकें कियो गयो कोई दुःखरूपी कृत्य वामें ये मेरो कार्य वा सिद्धी नही होय
गो एसो प्रश्न करे जो श्वान अपने कर्णनकूं हलाय दे तो मनुष्यके चिंतित कार्यकी
सिद्धी होय ॥ ९९ ॥ विजृंभितेइति ॥ जो श्वान जंभाई लेवे वा विष्टा करे वा आलसी
निरुद्यमी होय तो भयकूं आदिले चिंतानमें अभय करे फिर और प्रयोजनमें भयकूं

अंकूरिते पल्लविते सपुष्पे फलान्विते भूरुहि सारमेयः पुष्पे फले क्षीरतरौ च पंके संपूर्णकुंभेंऽभसि गोमये वा १०१ केदारमृत्स्ना मणिकेष्टिकासु प्रासादकुड्यान्नचयादिकेषु स्थानेषु वस्तुष्वपि शोभनेषु भूम्यादिलाभाय करोति मूत्रं १०२

॥ टीका ॥

पुनरर्थे अपरेषु प्रयोजनेषु तु सोपि भयाद्यनर्थप्रतिपादनाय भयाद्यनर्थस्य प्रतिपादनं कथनं तस्मै स्यात् १०० अंकूरितेइति अंकुराजाता अस्येति अंकूरितः तस्मिन् अंकूरयुक्ते पल्लविते जातपल्लवे सपुष्पे पुष्पसंयुक्ते फलान्विते भूरुहि वृक्षे तथा पुष्पे तथा फले तथा क्षीरतरौ पंके कर्दमे संपूर्णकुंभे घटे अंभसि पानीये गोमये छगणे वा १०१ केदारेति केदारे वप्रे मृत्स्ना मृत्तिका तस्यां मणिके जलभाजनविशेषे गेडुं इति प्रसिद्धे वा कोठीहंडा इष्टिकाईट इति प्रसिद्धा तस्यां प्रासादः देवभूभृतां गृहं कुड्यं भित्तिः अन्नचयादिकं सस्यसमूहप्रभृति एतेषु स्थानेषु एतेषामितरेतरद्वंद्वः एतद्व्यतिरिक्तशोभनेषु वस्तुष्वपि सारमेयः भूम्यादिलाभाय मूत्रं करोति कुरुते अलंजरः स्यान्माणिके कर्कर्यालुर्गलंतिकेत्यमरः १०२

॥ भाषा ॥

आदिले अनर्थको करवेवालो होय ॥ १००॥ अंकूरितेइति ॥ अंकूर पल्लव पुष्प फल येजामें प्रगट होंय एसे वृक्षपे वा पुष्पफल दूध जामेंसूं निकसे एसो वृक्ष कीच भरोहुयो घट जल गोवर ॥ १०१॥ केदारेति ॥ खेत मृत्तिका जल पात्र इंट देवघर राजघर कोठडी भींत अन्नको समूहकूं आदिले इन स्थाननमें अथवा इनसूं न्यारे सुंदर शोभायमान वस्तूनमें श्वान मूत्र करे तो पृथ्वीकूं आदिले पदार्थनको लाभ करे ॥ १०२॥

शय्यासनच्छत्रहुताशनेषु छिद्रेषु धूली निचयेषु यक्षः स्थानेषु मूत्र विसृजत्यनंतः स्यादर्थलाभोऽभिमतो नराणां १०३ खंडिनीमुशलकांजिकधानी शूर्पकेषु कृतदक्षिणचेष्टे लभ्यते बहु धनं शुनि मूत्रं तेषु कुर्वति स्कभोज्यमभीष्टं १०४ सिद्धान्नविष्ठाफलमांसवक्त्रो लाभाय यक्षोऽभिमुखः सदैव सहस्तपादास्थिफलादिके स्तु स्तोके दिनैः स्यान्महते धनाय १०५

॥ टीका ॥

शय्येति यक्षः शय्यासनछत्रहुताशनेषु शय्याच आसनंच छत्रंच हुताशनश्चेति द्वंद्वः तेषु छिद्रेषु बिलेषु धूलीनिचयेषु च एतेषु स्थानेषु यदा मूत्रं विसृजति कुरुते तदा नराणां अनंतः अपरिमितः अभिमतो वांछितः अर्थलाभः स्यात् १०३ खंडिनीति खंडिनी उखलीति प्रसिद्धा मुशलं अयोग्रं कांजिकधानी कांजिकभृतपात्रं शूर्पकं तितउः एतेषामितरेतरद्वंद्वः एतेषु कृतदक्षिणचेष्टे श्वनि सति बहुधनं लभते तेषु मूत्रं कुर्वतिसति अभीष्टं भोज्यं लभते १०४ सिद्धान्नेति सिद्धान्नविष्ठाफलमांसवक्त्रः सिद्धान्नं राद्धानं विष्ठागूथं फलं आम्रादि

॥ भाषा ॥

॥ शय्येति ॥ जो श्वान शय्या आसन छत्र अग्नी इनमें छिद्र बिलो धूलको समूह इन स्थाननमें मूत्र करे तो मनुष्यनकूं अनंत वांछित अर्थको लाभ करे ॥ १०३ ॥ ॥ खंडिनीति ॥ उखली मुसल कांजीको भरोहुयो पात्र सूप इनमें दक्षिण अंगकी चेष्टा करतो होय श्वान तो बोहोतसो धन प्राप्त होय और इनमें मूत्र करे तो वांछित भोजनके योग्यको लाभ होय ॥ १०४ ॥ सिद्धान्नेति ॥ रोटी पुडी लडुआ इनकूं आदिले सिद्ध हुयो पदार्थ और विष्ठा फल मांस ये जाके मुखमें होय एसो श्वान

तुंगे स्थितः श्वा यदि सुप्रदोषकरेणकंडुयति दक्षिणेन शिरस्तदा सर्वमनीषितानि सिद्ध्यत्यसाध्यान्यपियान्यभूवन् १०६ अधिष्ठितः श्वा शयनं स्वकीयमुद्घाटय चेद्दक्षिणमक्षिपश्येत् नैमित्तिकं स्यात्तदविघ्नसिद्ध्यै चिकीर्षिते वस्तुनि दुष्करेपि १०७

॥ टीका ॥

मांसं पललं एतेषामितरेतरद्वंद्वः तानि वक्त्रे मुखे यस्य स तथोक्तः अभिमुखो यक्षः सदैव लाभाय भवति तथा हस्तपादास्थिफलादिकैः पूर्णवक्त्रस्तु सः स्तोकैर्दिनैः महते धनाय स्यात् हस्तः करः पादः क्रमः अस्थि कीकसं फलादिकं फलप्रभृतिकं एतेषामितरेतरद्वंद्वः १०५ तुंगेइति यदि तु श्वा तुंगे स्कप्रदेशे स्थितो दक्षिणेन करेण शिरः कंडूयति तदा सर्वमनीषितानि सिद्ध्यंति असाध्यान्यपि साधयितुमशक्यान्यपि यान्यभूवन् १०६ अधिष्ठितइति यदि श्वा स्वकीयं आयतनं गृहं क्वचिच्छयनमित्यपिपाठः अधिष्ठितः दक्षिणमक्षि उद्घाटय नैमित्तिकं शाकुनिकं पश्येत् तदा दुष्करेपि चिकीर्षिते कर्तुमिष्टे वस्तुनि अविघ्नासिद्धिः विघ्नरहितासिद्धिः स्यात् १०७

॥ भाषा ॥

सन्मुख आवे तो सदां लाभके अर्थ जानना ओर हाथ पाम हाड फलादिक इन कर
कें मुख जाको भर्यो होय वो श्वान महान् धनके लाभके अर्थ जानना ॥ १०५ ॥
॥ तुंगेइति ॥ जो श्वान ऊंचे स्थानपे स्थित होय जेमने हाथकरकें मस्तक खुजावे तो
सर्व वांछित सिद्ध होंय जे पहलें नहीं होयवेके योग्य कार्य हैं वेवी सिद्ध होंय ॥ १०६
॥ अधिष्ठितइति ॥ जो श्वान अपने स्थानमें स्थित होय जेमने नेत्रकूं खोल करकें शकु
नलेवेवारेकूं देखे तो दुष्कर करवेके योग्य वस्तूमें वा कार्यमें निर्विघ्नसिद्धी होय ॥ १०७

दृष्ट्या प्रपश्यन् स पयो ब्रवीति कौलेयकः पांडुर
वस्त्रलाभं विलोचने चेद्विनिमील्य शेते भूयोपि
तस्मिन् शयने तथैव १०८ शुभावहः श्वा शय
नस्थितः सन् शिरोधरा मुन्नमयन्नराणां धुनोति
कर्णौ यदि तत्समस्तप्रयोजनानां कुरुते प्रणाशं
१०९ गमागमादावपि सारमेयः शुभो भवेदीदृश
चेष्टितो यः ब्रूमोऽधुना श्वानमऽनिष्टचेष्टं स्थि
तो प्रवेशे गमने च दुष्टम् ११० ७

॥ टीका ॥

दृष्ट्येति कौलेयकः दृष्ट्या पयः प्रपश्यन् चेद्यदि लोचने विनिमील्य भूयोपि तस्मिन् शयने तथैव शेते तदा स पांडुरवस्त्रलाभं ब्रवीति १०८ शुभेति शयने स्थितः सन् शिरोधरां ग्रीवां उन्नमयन् नराणां शुभावहः स्यात् यदि कर्णौ धुनोति तदा समस्तप्रयोजनानां सकलकार्याणां प्रणाशं कुरुते १०९ गमागमेति यः सारमेयः ईदृशचेष्टितः स सारमेयः गमागमादावपि गमनागमनादावपि शुभो भवेत् गमश्च आगमश्च गमागमाविति द्वंद्वः तावादौ यस्य तस्मिन् अधुना सांप्रतं स्थितो अवस्थितो प्रवेशे नगरग्रामादभ्यंत-

॥ भाषा ॥

॥दृष्ट्येति॥ जो श्वान दृष्टी करकें जल वा दूधकूं देखतो हुयो नेत्रनकूं मीच करकें फिर अपने सोयवेके स्थानमें तेसेंही जाय सोवे तो श्वेतवस्त्रको लाभ करे॥ ॥१०८॥ शुभेति॥ श्वान अपने सोयवेके स्थानमें स्थित होय नाड ऊंची करे तो मनुष्यनकूं शुभको करवेवालो होय जो काननकूं हलाय देवे तो सवले कार्यनको नाश करे ॥१०९॥ गमागमेति ॥ जो श्वान पहलें कही वोई चेष्टा करतो होय तो गमन आगमन इनकूं आदिले सव कार्यनमें शुभ करे अव स्थितीमें -

उद्धूलितोऽश्मादिक पूर्णवक्त्रो भवेत् पुनश्चौर भयाय
यक्षः यस्याग्रतः श्वास्थि लवं गृहीत्वा भषस्यसौ
याति पुरं यमस्य १११ विना मिषं यत्र च जागरूकाः
कुर्वंति चिंतां बहवो मिलित्वा उत्पद्यते निग्रह
हेतुभूतं तत्राचिराद्विग्रहदौस्थ्यमुग्रं . ११२ संछिन्नपुच्छश्रवणो रुगार्तः कृशो विचिंताभिमुखः प्रसर्पन्

॥ टीका ॥

रगमनेऽगमने च परदेशप्रस्थाने च अनिष्टचेष्टं दुष्टं श्वानं वयं ब्रूमः
११० उद्धूलितइति उद्धूलित रजोवगुंठितः अश्मादिभिः पूर्णवक्त्रः पुरोभवन्
यक्षः चौरभयाय स्यात् यस्य अग्रतः अग्रे श्वा अस्थिलवं
अस्थिखंडं गृहीत्वा भषति असौ पांथः यमस्यपुरं याति १११
विनेति यत्र च जागरूकाः श्वानः आमिषं मांसं विना बहवो मिलित्वा
चिंतां कुर्वंति तत्रअचिरात् स्तोककालेन नृणां नराणां निग्रहहेतुभूतं
काराक्षेपकारणं उग्रं उत्कटं विग्रहदौस्थ्यं कलहकष्टं उत्पद्यते ११२
संछिन्नेति संच्छिन्नपुच्छश्रवणः कर्तितपुछकर्णः रुगार्तः आमय-

॥ भाषा ॥

नगरग्रामादिकनके भीतर प्रवेश करतेमें और परदेशके गमनमें अनिष्ट जाकी चेष्टा
ऐसे दुष्टश्वानकूं हम कहेंहें ॥ ११० ॥ उद्धूलितइति ॥ रजमें लिप्त रह्यो होय पाषाणकूं
आदिले वस्तू करकें मुख जाको भर्यो होय एसो श्वान अगाडी आयजाय
तो चौरभयके अर्थ जाननो जाके अगाडी श्वान हाडको टूक मुखमें लेकरकें भूंसे
तो पांथ पुरुष यमराजके पुरकूं प्राप्त होय ॥ १११ ॥ विनेति ॥ जा जगें श्वान मांसविना
बोहोतसे मिलजांय तो चिंता करावें तहां शीघ्रही मनुष्यनकूं काराग्रहमें
पटकवेके योग्य बडो विग्रह कलह कष्ट प्रगट करे ॥ ११२ ॥ संच्छिन्नेति ॥ पूंछ
कान जाके कटे होंय रोग करकें पीडित होय दुर्बल होय विशेषकर चिंतातुर होय

कार्योद्यतेषु प्रविलोक्यमानः श्रेयो विधायी नहि सारमेयः ११३ निमज्ज्य तोये स्ववपु र्विधुन्वन् कौलेयक श्चौरभयं करोति भषन्नभीक्ष्णं पथि मंदिरे वा ग्रामेऽथवा चौरभयाय भूम्ने ११४ अत्युच्च नादं यदि वाति दीनं दृष्ट्वा दिनेशं भषणं बहूनाम् कौलेयकानां वमनं विजृंभां निंदंति मूर्द्धश्रवसोश्च कंपम् ११५

॥ टीका ॥

पीडितः कृशः दुर्बलः विचिंतः विशेषेण चिंतातुरः अभिमुखं संमुखं प्रसर्पन् आगच्छन् सारमेयः कार्योद्यमेषु प्रविलोक्यमानः श्रेयो विधायी नभवति श्रेयः कल्याणं विधातुं शीलं यस्य सतथेति बहुव्रीहिः ११३ निमज्ज्येति तोये निमज्ज्यस्ववपुर्विधुन्वन् कौलेयकश्चौर भयं करोति पथि मार्गे मंदिरे गृहे वा अथवा ग्रामे कौलेयकः अभीक्ष्णं वारंवारं भषन् भूम्ने राज्ञे चौरभयाय स्यात् ११४ अत्युच्चेति दिनेशं सूर्यं दृष्ट्वा वीक्ष्य बहूनां कौलेयकानां अत्युच्चनादं यदि वाअतिदीनं भषणं तथा विजृंभां जृंभणं तथा वमनं छर्दिं मूर्द्धः श्रवसोश्च कंपं निंदंति क्वचित् निहंतीतिपाठः ११५ ॥ छ॥

॥ भाषा ॥

एसो श्वान सन्मुख आवे और जे मनुष्य कार्यमें लग रहे होंय उनमांऊं देखे तो कल्याणको करवेवालो नहीं जाननो ॥ ११३ ॥ निमज्ज्येति ॥ जलमें डूब करकें फिर अपने अंगकूं हल हलावे तो श्वान चौरभय करे मार्गमें घरमें वा ग्राममें श्वान वारंवार भूंसे तो राजाके चौरभयके अर्थ जाननो ॥ ११४ ॥ अत्युच्चेति ॥ सूर्यकूं देखकरकें वोहोंतसे श्वान अति ऊंचो शब्द करे अथवा अति दीन बोलें वा तेसें ही जंभाई लेवें वा वमन करे वा मस्तक कानकूं कंपायमान करे तो वे श्वान निंदित जानने वा वे कार्यकूं नाश करें ॥ ११५

द्वारप्रदेशे जघनं विघर्षन् पूजार्हपांथागमनाय यक्षः करोति तत्रोपविशंश्च पुंसां संगं जनेनाभिमतेन सार्द्धम् ११६ प्रविश्य गेहं रभसेन यक्षः स्तंभं समालिंगति योऽथवा यः चुल्लीं समारोहति स ब्रवीति समागमं स्निग्धजनेनसार्द्धम् ११७ सुहृत्समागच्छति दूरदेशात् कंडूयमाने शुनि दक्षिणांगं शिरःप्रदेशस्पृशिचाति तूर्णं मिष्टो जनो निश्चित मभ्युपैति ११८ ॥छ॥

॥ टीका ॥

द्वारेति द्वारप्रदेशे जघनं विघर्षन् यक्षः पूजार्हपांथागमनाय भवति तत्र द्वारप्रदेशे उपविशंश्च श्वा पुंसां अभिमतेन जनेन सार्द्धं संगं करोति ११६ प्रविश्येति यो यक्षः गेहे प्रविश्य स्तंभं समालिंगते अथवा यः चुल्लीं समारोहति स यक्षः स्निग्धजनेन सार्द्धं समागमं संबंधं ब्रवीति ११७ सुहृदिति शुनि दक्षिणांगं कंडूयमाने दूरदेशात् सुहृन् मित्रं समागच्छति आयाति शिरःप्रदेशस्पृशि शिरसः प्रदेशं स्पृशतीति शिरःप्रदेशस्पृक् तस्मिन् शिरःप्रदेशस्पृशि शुनि च अति तूर्णं अतिशीघ्रं निश्चितं निश्चयेन इष्टो जनः अभ्युपैति आगच्छति ११८

॥ भाषा ॥

॥ द्वारेति ॥ घरके द्वारदेशमें जंघाकूं घिसै तो पूजवेके योग्य मार्गको चलो हुयो कोई आवै जो श्वान द्वारदेशमें बैठो होय तो वांछित जनन करके समागम होय ॥ प्रविश्येति ॥ जो श्वान घरमें प्रवेश करके स्तंभसूं आलिंगन करे अथवा चुल्हे पे चढजाय तो स्नेहवान् पुरुषको समागम करावे ॥ ११७ ॥ सुहृदिति ॥ श्वान जेमने अंगकूं खुजावे तो दूरदेशतें मित्र सुहृद आवे जो मस्तककूं स्पर्श करे तो अति शीघ्र निश्चयकर इष्ट जन आवे ॥ ११८ ॥

छायांतिकस्थो विदधाति घर्मे यद्युत्कटेन स्थितिमा
सनेन उत्पादयत्याशु विरोधमुग्रं तज्जागरूकः
सुहृदापि साकं ११९ शुभप्रदो दक्षिणचेष्टितः-
स्यात् सर्वत्रकाले सकलोद्यमेषु शांतं प्रदेशं ककु
भं च शांतांश्वासं श्रयेत् प्राक्तनपुण्ययोगात् १२०
कार्याणि कार्याणि नरेण नित्यं सर्वाणि दीप्तानि शु
नि प्रदेशो तान्यन्यथा यो विदधाति तस्य पतंत्य
नर्था वध बंधनाद्याः १२१

॥ टीका ॥

छायेति यदि यक्षः छायांतिकस्थः छायास्थितः उत्कटेन आसनेन धर्मे स्थितिं विदधाति तदा सजागरूकः सुहृदापि सार्द्धं आशु शीघ्रं उग्रं विरोधकलहं उत्पादयति क्वचित् प्रविश्य गेहमिति पाठोपि दृश्यते ११९ शुभेति श्वा दक्षिणचेष्टितः सर्वत्र काले सर्वस्मिन् काले सकलोद्यमेषु सर्व प्रयत्नेषु शुभप्रदः स्यात् श्वा दक्षिणचेष्टितः सन् शांतं प्रदेशं शांतं स्थानं ककुभं दिशं च शांतां प्राक्तनपुण्ययोगात् प्राचीनपुण्यसंबंधात् संश्रयेत् आश्रयेत् १२० कार्याणीति नरेण शुनि पृष्ठे सति सर्वाणि दीप्तानि कार्याणि कार्याणि कर्तव्यानि अन्यथा उक्तवैपरीत्ये-

॥ भाषा ॥

॥ छायेति ॥ जो श्वान छायामें बेठे हुयो होय तो श्रेष्ठ आसन करकें धर्ममें स्थिती करे वोही श्वान सुहृदजनन करकें शीघ्र बडो उग्र कलह प्रगट करावे॥११९॥ शुभेति जो श्वान पूर्वजन्मके पुण्य योगसूं दक्षिण अंगकी चेष्टा करतो होय शांतस्थानमें होय शांत दिशामें होय तो सदा सर्वदा संपूर्ण कार्यनमें शुभको देवेवारो जाननो ॥ १२० ॥ कार्याणीति ॥ श्वान पीठ पीछें होय और चेष्टा स्थान दिशा शब्द ये सब दीप्त होंय तो कार्य करवेके योग्य है जो इनसूं विपरीत होय जो कदाचित् कार्य करे तो वा पुरुषकूं

कंडुयमानः स्वकरं करोति सर्वाणि कार्याणि फलान्वितानि ब्रह्मप्रदेशे मधुरारवः श्वा ददाति भोज्यं सममामिषेण १२२ यस्येक्षते वेश्मनि सारमेय श्चिरं नभो गोमयमांसविष्ठाः रामां मनोज्ञां द्रविणं प्रभूतं प्राप्नोत्यसौ सौख्यमनश्वरं च १२३ वसुंधरायाः कमपि प्रदेशं मूर्द्ध्ना स्पृशन् यद्यवलोकते श्वा ॥

॥ टीका ॥

न यस्तानि कार्याणि विदधाति तस्य वधबंधनाद्या अनर्थाःउत्पतंति समुत्पद्यंते १२१ कंडुयमानइति स्वकरं कंडूयमानः श्वा सर्वाणि कार्याणि फलान्वितानि करोति ब्रह्मप्रदेशे मस्तकोर्द्ध प्रदेशे मधुरारवः श्वा आमिषेण मांसेन समं साकं भोज्यं ददाति १२२ यस्येति यस्य वेश्मनि सारमेयः चिरं नभोगोमयमांसविष्ठाः चिरं चिरकालं नभः आकाशं गोमयं छगणं मांसं पललं विष्ठा गूथं एतेषामितरेतर द्वंद्वः ईक्षते विलोकयति असौ नरः मनोज्ञां रामां स्त्रियं प्रभूतं द्रविणं धनं अनश्वरं अविनाशि सौख्यं च प्राप्नोति १२३ वसुंधरायाइति वसुंधरायाः पृथिव्याः कमपि प्रदेशं मूर्द्ध्ना स्पृशन् यदि श्वा अवलोकते तदा ध्रुवं

॥ भाषा ॥

वध वंधनादिक प्रगट होंय ॥१२१॥ कंडूयमानइति ॥ श्वान अपने हाथकूं खुजावे तो संपूर्ण कार्य फलसहित करे जो मस्तकके ऊपर मधुरशब्द बोले तो मांस सहित भोजनके योग्य पदार्थ देवै ॥१२२॥ यस्येति ॥ जाके घरमें - श्वान चिरकाल तांई अर्थात् बोहोत देर तांई आकाश गोवरमांस विष्ठा इनकूं देखतो होय तो मनुष्य सुंदर स्त्री बोहोतसो धन जाको नाश नहीं एसो सौख्य प्राप्त होय ॥१२३॥ वसुंधरायाइति ॥ पृथ्वीके कोई स्थानकूं श्वान मस्तक करके स्पर्श करतो होय वा देखतो होय तो निश्चय वा स्थानमें धन हैं एसो सिद्धपुरुष

ध्रुवं तदा तत्र महानिधानमस्तीति सिद्धैः कथितं
रहस्यम् १२४ दिनकराभिमुखो दिवसात्यये कु
तरवः खलु कर्षकभीतये पवनदिग्वदनस्तु
निशामुखे भवति चौरसमीरणभीतये १२५
उदङ्मुखो वक्ति रुवन्निशीथे द्विजोपपीडां मरणं
गवां च कुमारिकादूषणगर्भपातवह्नीन्निशां
ते शिवदिग्मुखः श्वा १२६ ॥ छ ॥

॥ टीका ॥

तत्र महानिधानमस्तीति सिद्धैः रहस्यं कथितं १२४ दिनकरेति दिवसात्यये दिनकराभिमुखः कुतरवः श्वा खलु निश्चितं कर्षकभीत्यै भवति तु पुनः निशामुखे संध्यायां पवनदिग्वदनः वायुदिङ्मुखः चौरसमीरणभीतये चौरास्तस्कराःसमीरणो झंझादिवायुः तयोर्भीति भयं तस्यै स्यात् १२५ उदङ्मुखइति निशीथे अर्द्धरात्रे उदङ्मुखः उत्तरदिग्वक्त्रः श्वा रुवन् द्विजोपपीडं ब्राह्मणानां बाधां गवां मरणं च वक्ति निशांते निशावसाने शिवदिङ्मुखः ईशानवदनः श्वा कुमारिकादूषणगर्भपाते वह्नीन् वक्ति कुमारिकायाः दूषणं लांछनादि गर्भपातो गर्भस्रावः वह्निः अग्निदाहः यदेक देशो पदसमुदायोपचारात्

॥ भाषा ॥

नको रहस्य वचन कह्यो हुयो है ॥ १२४ ॥ दिनकरेति ॥ दिवसके अंतमें सूर्यके सन्मुख श्वान शब्द करे तो निश्चय खेतीवारेनकूं भय करे फिर संध्या समयमें वायुदिशामाऊं मुख करकें बोले तो चौर पवन इनको भय करे ॥ १२५ ॥ उदङ्मुख इति ॥ अर्द्धरात्रीमें उत्तरदिशामें मुखकर श्वान बोले तो ब्राह्मणनसूं बाधा करे और गौनको मरण होय और रात्रीके अंतमें ईशानमाऊं मुख करकें बोले तो कन्याके कन्यापनेको दूषण और गर्भपात अग्नीको लगनो ये होंय ॥ २६ ॥

प्रातर्दिनेशाभिमुखोग्निदिक्स्थो भषन् विधत्ते नल
चौरभीतिं दिनस्य मध्येऽनिलमृत्युभीतिं सरक्त-
पातं कलहं दिनांते १२७ भषन्दिनेशाभिमुखः
प्रभाते ग्रामस्य मध्ये नृपनाशनाय वर्चो विमुंचन्
यदि दृश्यते श्वा सिद्धेऽपि कार्ये तदुपद्रवः स्यात् १२८
उर्द्ध्वाननाभास्करसंमुखीनाः श्वानोरुवंतो महते भयाय॥

॥ टीका ॥

एतेषामितरेतरद्वंद्वः १२६ प्रातरिति प्रातः प्रभाते अग्निदिक्स्थः दिनेशाभिमुखो भषन् श्वा अनलचौरभीतिं वह्नितस्कराभ्यां भयं विधत्ते दिनस्य मध्ये दिनेशाभिमुखो भषन् श्वा अनिलमृत्युभीतिं विधत्ते दिनांते दिनेशाभिमुखो भषन् श्वा सरक्तपातं कलहं विधत्ते १२७ भषन्निति प्रभाते प्रभातकाले ग्रामस्य मध्ये सूर्यसन्मुखो भषन्श्वा नृपनाशनाय स्यात् यदि दिनेशाभिमुखः श्वा विष्ठां विमुंचन् दृश्यते तदा सिद्धेपि कार्ये उपद्रवः स्यात् १२८ ऊर्ध्वाननाइति भास्कर संमुखीनाः ऊर्द्ध्वाननाः रुवंतः श्वानः महते भयाय स्युः हि निश्चितं

॥ भाषा ॥

॥प्रातरिति॥ प्रभातकालमें अग्नि दिशामें स्थित होय सूर्यके सन्मुख देखतो जाय शब्द करे तो अग्नी चौर इनको भय करे और दिनके मध्यमें सूर्य सन्मुख देखतो जाय शब्द करे तो अग्नी मृत्यू इनको भय करे सायंकालकूं सूर्यके सन्मुख देखतो जाय और शब्द करे तो श्वान रक्तपातसहित कलह करावे ॥१२७॥ भषन्निति॥ प्रभातकालमें ग्रामके मध्यमें सूर्यके सन्मुख देखकर श्वान बोले तो राजाके नाशके अर्थ जाननो ॥ जो सूर्यके सन्मुख देखतो जाय विष्ठा करतो होय एसो श्वान दीखे तो सिद्ध हुये कार्यमें उपद्रव होय ॥ १२८॥ ऊर्द्ध्वाननाइति॥ सूर्यके सन्मुख होय ऊंचो मुख करे हुयें श्वान भूंसे तो महान् भय करें संध्यासमयमें या प्रकार

एवं हि संध्यासमयेन्यदा तु निर्वासकाः स्यु र्नगरस्य तस्य १२९ ग्रामं निशायां खरसारमेयाः शून्यं विधातुं सहिता भवंति ग्रामे भषित्वा भषणाः श्मशाने रुवंति नाशाय च मुख्य पुंसः १३० ग्रामस्य मध्ये बहवो मिलित्वा श्वानो मुहुः क्रूररवा रटंतः मुख्यस्य पुंसः कथयंत्यसौख्यं श्वारण्यगः स्यात् सदृशो मृगेण १३१

॥ टीका ॥

संध्या समयेपि एवमेवं रुवंतः महते भयाय भवंति अन्यदा तु अन्यस्मिन् समये तु ऊर्द्ध्वानना रुवंतः तस्य नगरस्य निर्वासिकाः उद्वसकारकाः स्युः १२९ ग्राममिति निशायां खरसारमेयाः ग्रामं शून्यं विधातुं सहिताः भवंति भषणाः ग्रामे भषित्वा श्मशाने मुख्यपुंसो नाशयं रुवंति १३० ग्रामस्येति ग्रामस्य मध्ये बहवो मिलित्वा श्वानाः मुहुः मुहुः क्रूररवाः रटंतः मुख्यस्य पुंसः असौख्यं कथयंति अरण्यगः श्वा मृगेण हरिणेन सदृशः स्यात् हरिणसदृशं फलं ददातीत्यर्थः १३१

॥ भाषा ॥

बोलें तो निश्चय महान् भय करें और समयमें सूर्यके सन्मुख ऊंचो मुख कर रोंवे तो वा नगरकूं उजडवेके अर्थ जाननो ॥१२९॥ ग्राममिति ॥ रात्रीमें श्वान बोहोतसे मिलकरकें बोलें तो ग्रामकूं शून्य करे और ग्राममें भूंस करके फिर श्मशानमें शब्द करें तो ग्राममें मुख्य पुरुष होय ताकी मृत्यू करें ॥ १३० ॥ ग्रामस्येति ॥ ग्रामके मध्यमें बोहोतसे श्वान मिलकरकें वारंवार क्रूर शब्द करे तो ग्राममें मुख्य पुरुष होय ताकूं असौख्य करें और वनमें श्वानके फल मृगकी समान करे है जेसे मृगके शकुन तेसे ही श्वानके शकुन जानने ॥ १३१ ॥

भषंति दंडैरिव ताड्यमानाः खेखेति शब्देन मुहुर्मुहुर्ये ये वा प्रधावंति च मंडलीभिस्ते मृत्युदाः शून्यविधायिनो वा १३२ खनत्यगारे यदि सारमेयः कुड्यं तदा स्यात् खलु संधिपातः गोष्ठप्रदेशं यदि गोपहारो धान्यस्य भूमिं यदि धान्यलाभः १३३ कृत्वा शिरो द्वारि बहिर्वपुश्चेत् श्वा रौति दीर्घं गृहिणीं प्रपश्यन् तद्रोगदो वक्ति च बंधकीं तां बहिर्मुखोऽभ्यंतरकायभागः १३४

॥ टीका ॥

भषंतीति ये श्वानः दंडैस्ताड्यमानाइव खेखेति शब्देन मुहुर्मुहुः भषंति अथवा ये मंडलीभिः प्रधावंति ते लोकानां मृत्युदाः ग्रामस्य शून्यविधायिनो वा स्युः १३२ खनतीति यदि सारमेयः अगारे कुड्यं भित्तिं खनति तदा खलु निश्चयेन संधिपातः स्यात् कुड्यं भित्तिस्तदेडूक मंतर्निहितकीकसमिति हैमः यदि गोष्ठप्रदेशं गवां स्थानं खनति तदा गोपहारः स्यात् यदि धान्यस्य भूमिं खनति तदा धान्यलाभः स्यात् १३३ कृत्वेति द्वारि शिरः कृत्वा बहिर्वपुश्चेत् श्वा गृहिणी

॥ भाषा ॥

॥भषंतीति॥ जे श्वान दंडकरकें ताडन किये होंय ताकी सीनाई खं खें ये शब्द वारंवार अथवा मंडली बांध करकें दोडें तो वे लोकको मृत्यू करे अथवा ग्रामकूं सूनो करे॥ १३२॥ खननीति॥ जो श्वान घरमें भींत खोंदे तो निश्चयकर चौर भींत फोडकर आवे जो गोके स्थानकूं खोदे तो गो चुराय कर ले जाय जो धान्यकी पृथ्वीकूं खोदें तो धान्यको लाभ होय ॥१३३॥ कृत्वेति॥ जो श्वान घरके द्वारेमें मस्तक करकें देह जाको बहार होय स्त्रीके मांऊं देख रह्यो होय दीर्घशब्द करकें बोलतो होय तो रोग करे और बहार मुख होय जाको भीतर होय घरकी

धनागमः स्याच्छुनि जातु वामं जिघ्रत्यवामं कलहं प्रियाभिः
वामं तथोरुं विषयोपभोगो मित्रैः समं वैरमवाममूरुम् १३५
भुजद्वयं जिघ्रति सारमेये पुंसो भवेत्तस्करवैरियोगः
मांसास्थिभक्ष्याणि च भस्ममध्ये स्याद्गोपयत्यग्निभयं प्रभूतं १३६

॥ टीका ॥

प्रपश्यन् दीर्घमुच्चैः रौति· तदा रोगदःस्यात् बहिर्मुखः अभ्यंतरकायभागश्च श्वा यदि गृहिणीं प्रपश्यन् उच्चैः रौति तदा तां बंधकीं कुलटां वक्ति पुंश्चली धर्षिणी बंधक्यसती कुलटेत्वरीत्यमरः १३४ धनागमेति वामं जानु शुनि श्वाने जिघ्रति सति गंधोपादानं कुर्वति सति धनागमः स्यात् अवामं जिघ्रति प्रियाभिः कलहः स्यात् तथा वामं ऊरुं जिघ्रति सति विषयोपभोगः स्यात् अवाममूरुं जिघ्रति सति मित्रैः समं वैरं स्यात् १३५ भुजद्वयमिति सारमेये पुंसः भुजद्वयं जिघ्रति सति तस्करवैरियोगः तस्करश्चवैरीच तयोर्योगः संबंधो भवेत् तथा मांसास्थिभक्ष्याणि च मांसं पललं अस्थिकर्परं भक्ष्यं एतेषांद्वंद्वः भस्ममध्ये रक्षांतराले गोपयति सति प्रभूतं प्रचुरं अग्निभ

॥ भाषा ॥

स्त्रीके माऊं देखतो हुयो ऊंचे स्वरकर बोले तो वा स्त्रीकूं विभचारिणी कहेंहें एसो जाननो ॥ १३४ ॥ धनागमेति॥ जो श्वान वांयी जानूकूं सूंगतो होय तो धनको आगमन करे जो जेमनी जानूकूं सूंगतो होय तो प्रिया स्त्रीकरकें कलह करावे और वांये घोंटूंकूं सूंगतो होय तो विषयको भोग भोगे जेमने घोंटूंकूं सूंगतो होय तो मित्रकरकें सहित वैर करावे ॥ १३५॥ भुजद्वयमिति ॥ श्वान दोनो भुजानकूं सूंगतो होय तो पुरुषकूं चौर वैरी इनको संयोग होय और मांस हाड भक्ष्य इनें भस्म जो राख तामें छिपाय दे तो बोहोत अग्नीको भय होय ॥१३६॥

भषत्यधोभूमिरुहोतिवृष्टिः पुरस्य पीडा शुनि गोपुरे स्यात् मंचे पुनस्तत्र शयितुर्भयार्त्ति रर्त्तिस्तथा तस्य गृहस्य मध्ये १३७ भवेद्गृहस्योपरि वातभीत्यै पश्चात् भषन् भीतिकरः प्रयाणे यश्चापसव्यं जनसान्निवेशे भषन् व्रजत्याह सवैरिभीतिं १३८ भषन्नभीक्ष्णं भवनस्थितानामावेष्टनं चेत् कुरुते कदाचित् कौलेयको वश्यमुपस्थितं तज्ज्ञेयं भयं बंधनसंप्रवृत्तम् १३९

॥ टीका ॥

यं स्यात् १३६ भषतीति भूमिरुहः वृक्षस्य अधः भषति सति अतिवृष्टिः स्यात् गोपुरे नगरप्रतोल्यां शुनि भषति सति पुरस्य पीडा स्यात् पुरवर्त्तिः स्यात् तथा तस्य गृहस्य मध्ये अर्त्तिः पीडा स्यात् १३७ भवेदिति गृहस्योपरि भषन् वातभीत्यै वायुभयाय स्यात् प्रयाणे पश्चात् भषन् भीतिकरः स्यात् यश्चा जनसन्निवेशे अपसव्यं दक्षिणं भषन् व्रजति सवैरिभीतिं आह कथयतीत्यर्थः १३८ भषन्निति अभीक्ष्णंभषन्कौलेयकश्चेद्भवनस्थितानां कदाचित् आवेष्टनं कुरुते तदा अवश्यं बंधनसंप्रवृत्तं भयं उपस्थितं ज्ञेयं १३९

॥ भाषा ॥

॥भषतीति॥ वृक्षके नीचें श्वान बोले तो अति वृष्टी होय नगरके द्वारमें बोले तो नगर पुर इनमें पीडा होय जो पलंग खाट मंचा इनमें बोले तो वापे सोयवेवारेकूं भय पीडा होय और वा घरमेंवी पीडा होय ॥ १३७॥ भवेदिति ॥ जो घरके ऊपर श्वान बोले तो वायूको भय करे चलतीसमें पीठपीच्छें बोले तो भय करे जो श्वान घर नगरादिकमें प्रवेश करती समें दक्षिणभागमें बोले तो हुयो गमन करे तो वैरीको भय होय ॥ १३८॥ भषन्निति॥ वारंवार बोलतो हुयो श्वान घरमें स्थित जे पुरुष

लिप्तपूरितचतुष्कविशेषे प्रांगणेश्वनिवहो रममाणः
संपदं प्रवितरत्यति बह्वीं तत् खनन् पुनरनर्थकरो
ऽसौ १४० एकेन यो रोदिति लोचनेन दीनोऽल्पभो
जी स्वगृहस्य दुःखं करोत्यसौ क्रीडति यस्तु गो
भिः क्षेमं सुभिक्षं कुरुते मुदं श्वा १४१ इति वसं
तराजशाकुने श्वचेष्टिते शुभाशुभज्ञान प्रकरणं ७

॥ टीका ॥

लिप्तेति लिप्तः छगणादिना पूरितः अक्षतैश्च एवंविधेचतुष्कविशेषे चउक इति प्रसिद्धे प्रांगणे आजिरे रममाणः क्रीडांकुर्वाणः श्वनिवहः अति बह्वीं संपदं वितरति तत् खनन् पुनः असौ श्वनिवहः अनर्थकरः स्यात् १४० एकेनेति यः श्वा एकेन लोचनेन रोदिति कीदृक् दीनः दुःखितः अल्पभोजी अल्पाहारी असौ श्वा गृहस्य दुःखं करोति यस्तु गोभिः समं क्रीडति सश्वा क्षेमं सुभिक्षं मुदं च कुरुते १४१ इति वसंतराजटीकायां श्वचेष्टिते शुभाशुभज्ञान प्रकरणं सप्तमं ७

॥ भाषा ॥

तिनकूं आवेष्टन करले अर्थात् प्रदक्षिणा सीकर जाय तो अवश्य बंधनको भय निकटही जाननो ॥१३९॥ लिप्तेति ॥ गोवरसूं लीपकर चांवलनकर चोक पुरो होय एसे आंगनमें आयकर श्वान रमण करैं तो अति संपदा करें जो वा चोककूं खोदे तो अनर्थ करे ॥१४०॥ एकेनेति ॥ जो श्वान एक नेत्र करकें रोवै बडो दुःखी होय थोडे आहारको करवेवालो होय तो वा घरमें दुःख करे जो श्वान गौनकरकें सहित क्रीडा करै वो श्वान कल्याण और सुभिक्ष और हर्ष करे ॥१४१॥ ॥ इति श्रीवसंतराजभाषाटीकायां श्वचेष्टिते शुभाशुभ प्रकरणं सप्तमम् ॥७॥ ॥छ॥

शुभाशुभज्ञाननिमित्तमस्मिन् यथावदुक्तं मुनिसंमतेन प्रदर्श्यते श्वानविचेष्टितेन लाभस्य दिग्मात्रमथैतदत्र १४२ यक्षो हरिद्रामिषगैरिकाद्यैः पूर्णाननो वक्ति सुवर्णलाभं दृष्टिं पुनः पुष्पफलांकुरेषु चिरं ददानो निधिलाभकारी १४३ यः पल्लवैः क्रीडति वृक्षमूलं तथेक्षते यः स ददाति सौख्यं

॥ टीका ॥

शुभाशुभेति अस्मिन्प्रकरणे शुभाशुभज्ञाननिमित्तं यथावत् यथा ज्ञातं तथा उक्तं अथ मुनिसंमतेन श्वानविचेष्टितेन लाभस्यैतत् ज्ञानं अत्राऽस्मिन् प्रकरणे दिग्मात्रं प्रदर्श्यते १४२ यक्षइति हरिद्रामिषगैरिकाद्यैः हरिद्रा रजनी आमिषं मांसं गैरिकं धातुविशेषः आदिशब्दादन्येपि धातवो ग्राह्याः एतेषामितरेतरद्वंद्वः तैः कृत्वा पूर्णाननो यक्षः सुवर्णलाभं वक्ति पुष्पफलांकुरेषु पुष्पं प्रसूनं फलं आम्रादि अंकुराः प्ररोहाः एतेषां द्वंद्वस्तेषु चिरं दृष्टिं ददानः निधिलाभकारी स्यात् १४३ यइति यः श्वा पल्लवैः नवीनपत्रैः क्रीडति तथा वृक्षमूलं ईक्षते स सौख्यं ददाति तथा यः मंडलः अभिमुखः अभ्युपैति कीदृक्

॥ भाषा ॥

॥ शुभाशुभेति ॥ या सातमें प्रकरणमें शुभाऽशुभज्ञान जेसो जान्यो तेसो कह्यो आठमें प्रकरणमें मुनीनकी संमती करकें श्वानकी चेष्टासूं लाभको ज्ञान दिशामात्र दिखावें हें ॥ १४२॥ यक्ष इति ॥ हलदी मांस गेरूकूं आदिले औरवी धातू इनकरकें पूर्ण जाको मुख एसो श्वान सुवर्णको लाभ करे और पुष्प फल अंकुर इनमें बोहोत देर तांई देखो करे तो निधीको लाभ करे ॥ १४३ ॥ यइति ॥ जो श्वान नवीन पल्लवनकरकें क्रीडा करतो होय और वृक्षकी जडकूं देखतो होय वो सौख्य देवे जो श्वान गेरूकूं आदिले धातूनकरकें अथवा रुधिरकरकें

रक्ताक्तमूर्द्धाऽभिमुखोऽभ्युपैति यो मंडलः सोऽव
निलाभहेतुः १४४ स्थित्वोन्नते श्वा यदि तु प्रदेशे
पादेन कंडूयति दक्षिणेन शिरःप्रदेशं नियतं नर-
स्य तद्धेनुलाभं विदधाति सद्यः १४५ फलं गृही
त्वा सहसा निवासं यक्षो विशन् जल्पति पुत्रलाभं
योऽभ्येति हृष्टोऽभिमुखं प्रयातुः शीघ्रं स कुर्याद्धन
धान्यलाभं १४६ दक्षिणं यदि करोति चेष्टितं दक्षि
णेन चरणेन मंडलः लाभदो यदि पदा समाचरे
द्वामकेन खलु तत्र लाभदः १४७

॥ टीका ॥

रक्ताक्तमूर्द्धा रक्तेन धातुना रुधिरेण वा अक्तं लिप्तं मूर्द्धा मस्तकं यस्य स तथा स अवनिलाभहेतुः स्यात् १४४ स्थित्वेति उन्नते प्रदेशोउच्चैः स्थाने स्थित्वा यदि श्वा दक्षिणेन पादेन शिरःप्रदेशं कंडूयति नियतं तदा सद्यः शीघ्रं नरस्य धेनुलाभं विदधाति १४५ फलमिति यक्षः फलं गृहीत्वा सहसा शीघ्रं निवासं गृहं विशन् प्रविशन् पुत्रलाभं जल्पति यो हृष्टो हर्षयुक्तो यक्षः प्रयातुः अभिमुखं अभ्येति स धनधान्य लाभं कुर्यात् १४६ दक्षिणमिति मंडलः श्वानः दक्षिणेन चरणेन

॥ भाषा ॥

लाल लियो हुयो जाको मस्तक होय वा सन्मुख आवे तो पृथ्वीको लाभ करे ॥१४४॥ ॥स्थित्वेति॥ ऊंचे स्थानमें स्थित होय करकें जो श्वान जेमने पाम करकें मस्तककूं खुजावतो होय तो शीघ्र मनुष्यकूं गौलाभ करे॥ १४५॥ फलमिति॥ श्वान फल ले करकें शीघ्र घरमें प्रवेश करे तो पुत्रको लाभ होय जो हर्षयुक्त होय श्वान गमनकर्ताके सन्मुख आवे तो धनधान्यको लाभ करे ॥१४६॥ दक्षिणमिति॥ जो श्वान दक्षिण चरण करकें दक्षिण अंगकी चेष्टा करे तो लाभ देवै जो बांये पामकरकें दक्षि-

मूत्रं विधायाभिमुखं प्रयाति यो जागरूकः शुभ-
दो नराणां   कार्येषु सर्वेष्वपि सर्वकालं न मूत्रयं-
ती शुनकी प्रशस्ता १४८ स्थाने मनोज्ञे विदधाति
मूत्रं संतुष्टचित्तः शुभचेष्टितः श्वा   रम्यारवो
यः सरमासुतोऽसौ करोत्यभिप्रेतपदार्थलाभं १४९
इतिव· श्वचे· लाभप्र०८   कथ्यतेऽथ कापिलस्य चे-
ष्टितं रोगिणोमरणजीविते क्षणे   लक्षणं चरक
वाग्भटादिभिर्भाषितं यदंतिशाय्यवर्त्तते १५०

॥ टीका ॥

दक्षिणं चेष्टितं करोति तदा लाभदः स्यात् यदि असौ वामकेन पदाचरणेन दक्षिणचेष्टितं आचरति तदा लाभदो न स्यात् १४७ मूत्रमिति यो जागरूकः श्वा मूत्रं विधाय अभिमुखं सन्मुखं प्रयाति स पुंसां शुभदः स्यात् सर्वकालं सर्वेष्वपि कार्येषु शुनकी सरमा मूत्रयंती न प्रशस्ता १४८ स्थानेइति यः संतुष्टचित्तः शुभचेष्टितश्च रम्यारवः शुभशब्दकारी मनोज्ञे रम्ये स्थाने स्थले मूत्रं कुरुते असौ सरमासुतः अभिप्रेतपदार्थः लाभं करोति १४९ इति वसं० टी· श्वचे० लाभप्र० ८ कथ्यतेइति अथ रोगिणः मरणजीवितेक्षणे मरणं मृत्युः जीवितम्

॥ भाषा ॥

ए अंगकी चेष्टा करे तो लाभ देवै जो वांये पाम करकें दक्षिण अंगकी चेष्टा करतो होय तो लाभ नहीं देवै ॥१४७॥ मूत्रमिति॥ जो श्वान मूत्र करकें सन्मुख आवे वो पुरुषनकूं शुभ देवे सरमा नाम कुतिया मूत्र करे तो सर्व कार्यनमें शुभ नहीं ॥१४८॥ ॥स्थानेइति॥ प्रसन्नचित्त होय शुभ चेष्टा करतो होय शुभ शब्द करतो होय सुंदर स्थानमें मूत्र करे वो श्वान वांछितपदार्थको लाभ करे ॥१४९॥ इतिश्रीव· भा· टी० श्वचेष्टिते लाभप्र० ८॥ कथ्यतेइति॥ रोगीके मरण जीवनको देखनो तामें

लीढेथवा जिघ्रति सारमेयो हस्तस्य पृष्ठं तलमंगुलीर्वा रोगातुरस्योपदिशत्यवश्यं तत् पंचतां वासरपंचकेन १५१ कर्णयुग्ममथवेक्षणद्वयं नर्तयन् वदति वासरैस्त्रिभिः रोगिणो मरणमालिहन् पुनर्नासिकां दशभिरंतकृद्दिनैः १५२ पुनःपुनर्दक्षिणमूरुभागं लिहन् दिनैः पंचभिराह मृत्युम्

॥ टीका ॥

जीवनं तयोः ईक्षणं विलोकनं तस्मिन् कपिलस्य तत् चेष्टितं कथ्यते यत् कपिलचेष्टितं चरकवाग्भटादिभिर्भाषितं लक्षणमतिशय्य अतिक्रम्यवर्तते १५० लीढेइति यदि सारमेयः हस्तस्य पृष्ठं तलं अंगुलीर्वा लीढे आस्वादयति अथवा जिघ्रति आघ्राणं करोति तदा रोगातुरस्य वासरपंचकेन पंचतां नाशं अवश्यमुपदिशति पंचत्वं निधनं नाशो दीर्घनिद्रानिमीलनमिति हैमः १५१ कर्णेति कौलेयकः कर्णयुग्मं अथवा ईक्षणद्वयं लोचनयुग्मं नर्तयन् वासरैस्त्रिभिः रोगिणो मरणं वदति पुनः नासिकां आलिहन् दशभिर्दिनैः अंतकृत् नाशकृत् स्यात् १५२ पुनरिति यक्षः पुनःपुनः दक्षिणमूरुभागं लिहन् पंचभिर्दिनैः मृत्युमाह जठरावलेहात् तत्क्षणमेवयक्षः अवश्यं यम

॥ भाषा ॥

चरक वाग्भटादिकन्नें जे श्वानकी चेष्टा लक्षण कही हैं उनसें जे अधिकवर्तें हे तिनेमें कंहूं हूं ॥ १५० ॥ लीढेइति ॥ जो श्वान हाथको पृष्ठभाग वा अंगुली इनें चाटे वा सूंगे तो रोगीकूं पांच दिनमें अवश्य मृत्यू करे ॥१५१॥ कर्णेति ॥ श्वान दोनो काननकूं वा दोनो नेत्रनकूं न चावे तो तीन दिनकरकें रोगीकूं मृत्यू होय फिर नासिकाकूं चाटे तो दश दिनकर रोगीको नाश करे ॥ १५२ ॥ पुनरिति ॥ श्वान वारंवार दक्षिण ऊरू भागकूं चाटे तो पांच दिनमें मृत्यू जाननो जो उद-

यमक्षयं तत्क्षणमेव यक्षः क्षिपत्यवश्यं जठराव
लेहात् १५३ अवामभागेन यदा वलित्वा श्वा पृ
ष्ठकंडूतिमपाकरोति तदाक्षितत्रैव कृतांतगेहं रो
गाभिभूतो नियतं प्रयाति १५४ पुच्छोरसोर्ले
हनसिंहनाभ्यां प्रवर्तिताभ्यां सरमासुतेन क्रमा
ह्निनानां त्रितयद्वयाभ्यां भवेद्ध्रुवं रोगवतोवसानं १५५
पृष्ठे निमित्ते लसचित्तवृत्तिः संकोच्य गात्राण्यऽखि-
लानि शेते ॥

॥ टीका ॥

क्षयं यमगृहं क्षिपति प्रवेशयति संस्थानसुदजं धामनिवेशः शरणंक्ष-
यइत्यमरः १५३ अवामेति श्वा कौलेयकश्चेत् अवामभागेन दक्षिण
प्रदेशेन वलित्वा वक्रीभूय पृष्ठकंडूतिं खर्ज्जूमपाकरोति दूरीकरोति
तदा तत्रैव तदाक्षिरोगाभिभूतः कृतांतगेहं नियतं प्रयाति १५४ पुछेति
सरमासुतेन पुच्छोरसोः पुछं लंगूलं उरः हृदयस्थानं अनयोर्द्वंद्वस्त
योर्लेहनसिंहनाभ्यां प्रवर्त्तिताभ्यां सद्भ्यां क्रमाह्निनानां त्रितयद्वया-
भ्यां ध्रुवं निश्चयेन रोगवतोऽवसानं नाशो भवेत् १५५ पृष्ठइति नि
मित्ते पृष्ठे सति चेत् कौलेयकः अखिलानि गात्राणि संकोच्य अल-

॥ भाषा ॥

रकूं चाटे तो तत्क्षणही श्वान अवश्य यमलोककूं प्राप्त करे ॥ १५३ ॥ अवामेति॥
जो श्वान जेमने भागमें टेढो होय करकें पीठकी खुजलीकूं दूर करै तो रोगीकूं
वाईसमें अथवा वा दिनही निश्चय मृत्यू करे ॥ १५४ ॥ पुछेति ॥ श्वान पूंछ ओर
हृदयस्थान इनकूं चाटे वा सूंगे तो तीन दिन वा दोय दिनमें निश्चयकर रोग
वान् पुरुषकूं नाश वा मृत्यू करे ॥ १५५ ॥ पृष्ठेइति ॥ कोई आय करकें प्रश्न
करे वा समयमें जो श्वान सबले अंगनकूं संकोच करकें आलस्ययुक्त होय

कौलेयकश्चेत्तदुपैति रोगी परेतनाथावसथं क्षणे
न १५६ विधूय कर्णौ परिवर्त्य गात्रं प्रस्वापली-
लां भलुहोऽभ्युपैति यदा तदानीमचिरेण कालः
क्रोडीकरोत्यामयिनं प्रसह्य १५७ संकोचितांगः
पिहिताक्षियुग्मो निरस्तशंकं शुनकः शयानः
व्यात्ताननो मुंचति यस्तु लालां सरोगिणंमारयति
क्षणेन १५८

॥ टीका ॥

सचिन्त वृत्तिः शेते तदा रोगी क्षणेन परेतनाथो यमस्तस्य आवसथं गृहंउपैति गच्छति धिष्ण्यमावसथः स्थानं पस्त्यंसंस्त्याय आश्रयः इति हैमः १५६ विधूयेति यदाभलुहः अस्थिभुक् कर्णौ विधूय गात्रं शरीरं परिवृत्य परिवर्तने कृत्वा प्रस्वापलीलां अभ्युपैति तदा कालो यमः आमयिनं रोगिणं अचिरेण शीघ्रं प्रसह्य हठात् क्रोडी करोति उत्संगे गृह्णाति १५७ संकोचितेति यः शुनकः संकोचितांगः पिहिताक्षियुग्मः निरस्तशंकं यथा स्यात्तथा शयानः व्यात्ताननः विस्फाटितवदनः लालां मुंचति सक्षणेन रोगिणं मारयति यमसदनं प्रापयतीत्यर्थः १५८ ॥छ॥

॥ भाषा ॥

सोतो होय वा सोयजांय तो रोगी क्षणमात्रमें यमराजके घरकूं जाय॥ १५६॥ विधूयेति॥ जो श्वान काननकूं हलाय शरीरकूं समेट करकें सोय जाय तो यमराज रोगीकूं शीघ्रही हठसूं गोदमें धरले ॥१५७॥ संकोचितेति॥ जो श्वान अंगकूं समेट कर दोनो नेत्र मीच कर निशंक होय मोंढो फाटकर लाल मुखमेंसूं छोडतो हुयो. सूतो होय तो रोगीकूं क्षणमात्रमें यमलोककूं प्राप्त करे॥ १५८॥

निष्कारणं यः प्रपलायते श्वा विरौति वा वारिणि
योति भीतः मृतांगरज्वास्थि मुखोऽथवायो गेहंवि
शत्याशुसमृत्युमाह १५९ अत्यंत मालस्य मपा
स्य यक्षो दिने दिने भास्कर संमुखं यः उद्वेगका
रीभषति प्रभूतं ब्रवीति देशाधिपतेः समृत्युं १६०
रोगार्दितो जीवति किंनवेति प्रश्नेप्रयुक्ते श्वुनकोत्त
मस्य नेदृक्षया प्राणिति चेष्टयासौ म्रियेत ना-
न्यादृशचेष्टितेन १६१

॥ टीका ॥

निष्कारणमिति यः श्वा निष्कारणं प्रपलायते नश्यति यो वा वारिणि अतिभीतः विरौति अथवा यः मृतांगरज्वस्थि मुखः मृतांग रज्जूः अस्थिन्च मुखे यस्य स तथोक्तः गेहं विशति स आशु मृत्युमाह १५९ अत्यंतमिति यः यक्षः अत्यंतं अतिशयेन आलस्यं अपास्य त्यक्का दिने दिने भास्करसंमुखं उद्वेगकारी प्रभूतं भषति स देशाधिपतेः मृत्युं ब्रवीति १६० रोगेति अयं रोगार्दितः किं जीवति नवेति प्रश्ने प्रयुक्ते श्वुनकोत्तमस्य ईदृक्षया चेष्टयाऽसौ रोगी नप्राणिति नजीवति अन्यादृशाचेष्टितेन नम्रियेत १६१ ॥छ॥

॥ भाषा ॥

॥निष्कारणमिति॥ जो श्वानविना कारण भागजाय और नष्ट होय जाय अथवा जलमें
अति भयवान् होय रोवे अथवा मरेको अंग जेवडी हाड ये जाके मुखमें होय वो श्वा
न घरमें प्रवेश करजाय तो शीघ्रही मृत्यू कहेहे एसो जाननो ॥१५९॥ अत्यं
तमिति॥ जो श्वान अत्यंत आलस्यकूं छोडकरकें दिन दिनप्रति सूर्यके सन्मुख उद्वेग
कारी होय वोहोतसो भूंसे तो देशाधिपती राजाके मृत्यू करे॥ १६०॥ रोगेति॥ येरोः
गी जीवेगो के नहीं एसो प्रश्न करे तब श्वानकी एसी चेष्टा करकें तोरोगी नही जीवे-

रोगार्दितस्यौषध संप्रयोगे श्रेयस्करी नष्टविलोकने च दुर्गप्रवेशे च शुनां प्रदिष्टा तारागतिः संनिहिते भये च १६२ इ॰ श्वचे॰ जीवितमरणप्र॰ ९ शुनो निमित्तैः सहजप्रवृत्तैर्विभाव्यते भाव्य शुभं शुभंच . यात्रास्वयत्नेन यथा ध्वनीनैस्तदुच्यते संप्रति निश्चितार्थं १६३ वामां दिशं दक्षिणभूमिभागाद्गच्छन् प्रयाणे भषणः प्रशस्तः

॥ टीका ॥

रोगेति रोगार्दितस्य रोगपीडितस्य औषधसंप्रयोगे भेषजप्रयोगे तथा नष्टविलोकने दुर्गप्रवेशे च सन्निहिते भये च शुनां तारागतिः श्रेयस्करी प्रदिष्टा १६२ इति व॰टी॰ श्वचे॰ जी॰ मरणप्र॰ ९ शुनइति संप्रति इदानीं सहजप्रवृत्तैः स्वभावेन प्रवर्तितैः शुनो निमित्तैः भषणस्य शाकुनैः यात्रासु अयत्नेन यथा अध्वनीनैः पथिकैः भावि शुभमशुभं च विभाव्यते ज्ञायते तदस्माभिः निश्चितार्थं शुनोनिमित्तमुच्यते १६३ वामामिति प्रयाणे यात्रायां दक्षिणभूमिभागात् वामां दिशं गच्छन् भषणः प्रशस्तो भवति प्रवेशे पुनः वामप्रदेशात् सदक्षिण.भागगामी

॥ भाषा ॥

ओर चेष्टान करकें मरे नहीं ॥१६१॥ रोगेति॥ रोगकर पीडित होय वा पुरुषकूं ओषधीके देवे लेवेमें तेसें ही नष्ट देखवेमें दुर्गके प्रवेशमें संनिहितमें भयमें श्वाननकी गती जेमनी कल्याणकी करवेवारी कही है ॥१६२॥ इति श्रीवसंतराजशाकुने भाषाटीकायां श्वचेष्टिते जीवितमरणप्रकरणं नवमं ॥९॥ शुनइति ॥ अब स्वभाव करकें प्रवृत्त हुये श्वानके शाकुन तिन करकें यात्रानमें मार्गीन करकें होनहार शुभ वा अशुभ जाने जांय है सो श्वानके शाकुन निश्चयकिये हुये हम कहें हें ॥१६३॥ वामामिति ॥ यात्रा करती समयमें दक्षिण भागसूं वामभागमें गमन करे श्वान तो शुभ जानने

वामप्रदेशात् स पुनः प्रवेशो प्रशस्यते दक्षिणभाग
गामी १६४ याने प्रवेशे च मता प्रशस्ता शुन्याग
तिः श्वानविपर्ययेण नचेष्टितं प्रत्युभयो विशेषः
शुनी शुनोरत्रहि कश्चिदस्ति १६५ विष्ठां शुभं वा
वसनस्य खंड मादाय वक्रेण पुरः प्रधावन् कौले
यको जल्पति निश्चयेन प्रवासिनां मुत्तमवस्तु लाभं
१६६ स्तोकं व्रजित्वा यदि वामभागं निवर्तते श्चा
त्वरितं पुरश्चेत् सौख्यं तदा यच्छति स प्रभूतं दुः
खैक हेतुर्गति रस्य तारा १६७

॥ टीका ॥

प्रशस्यते १६४ यानेइति याने गमने तथा प्रवेशेच शुन्यागतिर्गमनं श्वानविपर्ययेण शुनो वैपरीत्येन प्रशस्तामता उभयोः शुनीशुनोः चेष्टितं प्रति इह न कश्चिद्विशेषः अस्ति १६५ विष्ठामिति विष्ठां गूथं शुभं वा वसनस्य वस्त्रस्य खंडं वक्रेण मुखेन आदाय गृहीत्वा पुरः अग्रे प्रधावन् त्वरितगत्यागच्छन् कौलेयकः प्रवासिनां यियासिनां उत्तमवस्तुलाभं निश्चयेन जल्पति १६६ स्तोकमिति यदि वामभागं स्तोकं

॥ भाषा ॥

फिर प्रवेश समयमें वामभागसूं दक्षिणभागमें गमन करे तो शुभ जाननो ॥१६४॥ यानेइति गमनमें तथा प्रवेशमें शुनि जो कुतिया ताकी गती श्वानकी गतीसूं विपरीत गती होय तो शुभ जाननी और श्वानकी गतीमें और शुनीकी गतीमें इतनो भेद है और चेष्टामें भेद वा विशेषता कछूवी नहीं हैं ॥१६५॥ विष्ठामिति॥ विष्ठा वा शुभ सुंदर वस्त्रको टूक मुखमें लेकरकें अगाडीकूं भाजे तो वो श्वान यात्राकूं गमन करे ताकूं उत्तम वस्तूको लाभ निश्चय करे ॥१६६॥ स्तोकमिति॥ जो श्वान थोडीसी दूर अगाडी चलकरकें शीघ्रही पीछो सामनेकूं बगद आवे तो वा गमन कर्ताकूं बोहो

आयाति हृष्टोऽभिमुखो यदिश्वा क्रीडां प्रकुर्वन् विलुठत्यथाऽग्रे शीघ्रं तदानीं ध्रुवमध्वगानां भवेत् प्रभूतो धनधान्यलाभः १६८ उच्चात्प्रदेशादवतीर्य नीचं यो याति वामोप्यसुखप्रदोसौ अनुच्चदेशात्पुनरुच्चदेशं यक्षो व्रजन् दक्षिणगोपि शस्तः १६९ गजाश्वशय्यासनशाद्वलेषु छत्रध्वजोलूखलसद्द्रुमेषु कुंभेष्टिकां संचयचामरेषु पर्याणमृत्पुष्पफलादिषु श्वा १७०

॥ टीका ॥

व्रजित्वा श्वा त्वरितं पुरश्चेत् निवर्त्तते तदा सौख्यं प्रभूतं जल्पति अस्य तारागतिः दुःखैकहेतुर्भवति १६७ आयातीति यदि श्वा हृष्टः क्रीडां प्रकुर्वन् आयाति अथ यथाग्रे विलुठति तदानीं ध्रुवं निश्चयेन अध्वगानां पांथानां प्रभूतः धनधान्य लाभः स्यात् १६८ उच्चादिति यो यक्षः उच्चात्प्रदेशात् अवतीर्य नीचं याति असौ वामोपि असुखप्रदः स्यात् अनुच्चदेशात् अधःप्रदेशात् पुनः उच्चदेशं व्रजन् यक्षः दक्षिणगोपि शस्तः शोभनः १६९ गजाश्वेति गजाश्वशय्यासनशाद्वलेषु

॥ भाषा ॥

त सौख्य होय श्वानकी तारागती अर्थात् जेमनी गती दुःखकी देवेवारी जाननी ॥ ॥१६७॥ आयातीति ॥ जो श्वान प्रसन्न क्रीडाकरत सन्मुख आवे जापीछें जो अगाडी लोट जाय तो निश्चयकर मार्गीनकूं बोहोतसो धनधान्यको लाभ होय ॥१६८॥ उच्चादिति ॥ जो श्वान ऊंचे स्थानसूं उतरकें नीचें स्थानपे आय जाय जो ये वामभागमेंवी आय जाय तो दुःख देवे ओर नीचे स्थानसूं ऊंचे स्थानपे चढजाय ओर जेमने भागमें वी होय तो बोहोत शुभ जाननो॥ १६९॥ गजाश्वेति ॥ हाथी घोडा शय्या आसन हरी तृण सत्र ध्वजा ऊखल उत्तम वृक्ष कुंभ ईंटको समूह चमर पल्हाण

व्रजेत्पुरस्ताद्यदि मूत्रयित्वा सदैव तत्सिध्यति कार्यमिष्टम् मिष्टान्नभोज्यं नवगोमये स्यान्मूत्रेण शुष्केपिच शुष्कभोज्यं १७१ युग्मं तुष्टः सुपुष्टः स्फुमना निरोग उत्साहयुक्तः परिपूर्णकायः सहेलखेलोऽभिमुखं प्रसर्पन्यक्षः सदैवाभिमतस्यासिद्ध्यै १७२

॥ टीका ॥

तत्र गजः हस्ती अश्वः तुरंगः शय्या पल्यंकः आसनमुपवेशनस्थलं शाड्वलानि हरिततृणानि एतेषामितरेतरद्वंद्वः तेषु छत्रध्वजोलूखलसद्रुमेषु छत्रं आतपत्रं ध्वजा वैजयंती उलूखलः प्रतीतः सद्रुमाः आम्रप्रभृतयः एतेषां द्वंद्वः तेषु कुंभेष्टिकासंचयचामरेषु कुंभः कलशः इष्टिकासंचयः ईंटसमूहः चामराणि बालव्यजनानि एतेषामपि द्वंद्वः पर्यायामृत्पुष्पफलादिकेषु पर्याणं पल्हाणइति लोके प्रसिद्धं मृत् मृत्तिका पुष्पं प्रसूनं फलादीनि प्रतीतानि एतेषामितरेतरद्वंद्वः तेषु १७० व्रजेदिति यदि एषु स्थलेषु श्वा कौलेयकः मूत्रयित्वा पुरः अग्रे व्रजन् तदा सदैव कार्यं इष्टं सिद्ध्यति नवगोमये मूत्रेण मिष्टान्नभोज्यं स्यात् शुष्केपिच शुष्कभोज्यं स्यात् १७१ तुष्टइति एवंविधो यक्षः अभिमुखं प्रसर्पन् सन्मुखमागच्छन् सदैव अभिमतस्य अभीष्टस्य सिद्ध्यै स्यात् कीदृक् तुष्टः संतुष्टिमान् पुनः कीदृक् स्फपुष्टः अकृशतनुः पुनः

॥ भाषा ॥

मृत्तिका पुष्पफलादिक ॥१७०॥ व्रजेदिति ॥ जो श्वान ये कहे जे स्थल इनमें मूत्र करकें मनुष्यके अगाडी गमन करे तो सदां वांछित कार्य सिद्ध करे और जो नवीन गोवरपे मूत्र करे तो मिष्टान्नभोजन करावे सूके गोवरपे मूत्र करे तो सूको भोजन होय ॥१७१॥ तुष्टइति ॥ जो संतुष्टिमान् होय पुष्ट होय प्रसन्न होय रोगरहित होय आनंद युक्त होय परिपूर्ण देह जाको होय लीला सहित क्रीडा करतो

अन्नाज्यविष्ठामिषगोमयानि नवानि बिभ्रद्वदनेस
दैव वामोपसव्योऽप्यवलोक्यमानो मनोरथान्पूर
यति ध्रुवं श्वा १७३ यक्षः पुरस्तादवनिं विलिख्य
यातुर्मुखं पश्यतिचेत्तदानीं तत्रैव देशे द्रविणस्य-
लाभं ब्रवीति कार्यो नहि संशयोऽत्र १७४ यातार
माजिघ्रति संप्रयाति तदानुलोम्येन च सारमेयः ॥

॥ टीका ॥

कीदृशः सुमनाः पुनः कीदृशः निरोगः रोगनिर्मुक्तः पुनः कीदृक् उत्साहयुक्तः उत्साहः आनंदविशेषः तेनयुक्तः अन्वितः पुनः कीदृक् परिपूर्णकायः परिपूर्णःअवयवः कायोयस्य स तथा पुनः कीदृक् सहेलखेलः सहेलं सलीलं खेलः क्रीडा यस्य सतथा १७२ अन्नेति नवानि अन्नाज्यविष्ठामिषगोमयानि अन्नं च आज्यं च विष्ठा च आमिषं च गोमयं चेतीतरेतरद्वंद्वः वदने बिभ्रन् श्वा सदैव वामोपि अपसव्योपि च विलोक्यमानो ध्रुवं मनोरथं पूरयति १७३ यक्षइति यक्षः चेद्यदि पुरस्तादवनिं विलिख्य यातुर्मुखं पश्यति तदानीं तत्रैव देशे द्रविणस्य लाभं ब्रवीति हि निश्चितं अत्र संशयो न कार्यः १७४ यातारमिति स सारमेयः सिद्धिहेतुर्भवति यः यातारमाजिघ्रति तदानुलोम्येन च

॥ भाषा ॥

होय एसो श्वान सन्मुख आवे तो वांछित सिद्धी होय ॥१७२॥ अन्नेति ॥ नवीन अन्न घृत विष्ठा गोवर इनें मुखमें धारण करै और वां यो जेमनो देखतो होय तो निश्चय मनोरथकूं पूरण करे ॥१७३॥ यक्षइति ॥ जो श्वान अगाडी पृथ्वीकूं लिख करकें वा खोद करकें गमनकर्ताके मुखकूं देखे तो वाई देशमें धनको लाभ होय निश्चयं यामें संदेह नहीं हें ॥१७४॥ यातारमिति ॥ जो श्वान गमन कर्ताकूं आय कर सूंगे और अनुलोमगती कर चलो जाय अथवा कोई पाग करकें मस्तककूं

मूर्द्धोऽथवायो विनिहंति कंडूं केनापि पादेन ससि
द्धिहेतुः १७५ आदाय यक्षः कुसुमानि धावन्
ब्रवीति यातुर्विपुलां समृद्धिं दृष्टोपि कृष्णः श्वुन
कोऽखिलानि निहंति कार्याणि समीहितानि १७६
वामेन गच्छन् पथिकेन सार्द्धं ददाति रम्यां रमणीं ध
नं च व्रजंस्तु मार्गे सह दक्षिणेन कौलेयकस्तस्कर
भीतिहेतुः १७७ आदाय पत्रं हरितं यदि श्वा
दूर्वां नवां वा नवगोमयं वा ॥

॥ टीका ॥

प्रयाति अथवा केनापिपादेन मूर्द्धः कंडूं विनिहंति १७५ आदायेति
यक्षः कुसुमानि आदाय गृहीत्वा धावन् यातुर्विपुलां समृद्धिं ब्रवीति
कृष्णः श्वुनकः दृष्टोपि विलोकितोऽपि अखिलानि समीहितानि कार्या
णि निहंति विनाशयति १७६ वामेनेति कौलेयकः पथिकेन सार्द्धं वा
मेनभागेन गच्छन् रम्यां रमणीं धनं च ददाति तु पुनः मार्गे पथिकेनस
ह दक्षिणेनभागेन व्रजन् कौलेयकः तस्करभीतिहेतु र्भवति १७७
आदायेति यदि श्वा हरितं पत्रं नवां दूर्वां नवगोमयं वा आदाय प्रयातुः

॥ भाषा ॥

खुजावनो होय तो वो श्वान सिद्धी करे ॥१७५॥ आदायेति ॥ श्वान पुष्प लेकरकें
दोडे तो गमन कर्ताकूं विपुल समृद्धी करे ओर कालो श्वान दीखे तो समग्र कार्य
विनाश करे ॥१७६॥ वामेनेति ॥ श्वान गमन कर्ताकी संग संग वामभागमें गमन
करे तो सुंदर रमणी ओर धन देवे जो मार्गमें गमन कर्ताकी संग जेमने भागमें
गमन करे तो श्वान चौरनको भय करे ॥१७७॥ आदायेति ॥ जो श्वान हरो प-
त्र नवीन दूर्वा नवीन गोवर इने लेकरकें गमन कर्ताके अगाडी आय जाय तो नि-
श्चय कर राजाको अनुग्रह कहे हे एसो जानना ॥१७८॥

प्रयाति यातुः पुरतस्तदानीं राजप्रसादं नियतं ब्रवीति १७८
स्थानांतरं बिभ्रदुपानहं चेत् प्रयाति तद्द्रव्य हरो य-
दा श्वा आस्ते पुरस्तात् सह याति नो वा ददात्युपा
नद्वदनस्तदार्थम् १७९ आर्द्रकीकसमुखः पुरत
श्चे दृश्यते भवति तच्छुभदः श्वा चर्मशुष्कमथवा
स्थि विशुष्कं बिभ्रदेष मरणं विदधाति १८० केशास्थि
वल्कोपलजीर्णवस्त्राण्यंगारभस्मेंधनकर्पराणि व
क्त्रे समादाय च याति यातुर्दृग्गोचरी भूरिभयावहः श्वा १८१

॥ टीका ॥

पुरतः प्रयाति तदानीं नियतं निश्चयेन राजप्रसादं ब्रवीति १७८ स्थानांतरमिति चेत् श्वा उपानहं पादत्राणं बिभ्रत् स्थानांतरं प्रयाति तदा द्रव्यहरः स्यात् यदा तु उपानद्वदनः पुरस्तात् आस्ते तिष्ठति अथवा सहसाकं नो याति तदाऽर्थं ददाति १७९ आर्द्रेति आर्द्रकीकसमुखः आर्द्रं सद्यस्कं कीकसं अस्थि मुखे यस्य सः श्वा पुरतः अग्रतश्चेत् दृश्यते तदा शुभदो भवति शुष्कं चर्म अथवा विशुष्कमास्थि बिभ्रत् श्वा पुरतश्चे दृश्यते तदा एष मरणं विदधाति १८० केशेति केशास्थिवल्कोपलजीर्णवस्त्राणि केशाः प्रतीताः अस्थि कीकसं वल्कं वल्कलं उपलः अश्मा जीर्णवस्त्रं

॥ भाषा ॥

॥स्थानांतरमिति॥ जो श्वान जूती जोडा लेकरकें और स्थानमें चलो जाय तो द्रव्यको हरण होय जो जूती मुखमें लेकरकें अगाडी आय ठाडो होय अथवा संग नहीं चले तो अर्थ देवे॥ १७९॥ आर्द्रेति ॥ गीलो तत्काल को हुयो हाड जाके मुखमें होय एसो श्वान अगाडी दीखे तो शुभ देवे सूको चर्म अथवा हाड लेकर श्वान अगाडी दीखे तो मरण करै ॥ १८१ ॥ केशेति ॥ केश हाड वल्कल पाषाण जीर्ण वस्त्र अंगारभस्म इंधन ठीकरा ये मुखमें लेकरकें गमन कर्ताके दृष्टीके अगाडी आवे तो बोहोत भय प्रगट करे ॥१८१॥

सवह्न्यलातं मरणाय यातुर्वल्लीवरत्रादि च बंध·
नाय घाताय निर्वाणमलातमाहु रालोकितं मंड
लवक्रसंस्थम् १८२ मानवावयवपूरिताननो वी
क्षितो भवति भूमिलाभदः स्वांगपुच्छरसना प्र
चालनान्मंडलो विपुलभूतिदः सदा १८३

॥ टीका ॥

प्रतीतं एतेषामितरेतरद्वंद्वः अंगारभस्मेंधनकर्पराणि चैतेषां द्वंद्वः वक्त्रेसमादाय यातुः दृग्गोचरो यदि श्वा याति तदा भूरिभयावहः भूरिभयजनको भवति १८१ सवह्नीति सवह्न्यलातं वह्निः अग्निस्तेनसहितं अलातं उल्मुकं मंडलवक्रसंस्थं आलोकितं गंतुः मरणाय वल्लीवरत्रादि च वल्ली प्रततिः वरत्रादि रज्वादिकं मंडलवक्रसंस्थं अवलोकितं गंतुः बंधनाय निर्वाणं अलातं मंडलवक्रसंस्थं आलोकितं गंतुः घाताय पंडिता आहुरिति प्रत्येकं संबंधः १८२ मानवेति मानवावयवपूरिताननः मानवा मनुष्या स्तेषामवयवः हस्तपादादयस्तैः पूरितं भृतं आननं वदनं यस्य स तथोक्तः वीक्षितः श्वा भूमिलाभदो भवति तथा स्वांगपुच्छरसना प्रचालनात् स्वांगं स्वशरीरं पुछं वालधिः रसना जिह्वा एतेषां द्वंद्वः तेषां प्रचालनात् मंडलः श्वानः सदा विपुलभूतिदो भवति भूतिर्भस्मनि संपदीत्यमरः १८३

॥ भाषा ॥

॥सवह्नीति॥ अग्नीकरकें सहित जलती लकडीया मुखमें जाके होय एसो श्वान दीखै तो गमनकर्ताकूं मरणके अर्थ होय ओर लता जेवडीकूं आदि ले जाके मुखमें होय एसो श्वान दीखे तो गमनकर्ताकूं बंधनके अर्थ जाननो धूंआ विनाकी जलती लकडिया जाके मुखमें होय वो श्वान दीखे तो विवेकी वाकूं घातको करवेवालो कहें हें ॥१८२॥ मानवेति॥ मनुष्यनके हाथ पाम इनकूं आदि ले जे अंग तिन करकें भरो हुयो जाको मुख वो श्वान दीखेतो पृथ्वीको लाभ करे जो अपनो शरीर पूंछ जि-

अंत्यंतकंडूतिपरो नराणां विरोधकारी शुनकः सदैव
स्यादूर्ध्वपादः स पुनः शयानः सिद्धिप्रदः कार्यविधौ
प्रदुष्टे १८४ क्रीडां गृहश्वा यदि गेहशुन्यां करोति
तद्बंधु समागमः स्यात् शुनांगणः क्रीडति यो मि
लित्वा किंचिद्भषन् सोभिमतोति शिष्टः १८५ नृ
णां प्रयाणे भवनागमे वा श्वानो रमंते यदि सप्रमोदाः
तदिष्टकार्येपि भवेत् प्रमोदः समागमश्च स्वजनैः
समानम् १८६ ॥ छ ॥

॥ टीका ॥

अत्यंतेति अत्यंत कंडूतिपरः शुनकः सदैव नराणां विरोधकारी स्यात् प्रदुष्टे कार्ये ऊर्द्ध्वपादः शयानः स सिद्धिप्रदः स्यात् १८४ क्रीडामिति यदि गृह श्वा गेहशुन्यां क्रीडां करोति तदा बंधुसमागमः स्यात् यः शुनांगणः किंचित् भषन् मिलित्वा क्रीडति स अतिशिष्टः अतिमतः १८५ नृणामिति नृणां प्रयाणे यात्रायां भवनागमे वा यदि श्वानः सप्रमोदाः हर्षसहिताः रमंते तदेष्टकार्येपि प्रमोदो भवेत् स्वजनैः समानं समागमश्च भवति १८६ ॥ छ ॥

॥ भाषा ॥

क्षा इनकूं चलावे तो दीखै तो श्वान सदा संपदा देवै ॥ १८३॥ अत्यंतेति ॥ अत्यंत शरीरके खुजायवेमें तत्पर होय श्वान तो सदां मनुष्यनकूं विरोध करे दुष्ट कार्यमें ऊंचो पाम करे सूंतो होय तो श्वान सिद्धी देवै ॥ १८४ ॥ क्रीडामिति ॥ जो घरको श्वान गेहकी शुनीमें क्रीडा करे तो बंधूनको समागम होय जो श्वाननको समूह कछूक भूंसतो हुयो सब मिलकरकें क्रीडा करे तो वो श्वान अतिश्रेष्ठ वांछितकरवेवालो जाननो ॥ १८५॥ नृणामिति॥ मनुष्यनकूं यात्रासमयमें वा प्रवेशसमयमें जो श्वान हर्ष सहित रमण करै तो वांछित कार्यमेंवी हर्ष होय ओर स्वजनजनन करकें समागम होय॥ १८६

अवामयाने सह संप्रवृत्ते परस्परं चुंबति यक्षयुग्मे
स्निग्धावलोकिन्यवगूहति स्याद्रतप्रसक्ते च युवत्यवाप्तिः १८७
गवासह क्रीडति चेत्तदानीं प्रयोजनं सिद्ध्यति यद्यदिष्टम्
ग्रामप्रवेशो पुरतोऽथ मूत्र्य प्रयात्यभीष्टाशनलब्धये श्वा १८८
वामोऽपि भूत्वा भषणो विलोलन् भंगं रणे यच्छति चार्थनाशम्
क्रुद्धोभिधावन्पुरतोभिधत्ते रक्तप्रपातं वधबंधनंच १८९

॥ टीका ॥

अवामेति यक्षयुग्मे अवामयाने सहसंप्रवृत्ते सति परस्परं चुंबति सति स्निग्धावलोकिनि सति अवगूहति सति आलिंगति सति रतप्रसक्ते मैथुनासक्ते च युवत्यावाप्तिः स्यात् १८७ गवेति चेत् श्वा गवा धेन्वासह क्रीडति तदानीं यद्यदिष्टं प्रयोजनं तत्सिद्ध्यति अथ ग्रामप्रवेशश्वा पुरतः पुरस्तात् मूत्र्य प्रस्रवणं कृत्वा प्रयाति तदाऽभीष्टाशनलब्धये अभीष्टमिच्छितं यदशानं भोजनं तस्य लब्धिः प्राप्तिः तस्यै भवति १८८ वामइति भषणः वामोपि भूत्वा विलोलन् घूर्णन् रणे भंगं कार्यनाशं यच्छति तथा क्रुद्धः पुरतः अग्रेऽभिधावन् रक्तप्रपातं रुधिरस्रावं वधबंधनं

॥ भाषा ॥

॥अवामेति॥ श्वानको जोडा जेमने भागमें गमन करे वा संग चले वा परस्पर चुंबन करें वा स्नेह सहित अवलोकन करते होंय वा आलिंगन करते होंय वा मैथुनमें आसक्त होंय तो स्त्रीकी प्राप्ती होय ॥ १८७॥ गवेति॥ जो श्वान गोसूं क्रीडा करे तो जोजो प्रयोजन होय वो वो कार्य सिद्ध होंय और ग्रामप्रवेशमें श्वान अगाडी मूत्र करकें चल्यो जाय तो वांछितभोजनकी प्राप्तीके अर्थ जाननो ॥ १८८॥ वामइति ॥ श्वान वांयों होय करकें घूमतो होय तो संग्राममें भंग करे और कार्यको नाश करे और क्रोधवान् होय अगाडी दोडे तो रुधिरको स्राव वधबंधन करे ॥१८९॥

यंवीक्ष्यते काष्ठदृषन्मुखः श्वा तस्य ध्रुवं स्यादचिरेण
युद्धम् क्रीडंत्ययुग्माः प्रगुणे प्रयाणे युद्धाय
यक्षा दिनसप्तकेन १९० प्रस्थातुरग्रे यदि सारमेयः
कायं स पुच्छः श्रवणं धुनोति ध्रुवं तदा दत्त
दृढप्रहारा हरंति चौराद्द्रविणं क्षणेन १९१ युग्मं
प्लुते तरौ कंटकभाजि शुष्के भग्ने विशीर्णे पतिते च वृक्षे
अवस्करास्थ्नीं धनभृंगभस्म श्मशानवह्नी तुषकर्परेषु १९२

॥ टीका ॥

वा अभिधत्ते. १८९ यमिति काष्ठदृषन्मुखः काष्ठं दारु दृषत्प्रस्तरः अनयोर्द्वंद्वः एतौ मुखे यस्य स तथोक्तः श्वा यंवीक्ष्यते तस्य अचिरेण ध्रुवं युद्धं स्यात् तथा प्रगुणे प्रारब्धे प्रयाणे अयुग्माः त्रिपंचसप्तसंख्याकाः यक्षाः ।क्रीडंति तदा दिनसप्तकेन युद्धाय स्युः १९० प्रस्थातुरिति यदि सारमेयः प्रस्थातुः गंतुरग्रेपुरस्तात् सपुच्छश्रवणं कायं पुच्छश्रवणाभ्यां सहितं कायं शरीरं धुनोति तदा चौरा दत्तदृढप्रहाराः क्षणेन द्रविणं धनं हरंति १९१ प्लुतेइति प्लुतेतरौ जलप्लाविते वृक्षे क्वचित् दग्धेकाटौ इति पाठः तत्र दग्धे अग्निना प्रज्वलिते कटौ कटुक इत्यर्थः

॥ भाषा ॥

॥ यमिति ॥ काष्ठ पाषाण मुखमें जाको एसो श्वान जा पुरुषकूं देखे ता पुरुषकूं शीघ्रही निश्चय युद्ध होय और गमनमें तीन पांच सात एसेऊना संख्या जिनकी वे श्वान क्रीडा करे तो सात दिनमें युद्ध करावे ॥१९०॥ प्रस्थातुरिति ॥ जो श्वान गमन कर्ता पुरुषके अगाडी पूंछ कान शरीर इनें हलावे तो चौर प्रहार करकें क्षणमात्रमें धन हरले जांय ॥ १९१ ॥ प्लुतेइति ॥ जलमें डूबो वृक्ष वा अग्नी करकें प्रज्वलित कटुयो वृक्ष और कांटेनको वृक्ष सूको वृक्ष भग्न हुयो वृक्ष फटो हुयो वृक्ष पडोहुयो

अंगारशूलाऽश्मपलालकेशविशीर्णविट्चर्ममृतेषु
दृष्टः श्वा मूत्रयन्यच्छति कार्यनाशं दारिद्र्यमृत्यु
प्रमुखाननर्थान् १९३ विण्मांसभक्षादिकपूर्ण
वक्त्रोभयार्दितः श्वा यदि कंपमानः पराङ्मुखो
याति तदाध्वगानां नश्यंति सिद्धान्यपि वांछितानि १९४

॥ टीका ॥

तथा कंटकभाजि कंटकयुक्ते तथा शुष्के तथा भग्ने विशीर्णे स्फोटिते पतिते च वृक्षे अवस्करास्थींधनशृंगभस्मश्मशानवल्लीतुषकर्परेषु एतेषु स्थलेषु श्वा दृष्ट इत्युत्तरेणान्वयः १९२ अंगारेति अंगारशूलाश्मपलालकेशविशीर्णविट्चर्ममृतेषु श्वा मूत्रयन् मूत्रं कुर्वन् दृष्टः कार्यनाशं दारिद्र्यमृत्युप्रमुखान् अनर्थान्यच्छति तत्र अवस्करः अवकरः अस्थि कीकसं इंधनं एधः शृंगं विषाणं भस्म रक्षा श्मशानं प्रेतस्थलं श्मशानवल्लीत्येकपदं वा तुषः पुलाकः कर्परं कपालमेतेषामितरेतरद्वंद्वस्तेषु अंगारः हलाइति प्रसिद्धः शूलः कंटकः अश्मादृषत् पलालं धान्यरहितं यवादितृणं भुसइति ख्यातं केशः कचः विशीर्णा विट् विशीर्णा चासौ विष्ठा चेति कर्मधारयः चर्म आजिनं मृतं मृतकं एतेषामितरेतरद्वंद्वः तेषु १९३ विण्मांसेति यदि विण्मांसभक्षादिकपूर्णवक्त्रः विट् च मांसं च

॥ भाषा ॥

वृक्ष इनमें ओर हाड काष्ठ सींग भस्म श्मशान तुष कपाल इनमें ॥१९२॥ अंगारेति॥ अंगार शूल नाम कांटे पाषाण भुस केश विखरो हुयो विष्ठा चाम मृतक नाम मरो हुयो इनमें श्वान मूत्र करतो दीखे तो कार्यको नाश करे ओर मृत्यूकूं आदि लेकर मुख्य जे अनर्थ तिने देवै ॥ १९३॥ विण्मांसेति ॥ विष्ठा मांस भक्षादिक पदार्थ इनकरकें मुख जाको भर्यो होय भयकरकें पीडित होय कंपायमान होय एसो श्वान पीछो मुखकर चल्यो जाय तो मार्गमें गमनकर्ताकूं सिद्ध हुयेवी वांछितकार्यनाशकूं प्राप्त करे १९४

यं वीक्ष्यते काष्ठदृषन्मुखः श्वा तस्य ध्रुवं स्यादचिरे
ण युद्धम् क्रीडंत्ययुग्माः प्रगुणे प्रयाणे युद्धाय
यक्षा दिनसप्तकेन १९० प्रस्थातुरग्रे यदि सार
मेयः कायं स पुच्छः श्रवणं धुनोति ध्रुवं तदा दत्त
दृढप्रहारा हरंति चौरा द्रविणं क्षणेन १९१ युग्मं
प्लुते तरौ कंटकभांजि शुष्के भग्ने विशीर्णे पतिते च वृ
क्षे अवस्करास्थी धनभृंगभस्म श्मशानवल्ली तु
षकर्परेषु १९२

॥ टीका ॥

वा अभिधत्ते १८९ यमिति काष्ठदृषन्मुखः काष्ठं दारु दृषत् प्रस्तरः अनयोर्द्वंद्वः एतौ मुखे यस्य स तथोक्तः श्वा यं वीक्ष्यते तस्य अचिरेण ध्रुवं युद्धं स्यात् तथा प्रगुणे प्रारब्धे प्रयाणे अयुग्माः त्रिपंचसप्तसंख्याकाः यक्षाः । क्रीडंति तदा दिनसप्तकेन युद्धाय स्युः १९० प्रस्थातुरिति यदि सारमेयः प्रस्थातुः गंतुरग्रे पुरस्तात् सपुच्छश्रवणं कायं पुच्छश्रवणाभ्यां सहितं कायं शरीरं धुनोति तदा चौरा दत्तदृढप्रहाराः क्षणेन द्रविणं धनं हरंति १९१ प्लुतेइति प्लुते तरौ जलप्लावितेवृक्षे क्वचित् दग्धेकाटौ इति पाठः तत्र दग्धे अग्निना प्रज्वलिते कंटौ कटुक इत्यर्थः

॥ भाषा ॥

॥ यमिति ॥ काष्ठ पाषाण मुखमें जाको ऐसो श्वान जा पुरुषकूं देखे ता पुरुषकूं शीघ्रही निश्चय युद्ध होय ओर गमनमें तीन पांच सात ऐसे ऊना संख्या जिनकी वे श्वान क्रीडा करे तो सात दिनमें युद्ध करावे ॥ १९० ॥ प्रस्थातुरिति ॥ जो श्वान गमन कर्ता पुरुषके अगाडी पूंछ कान शरीर इनें हलावे तो चौर प्रहार करकें क्षणमात्रमें धन हरले जांय ॥ १९१ ॥ प्लुतेइति ॥ जलमें डूबो वृक्ष वा अग्नी करकें प्रज्वलित कटुवो वृक्ष ओर कांटेनको वृक्ष सूको वृक्ष भग्न हुयो वृक्ष फटो हुयो वृक्ष पडोहुयो

अंगारशूलाऽश्मपलालकेशविशीर्णविड्चर्ममृतेषु दृष्टः श्वा मूत्रयन्यच्छति कार्यनाशं दारिद्र्यमृत्युप्रमुखाननर्थान् १९३ विण्मांसभक्षादिकपूर्णवक्त्रो भयार्दितः श्वा यदि कंपमानः पराङ्मुखो याति तदाध्वगानां नश्यंति सिद्धान्यपि वांछितानि १९४

॥ टीका ॥

तथा कंटकभाजि कंटकयुक्ते तथा शुष्के तथा भग्ने विशीर्णे स्फोटिते पतिते च वृक्षे अवस्करास्थींधनशृंगभस्मश्मशानवल्लीतुषकर्परेषु एतेषु स्थलेषु श्वा दृष्ट इत्युत्तरेणान्वयः १९२ अंगारेति अंगारशूलाश्मपलालकेशविशीर्णविड्चर्ममृतेषु श्वा मूत्रयन् मूत्रं कुर्वन् दृष्टः कार्यनाशं दारिद्र्यमृत्युप्रमुखान् अनर्थान्यच्छति तत्र अवस्करः अवकरः अस्थि कीकसं इंधनं एधः शृंगं विषाणं भस्म रक्षा श्मशानं प्रेतस्थलं श्मशानवल्लीत्येकपदं वा तुषः पुलाकः कर्परं कपालमेतेषामितरेतरद्वंद्वस्तेषु अंगारः हल्ला इति प्रसिद्धः शूलः कंटकः अश्मा दृषत् पलालं धान्यरहितं यवादितृणं भुस इति ख्यातं केशः कचः विशीर्णा विट् विशीर्णा चासौ विष्ठाचेति कर्मधारयः चर्म अजिनं मृतं मृतकं एतेषामितरेतरद्वंद्वः तेषु १९३ विण्मांसेति यदि विण्मांसभक्षादिकपूर्णवक्त्रः विट् च मांसं च

॥ भाषा ॥

वृक्ष इनमें ओर हाड काष्ठ सींग भस्म श्मशान तुष कपाल इनमें ॥१९२॥ अंगारेति॥ अंगार शूल नाम कांटे पाषाण भुस केश विखरो हुयो विष्ठा चाम मृतक नाम मरो हुयो इनमें श्वान मूत्र करतो दीखे तो कार्यको नाश करे ओर मृत्यूकूं आदि लेकर मुख्य जे अनर्थ तिने देवे ॥ १९३॥ विण्मांसेति॥ विष्ठा मांस भक्षादिक पदार्थ इनकरकें मुख जाको भर्यो होय भयकरकें पीडित होय कंपायमान होय एसो श्वान पीछो मुखकर चल्यो जाय तो मार्गमें गमनकर्ताकूं सिद्ध हुयेवी वांछितकार्यनाशकूं प्राप्त करे १९४

पराङ्मुखः श्वा खनति क्षितिं यो योवा समारोदिति
पूर्णवक्त्रः प्रतिष्ठमानस्य पुरः स्थितोऽसौ भयाद्भ
यं जल्पति दुर्निवारं १९५ विजृंभते लेढि च ना
सिकाग्रं यः स्वांगभंगं भषणः करोति सलाभहा
निं प्रकरोति पुंसां मृत्युप्रदः श्वांतरलंघनेन १९६
विधूतकर्णेश्शुनि चेत्पुरस्तात्पांथो विशेद्वेश्म तदा
समस्तं प्रत्यागतोऽर्थं यमुपार्ज्य पापास्तं राजकी
याः पुरुषाहरंति १९७

॥ टीका ॥

भक्ष्यादिकंच एतेषांद्वंद्वस्तैः पूर्णभूतं वक्त्रंमुखंयस्य सः पराङ्मुखः
भयार्दितः कंपमानः श्वायाति तदा अध्वगानां सिद्धान्यपि वांछितानि
नश्यंति नाशं प्राप्नुवंति १९४ पराङ्मुखेति यः श्वा पराङ्मुखः पश्चा
न्मुखः क्षितिं पृथिवीं खनति यः प्रतिष्ठमानस्य गच्छतः जनस्य पुरः स्थि
तः पूर्णवक्त्रः समारोदिति असौ दुर्निवारं भयात् भयं जल्पति १९५
विजृंभतेति यः श्वा विजृंभते जृंभां करोति नासिकाग्रंच लेढि यश्च भष
णः स्वांगभंगं करोति स पुंसां लाभहानिं प्रकरोति अंतरलंघनेन च मृ
त्युप्रदो भवति १९६ विधूतकर्णेइति चेत्पांथः पुरस्तात् अग्रे विधूत

॥ भाषा ॥

॥पराङ्मुखेति॥ जो श्वान पीछो मुख करकें पृथ्वीकूं खोदतो होय अथवा जो पुरुषबे
ठो होय वाके अगाडी खडो होय मुख भर्यो होय एसो श्वान रोवे तो दुर्निवारभयतेंबी
भय होय ॥१९५॥ विजृंभतइति॥ जो श्वान जंभाई लेवे और नासिकाके अग्रभा
गकूं चाटतो होय अपने अंगकूं भंग करतो होय तो वो श्वान पुरुषनकूं लाभकी
हार्नी करे अपने बीचमें उलांग जायतो मृत्यूको देवेवारो जाननो ॥१९६॥ विधूतेति॥
गमनकर्ता पुरुषके अगाडी दोनो कान हलाय करकें श्वान घरमें प्रवेशकरजाय तो

गतौनिवृत्तावथवा श्वयुद्धं युद्धाय बंधाय वधाय
च स्यात् व्रजंति तारा यदि युद्धशक्ताः श्वान
स्तदा स्यात्पथिचौरभीतिः १९८ बलेन वामो य
दि नीयते श्वा कष्टात्तदल्पं विदधाति लाभं ता
रोऽथवा वामगतिर्भयेन श्वानर्थमर्थं च करोति या
तुः १९९ घुरघुरारवमुच्चरति क्रुधा भषति यो
भषणो भयतोऽथवा

॥ टीका ॥

कर्णेश्वुनि वेश्मनि विशेत् तदायमर्थं उपार्ज्य प्रत्यागतः पापाः राजकीयाः पुरुषाः तं समस्तं अर्थं हरंति क्वचित्समुपार्ज्येत्यपि पाठः १९७ गताविति गतौ अथवा निवृत्तौ श्वयुद्धं भवति तदा युद्धाय वधाय बंधाय च स्यात् यदि युद्धसक्ताः श्वानः पुरस्तात् तारा व्रजंति तदा पथिचौरभीतिः स्यात् १९८ बलेनेति यदि श्वा बलेन बलात्कारेण वामः नीयते तदा कष्टात् अल्पलाभं विदधाति अथवा भयेन तारः वामगतिश्च श्वा भवति तदा यातुः अनर्थमर्थंच करोति १९९ घुरघुरेति क्रुधा घुरघुरारवं यः उच्चरति अथवा यः

॥ भाषा ॥

जा धनकूं कुमाई करकें पीछो आयो वा समस्त धनकूं पापरूप राजकाजके पुरुष हर लेवैं ॥१९७॥ गताविति॥ गमनसमयमें वा प्रवेश समयमें श्वान युद्ध करे तो युद्धबंधन वध इनके अर्थ जाननो जो युद्धमें आसक्त होय रहे होंय वे श्वान अगाडीतें जेमने चले जांय तो मार्गमें चौरको भय होय ॥१९८॥ बलेनेति॥ जो श्वान बलात्कारसूं वामभागमें चल्यो जाय तो कष्टसूं अल्पलाभ करे अथवा भय करकें जेमने भागमें वा वांये भागमें श्वान आय जाय तो गमनकर्ताकूं अनर्थरूप अर्थ करे ॥१९९॥ घुरघुरेति॥ क्रोधकरकें घुरघुर शब्द उच्चारण करे अथवा भयसूं भूंसे

भ्रमति वाऽथ मृषैव यतस्ततो ध्रुवमसौ विदधाति
धनक्षयं २०० खनन्धरित्रीमसुखावहः स्याल्लो
लन् पुनः स्यादनिवृत्तिहेतुः धुन्वन् शिरश्चौरभयं
करोति व्यात्ताननस्त्वीहितकार्यनाशं २०१ आघ्रा
य पृष्ठे दशनैर्नखैर्वा वस्त्रं विकर्षन् विदधात्यनर्थम्
तथाविधोऽग्रे यदि सारमेयः प्रवासिनां तत्कुरुतेऽ
र्थलाभं २०२ दृग्गोचसे ग्रामगतो धुतांगो भयंक
रः श्वा सकलोद्यमेषु ॥

॥ टीका ॥

भयनः भषणो भषति अथ मृषैव मिथ्यैव यतस्ततः भ्रमति असौ श्वानः
ध्रुवं धनक्षयं विदधाति २०० खनन्निति धरित्रीं खनन् असुखावहः
स्यात् लोलन्पुनः अनिवृत्तिहेतुः असुखकारणं स्यात् शिरो मस्तकं
धुन्वन् चौरभयं करोति व्यात्ताननस्तु विस्फाटितवक्रस्तु ईहितकार्यनाशं
करोति २०१ आघ्रायेति, श्वा पृष्ठे आघ्राय दशनैः न
खैर्वा वस्त्रं विकर्षन् अनर्थं विदधाति यदि अग्रे सारमेयः तथा
विधो भवति तदा प्रवासिनां अर्थलाभं कुरुते २०२ दृग्गोचरेति

॥ भाषा ॥

अथवा वृथा इतको इत भ्रमतो होय वो श्वान निश्चय धनको क्षय करे॥ २००
खनन्निति॥ पृथ्वी खोदतो होय तो दुःखकूं करे चलतो होय तो दुःख करे म
स्तककूं हलावतो होय तो चौरको भय करे और मुख फाडतो होय तो वांछि
तकार्यको नाश करे॥ २०१॥ आघ्रायेति॥ श्वान पीठमें सूंगकरकें दांत नख
इन करकें वस्त्रकूं खेचतो होय तो अनर्थ करे जो श्वान अगाडीकूं एसो
होय तो वो गमन कर्ताकूं अर्थलाभ करे॥ २०२॥ दृगिति॥ ग्राम जायवेवारे
मनुष्यकूं देहकूं कंपायमान करतो होय एसो श्वान दीखे तो संपूर्ण

स्वादन्पुनः कंचनरं करोति सर्वापदामास्पदमाग्र
हेण २०३ वामोऽथवा पृष्ठगतोऽतिरौद्रं भषन्
भवेत्पांथपराजयाय पुनर्विवृत्तेः कथयत्यभा
वं भषंस्तथाग्रे यदि जागरूकः २०४ एकोऽग्रतः
पृष्ठगतस्तथान्यो यक्षौ न शस्तौ युगपद्भषंतौ स
व्यापसव्यौ यदि तौ भवेतां तत्तोरणाख्यौ शुभ
दौ सदैव २०५ ॥ छ ॥

॥ टीका ॥

दृग्गोचरो दृष्टिविषयं गतः ग्रामगतः श्वा धुतांगः कंपितांगः सक-
लोद्यमेषु सकलप्रयत्नेषु भयं करोति स्वादन् पुनः श्वा कं नरं मनुष्यं
सर्वापदामास्पदमाग्रहेण हठात् न करोति अपितु सर्वमपि नरं करो
त्येव २०३ वामइति वामः अथवा पृष्ठगतः श्वा अतिरौद्रं भषन्
पांथपराजयाय भवेत् अथ यदि अग्रे जागरूकः श्वानः भवति तदा
पुनर्विवृत्तेः प्रत्यागमस्य अभावं कथयति २०४ एकइति एकः अ-
ग्रतः अग्रेगतः तथाऽन्यः पृष्ठगतः एवं युगपद्भषंतौ यक्षौ न शस्तौ
यदि सव्यापसव्यौ तौ भवेतां तत्सदैव तोरणाख्यौ शुभदौ २०५

॥ भाषा ॥

उद्यमनमें भय करैं और जो खावतो दीखे तो हठसूं सर्व आपदानको स्थान मनु
ष्यकूं करै ॥ २०३ ॥ वामइति ॥ वांयो अथवा पीठपीछें श्वान अतिक्रूर भूंसे तो
मार्गीको पराजय होय अथवा जो श्वान गमनकर्त्ताके अगाडीकूं अतिक्रूर भूंस
तो होयतोपीछो आयवेको अभाव कहेहैं ये जाननो ॥ २०४ ॥ एकइति ॥ एक अगा-
डी और एक पीठ पिछाडी संगके संग भूंसते होंय तो शुभ नहीं जाननो जो
वांये जेमने भागमें संगके संग बोलते होय तो उनको तोरण नाम हैं सो शुभके
देवेवारे जानने ॥ २०५ ॥ ॥ छ ॥

पादौगृहे जिघ्रति सारमेयः पुंसो यदा वक्ति तदाशु
यात्रां यियासितो जिघ्रति लेढि वाथ प्रयाणभंगं
प्रणया ब्रवीति २०६ पद्भ्यां क्षितिं तक्षति पश्चिमा
भ्या मुद्धूलितो दीर्घतरोच्चनादः वमत्यथाग्रे हद
तेक्षतांगो बिभेति वायः सभयंकरः श्वा २०७
अग्रांघ्रिणोर्वी मवदारयित्वा प्रोच्चैः स्थितः प्रास्थित
मीक्षते वा

॥ टीका ॥

पादाविति यथा सारमेयो गृहे पादौ जिघ्रति तदा पुंसः आशु शीघ्रं यात्रां वक्ति यियासितः गंतुमिच्छतः पादौ लेढि जिघ्रति वा तदा प्रणयात् प्रयाणभंगं ब्रवीति २०६ पद्भ्यामिति यदि पश्चिमाभ्यां पद्भ्यां श्वा क्षितिं तक्षति तनू करोति खनतीति यावत् तक्ष तनूकरणे धातुः कीदृक् उद्धूलितः धुलीदिग्धः पुनः कीदृक् दीर्घतरोच्चनादः दीर्घतरउच्चश्च नादो यस्य स तथा अथ यो यक्षः अग्रे वमति वांतिं कुरुते हदते विष्ठां विधत्ते अक्षतांगः अक्षतशरीरो बिभेति वा स श्वा भयंकरो भयजनको भवति २०७ अग्रेति यो जागरूकः अग्रांघ्रिणा अग्रपादेनउर्वीं पृथ्वीं अवदारयन् विकर्षन् प्रोच्चैः स्थितः प्रास्थितं ईक्षते विलोकते अथ

॥ भाषा ॥

॥पादाविति॥ जो श्वान घरमें पामनकूं सूंगे तो पुरुषकूंशीघ्रही यात्रा कहेहै जो गमनकूं इच्छा करतो होय वा पुरुषके पामकूं चाटे वा सूंगे तो स्नेहसूं गमनको भंग कहे है ये जाननो ॥२०६॥ पद्भ्यामिति॥ जो श्वान पिछाडीके पामन करकें पृथ्वीकूं खोदतो होय धूलमें भरो होय अथवा जो श्वान अगाडी वमन करतो होय वा विष्ठाकरतो होय शरीर जाको हीन और प्रहारयुक्त नहीं होय भयवान् होय तो वो श्वान भय प्रगट करै ॥ २०७॥ अग्रेति॥ जो श्वान अगाडीके पामकरकें पृथ्वीकूं खोदे

कंडुयते चोत्तममंगभागं यो जागरूकः कुरुते ससिद्धिम् २०८ लांगूलजिह्वाकटिपृष्ठभागान् प्रचालयन् सन्मुखमेति हृष्टः कूजन् लिहन् पृष्ठवपुः सुचेष्टो यः श्वा स कार्येषु भवत्यभीष्टः २०९ तिष्ठतां प्रवसतां च नराणां मंदिरे प्रविशतांच समस्तं दक्षिणं भषणचेष्टितमिष्टं वामकं पुनरुशांति विदुष्टं २१० वामकेन यदि दक्षिणमंगं, दक्षिणेन भषणो यदि वामम्

॥ टीका ॥

वा उत्तमं अंगभागं कंडूयति ससिद्धिं कुरुते २०८ लांगूलेति यः श्वा लांगूलजिह्वाकटिपृष्ठभागान् प्रचालयन् हृष्टः सन्मुखमेति तथा यः कूजन् पृष्टवपुर्लिहन् सुचेष्टोभवति स श्वा कार्येषु अभीष्टः संमतो भवति लांगूलं च जिह्वाच कटिपृष्ठभागश्चेतीतरेतरद्वंद्वः २०९ तिष्ठतामिति तिष्ठतां स्थानस्थितवतां तथा प्रवसतां गच्छतां तथा मंदिरे प्रविशतां च नराणां मनुष्याणां समस्तं दक्षिणं भषणचेष्टितं इष्टं वामकं पुनः भषणचेष्टितं विदुष्टं विशेषेणदुष्टं उशांति कथयंति २१० वामकेनेति यदि श्वा वामकेनदक्षिणं अंगं स्पृशाति यदि दक्षिणेन

॥ भाषा ॥

वा बोहोत ऊंचेपे स्थित होत स्थितपुरुषनकूं देखतो होय अथवा उत्तम अंगकूं खुजावतो होय तो वो श्वान सिद्धी करे ॥२०८॥ लांगूलेति ॥ जो श्वान पूंछ जिह्वा कटी पृष्ठभाग इनें चलावत प्रसन्न सुख होय सन्मुख आवे तेसें ही शब्द करत पीठ शरीर इनें चाटतो हुयो सुंदर चेष्टा करतो होय वो श्वान कार्यनमें वांछित संमत योग्य हे ॥२०९॥ तिष्ठतामिति ॥ बेठे होंय गमन करते होंय वा घरमंदिरमें प्रवेश करने होंय उन मनुष्यनकूं श्वानकी समस्त जेमनी चेष्टा शुभ ओर वांई चेष्टा अशुभ दूषित कहेंहें ॥२१०॥ वामकेनेति ॥

संस्पृशत्यभिमतोन कदाचित्तत्प्रयोजनविधौ
क्वचनापि २११ ऊकाराख्यात्स्यादुकाराच्च श
ब्दाद्वामेपार्श्वेसारमेयोऽर्थसिद्ध्यै व्याक्षेपायप्रो
क्त आकारशब्दो पृष्ठे शब्दारोधकाः सर्वएव २१२
गोधाबिडालः शशकः शृगालः कोलस्तथा पंचसु
ना समानाः प्राणान्क्षुतं क्षोभयते चतुर्णां बिडा
लगोमानवकुक्कुराणां २१३ इ० श्वचे० यात्राप्र० १०

॥ टीका ॥

च वामं स्पृशति सश्वा कदाचित् क्वचनापि प्रयोजनविधौ कार्यविधानेन अभिमतः २११ ऊकाराख्यादिति सारमेयः वामे पार्श्वे सव्यप्रदेशे ऊकाराख्यात् शब्दात् ऊकाराच्छब्दाच्च अर्थसिद्ध्यै भवति तथा आकारशब्दः व्याक्षेपाय भवति पृष्ठे पृष्ठभागे शुनः सर्वेशब्दाः रोधकाएव भवंति २१२ गोधेति गोधा निहाका बिडालः ओतुः शशकः ससो इति प्रसिद्धः शृगालः जंबुकः कोलो वराहः एते पंचशुना भषणेन समानाः सदृशा ज्ञेयाः तथा बिडालगोमानवकुक्कुराणां चतुर्णां क्षुतं छिक्का प्राणान् क्षोभयते बिडालो मार्जारः गौर्धेनुः मानवो मनुष्यः

॥ भाषा ॥

जो श्वान वांयो होयकर जेमने अंगकूं स्पर्श करतो होय जो जेमनो होय वांये अंगकूं स्पर्श करतो होय तो कदाचित् कोई कार्यमें योग्य शुभ नहीं जाननो ॥ २११॥ ॥ऊकारेति॥ श्वानके ऊकार शब्द बोलवेतें वा ऊकार शब्द बोलेसूं अर्थसिद्धीके अर्थ जाननो जो आकार शब्द बोलतो होय तो आक्षेपके अर्थ जाननो और पीठ पीछें श्वानके समस्त शब्द कार्यकूं रोकवेके अर्थ जाननो ॥१२१२॥ गोधेति॥ गोह बिलाव खरगोस श्याल शूकर ये पांचो श्वानकी समान जानने और बिलाव गौ मनुष्य श्वान इनकी छींक प्राणनकूं क्षोभ करवेवाली जाननो ॥२१३॥ इति-

जल्पति भोजनलाभनिषेधौ यत्तदथावितथं कथयामि चिह्नमनिह्नुतभाविपदार्थं सारतरं सरमातनयस्य २१४
वामगतो गमने यदि यक्षो दक्षिणगो भवनागमनेषु खादति किंचनदृष्टिपथस्थो यच्छति तद्विविधं बहुभोज्यम् २१५

॥ टीका ॥

कुक्कुरः श्वा एतेषां द्वंद्वः २१३ इति वसंतराजशाकुने टीकायां श्वचेष्टिते यात्राप्रकरणम् १० जल्पतीति अथ सरमातनयस्य भषणस्य यत् चिन्हं भोजनलाभनिषेधौ भोजनस्य लाभश्च निषेधश्च तौ कर्मपदं जल्पति तत्सरमासुतस्य चिह्नं अनिह्नुतभाविपदार्थं न निह्नुतो नापलपितो भावि पदार्थो यत्र तत्तथा पुनः कीदृक् सारतरं अतिशयेन सारं अवितथं सत्यं वयं कथयामः २१४ वामेति यदि यक्षो भषणः गमने वामगतो भवति भवनागमने तु दक्षिणगः स्यात् किंच नदृष्टिपथस्थः खादति अत्ति तदा विविधं विचित्रं बहुभोज्यं यच्छति ददाति २१५

भाषा

श्री वसंतराजभाषाटीकायां श्वचेष्टिते यात्राप्रकरणं दशमं १० ॥ जल्पतीति ॥ श्वानके जो चिह्न भोजनके लाभकूं और निषेधकूं कहें हें वेई चिन्ह नही प्राप्त हुये होनहारपदार्थकूं प्राप्त करयेवाले अधिक कर साररूप सत्य तिनें हम कहेंहें ॥ २१४॥ वामेति॥ जो श्वान गमन समयमें वांयो होय घरकूं आवते समयमें जेमनो होय कछूक नेत्रनके अगाडी बेठ्यो होय और खावतो होय तो नानाप्रकारके चित्रविचित्र भोजन देवे ॥ २१५॥

दक्षिणगः प्रथमं तदनुस्याद्वामगति र्व्रजतामाशितुं
श्वा वेश्मनि यत्र च तत्र तदन्नं दूरतरं विषवत्त्य
जनीयं २१६ धूतशिरा उन्नामित पुच्छो योभषणः
सनिषेधति भोज्यं संमुखमेति गृहादुततिर्यग्
भुक्तमपिस्थिरतां नतदेति २१७ सृक्कियुगंय
दि लेढि धरित्रीं जिघ्रति तत्सपिंपीलिकमाज्यं यत्र
चलेदिसुधौतममत्रं तत्रभवत्यऽशनं विषयुक्तं २१८

॥ टीका ॥

दक्षिणगइति यत्र वेश्मनि गृहे आशितुं भोजनंकर्तुं व्रजतां गच्छतां नराणां श्वा प्रथमं दक्षिणगः स्यात्तदनुवामगतिः स्यात् तदा तत्रवेश्मनि तदन्नं विषवत् दूरतरं त्यजनीयं त्याज्यं २१६ धूतशिरा इति यो भषणो धूतशिराः कंपितमूर्द्धा उन्नामितपुच्छःस्यात् स भोज्यं निषेधति तथान्यः गृहात् संमुखमेति आगच्छति उततिर्यग् याति तदा भुक्तमपि नास्थिरतामेति २१७ सृक्कियुगमिति यदि धरित्रीं जिघ्रति सृक्कियुगं दंतवस्त्रप्रांतयुगलं लेढि च स श्वा सपिपीलिकं कीटिकासहितं आज्यं वक्ति यत्रस्रुधौ तं सुष्टुप्रक्षालितं अमत्रं

॥ भाषा ॥

॥दक्षिणगइति॥ जा घरमें भोजन करवेकूं गमनकरवेवाले मनुष्यनके श्वान पहलें जेमनो आवे ता पीछे बांयो गमन करजांय तब वा घरमें वो अन्न विषकी सीनाई दूरतेंईं त्याग करनो योग्य है॥२१६॥ धूतशिराइति॥ जो श्वान मस्तक हलाय पूंछकूं नमाय दे तो भोजनके योग्य पदार्थको निषेध जाननो तेसेंहीं जो घरसूं उन्मुख आवे वा तिरछो जाय तो भोजन कियो पदार्थ स्थिर नहीं रहे॥ ॥२१७॥ सृक्कियुगमिति॥ जो पृथ्वीकूं चाटे वा दोनो गलफाडेनकूं चाटे तो भोजनमें चेंटिसहित घी जाननो जहां धुपेहुये पात्रकूं चाटे तहां विष सहित भोजन जाननो॥२१८॥

ओष्ठयुगं यदि दर्शितदंतो लेढि भवत्यशनं तदभीष्टं
लेढि यदा पुनराननमध्यं नौष्ठयुगं विनिहंत्यशनं तत्
२१९ मूत्रयिता यदि शोभनदेशे क्षीरिणि शाखि
नि पक्वफले वा श्वा पुरतः पुरुषस्य तदानीमिष्ट
तरे भवतोऽशनपाने २२० दक्षिणभागगतो यदि
लीढे सृक्किगुगं भषणोऽभिमुखं च पश्यति तद्धुभ
तेयमभीष्टं भोज्यमरण्यगतोपि मनुष्यः २२१ इति
वसंतराजशाकुने श्वचेष्टिते भोजनप्रकरणमेकादशं

॥ टीका ॥

पात्रं लेढि तत्र अशनं विषयुक्तं भवति २१८ ओष्ठयुगमिति यदि
दर्शितदंतः श्वा ओष्ठयुगं लेढि तदाऽभीष्टं अशनं भवति यदा पुनः आ
ननमध्यं लेढि नौष्ठयुगं तदा तत् अशनं विनिहंति २१९ मूत्रयितेति
यदि पुरुषस्य पुरतः श्वा शोभनदेशे तथा क्षीरिणि शाखिनि पक्वफले
वा क्वचित् पुष्पफलेवेति पाठः मूत्रयिता स्यात् तदानीं अशनपाने इष्ट
तरे भवतः २१९ दक्षिणेति यदि दक्षिणभागगतो भषणः सृक्किगुगं
लीढे अभिमुखं च पश्यति तदाऽरण्यगतोप्ययं मनुष्यः अभीष्टं
भोज्यं लभते प्राप्नोति २२० इतिव॰ टी॰ श्वचेष्टिते भोजनप्रकरणं ११

॥ भाषा ॥

चाटे तो वांछित भोजन
॥ओष्ठयुगमिति॥ जो श्वान दांत दिखावै और दोनो होटनकूं चाटे तो वांछित भोजन
होंय जो फिर मुखके भीतर दोनो होटनकूं नहीं चाटे तो वो भोजन नाश करे ॥ २१९॥
॥मूत्रयितेति॥ जो श्वान सुंदर स्थानमें और दूध जामेंसूं निकसे वा शाखामें पकेहु
ये फल वा पुष्पमें मूत्र करे तो भोजन जल दोनो योग्य शुभ जाननो ॥ २२०॥ दक्षिणेति॥
जेमने भागमें श्वान दोनो गलफाडेनकूं चाटतो जाय संमुख देखे तो वनमें प्राप्तहुयो वी
मनुष्य वांछित भोजनके योग्य प्राप्त होय ॥ २२१॥ इ॰ व॰ भा॰ टी॰ श्वचे॰ भोजनप्र॰ ११

अथप्रकरणोद्देशो वृत्तसंख्या च कथ्यते श्वनोऽधि
वासनंपूर्वं वृत्तैः षोडशभिः स्मृतं १ द्वितीयं राज्य
लाभाख्यं त्र्यधिकैर्दशभिस्तथा तृतीये वरणं वृत्तैः
र्दशभिश्चतुरुत्तरैः २ चतुर्थेदेशलाभादि दशभिः पं
चभिस्तथा पंचमंचाष्टभिर्वृत्तैर्दृष्टिप्रकरणं स्मृतं
३ युद्धप्रकरणंषष्ठं वृत्तानां त्रिंशता तथा षट्च
त्वारिंशतावृत्तैः शुभज्ञानंच सप्तमे ४

॥ टीका ॥

अथेति श्वचेष्टितकथनानंतरं मया प्रकरणोद्देशो वृत्तसंख्या च कथ्यते तत्र पूर्वं श्वनः अधिवासनप्रकरणं षोडशभिर्वृत्तैः स्मृतं १ द्वितीयमिति यं राजलाभाख्यं प्रकरणं त्र्यधिकैर्दशभिः त्रयोदशभिर्वृत्तैः स्मृतं तृतीये प्रकरणे चतुरुत्तरैर्दशभिश्चतुर्दशभिः वृत्तैः वरणं प्रतिपादितं २ चतुर्थेइति चतुर्थे प्रकरणे दशभिः पंचभिश्च पंचदशभिर्वृत्तैः देशलाभादिप्रकरणं प्रतिपादितं तथा अष्टभिर्वृत्तैः पंचमं दृष्टिप्रकरणं स्मृतं ३ युद्धेति तथा युद्धप्रकरणं षष्ठं वृत्तानां त्रिंशता स्मृतं सप्तमे प्रकरणे शुभज्ञानाख्यं षट्चत्वारिंशतावृत्तैः स्मृतं ४

॥ भाषा ॥

अथेति॥ श्वानकी चेष्टा कहेके अगाडीमें प्रकरणनकी संख्या और प्रकरण प्रकरणके श्लोकनकी संख्या कहूंहूं उनमें पहलो अधिवासन नाम पूजा प्रकरण सोलै श्लोकनकरकें कह्यो हैं॥ २२३॥ द्वितीयमिति॥ दूसरो राजलाभ नाम कर प्रकरण तामें तेरह श्लोक हैं तीसरो विवाह प्रकरण तामें चोधे श्लोक हैं॥ २॥ चतुर्थेति॥ चोथो देशलाभादि प्रकरण तामें पंद्रह श्लोक करे हैं और पांचमो दृष्टिप्रकरण आठ श्लोकन करकें कह्योहै॥३॥ युद्धेति॥ छटो युद्धप्रकरण तीस श्लोकन करकें कह्यो है॥ सातमो शुभज्ञाननाम प्रकरण तामें छैंचालीस श्लोक कहेहैं॥ ४॥ ॥६७॥

लाभप्रकरणंवृत्तैर्विमृष्टं चाष्टमेऽष्टभिः रोगिणां
जीवितज्ञानं नवमे दशाभिस्त्रिभिः ५ एकपंचा
शतावृत्तैर्यात्राच दशमे मता एकादशेऽष्टभिर्वृत्तै
र्भोज्यलाभो विभावितः ६ एवंप्रकरणान्यस्मिन्
न्नेकादश श्वचेष्टिते द्वाविंशत्यासमायुक्ते वृत्तानां
द्विशते तथा ७ इतिवसंतराजशाकुने सदागमार्थ
शोभनेऽष्टादशोवर्गः समाप्तः

॥ टीका ॥

लाभेति अष्टमे प्रकरणे अष्टभिर्वृत्तैः लाभप्रकरणं विमृष्टं नवमे प्रकरणे दशाभिस्त्रिभिः त्रयोदशाभिरित्यर्थः वृत्तैः रोगिणां जीवितज्ञानं विचारितमिति शेषः ५ एकेति दशमे प्रकरणे एकपंचाशतावृत्तैर्यात्रा मता प्रोक्ता तथा एकादशे प्रकरणे अष्टभिर्वृत्तैः भोज्यलाभो विभावितः विचारितः ६ एवमिति एवममुना प्रकारेणास्मिन् शास्त्रे श्वचेष्टिते एकादशप्रकरणानि भवंति तथा वृत्तानां द्विशते द्वाविंशत्यायुक्ते स्तः ७ इति वसंतराजशाकुने सदागमार्थशोभने समस्तसत्यकौतुके विचारितं श्वचेष्टितं इत्यष्टादशोवर्गः १८ ॥छ॥

॥ भाषा ॥

॥लाभेति॥ आठमो लाभ प्रकरण तामें आठ श्लोक कहे हैं और नोमो जीवित मरण प्रकरण तामें तेरह श्लोक कहे हैं ॥ ५ ॥ एकेति ॥ दशमो यात्रा प्रकरण तामें इक्यामन श्लोक कहे हैं और ग्यारमो भोजन लाभ प्रकरण तामें आठ श्लोक कहे हैं ॥ ६॥ एवमिति ॥ या प्रकार करकें या ग्रंथमें श्वानकी चेष्टानमें ग्यारह प्रकरण हैं तिनके श्लोक दोयसे बाईस हैं ॥७॥ ॥ इति वसंतराजभाषाटीकायां श्वचेष्टिते अष्टादशोवर्गः समाप्तः ॥१८॥ ॥छ॥

शोभनाशुभफलाप्तिसूचकं कथ्यते त्ववितथं शिवारुतं शांतदीप्तककुभां विशेषतो ज्ञानमत्र च सदोपयुज्यते १ दग्धादिगुक्ता दिननाथमुक्ता विवस्वदाशा भवति प्रदीप्ता साधूमिता यां सविता प्रयाति शेषा दिगंताः खलु पंचशांताः २ दग्धादि गैशी ज्वलिता दिगैंद्री धूमान्विता चानलदिक्प्रभाते प्रत्येकमेवं प्रहराष्टकेन भुंक्ते दिशोऽष्टौ सविताक्रमेण ३ आद्ये दिनस्य प्रहरे प्रवृत्ते महेश देवेश हुताश दिक्षु ॥

॥ टीका ॥

शोभनेति मया शिवारुतं शृगाली जल्पितं कथ्यते उच्यते कीदृशं शोभनं मनोहरं पुनः कीदृशं शुभाशुभफलाप्तिसूचकं शुभंच अशुभंच यत्फलं तस्य आप्तिः प्राप्तिस्तस्याः सूचकं ज्ञापकं पुनः कीदृशं अवितथं सत्यं अत्र शिवारुते शांतदीप्तककुभां शांतदीप्तदिशां ज्ञानं सदा सर्वकाले विशेषतः विशेषात् उपयुज्यते उपयोगी भवति १ दग्धेति २ दग्धेति ३ इदं वृत्तद्वयं पूर्वव्याख्यातत्वान्नव्याख्यातं आद्येइतिं दिनस्य आद्ये प्रहरे प्रवृत्ते सति महेशदेवेशहुताशदिक्ष महेशः शं-

॥ भाषा ॥

॥ शोभनेति ॥ अब मनोहर शुभ असुभ फलकी प्राप्तीको करवेवालो सत्यरूप एसो शृगालीको शब्द कहुंहूं या शृंगालीके शब्दमें शांत दीप्त दिशानको ज्ञान सर्वकालमें विशेषतें उपयोगी होयहे ॥ १ ॥ दूसरे श्लोककी और तीसरे श्लोककी टीका पहलें कह्याये इनको विस्तार वोहोत यासूं नहीं कियो ॥ २ । ३ ॥ आद्येइति ॥ दिनके प्रथम प्रहरमें शृगाली ईशान पूर्व अग्निकोण इनमें बोले तो त्रास नाश भय शरीरको नाश बंधन ये क्रमकरकें होंय ॥ ४ ॥

शिवा रटंती कुरुते क्रमेण संत्रासकायव्ययबंधना
नि ४ अह्नो द्वितीये प्रहरस्य भागे सहस्रनेत्रा
नलकालदिक्षु शिवा रटंती कुरुते क्रमेण संत्रास
कायव्ययबंधनानि ५ प्राप्ते तृतीये प्रहरे दिनस्य
हुताशवैवस्वतयातु दिक्षु शिवार० ६ समागतं
ह्नः प्रहरे चतुर्थे प्रेतेश रक्षः पति पाशि दिक्ष शि
वा रटंती कुरुते क्रमेणसंत्रासकायव्ययबंधनानि ७

॥ टीका ॥

करः देवेशः इंद्रः हुताशो वह्निः एतेषां द्वंद्वः तेषां दिक्षु ईशानपूर्वाग्निकोणेष्वित्यर्थः रटंती शिवा क्रमेण संत्रासकायव्ययबंधनानि कुरुते संत्रासो भयं कायव्ययः शरीरनाशः बंधनं काराक्षेपः एतेषां द्वंद्वः ४ अह्नइति अन्हः दिवसस्य द्वितीये प्रहरस्य भागे सहस्रनेत्रानलकालदिक्षु पूर्वाग्निदक्षिणदिक्षु रटंती शिवी संत्रासकायव्ययबंधनानि कुरुते गतार्थमेतत् ५ प्राप्तेइति दिनस्य तृतीये प्रहरे प्राप्तेसति हुताशवैवस्वतयातु दिक्ष हुताशः अग्निः वैवस्वतो यमः यातुः राक्षसः एतेषां द्वंद्वः तेषां दिक्ष अग्नि दक्षिणनैर्ऋति दिक्षु इत्यर्थः रटंती शिवा संत्रासकायव्ययबंधनानि कुरुते ६ समागतेइति अन्हः तुरीये चतुर्थे प्रहरे समागतेसति प्रेतेशरक्षः पतिपाशि दिक्षु प्रेतेशो यमः रक्षःपतिः रक्षोऽधिपतिः पाशी वरुणः एतेषां द्वंद्वस्तेषां दिक्ष -

॥ भाषा ॥

॥ अन्हइति ॥ दिनके दूसरे प्रहरमें शृगाली पूर्व अग्नीकोण दक्षिण इन दिशानमें बोले तो भय शरीरको नाश बंधन ये करे॥ ५॥ प्राप्तेइति ॥ दिनके तीसरे प्रहरमें अग्निकोण दक्षिण नैर्ऋत्य कोण इनमें शृगाली बोले तो भय शरीरको नाश बंधन ये होंय॥ ६ समागतेइति ॥ दिनके चोथे प्रहरमें दक्षिण नैर्ऋत्य पश्चिम इनदिशानमें शृगाली बोलेतो

आद्ये निशाया प्रहरे प्रवृत्ते रक्षोधिपांभः पतिवातादिक्षु शिवा० ८ ततो द्वितीये प्रहरे रजन्या स्तोयाधिनाथानिलसोम दिक्षु शिवा० ९ यामे तृतीयेपिहि यामवत्याः समीरदोषाकरशंभुदिक्षु शिवा० १० समागते रात्रि तुरीययामे निशाकरेशानसुरेशदिक्षु शिवा रटंती कुरुते क्रमेण संत्रास कायव्ययबंधनानि ११

इति व० शिवारुते दग्धादिप्रकरणं प्रथमं १

॥ टीका ॥

दक्षिणनैर्ऋत्यपश्चिमासु रटंती शिवा संत्रासकायव्ययबंधनानि कुरुते ७ आद्येइति निशाया आद्ये प्रहरे प्रवृत्तेसति रक्षोधिपांभः पतिवातदिक्षु क्वचिद्रक्षः प्रचेतोनिलदिक्षु चैवमित्यपि पाठः नैर्ऋतपश्चिमवायुदिक्षु क्रमेण पूर्वोक्तं फलं कुरुते ८ ततइति ततो रजन्याः द्वितीयेमहरे तोयाधिनाथानिलसोमदिक्षु वरुणवायुकुबेरदिक्षु क्रमेण पूर्वोक्तं फलं कुरुते ९ यामेइति यामवत्या रजन्यास्तृतीये यामे समीरदोषाकरशंभु दिक्षु वायु सोम महेशदिक्षु रटंती शिवा पूर्वोक्तं फलप्रदा ज्ञेया १० समागते इति रात्रितुरीययामे समागतेसति निशाकरेशानसुरेशदिक्षु उत्तरेशानपूर्वदिक्षु रटंती शिवा संत्रासेति पूर्वोक्तफलप्रदा स्यात् ११ इ० दग्धा० प्र० १

॥ भाषा ॥

भय शरीरको नाश बंधन ये क्रम करकें करै ॥ ७॥ आद्येइति ॥ रात्रीके पहले प्रहरमें नैर्ऋत्य पश्चिम वायुकोण इन दिशानमें बोले तो पहलें कह्येहुये फल जाननो ॥ ८॥ ततइति ॥ रात्रीके दूसरे प्रहरमें पश्चिम वायु उत्तर इनदिशानमें बोले तो शृगाली भयदेहको नाश बंधन करे ॥ ९ ॥ वामेइति ॥ रात्रीके तीसरे प्रहरमें वायुकोण उत्तर ईशान इनमें बोले तो भयदेहको नाश बंधन करे ॥ १० ॥ समागतेइति ॥ रात्रीके चोथे प्रहरमें शृगाली उत्तर ईशान पूर्व इनमें बोले तो भय देहको नाश बंधन करे ॥ ११ ॥ इ० व० भा० शि० द० दीप्तधूमित दिक्त्रयप्र० प्र० ॥ १ ॥

इतीरितं दिक्त्रययामयोगात् फलं विरुद्धं विरुतैः शिवायाः ब्रूमोथ दिक्पंचकयामयोगात्[illegible]लानि पुंसां क्रमतः शुभानि १२ कृतांतरक्षोवरुणानिलेंदुदिक्ष्वाद्ययामे रटितैः शृगाल्याः स्यादिष्टवा[illegible]श्रुतिरिष्टसिद्धिर्लाभः सुभिक्षं प्रियलोकसंगः १[illegible]क्षःप्रचेतोऽनिलसोमशंभुदिक्षु द्वितीये प्रहरे रुते[illegible] स्यादिष्टवार्त्ता० १४

॥ टीका ॥

इतीति इति पूर्वोक्तप्रकारेण अस्माभिः दिक्त्रययामयोगात् शिवायाः विरुतैः विरुद्धं फलमीरितं कथितं अथ दिक्पंचकयामयोगात् क्रमतः अनुक्रमेण शुभानि फलानि पुंसां मनुष्याणां वयं ब्रूमः कथयामः १२ कृतांतेति दिनाद्ययामे दिवसस्य प्रथमप्रहरे कृतांतरक्षोवरुणानिलेंदुदिक्षु दक्षिणनैर्ऋतपश्चिमवायुउत्तरदिक्षु शृगाल्या रटितैः इष्टवार्ताश्रुतिः इष्टसिद्धिर्लाभः सुभिक्षं प्रियलोकसंगः स्यात् यथाक्रमं पंचापि फलानि भवंतीत्यर्थः १३ रक्षइति दिनस्येत्यनुवर्तते द्वितीयप्रहरे रक्षःप्रचेतोनिलसोमशंभुदिक्षु नैर्ऋतवरुणवायुकुबेरेशानदिक्षु शिवायाः रुतेन इष्टवार्तेत्यादि पूर्वोक्तफलं यथाक्रमं स्यात् १४ ॥छ॥

॥ भाषा ॥

॥इतीति॥ या प्रकार हमनें तीन दिशाके प्रहरके योगसूं शिवाकें शब्दन करकें विरुद्ध फलमानु खोटे फल कहेहें अब पांचों दिशानके प्रहरके योगसूं क्रम करकें फल कहें हें ॥१२॥ कृतांतेति ॥ दिनके पहले प्रहरमें शृगाली दक्षिण नैर्ऋत्य पश्चिम वायु उत्तर इन दिशानमें बोले तो वांछितवार्ताको श्रवण इष्टसिद्धी को लाभ सुभिक्ष प्रियलोकको संग येहोंय १३ रक्षइति ॥ दिनकेदूसरे प्रहरमें नैर्ऋत्य पश्चिम वायु उत्तर ईशान इनदिशानमें शृगाली बोले तो इष्टवार्ताको श्रवण१ इष्टसिद्धी २ लाभ ३ सुभिक्ष ४ प्रियजनको संग५

जलेशवातेंदुशिवामरेश दिक्ष्वारवेण प्रहरे तृतीये
स्यादिष्टवार्त्ता० १५ समीरसोमेशास्करेशवह्नि दिक्षु
स्वरेणप्रहरे चतुर्थे स्यादिष्टवार्त्ता० १६ शशांकरु
द्रेंद्रहुताशकालदिक्ष्वारवैः पंचमयामभागे स्य
दिष्टवा० १७ ईशानशक्राग्निकृतांतरक्षो दिक्षुस्व
रेणप्रहरेच षष्ठे स्यादिष्टवार्त्ता० १८

॥ टीका ॥

जलेशेति दिनस्य तृतीये प्रहरे जलेशवातेंदुशिवामरेशादिक्षु पश्चि
मवायुसोमशंकरशक्रककुप्सु शिवायाः आरवेण शब्देन यथाक्र
मं पूर्वोदितं फलं स्यात् १५ समीरेति दिनस्य चतुर्थे प्रहरे समीरसो
मेशास्करेशवह्नि दिक्षु वायुसोमशंभुइंद्रवह्निदिक्षु शिवायाः स्वरेण
पूर्वोक्तमेव फलं यथाक्रमं स्यात् १६ शशांकेति दिनस्य पंचमया
मभागे शशांकरुद्रेंद्रहुताशकालदिक्षु उत्तरेशानपूर्वाग्निदक्षिणदि
क्षु शिवारवैः इष्टवार्तेति पूर्वोक्तमेव फलं क्रमेण स्यात् १७ ईशाने
ति दिनस्यषष्ठेच प्रहरे ईशानशक्राग्निकृतांतरक्षोदिक्षु ईशानपूर्वा
ग्निदक्षिणनैर्ऋतदिक्षु शिवास्वरेण इष्टवार्तेति पूर्वोक्तमेव फलं स्यात् १८

॥ भाषा ॥

ये पांचों फल क्रमकरकें होंय ॥ १४ ॥ जलेशेति ॥ दिनके तीसरे प्रहरमें पश्चिम वायु उत्तर
ईशान पूर्व इन पांचों दिशानमें शृगाली बोले तो पहलें कहेजे पांचों फलते होंय ॥१५॥
समीरेति ॥ दिनके चोथे प्रहरमें वायु उत्तर ईशान पूर्व अग्नीकोण इनमें बोले तो पह
लें कहेजे पांचों फल ते क्रमकरकें होय ॥ १६ ॥ शशांकेति ॥ दिनके पांचमें प्रहरमें
उत्तर ईशान पूरव अग्निकोण दक्षिण इनपांचों दिशानमें बोले तो पहलें कहेजे पांचों फल
ते होंय ॥ १७ ॥ ईशानेति ॥ दिनके छठे प्रहरमें ईशान पूरव अग्निकोण दक्षिणनैर्ऋत्य इन
पांचों दिशानमें बोले तो शृगाली पहले कहे हुये पांचों फल करै ॥ १८ ॥ ॥ छ ॥

इंद्राग्निकालास्रपपाशपाणिदिक्ष्वारवात्सप्तमयामभागे स्यादिष्टवा० १९ वह्न्यंतकृन्नैर्ऋतपाशिवातदिक्ष्वष्टमे च प्रहरे रवेण स्यादिष्टवार्ता० २० इतिशिवारुते दिक्पंचकयामयोगप्रकरणं द्वितीयं एकादिकानां निधनाष्टमानां शिवारुतानामधुना यथार्थम् प्राच्यादिकास्वष्टसु दिक्ष्वशेषं यद्यत्फलं तत्तदुदीरयामः २१

॥ टीका ॥

इंद्राग्नीति सप्तमयामकाले इंद्राग्निकालास्रपपाशपाणिदिक्षु पूर्वाग्निदक्षिणनैर्ऋतपश्चिमदिक्षु शिवायाः आरवात् स्यादिष्टवार्तेति तदेवफलं १९ वह्नीति अष्टमे प्रहरे वन्ह्यंतकृन्नैर्ऋतपाशिवातदिक्षु अग्निदक्षिणनैर्ऋतपश्चिमवायुहरित्सु शिवारवेण इष्टवार्तादिकं फलं पूर्वोक्तमेव स्यात् २० इतिवसंतराजटीकायां शिवारुते दिक्पंचकयामयोगप्रकरणं द्वितीयं २ एकेति अधुना सांप्रतं प्राच्यादिकासु अष्टसु दिक्षु एकादिकानां निधनाष्टमानां शिवारुतानां अशेषं यद्यत्फलं तत्तद्वयं उदीरयामः एकः एकसंख्याकः आदौ येषु ते तथोक्ता

॥ भाषा ॥

॥इंद्राग्नीति॥ सातमें प्रहरमें शृगाली पूरव अग्निकोण दक्षिण नैर्ऋत पश्चिम इन पांचों दिशानमें बोले तो पहलें कहेहुये पांचों फल होंय ॥१९॥ वन्हीति॥ आठमें प्रहरमें अग्निकोण दक्षिण नैर्ऋत्य पश्चिम वायु इन पांचों दिशानमें बोले तो पहलें कहे जे पांचों फल ते होंय॥ २०॥ इति वसंतराजभाषाटीकायां शिवारुते दिक्पंचयामयोगप्रकरणं द्वितीयं ॥२॥ एकेति ॥ अब पूरवकूं आदि ले आठों दिशानमें एक है आदिमें जिनके निधन नाम हैं आठमो जिनमें एसे शृगालीके शब्दनको जो जो समग्र फल हैं सो सो हम कहेंहैं ॥२१॥

धनाप्ति मिष्टाप्तिमभीष्टलाभं लाभं ततोऽर्थस्य फलंशुभंच भयप्रणाशं सकलंच सौख्य मेकादि शब्दैः कुरुते प्रशांते २२ भयान्यनिष्टश्रुतिरर्थहानिरिष्टैर्वियोगो महतीचभीतिः स्याद्विड्वरार्त्तिर्मरणंचदीप्तेत्वेकादिना फेत्कृतिसप्तकेन २३ ऐंद्र्यां निनादे प्रथमेऽर्थलाभो भवेद्द्वितीये निधिदर्शनं च कन्यातृतीये लभते चतुर्थे बंध्वागमः पंचमकेऽर्थसिद्धिः २४ ॥छ॥

॥ टीका ॥

तेषां पुनः कीदृशानां शिवारुतानां निधनो निधनाख्यः अष्टमो येषु ते तथोक्तास्तेषामित्यर्थः २१ धनाप्तिमिति प्रशांतदिग्विभागे एकादिशब्दैः एकः आदौ कृत्वा यावत्सप्तशब्दास्तैः अनुक्रमेण धनाप्तिं इष्टाप्तिं अभीष्टलाभं अर्थस्यलाभं फलं शुभं च भयप्रणाशं सकलं सौख्यं च शिवाकुरुते २२ भयानीति दीप्ते दिग्विभागे एकादिना फेत्कृति सप्तकेन भयानि १ अनिष्टश्रुतिः२ अर्थहानिः ३ इष्टैर्वियोगः ४ महतीचभीतिः ५ विड्वरार्त्तिः ६ मरणं ७ च स्यात् २३ ऐंद्र्यामिति पूर्वस्यां प्रथमे निनादे अर्थलाभो भवेत् द्वितीये शब्दे निधिदर्शनं भवति तृतीये कन्या

॥ भाषा ॥

॥धनाप्तिमिति॥ शांत दिशामें एककूं आदि ले सात शब्द बोले तो शृगाली अनुक्रम करकें धनकी प्राप्ती इष्टकी प्राप्ती अभीष्टको लाभ अर्थको लाभ शुभ फल भयको नाश सौख्य करे ॥२२॥ भयानीति॥ दीप्त दिशामें एककूं आदि ले सात शब्द बोले तो भय१ अनिष्टको श्रवण२ अर्थकी हानी ३ इष्ट जनन करकें वियोग ४ महान् भय ५ उन्नम वैश्यकी पीडा ६ मरण ये होंय ॥२३॥ ऐंद्र्यामिति॥ पूरव दिशामें पहले शब्द में अर्थको लाभ होय दूसरे शब्दमें धन दीखै तीसरे शब्दमें कन्या प्राप्त होय चोथे श-

षष्ठे रवे कुप्यति भूमिनाथो भीः सप्तमे स्याद्विफलोऽष्टमस्तु त्रासोग्निभागे प्रथमे द्वितीये नराधिपः कुप्यति भीस्तृतीये २५ घातं चतुर्थे नगरस्य शब्दे शिवारुते पंचमके च युद्धं वदंति तज्ज्ञाः कलहं च षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु २६ आद्ये शुभं स्यादशुभं द्वितीये याम्ये महाव्याधिभयं तृतीये स्वरे चतुर्थे स्वजनागमः स्यात्पुत्रो भवेत्पंचसु फेत्कृतेषु २७

॥ टीका ॥

लभते चतुर्थे बंध्वागमः स्यात् पंचमकेऽर्थसिद्धिः स्यात् २४ षष्ठेइति षष्ठेरवे शब्दे भूमिनाथः कुप्यति सप्तमेभीः स्यात् अष्टमस्तु विफलः अग्निभागे प्रथमे रवे त्रासः स्यात् द्वितीये नराधिपः कुप्यति तृतीये भीर्भवति २५ घातमिति चतुर्थे शिवारुते शब्देनगरस्य घातः स्यात् पंचमके शिवारुते शब्दे युद्धं भवति षष्ठे कलहं तज्ज्ञाः वदंति सप्तमे भीतिः अष्टमस्तु विफलः २६ आद्येइति याम्ये दक्षिणभागे आद्येरवे शुभं स्यात् द्वितीयेरवे अशुभं स्यात् तृतीये महा

॥ भाषा ॥

ब्दमें वंधूको आगमन होय पांचमें शब्दमें अर्थकी सिद्धी होय ॥ २४ ॥षष्ठेइति ॥ छठे शब्दमें पृथ्वीको नाथकोपवान् होय सातमें शब्दमें भय होय आठमो शब्द तो निष्फल है अग्निकोणमें पहलो शब्द बोले तो त्रास होय दूसरे शब्दमें राजाको कोप होय तीसरेशब्दमें भयहोय ॥२५॥घातमिति॥ चोथे शब्दमें नगरको घात होय पांचमें शब्दमें युद्ध होय छठे शब्दमें कलह होय शृगालीके सातमें शब्दमें भय होय आठमो शब्द तो निष्फल हे ॥ २६॥ आद्येइति॥ दक्षिण दिशामें शृगाली पहलो शब्द बोले तो शुभ होय दक्षिणमें दूसरो शब्द बोले तो अशुभ होय तीसरे शब्दमें महान्व्याधीको भय

जायेत कन्या रटितेच षष्ठे भीः सप्तमे स्याद्विफलो
ष्टमस्तु ग्रामस्य घातो दिशि राक्षसाना माद्ये द्वि
तीयेपि च गोकुलस्य २८ मृत्युस्तृतीये द्विचतुष्प
दानां हानिश्चतुर्थेप्यथ पंचमे च चौराद्भयं राजभ
यं च षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु २९
शब्दे शिवाया वरुणस्य भागे आद्ये भयं हानि रथ द्वि
तीये स्याद्राजदूतागमनं तृतीये दाहश्चतुर्थे ख
लु चौरभीतिः ३० ॥ छ ॥

॥ टीका ॥

व्याधिभयं भवति चतुर्थे स्वरे स्वजनागमः स्यात् पंचसु फेत्कृतेषु पुत्रो भवेत् २७ जायेतेति षष्ठे रटिते च शब्दे कन्या जायेत सप्तमे भीः स्यादष्टमस्तु विफलः राक्षसानां दिशि नैर्ऋतदिशि आद्ये शब्दे ग्रामस्य घातः स्यात् द्वितीयेपि च गोकुलस्य घातः स्यात् २८ मृत्युरिति तृतीये शब्दे द्विपदानां चतुष्पदानां मृत्युः स्यात् चतुर्थे शब्दे हानिः अथ पंचमे च शब्दे चौराद्भयं भवति षष्ठे राजभयं भवति सप्तमे भीः स्यात् अष्टमस्तु विफलः २९ शब्देइति वरुणस्य भागे पश्चि-

॥ भाषा ॥

य होय चोथे शब्दमें स्वजन जनको आगम होय पांचमों शब्द करे तो पुत्र होय ॥ २७ जायेतेति ॥ शृगालीके छठे शब्दमें कन्या होय दक्षिणमें शृगालीके सातमें शब्दमें भय होय शृगालीको आठमो शब्द तो निष्फल है नैर्ऋत्यकोणमें शृगालीके पहले शब्दमें ग्रामको घात होय दूसरे शब्दमें गोकुलको घात होय ॥ २८ ॥ मृत्युरिति ॥ तीसरे शब्दमें मनुष्यादिक और चोपदा इनका मृत्यू होय चोथे शब्दमें हानी होय पांचमें शब्दमें चोरतें भय होय छठे शब्दमें राजभय होय सातमें शब्दमें भय होय आठमो शब्द तो निष्फल है ॥ २९ ॥ शब्देइति ॥ पश्चिम दिशामें शिवा पहलो शब्द बोले

स्यात्पंचमे राजभयं च षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु वायव्यभागे भयमेकशब्दे भयातिरेको भवति द्वितीये ३१ वृष्टिस्तृतीये महती चतुर्थे मेघागमो वर्षति पंचमे च क्रोधं विधत्ते नृपतिश्च षष्ठे भीः सप्तमे स्यात् द्विफलोऽष्टमस्तु ३२ दिश्युत्तरस्यां विहिते विरावे म्रियेत कश्चित् प्रथमे द्वितीये

॥ टीका ॥

म दिशि शिवायाः आद्ये रवे भयं भवति अथ द्वितीये हानिः तृतीये राजदूतागमनंस्यात् चतुर्थे दाहः स्यात् पंचमे खलु निश्चयेन चौरभीतिः स्यात् ३० स्यादिति षष्ठे राजभयं स्यात् सप्तमे सामान्येन भीः स्यात् अष्टमस्तु विफलः तथा वायव्यभागे शिवायाः एकशब्दे भयं भवति द्वितीये भयातिरेको भयाधिक्यं भवति ३१ वृष्टिरिति तृतीये महती वृष्टिर्भवति चतुर्थे मेघागमो भवति पंचमे च वर्षति षष्ठे नृपतेः क्रोधं विधत्ते सप्तमे भीः स्यात् अष्टमस्तुविफलः ३२ दिशीति उत्तरस्यां दिशि प्रथमे विरावे विहिते कश्चिन्म्रियेत द्वितीये महाभयं

॥ भाषा ॥

तो भय होय दूसरो शब्द बोले तो हानी होय तीसरे शब्दमें राजाके दूतको आगमन होय चोथेमें दाह होय पांचमें शब्दमें निश्चय कर चौरको भय होय ॥ ३० ॥ स्यादिति ॥ छठे शब्दमें राजभय होय सातमें शब्दमें सामान्य भय होय आठमों शब्द तो निष्फल है और वायव्य कोणमें शृगालीके पहले शब्द बोलवेमें तो भय होय दूसरे शब्दमें भयकी अधिकता होय ॥ ३१ ॥ वृष्टिरिति ॥ शृगालीके तीसरे शब्दमें महान् वृष्टि होय चोथे शब्दमें मेघको आगमन होय पांचमें शब्दमें वर्षा होय छठे शब्दमें राजाको क्रोध होय सातमें शब्दमें भय होय आठमो शब्द तो निष्फल है ॥ ३२ ॥ दिशीति ॥ उत्तर दिशामें शृगाली पहलो शब्द बोले तो कोई मरे दूसरे शब्दमें महान् भय

महाभयं विप्रवधस्तृतीये क्षत्रं चतुर्थे खलु हन्यते
च विट्पंचमे षष्ठरवे च शूद्रो भीः सप्तमे स्यात्द्वि
फलोऽष्टमस्तु ३३ राहोस्तथा दर्शनमाद्यशब्दे के
तोर्द्वितीये च तथोत्तरेण उल्काप्रपातस्त्रिषु दुर्दिनं
च चतुर्षु भद्रं खलु पंचमे स्यात् ३४ संगो भवेद्वै-
रिजनस्य षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु आ
द्ये भवेद्दुर्दिनमीशदेशे वृष्टिर्द्वितीये च रवे शिवायाः ३५

॥ टीका ॥

भवति तृतीये विप्रवंधः स्यात् चतुर्थे क्षत्रं हन्यते पंचमे विट् वैश्यः
हन्यते षष्ठे रवे शूद्रः हन्यते सप्तमे भीः स्यात् अष्टमस्तु विफलः ३३ रा
होरिति तथोत्तरेण आद्ये शब्दे राहोर्दर्शनं स्यात् द्वितीये शब्दे केतो
र्दर्शनं भवति त्रिषु शब्देषु उल्काप्रपातः स्यात् चतुर्षु दुर्दिनं स्यात् दु
र्दिनं मेघजं तम इति हैमः पंचसु खलु निश्चयेन भद्रं कल्याणं स्यात् ३४
संगइति षष्ठे शिवाशब्दे वैरिजनैश्च संगः स्यात् सप्तमे भीः स्यात्
अष्टमस्तु विफलः तथा ईशदेशे ईशान्यां आद्ये शब्दे दुर्दिनं स्यात्
शिवायाः द्वितीये च रवे वृष्टिर्भवेत् ३५

॥ भाषा ॥

होय तीसरे शब्दमें ब्राह्मणको वध होय चोथे शब्दमें क्षत्री मरै पांचमें शब्दमें वैश्य
मरे छटे शब्दमें शूद्र मरै सातमें शब्दमें भय होय शृगालीको आठमो शब्द तो नि
ष्फल है ॥ ३३ ॥ राहोरिति ॥ उत्तर दिशामें शृगालीके पहले शब्दमें राहूको दर्शन हो
य दूसरे शब्दमें केतूको दर्शन होय तीसरे शब्दमें उल्काप्रपात होय चोथे शब्दमें
मेघादिक कर खोटो दिन होय पांचमें शब्दमें कल्याण होय ॥ ३४ ॥ संगइति ॥
छटे शब्दमें बेरीजनन करकें संग होय सातमें शब्दमें भय होय आठमो शब्द तो नि
ष्फल है ईशानमें शृगालीको पहलो शब्द दुर्दिन करे शृगालीको दूसरो शब्द वृष्टी करे ॥ ३५,

वातस्तृतीये त्वशनिश्चतुर्थे म्रियेत कश्चित्खलु पंचमेच लभेतपृथ्वीं निनदेचषष्ठे भीः सप्तमेस्याद्विफलोऽष्टमस्तु ३६ इतिशिवारुतेस्वरा०प्र० ३

क्षेमलाभपुनरागमनानां निश्चयं समधिगम्य विशंकः येन याति पथिकः परदेशं तच्छिवारुतमथ प्रथयामः ३७ यं यं देशं गंतुमभ्युद्यतानां पुंसां शब्दानुच्चरंती शृगाली

॥ टीका ॥

वातइति तृतीये शब्दे वातः स्यात् चतुर्थेऽशनिः विद्युत्पातः पंचमे शब्दे कश्चिन्म्रियेत षष्ठे निनदे पृथ्वीं लभेत सप्तमे भीः स्यात् अष्टमस्तु विफलः ३६ इतिव०टी०शिवारु०स्वराष्टकप्र० ३ क्षेमेति ॥ अथ येन शिवारुतेन क्षेमलाभपुनरागमनानां क्षेमं कल्याणं लाभः प्राप्तिः पुनरागमनं परावृत्यागमनं एतेषामितरेतरद्वंद्वः तेषां निश्चयं समधिगम्य अवधार्य विशंकः शंकारहितः परदेशं याति तत् शिवारुतं वयं प्रथयामः विस्तारयामः ३७ यंयमिति यंयं देशं गंतुं अभ्युद्यतानां पुंसां शांताशायां शांतायां दिशि शब्दानुच्चरंती शृगाली वां

॥ भाषा ॥

॥ वातइति ॥ तीसरे शब्दमें वात पवन होय चोथे शब्दमें वज्रपात होय पांचमें शब्दमें कोई मरे छटे शब्दमें पृथ्वीको लाभ होय सातमें शब्दमें भय होय आठमो शब्द तो निष्फल है ॥ इति वसंतराजशाकुने भाषाटीकायां शिवारुते स्वराष्टकप्रकरणं ३ ॥ क्षेमेति ॥ अब जा शृगालीके शब्द करकें कल्याण लाभ परदेश जाय कर पीछो आमनो इनको निश्चय जानकरकें पुरुष निःसंदेह परदेशकूं जाय वो शृगालीको शब्द हम विस्तार करकें कहें हें ॥ ३७ ॥ यंयमिति ॥ जाजा देशकूं जायवेकूं तयारी करी मनुष्यनें उनकूं शांतदिशामें शृगाली बोले तो वांछितनकी

शांताशायां सिद्धये वांछितानां दीप्तायांतु स्याद
भीष्टक्षयाय ३८ प्राचीं दिशं सन्मुखभानु विंबा
प्रतिष्ठमानस्य नरस्य यस्य शब्दं शृगाली पुरतः क
रोति बंधंवधंच प्रकरोति तस्य ३९ प्राचीं दिने
शाभिमुखस्य यस्य प्रयातु कामस्य शिवा सशब्दा
भियेऽर्थनाशायचंदक्षिणास्यां वामापुनर्वांछित
कार्यसिद्धै ४०

॥ टीका ॥

छितानां सिद्धये भवति दीप्तायां दिशि तु अभीष्टक्षयाय वांछितनाशाय भवति स्यात् ३८ प्राचीमिति प्राचीं दिशं प्रतिष्ठमानस्य यस्य नरस्य सन्मुखभानुबिंबा शृगाली पुरतः शब्दं करोति तस्य बंधवधं च प्रकरोति ३९ प्राचीमिति दिनेशाभिमुखस्य प्रयातुकामस्य यस्य पुंसः प्राचीं प्रति पूर्वां दिशं प्रति अर्कसन्मुखमित्यर्थः या शिवा सशब्दा स तस्य भियै स्यात् दक्षिणा अपसव्याऽर्थनाशायच स्यात् वामा पुनः वांछितकार्यसिद्धै स्यात् ४० ॥ ६९ ॥

॥ भाषा ॥

सिद्धी होय और जो दीप्त दिशामें बोले तो वांछितको क्षय होय ॥ ३८ ॥ प्राचीमिति ॥ पूरबदिशा प्रति चल्यो मनुष्य वाकूं सूर्यके सन्मुख देखरही एसी शृगाली अगाडी शब्द करे तो वाकूं वधबंधन करे ॥ ३९ ॥ प्राचीमिति ॥ पूरब दिशामें गमनकर्ता पुरुषकूं सूर्यके संमुख देखती हुई बांई बोले तो भयके अर्थ और जेमने भागमें बोले तो अर्थको नाश करे जो फिर वामभागमें जाय बोले तो वांछितकार्यकी सिद्धीके अर्थ जाननी ॥ ४० ॥ ॥ ६९ ॥

प्रत्यर्कमाशां चलितस्य पूर्वी शिवा विरावं पुरुषस्य यस्य करोति पृष्ठे प्रकरोति तस्य सर्वप्रकारमभिलाषसिद्धिं ४१ प्रस्थायिनो यस्य च दक्षिणाशां शिवारवं मुंचति दक्षिणेन आदित्ययुक्ता यदि नो तदानीं भवेद्ध्रुवं तस्य महीपतित्वं ४२ वैवस्वताशां चलितस्य यस्य दिवाकरस्तिष्ठति दक्षिणेन शिवा च वामा कुरुते विरावं संपद्यते तस्य महीपतित्वम् ४३

॥ टीका ॥

प्रत्यर्कमिति पूर्वां आशां दिशं चलितस्य यस्य पुरुषस्य शिवा पृष्ठे प्रत्यर्कं अर्कसन्मुखं विरावं करोति तस्य सर्व प्रकारां अभिलाषसिद्धिं प्रकरोति ४१ प्रस्थायिनइति दक्षिणाशांप्रति प्रस्थायिनः यस्य पुरुषस्य दक्षिणेन अपसव्येन शिवा रवं विरावं मुंचति यदि आदित्ययुक्ता शिवा न भवति तदानीं तस्य महीपतित्वं ध्रुवं भवेत् ४२ वैवस्वतेति वैवस्वताशां पूर्वंप्रति प्रचलितस्य पुंसः दिवाकरः दक्षिणेन अपसव्यभागेन तिष्ठति शिवा च वामं विरावं कुरुते तस्य महीपतित्वं संपद्यते क्वचित्संपद्यते तस्य समस्तमिष्टमित्यपिपाठः ४३

॥ भाषा ॥

॥ प्रत्यर्कमिति ॥ पूरव दिशाकूं गमन कर्ता पुरुषकूं शृगाली पीठपीछें सूर्य सन्मुख देखती हुई शब्द करे तो वा पुरुषकूं अभिलाषाकी सिद्धी करे ॥ ४१ ॥ प्रस्थायिनइति ॥ दक्षिण दिशाकूं जायवाकूं शृगाली जेमनें भागमें बोले और वा दिशामें सूर्य नहीं होय तो वा पुरुषकूं पृथ्वीपतीपनो निश्चय होय ॥ ४२ ॥ वैवस्वतेति ॥ पूरव दिशाकूं चले ताकूं सूर्य तो जेमने भागमें होय शृगाली वांई बोले तो वाकूं पृथ्वीपतीपनो होय ॥ ४३ ॥

॥ छ ॥

पुमान् यदायाम्यककुप्प्रवासी करोतिशब्दं पुरतः शृगाली आस्ते विवस्वानपि सन्मुखश्चेद्भवेत्तदानीमचिरेण मृत्युः ४४ नरस्य याम्यां ककुभं थियासोः शृगालभार्या यदि पृष्ठभागे फेत्कारमामुंचति पंचभावस्तत्सप्त रात्रेण भवत्यवश्यम् ४५ दिशं प्रतीचीं व्रजतः शृगाली नरस्य यस्याभिमुखा विरौति शांतास्थिता शांतफलप्रदात्री दीप्तातु दीप्तं फलमातनोति ४६

॥ टीका ॥

पुमानिति यदापुमान्याम्यककुप्प्रवासीस्यात् दक्षिणगामीभवेदित्यर्थः पुरतस्तस्य च शृगाली शब्दं करोति चेत् विवस्वानपि शृगाल्याः सन्मुखः आस्ते तदानीं अचिरेणाल्पकालेन गंतुः मृत्युः स्यात् ४४ नरस्येति याम्यां ककुभं थियासोर्नरस्य यदि पृष्ठभागे शृगालभार्या फेत्कारमामुंचति तदा सप्तरात्रेण पंचभावः पंचानांभावः पंचत्वं मरणमवश्यं स्यात् पंचत्वं निधनं नाशो दीर्घनिद्रानिमीलनमिति हैमः ४५ दिशामिति प्रतीचीं पश्चिमां दिशं व्रजतो नरस्य यस्य शृगाली अभिमुखा विरौति तत्रायं विशेषः यदि शांतास्थिता तदाशांतफलप्रदात्रीस्यात् दीप्तातु दीप्तास्थिता तु दीप्तंफलमातनोति प्र-

॥ भाषा ॥

॥ पुमानिति ॥ जो पुरुष दक्षिण दिशाकूं जातो होय वाके अगाडी शृगाली बोलेजो सूर्यबी शृगालीके सन्मुख होय तो शीघ्रही गंताकी मृत्यू होय ॥ ४४ ॥ नरस्येति ॥ दक्षिण दिशामें गमनकर्त्ताकूं जो पीठपीछें शृगाली शब्द बोले तो सात रात्रीमें मरणहोय ॥ ४५ ॥ दिशामिति ॥ पश्चिमदिशाकूं गमन करे वाके सन्मुख बोले तो शांतदिशामें बोले तो शांत दिशामें होय तो शांत फल देवे और दीप्त दिशामें होय तो दीप्तफलदेवै ॥ ४६ ॥

प्राचेतसीं संचलितस्य काष्ठां शृगालिकाजल्पति
दक्षिणेन यदा तदानीं सुबहूनऽनर्थान् करोति चा
र्थानपहंति पुंसः ४७ दिशं प्रचेतः परिपाल्यमा
नां नरस्य यस्य व्रजतः शृगाली वामा विरावं प्र
करोति शांता भवंत्यभिप्रेतफलानि तस्य ४८ योवारु·
णीं याति दिशं मनुष्यः शृण्वन् शिवायारुदितानि पृ
ष्ठे गतस्य तस्याशु हुताशभीति रसंशयं स्याद्द्रवि
णक्षयश्च ४९

॥ टीका ॥

तीचीं तु पश्चिमेति हैमः ४६ प्राचेतसीमिति प्रचेताः वरुणस्तस्येयं प्राचेतसी पश्चिमा तां काष्ठां दिशं संचलितस्य पुंसः यदि दक्षिणेन शृगालिका जल्पति तदानीं सुबहूननर्थान्करोति पुंसः अर्थानपहंति ४७ दिशमिति प्रचेतः परिपाल्यमानां दिशं पश्चिमां काष्ठामित्यर्थः व्रजतो यस्यनरस्य शृगाली वामा विरावं प्रकरोति चेत् शांता तदा तस्य अभिप्रेतफलानि भवंति ४८ यइति यः पुमान् वारुणीं दिशं शिवायाः रुदितानि पृष्ठे शृण्वन् याति तस्य गतस्य आसु शीघ्रं असंशयं हुताशभीतिः स्यात् तथा द्रविणक्षयश्च स्यात् ४९

॥ भाषा ॥

॥ प्राचेतसीमिति ॥ पश्चिमकूं गमन करे ताकूं जो जेमने भागमें शृगाली बोले तो बोहोत से से अनर्थ करे और अनर्थकूंवी नाश करै ॥ ४७ ॥ दिशमिति ॥ पश्चिम दिशाकूं गमनकर्ताके शृगाली वांई भागमें बोले जो शांता होय तो वाकूं वांछितफल होंय ॥४८॥ यइति ॥ जो पुरुष पश्चिम दिशाकूं जातो होय और पीठपीछें शृगालीको शब्द सुनतो हुयो चले तो वाकूं शीघ्रही निःसंदेह अग्नीको भय होय और धनको क्षय होय ॥ ४९ ॥

यस्योत्तराशां चलितस्य पुंसः प्राच्यां शिवा मुंच
ति फेत्कृतानि भानुः प्रतीच्यां विहितस्थितिश्चे
दपेक्षितं सिद्ध्यति तत्क्षणेन ५० मुंचत्युदीचीं
चलितस्य पृष्ठे शिवा विरावं पुरुषस्य यस्य आ
स्ते च मध्ये नभसो विवस्वां स्तथार्थहानि र्मरणं च
दृष्टम् ५१ कुबेरकाष्ठां प्रति यः प्रयाति ज्वालामु
खी चाभिमुखी विरौति तस्याध्वगस्याभिमता
र्थसिद्धि र्भवेच्च संपत्पुनरागम श्च ५२

॥ टीका ॥

यस्येति उत्तराशां रटितस्य पुंसः प्राच्यां पूर्वस्यां शिवा फेत्कृतानि मुंचति चेत् भानुः प्रतीच्यां पश्चिमायां विहितस्थितिः तदा अपेक्षितं वांछितं क्षणेन सिद्ध्यति ५० मुंचतीति यस्य पुरुषस्य उदीचीं उत्तरां चलितस्य पृष्ठे शिवा विरावं मुंचति यदि विवस्वान् नभसोमध्ये आस्ते तदा अर्थहानिः मरणं च दृष्टं ५१ कुबेरेति यः पुमान् कुबेरकाष्ठां प्रति उत्तरां प्रति प्रयाति ज्वालामुखी शिवा च अभिमुखी विरौति तस्याध्वगस्य अभिमतार्थसिद्धिर्भवेत् संपच्च पुनः आगमश्च स्यात् ५२ ॥ छ ॥

॥ भाषा ॥

॥ यस्येति ॥ उत्तरदिशाकूं चलतो होय वा पुरुषकूं पुरबदिशामें श्रृगाली बोले जो सूर्य पश्चिमदिशामें होंय तो तत्क्षण वांछित सिद्धी होय ॥ ५० ॥ मुंचतीति ॥ जो उत्तरदिशाकूं चलतो होय वाकूं पीठपीछैं श्रृगाली बोले जो सूर्य आकाशके मध्यभागमें स्थित होय तो अर्थकी हानी मरण ये होंय ॥ ५१ ॥ कुबेरेति ॥ उत्तरदिशाकूं जातो होय वाकूं श्रृगाली सन्मुख बोले तो वाकूं वांछित अर्थकी सिद्धी होय और संपदा होय आगम होय ॥ ५२ ॥

तिष्ठति तीव्रकरो दिशि यस्यां फेत्कुरुते यदि तत्र शृगाली तद्व्रजतः पथिकस्य भवेतां निश्चयतो धनुजीवितनाशौ ५३ दक्षिणतः प्रथमं यदि पश्चाद्वामगता पथिकस्य शृगाली फेत्कुरुते कुरुते तदवश्यं क्षेमधनाप्तिगृहागमनानि ५४ अध्यास्य शांतां ककुभं नरस्य वामा शृगाली यदि रारटीति तंदर्थलाभं वितरत्यवश्यमर्थक्षयं दक्षिणतो रटंती ५५

॥ टीका ॥

तिष्ठतीति यस्यां दिशि तीव्रकरः सूर्यस्तिष्ठति तत्र यदि शृगाली फेत् कुरुते तदा व्रजतः पथिकस्य निश्चयतः जीवितधननाशौ भवेतां ५३ दक्षिणतइति यदि शृगाली प्रथमं दक्षिणतः अपसव्यतः प्रयाति पश्चाद्वामगता पथिकस्य फेत्कुरुते तदा तस्य अवश्यं क्षेमधनाप्तिगृहागमनानि कुरुते क्षेमं च धनाप्तिश्च गृहागमनं चेति द्वंद्वः ५४ अध्यास्येति शांतां ककुभमध्यास्य आश्रित्य यदि नरस्य शृगाली वामा रारटीति अवश्यं तदाऽर्थलाभं वितरति दक्षिणतः रटंती अर्थक्षयं कुरुते ५५ ॥ छ ॥

॥ भाषा ॥

॥ तिष्ठतीति ॥ जा दिशामें सूर्य स्थित होय वाई दिशामें जो शृगाली बोले तो मार्गचलवेवालेकूं निश्चय जीव धन इनको नाश होय ॥ ५३ ॥ दक्षिणतइति ॥ जो शृगाली पहलें जेमने भागमें आवे पीछें वामभागमें आय शब्द करे तो मार्गीकूं अवश्य कल्याण धनकी प्राप्ती घरकूं आगमन करै ॥ ५४ ॥ अध्यास्येति ॥ शांता दिशामें स्थित होय और वांई होय शब्द बोले तो अवश्य अर्थको लाभ होय जो जेमनी बोले तो अर्थको क्षय होय ॥ ५५ ॥

वामा प्रदीप्ते ककुभः प्रदेशे लाभं तथानर्थमुपाददाति शिवा रटती पथि दक्षिणा तु क्षिपत्यनर्थावटसंकटेषु ५६ शांते दिगंते यदि वा प्रदीप्ते पृष्ठे प्रयाणप्रतिषेधयित्री शब्दायमाना तु शिवा पुरस्तान्निमज्जयत्यापदगाधसिंधौ ५७ वामेऽपसव्ये पुरतोऽथपृष्ठे पुंसः शिवा जल्पति यत्र तत्र आयांति चौराः प्रथमे विरावे द्वयोर्भवे त्तस्कर दर्शनं च ५८

॥ टीका ॥

वामेति प्रदीप्ते ककुभः प्रदेशे वामा लाभं तथानर्थमुपादधाति तथा प्रदीप्ते ककुभः प्रदेशे शिवा दक्षिणा रटंती अनर्थावटसंकटेषु क्षिपति तत्रानर्थः प्राणव्यपरोपणं अवटः उत्पथप्रक्षेपः संकटं कष्टं एतेषां द्वंद्वस्तेष्वित्यर्थः ५६ शांतेइति शांते यदि वा प्रदीप्ते दिगंते पृष्ठे शब्दायमाना शिवा प्रयाणप्रतिषेधयित्री स्यात् पुरस्तादग्रे शब्दायमाना तु आपदगाधसिंधौ आपदएव अगाधः अलब्धतलः सचासौ सिंधुः समुद्रस्तस्मिन् अगाधमतलस्पर्शमित्यमरः निमज्जयति पातयतीत्यर्थः ५७ वामेइति वामेऽपसव्येदक्षिणेपुरतः अथ पृष्ठे यत्र तत्र पुंसः शिवा जल्पति तदा प्रथमे विरावे चौराः आयांति द्वयोः शब्दयोस्तस्करदर्शनं भवेत् ५८

॥ भाषा ॥

॥वामेति॥ दीप्त दिशामें वामांगमें शृगाली बोले तो अलाभ अनर्थ करे ओर प्रदीप्त दिशामें जेमनें भागमें बोले तो अनर्थ गढेलेमें पडनो संकट ये होंय ॥ ५६॥ शांतेइति॥ शांत वा दीप्त दिशामें शृगाली पीठपीछें बोले तो गमनको निषेध जाननो ऐसी होय अगाडी बोले तो आपदारूपी अगाधसमुद्रमें पडे ॥ ५७॥ वामेइति ॥ ओर बांई जेमनी अगाडी पीठपीछें जहां तहां शृगाली बोले तो पुरुषकूं प्रथमशब्दमें तो चौर आंवे दोय बोलमें चौरको दर्शन होय॥ ५८॥

नृपादरोऽर्थागमनं तृतीये तुर्येक्षितिः पंचमकेऽर्थ
लाभः वाणिज्यसेवा विफलाथषष्टे भीःसप्तमे
स्याद्विफलोष्टमस्तु ५९ हाहारवं मुंचति हृष्टभा
वाद्धास्यं तु तस्यास्तदुदाहरंति अग्रेसरी वा पथि
वा यियासोः सा द्विप्रकारापि मनोरथास्त्यै ६० नृप
स्ययात्रासमये पुरस्तात् प्रयाति चेद्वर्त्मनि वेदयंती
कुर्याच्छिवा वैरिपराजयं च जयश्रियं चाभिमतं तदन्यत् ६१

॥ टीका ॥

नृपेति तृतीये नृपादरः राजसन्मानं अर्थागमनं च भवेत् तुर्येक्षितिः कष्टहानिर्वा स्यात् पंचमकेऽर्थलाभः स्यात् षष्ठे वाणिज्यसेवा विफला स्या कुत्रचित् वाणिज्यसेवादिफलाय स्यादित्यपि पाठः सप्तमे भीः स्यादष्टमस्तु विफलः ५९ हाहेति हृष्टभावात् हर्षस्वभावतः या शिवा हाहारवं मुंचति तस्यास्तद्धास्यं उदाहरंति अथवा या यियासोर्गंतुकामस्य पथि मार्गेऽग्रेसरा पुरःसरा भवति सा द्विप्रकारापि उभयप्रकारापि मनोरथास्त्यै अभिलषितसिद्ध्यै भवति ६० नृपस्येति नृपस्य राज्ञः यात्रासमये यदि वर्त्म मार्गं निवेदयंती निरूपयंती पुरस्तात् प्रयाति तदा

॥ भाषा ॥

॥नृपेति॥ तीसरे शब्दमें राजाको सन्मान अर्थको आगमन होय चोथे बोलमें पृथ्वी वा कष्टकी हानी होय पांचमें बोलमें अर्थको लाभ होय छठे बोलमें वाणिज्य सेवादिक निष्फल होय सातवें शब्दमें भय होय आठमों शब्द तो निष्फल है ॥ ५९ ॥ हाहेति ॥ जो शृगाली हर्षसूं हाहा शब्द बोले तो शिवाको वो शब्द हास्य नाम हसनो कहें हैं अथवा गमनकर्ताके मार्गमें अगाडी होय तो ये दोनो शृगाली मनोरथकी प्राप्ती और वांछितकी सिद्धी करे ॥ ६० ॥ नृपस्येति ॥ राजाकी यात्रासमयमें जो मार्गकूं निरूपण करती शृगाली अगाडी चले तो बैरीको पराजय करे और वांछित जयश्री करे ॥६१

कार्यांतरेष्वप्यनुगम्यमानाश्रेयःप्रदा शांतदिशिप्रदि
ष्टा शिवाप्रदीप्ते तु पुनः प्रदेशे समारटंती महते भ
याय ६२ भयोद्यमे दीप्तदिशि प्रदीप्तैर्नादैर्नृणां हं
तिमहांति देवी भयानि सर्वाण्यपि शांतनादा शांतस्थि
तासैव भयस्य भूम्नः ६३ यदा शृगाली कुरुते नराणां
शब्दं च नद्युत्तरणे कदाचित् तटद्वये तत्परिरक्षणीयं
महद्भयं भावि जलेचरेभ्यः ६४ इ० शि० रु० या० प्र० ४

॥ टीका ॥

शिवा वैरिपराजयं कुर्यात् अन्यत् अभिमतं जयश्रियं च कुर्यात् ६१ का
र्यांतरेष्विति कार्यांतरेष्वपि पृष्ठे पृष्ठभागे शिवा शांतदिशि रटंती अनु
गम्यमाना पृष्ठे आगममाना श्रेयःप्रदा प्रदिष्टा प्रदीप्ते तु प्रदेशे शिवास
मारटंती पृष्ठे आगच्छंती महते भयाय स्यात् ६२ भयेति भयोद्यमे स
मुद्भूते शिवा दीप्तदिशि प्रदीप्तैर्नादैः सर्वाण्यपि महांति भयानि हंति
भयोद्गमे सैव शांतनादा शांतशब्दा शांतस्थिता शांतदिक्स्थिता भू
म्ने महते भयाय भवति ६३ यदेति यदा शृगाली नराणां नद्युत्तरणे
कदाचित् शब्दं कुरुते तदा तद्वस्ततटद्वये परिरक्षणीयं यतः जलेचरे-
भ्यो महद्भयं भावि भवितव्यं ६४ इति व० टी० शिवारुतेयात्राप्र० ४

॥ भाषा ॥

॥ कार्यांतरेष्विति ॥ कार्यांतरनमें पीठपीछें शांतदिशामें बोलती हुई पीठपीछें चली
आवे तो कल्याण देवे और दीप्तदिशामें शृगाली बोलती हुई पीठपीछें आवे तो महा
न् भय होय ॥ ६२ ॥ भयेति ॥ कोई भय उठ्यो होय और शृगाली दीप्तदिशामें होय दी
प्ती बोल बोले तो सबले महान् भय दूर होय और भय उठेपे जो शृगाली शांतदि
शामें स्थित होय शांत शब्द बोले तो महान् भय होय ॥ ६३ ॥ यदेति ॥ जो शृगाली
मनुष्यनकूं नदी उतरती समयमें कदाचित् शृगाली शब्द करे तो बोधन दोनो तटपे

स्थानास्थितान्नामभियोगभाजां नैमित्तिकानामुपदि
श्यतेथ शिवाविरावैरशिवं शिवं च सुनिश्चितार्थंमु
निसम्मतेन ६५ करोति फेफेइति सर्वदिक्षु यदा
तदा स्थानविघातयुद्धे शिवा विधत्ते क्षुभितात्व
संख्यान् रौद्रान् स्वरान् मुंचति चेदुपेक्षा ६६

॥ टीका ॥

स्थानेति अथ अभियोगभाजां अभियोगं उद्यमं भजंते ते अभियोगभाजस्तेषां कृतयात्राणामित्यर्थः स्थानास्थितानां स्थाने स्वगृहएव कृतस्थितानां नैमित्तिकानां शाकुनाशाकुनवतां मुनिसत्तमेन शिवाविरावैः सुनिश्चितार्थं शिवं अशिवं च उपदिश्यते ६५ करोतीति यदा सर्वदिक्षु फेफेइति करोति तदा शिवा स्थानविघातयुद्धे विधत्ते क्षुभिता तु शिवा असंख्यान् रौद्रान् भयावहान् स्वरान् मुंचति चेत् तदा उपेक्षा उपेक्षणीया ६६ ॥छ॥

॥ भाषा ॥

रक्षाके योग्य जाननो ओर जल जंतूनसूं महान् भय होनो योग्य है ॥ ६४ ॥ ॥ इतिश्रीवसंतराजशाकुने भाषाटीकायां शिवारुते यात्राप्रकरणं चतुर्थं

॥ स्थानेति ॥ यात्राकरवेवालेनकूं ओर स्थानमें बैठे होंय उनकूं शकुन अशकुनके देखवेवाले होंय उनकूं मुनीनें शृगालीके शब्दन करकें निश्चय हैं अर्थ जिनके एसे शुभ अशुभ शकुन कहेहें ॥ ६५ ॥ करोतीति ॥ जो सर्व दिशानमें फेफे ये शब्द करे तो शृगाली स्थानके नाश कर्ता युद्धकूं करे जो क्रोधवान् होय करकें शृगाली असंख्यात भयके करवेवाले शब्द बोले तो कार्य छोडवेके योग्य है ॥ ६६ ॥ ॥छ॥

निरंतरं रौति च सर्वदिक्षु समंदकारुण्यरवा तुरा चेत् अपत्यमोहेन युता शृगाली त्यक्तस्पृहा सा कथिते हतज्ञैः ६७ स्थित्वाप्रदीप्ते ककुभो विभागे ज्वालामुखी फेत्कुरुतेति रौद्रम् ग्रामस्य पार्श्वे प्रकरोति नाशं तस्याथवा तिष्ठति यश्च मध्ये ६८ ग्रामस्य मध्यं समवाप्य यस्य ज्वालामुखी मुंचति फेत्कृतानि सशून्यतां गच्छति निश्चयेन लोकस्य वास्या· दसुखं प्रभूतम् ६९

॥ टीका ॥

निरंतरमिति या अपत्यमोहेन शृगाली समंदकारुण्यरवा तुरा मंदः मंदतरः कारुण्यो दयोत्पादकः ताभ्यां रहिताभ्यां रवः शब्दो यस्याः सा आतुरा च निरंतरं सर्वदिक्षु सा इहतज्ञैः शिवारुतज्ञैः त्यक्तस्पृहा कथिता ६७ स्थित्वेति यस्य ग्रामस्य पार्श्वे स्थित्वा प्रदीप्ते ककुभो विभागे ज्वालामुखी यदि फेत्कृता निमुंचति अति रौद्रं फेत्कुरुते इति वा तदा तस्य ग्रामस्य नाशं करोति अथवा ग्रामस्य मध्ये यस्तिष्ठति तस्य नाशं करोतीत्यर्थः ६८ ग्रामस्येति यस्य ग्रामस्य मध्यं समवाप्य ज्वालामुखी फेत्कृतानि मुंचति निश्चयेन स शून्यता मुद्वसतां गच्छति

॥ भाषा ॥

॥ निरंतरमिति ॥ जो संतानके मोहकरकें शृगाली मंद और कारुण्य प्रकट करे एसो और आतुर होय सर्व दिशानमें शब्द बोले तो शिवाके शब्दके तत्वकूं जानवेवालेननें वाकूं वांछारहित कहीहें ॥ ६७ ॥ स्थित्वेति ॥ जा ग्रामके पसवाडेनमें स्थित होय कर दीप्तदिशामें शृगाली फे शब्द करे वा अति रौद्र फे शब्दकूं बोले तो वा ग्रामको नाश करे अथवा वा ग्रामके मध्यमें जो स्थित होय वाको नाश करे ॥ ६८ ॥ ग्रामस्येति ॥ जाग्रामके मध्यमें आय करकें शृगाली फे शब्द करे तो निश्चय शून्यता नाम उजाड दे

ग्रामांतिके सप्तदिनानि यावन्महाभयोत्पादितफेत्
कृतेन विरौति चेत्तत्कुरुते शृगाली तद्वासिलोक-
स्य भयप्रभूतं ७० मध्यंदिने यावदहानि पंच शिवा
समीपे नगरस्य यस्य विरौति घातं विदधाति तस्य
भयं च वह्निप्रभवं प्रभूतम् ७१ पंचार्द्धरात्राणि क
थंचिदेषा क्रूररवा व्याहरते शृगाली यस्यांतिके
तं बहवो हठेन मुष्णांति चौरा जनसन्निवेशम् ७२

॥ टीका ॥

वा अथवा लोकस्य प्रभूतं असुखं स्यात् ६९ ग्रामांतिकेइति चेच्छृगाली ग्रामस्य अंतिके समीपे सप्तदिनानि यावत् महाभयोत्पादितफेत्कृतेन विरौति तदा तद्वासिलोकस्य महांतं भयं कुरुते ७० मध्यमिति यस्य नगरस्य समीपे शिवा मध्यंदिने मध्याह्ने पंच अहानि पंचदिनानि यावद्विरौति तस्य नगरस्य घातं विदधाति वह्निप्रभवं प्रभूतं भयं च विदधाति ७१ पंचेति यस्यांतिके एषा शृगाली क्रूररवा सती पंचार्द्धरात्राणि पंचनिशीथानि ग्रामं यदि कथंचित् व्याहरते फेत्कुरुते निशीथस्त्वर्द्धरात्रं तदा जनसन्निवेशं तं ग्रामं बहवश्चौरा हठेन मुष्णांति

॥ भाषा ॥

अथवा जननकूं बोहोतदुख होय ॥६९॥ ग्रामांतिकेइति ॥ जो शृगाली ग्रामके समीपमें सात दिन तांई महाभयकूं प्रगटकरवेवालो फेत्कार शब्द करकें बोले तो वा गाममें निवास करे उनकूं महान् भय करे ॥७०॥ मध्यमिति ॥ जा नगरके समीपमें मध्यान्हकी समें पांच दिन तांई शृगाली बोले तो वा नगरको घात करै और अग्नीको बोहोत भय करे ॥७१॥ पंचेति ॥ जा गामके पास शृगाली क्रूर शब्द साढे पांचरात्री तांई बोले तो बोहोतसे चोर हठकरकें ग्रामकूं लूटे ॥७२॥

स्थानस्य यस्योपगता समीपं शिवा प्रगे पंचदिनानि यावत् जाते भृशं प्रोच्चरते तदा स्यान्महन्नराणां महतीच हानिः ७३ सुरक्षितस्यापि मनुष्यलक्षैर्ग्रामस्य शीघ्रं ग्रहणं विधत्ते त्रयं दिनानां दिवसावसाने शिवा रटंती परुषस्वरेण ७४ दिक्ष्वारटंती सकलासु रौद्रं भ्रमंत्यरविन्ना परितः पुरंचेत् शृगालजाया खलु तद्ब्रवीति युद्धं महत्तत्र तथाभि-घातम् ७५

॥ टीका ॥

स्यादित्यजयः ७२ स्थानस्येति शिवा शृगालभार्या यस्य स्थानस्य समीपमुपगतासती प्रगे प्रभाते जाते पंचदिनानि यावत् प्रोच्चरते भृशं फेत्कृतानि कुरुते तदा तत्र महन्नराणां महतां पुंसां महती हानिः स्यात् ७३ सुरक्षितस्येति दिवसावसाने परुषस्वरेण दिनानां त्रयं शिवा रटंती मनुष्यलक्षैः सुरक्षितस्यापि ग्रामस्य शीघ्रं ग्रहणं विधत्ते ग्रहंकुरुते ७४ दिक्ष्विति रौद्रेणस्वरेण स्वरेण शृगालजाया सकलासु दिक्षु रौद्रं रटंतीचेत् पुरं परितः आरविन्ना भ्रमति तदा खलु तत्र महद्युद्धं तथाभिघातंच ब्रवीति ७५

॥ भाषा ॥

॥ स्थानस्येति॥ शृगाली जा स्थानके पास आय करकें प्रातःकाल होय वा समेंमें पांचदिन तांई अत्यंत फेत्कार शब्द करे तो महान् पुरुषनकी महान् हानी होय॥७३ ॥ सुरक्षितस्येति॥ दिनकें अंतमें कठोरस्वरकरकें तीनदिन तांई शृगाली बोले तो लाखां मनुष्यन करकें रक्षा करोगयो होय तोवी वा ग्रामकूं शीघ्रही ग्रहण करै॥७४॥ ॥दिक्ष्विति॥ रौद्रस्वर करकें शृगाली सब दिशानमें बोले जो पुरके च्यारोंमेंर दुःखविना भ्रमण करे तो महान् युद्ध और घात होय॥७५॥

ज्वालाविमुंचत्यतिरौद्रनादा समाकुला धावतिया
समंतात् रोमांचकंपौ जनयत्यकस्मात् कुर्याच्छि
वा सायुवराजपातं ७६ रोमोद्गमंया जनयत्य
कस्मात् फेइत्यतिक्रूर रवा नराणाम् मूत्रंपुरी
षं चतुरंगमाणां सा सर्वदा स्यादशिवा शिवेह ७७
तरंगिणी रोधसि सौम्यरूपांस्त्रीन् पंच वा मुंचति
यानिनादान् शिवाशिवां तां नृपतित्वदात्रीं वंदेत
देवी मभिवंदनीयाम् ७८

॥ टीका ॥

ज्वालामिति या अतिरौद्रनादा ज्वालां विमुंचति या समंतात् समा
कुला धावति या अकस्मात् रोमांच कंपौ जनयति सा शिवा युवरा
जपातं कुर्यात् ७६ रोमेति या फेइति अति क्रूररवा नराणां
अकस्मात् रोमोद्गमं जनयति तुरंगमाणां मूत्रंपुरीषं चाकस्माज्ज
नयति सा शिवा इह अशिवा न श्रेष्ठा ७७ तरंगिणीति तरंगि
णीरोधसि नदीतटे या शिवा सौम्यरूपान् त्रीन् पंचनादान् मुंचति
तां शिवां देवीं अभिवंदनीयां नृपतित्वदात्रीं वंदेत ७८

॥ भाषा ॥

॥ज्वालामिति॥ जो अतिरौद्र शब्द बोलती होय ज्वालामुखमेंसूं निकासती होय
जो च्यारोंमेर आकुल होय भागती होय जो अकस्मात् रोम ठाडे होंय वा कंपा
यमान होय तो वो शृगाली युवराजको पात करे ॥ ७६॥ रोमेति॥ जो शृगाली
फे या प्रकार अति क्रूर शब्द बोले तो मनुष्यनकूं अकस्मात् रोमांचको उदय करे
घोडानकूं मूत्र पुरीष अकस्मात् प्रगटकरे वो शृगाली श्रेष्ट नहीं ॥ ७७॥ तरंगिणी
ति ॥ नदीके तटकेऊपर जो शिवा तीन वा पांच सौम्य शब्दबोलेतो नमस्कारकरवेके योग्य
राजापनेकी करवेवाली एसीवो शिवादेवी ताय नमस्कार करे॥ ७८॥

श्मशानभूमौ दिनमध्यभागे मध्येरजन्याश्च गृहा
ग्रदेशे यारौति तस्यै बलिमर्घयुक्तं भक्त्या प्रद
द्याद्यदि भद्रमिच्छेत् ७९ सर्वेषु कार्येषु समुद्यते
षु बलिः शिवायाविनिवेदनीयः गृह्णाति यस्मिन्
विषयेभ्युपेत्य देवी बलिं यच्छाति तत्रासिद्धिम् ८०
इति व० शिवारुते स्थानास्थितप्रकरणं ५ ॥छ॥
कथ्यते बलिविधानमिदानीं शाकुनागममतेन शि
वायाः ॥

॥ टीका ॥

श्मशानेति श्मशानभूमौ दिनमध्यभागे मध्याह्ने तथा रजन्याश्च मध्ये गृहाग्रदेशे गृहस्य पुरः प्रदेशे या शिवा रौति यदि भद्रं कल्याणमिच्छेत् तदा तस्यै बलिमर्घयुक्तं भक्त्या प्रदद्यात् ७९ सर्वेष्विति समुद्यतेषु सर्वेषु कार्येषु शिवायाः बलिर्निवेदनीयः यस्मिन्विषये देवी अभ्युपेत्य आगत्य बलिं गृह्णाति तत्र सिद्धिं जल्पति ८० इतिवसंतराजशाकुने टी० शिवारुते स्थानस्थितप्रकरणं पंचमं ५ कथ्यते इति इदानीं शाकुनागममतेन शाकुनसिद्धांतप्रोक्तेन शि-

॥ भाषा ॥

॥श्मशानेति॥ श्मशानमें मध्यान्हमें अर्धरात्रीमें घरके अगाडी इतनी जगेंमें शृगाली बोले तो जो प्राणी कल्याणकी इच्छा करे तो वाके अर्थ बलिदान अर्घसहित भक्तीपूर्वक देवै ॥७९॥ सर्वेष्विति॥ संपूर्णकार्यनमें शिवाकी बली करे जाकार्यमें शिवादेवी आय करकें बलिदान ग्रहण करे ता कार्यमें सिद्धी कहै है ये जाननो ॥८०॥ इति वसंतराजभाषाटीकायां शिवारुते स्थानास्थित प्रकरणं पंचमम् ॥५॥ ॥ कथ्यतेइति ॥ अब शकुनशास्त्रके मत करकें शिवा नाम शृगालीको बलिविधान कहैहैं ये बलि विधान कैसो है जो दिव्यमंत्रन

दिव्यमंत्रबलिबाधितदोषंसाधिताखिलसमुद्यत-
कार्यम् ८१ शून्यालयंरुद्रगृहं श्मशानं चतुष्प
थंमातृगृहंजलांतम् वंध्यावनिश्चत्वरमेवमाद्या
बलिप्रदानायमताः प्रदेशाः ८२ तेषांच मध्यादु
दितप्रदेशे विशोधिते मंडलकं विदध्यात् पौरा
णिकश्लोकपरीक्षितायां संगृह्य गोर्गोमयमंतरि
क्षात् ८३

॥ टीका ॥

वायाः बलिविधानं कथ्यते कीदृशं बलिविधानं दिव्यमंत्रबलिबाधित
दोषं दिव्यमंत्रेण प्रतिष्ठितो यः बलिः पूजा तेन बाधिता दोषा येन त
तथा पुनः कीदृशं साधिताखिलसमुद्यतकार्यं साधितमखिलं
समुद्यतानां कार्यं येन तत्तथेति ८१ शून्येति एवमाद्याः इत्यादि
काः प्रदेशाः स्थानशेषाः बलिप्रदानायमता इष्टाः तएव दर्शयति
शून्याश्रयं शून्यंस्थलं क्वचिच्छून्यालयमित्यपि पाठः रुद्रगृहं
शंभुगृहं श्मशानं प्रेतगृहं चतुष्पथं यत्र चत्वारः पंथानो मिलंति वं
ध्यावनिः मुंडितभूमिः ८२ तेषामिति तेषां स्थलानां मध्यात्
विशोधितेउदितप्रदेशे पूर्वोदितं मंडलकं विदध्यात् किंकृत्वा॰ नरिक्षा
त॰ आकाशात् गोर्गोमयं संगृह्य नभोंतरिक्षंगगनमनंतंसुर वर्त्म

॥ भाषा ॥

करकें बलि पूजा करें तो सबले दोष दूर होंय और या करकें हिं जितने अपने
कार्यउद्युक्तहोय रहे होंय वेवी होंय॥ ८१ ॥ शून्येति॥ सूनो स्थल होय शिवमंदिर हो
य श्मशान होय चोरायो होय ऊखर पृथ्वी होय इनकूं आदि लेकें स्थान शिवा बली
देवेके योग्य हैं ॥ तेषामिति॥ इनके मध्यमेंसूं सोधो हुयो योग्य स्थान तामें पह
लें कह्यो जो मंडल ताय करै पहलें गौको गोवर हाथको हाथमें लियो हुयो होय

अत्यंतजीर्णदेहाया वंध्यायाश्च विशेषतः रोगार्त्ते
नवसूतायानगोर्गोमयमाहरेत् ८४ तस्मिन् विचि
त्रं विततं विदध्यात्पिष्टातकेनाष्टदलं सरोजं सं
पूजयेत्तत्र सुराधिपादीन् क्रमेणसर्वानपि लोकपा
लान् ८५ मध्येसुतैः सप्तभिरभ्युपेता शिवान्वि
तापिष्टमयी प्रयत्नात् पूज्या शिवादूत्यभिभक्ति
योगात् प्रभूतपुष्पाक्षत धूपदीपैः ८६ साज्यगु
डोदनमाषकुलत्थैर्यावकपूपलिकामिषमाद्यैः

॥ टीका ॥

स्वमित्यमरः कथंभूतायाः गौः पौराणिकश्लोकपरीक्षितायाः इदं
सु पूर्वमेव व्याख्यातं ८३ अत्यंतेति पूर्वमिदं व्याख्यातं ८४ त
स्मिन्निति तस्मिन् मंडलके पिष्टातकेन विचित्रं विविधवर्णं विततं वि
स्तीर्णं अष्टदलं सरोजं कमलं विदध्यात् कुर्यात् तत्र कमले क्रमे
ण सर्वानपि सुराधिपादीन् लोकपालान् संपूजयेत् ८५ मध्येइति
सुगमार्थत्वान्न लिख्यते ८६ साज्येति बुद्धिमता प्रेक्षावता पुंसे-
तिशेषः बलिकर्मणिनराशनमात्रासंभृतिः कार्या कैः साज्यगुडोदन
माषकुलत्थैः आज्येनघृतेनसहिताःसाज्याः तेचते गुडोदनमाषकु-

॥ भाषा ॥

याको मंडल बनानो ॥ ८३ ॥ अत्यंतेति ॥ अत्यंत जीर्ण देह जाको होय वंध्या होय रोग
ली होय नवीन व्याही होय एसी गौको गोवर नहीं लेनो ॥ ८४ ॥ तस्मिन्निति ॥ ता मंडल
में चूनको चित्रविचित्र लंबो चोडो अष्टदल कमल करेवा कमलमें क्रम करकें संपूर्ण
लोकपाल देवतानको पूजन करे ॥ ८५ ॥ मध्येइति ॥ सात पुत्रन करकें सहित शृगाली
ये चूनके बनाय बीचनमें स्थापन कर. भक्तीसूं बोहोतसें पुष्प अक्षत धूप दीप इनक
रकें पूजन करे ॥ ८६ ॥ साज्येति ॥ बुद्धिमान् पुरुष बलिदानमें घी गुड चांवल उडद

संभृतिरन्ननराशनमात्राबुद्धिमता बालिकर्मणिका
र्या ८७ प्राप्याष्टमींवाथ चतुर्दशीं वा संमंत्र्यमं
त्रेण च सप्तकृत्वः बलिं शिवाया निशि निश्चयेन
दद्यान्मनुष्यो यदि भद्रमिच्छेत् ८८

॥ टीका ॥

लथ्थाश्चेति कर्मधारयः तैः यावकपूपलिकाविषमद्यैः यावकपूपलिका माषचूर्णपूपिका स्याद्यावकस्तु कल्माषइत्यमरः आमिषं मांसं मद्यं मदिरा तेषां द्वंद्वः कीदृशी संभृतिः नराशनमात्रा नराशनं पुरुषाशनमेव मात्राप्रमाणं यस्याः सा तथा यावतानरस्तृप्तो भवति तावन्मात्रेत्यर्थः ८७ प्राप्येति मनुष्यः अष्टमीं चतुर्दशीं वा प्राप्य सप्तकृत्वः सप्तवारं मंत्रेण संमंत्र्य निशिरात्रौ शिवायाः बलिं निश्चयेन दद्यात् यदि भद्रं कल्याणमिच्छेत् अथ मंत्रः ॐ शिवेज्वालासुरवी बलिं गृहाण गृहाण हुंफट् २ स्वाहा इत्यामंत्रणमंत्रः ॐ शिवे शिवदूति भगवति चंडि इदमर्घ्यं बलिंली अलिली लासमन्वितं नमार्चितं गृहाण गृहाण आगच्छ २ वायुवेगेन शुभं कुरु २ स्वाहा इत्यर्घ्यमंत्रः बलिप्रदानायमतांतरं ॐ नमो भगवति एवंबलिं गृहाण गृहाण इमंबलिं गंधधूपपुष्पादिकं दहदह पच२ घोररूपिणि भो भगवति शिवदूति पिबतस्वाहा एतस्यमंत्रद्वितयस्य मध्यादेकेनकेनाप्यभिमंत्रणीयः बलिः शिवायाः सप्तहाप्रभावं पृथक् पृथक् मंत्रयुगंयदेतत् ६५ शिवायाः बलिः एतस्यमंत्रद्वितयस्य मध्यात्

॥ भाषा ॥

कुल्था लापसी उडदके बडा मांस मदिरा इन सबनको प्रमाण जितनेमें मनुष्य तृप्त होय उतनो आहार करे ॥८७॥ प्राप्येति ॥ मनुष्य अष्टमी वा चतुर्दशीकूं सात वार मंत्रसूं अभिमंत्रण करकें रात्रीमें शिवाकी बली निश्चय करकें देवे जो कल्या-

तांबूलवस्त्राऽशनदक्षिणानि नैमित्तिकं शाकुनशा
स्त्रदक्षः प्रपूजयेत्तत्र भवत्यभीष्टमाचार्यवर्ये
परितोषिते हि ८९ आश्लेषिका वह्निकृतांतरु
द्रधिष्ण्यानि पूर्वात्रितयेनसाकं ज्येष्ठां च संत्य
ज्य विरौति येह श्रेयस्करी जंबुकगेहिनी सा ९०

॥ टीका ॥

केनाप्येकेन मंत्रेण अभिमंत्रणीयः यतः एतच्छिवायाः मंत्रयुगंपृथक् पृथक् मंत्रयुगं यदेतत् ६५ शिवायाः बलिः एतस्य मंत्रद्वितयस्यमध्यादेकेनापि एकेनमंत्रेणाभिमंत्रणीयः यतः एताच्छिवायाः मंत्रयुगंपृथक् पृथक् स्फमहाप्रभावं वर्तते ८९ तांबूलेति तत्रतस्मिन् प्रदेशे नैमित्तिकं शाकुनाचार्यं प्रपूजयेत् कैः तांबूलवस्त्राशनदक्षिणाभिः तांबूलंचवस्त्रंच अशनंच दक्षिणाच एतासां द्वंद्वस्तैः किंविशिष्टं नैमित्तिकं शाकुनशास्त्रदक्षं शाकुनशास्त्रवेत्तारमित्यर्थः हि यस्मात्कारणात् आचार्यवर्ये परितोषिते अभीष्टं मनोभिलषितं ८९ आश्लेषिकेति याजंबूकगेहिनी शृगाली अश्लेषाकृत्तिका भरणी आर्द्रा धिष्ण्यानिपूर्वात्रितयेनसाकं पूर्वाफाल्गुनी -

॥ भाषा ॥

एकी इच्छा करे ताकूं यारीतकरकरनो योग्य है ॥ अथमंत्रः ॥ ॐ शिवे ज्वालामुखी बलिंगृहाण २ हुंफट् स्वाहा ॥ इत्यामंत्रणमंत्रः ॐ शिवे शिवदूति भगवती चंडि इदमर्घ्यबालिंली श्रालिलीलासमान्वितं नमार्चितं गृहाण २ आगच्छ २ वायुवेगेनशुभंकुरु २ स्वाहा ॥ इत्यर्घ्यमंत्रः ॥ इनमंत्रनकरकें बलिदान अर्घ देनो ॥ ८९ ॥ ॥ तांबूलेति ॥ याई स्थानमें शकुनशास्त्रके वेत्ता शकुनमें मुख्य आचार्य होंयउनको तांबूल वस्त्र भोजन दक्षिणा इनकरकें पूजन करे आचार्यके प्रसन्नहुये सूं मनोवांछित पूर्ण होंयहें ॥ ९० ॥ आश्लेषिकेति ॥ जो शृगाली अश्लेषा कृत्ति-

हितैषिणी सर्वसमीहितेषु देवी भवानी भुवि फेरवा
सु कृताधिवासा कृपया सदैव शिवारुते तेन यते
त विद्वान् ९१ इति व० शिवारुते बलिविधानप्र० ६
अथ प्रकरणोद्देशो वृत्तसंख्या च कथ्यते वृत्तैर्दि
क्रमयामाख्यमेकादशभिरादिमं १ द्वितीयं न
वभिर्वृत्तैः स्याद्दिक्पंचकनामकं त्रिगुणैः पंच-
भिर्वृत्तैस्तृतीयं च स्वराष्टकम् २

॥ टीका ॥

पूर्वाषाढा पूर्वाभाद्रपदेति नक्षत्रत्रिकेन सह ज्येष्ठां च संत्यज्य विरौति
साजंबुकगेहिनी श्रेयस्करी स्यात् ९० हितैषिणीति भुवि पृथि-
व्यां देवी भवानी वर्त्तते कीदृशी समीहितेषु हितैषिणी हितवांछि
का पुनः कीदृशी कृपया सदैव फेरवासु कृताधिवासा तेन कारणेन
शिवारुते विद्वान्यतेत यत्नं कुर्यात् ९१ इति व० टी० शिवारुते बलि
विधानप्र० ६ अथेति अथेति बलिविधानकथनानंतरं प्रकरणोद्दे-
शो वृत्तसंख्या च कथ्यते तत्र एकादशभिर्वृत्तैः आदिमं प्रथमं दिक्क्र
मयामाख्यं प्रकरणं भवति १ द्वितीयमिति दिक्पंचकनामकं द्विती-

॥ भाषा ॥

क्रभरणी आर्द्रा रोहिणी पूर्वा फाल्गुनी पूर्वाषाढा पूर्वाभाद्रपद ओर ज्येष्ठा नक्षत्रकूं
त्यागि करकें नक्षत्रनमें बोले तो कल्याण करे ॥ ९० ॥ हितैषिणीति ॥ या पृथ्वीमें
हित वांछाकी देवेवाली कृपाकरकें शिवा जो शृगाली तामें निवास कररही ऐसी भ
वानी देवी वर्ते हे. ता कारण करकें विद्वान् पुरुष शिवाके शब्दमें यत्न करे हें ॥ ९१ ॥ इ-
ति व० भा० टी० शि० बलिविधानप्र० ६ ॥ अथेति ॥ बलिविधान कहेके अनंतर अब
प्रकरण ओर श्लोकनकी संख्या कहें हें तामें ग्यारह श्लोकन करकें पहलो दिक्क्र
क्रयामनाम प्रकरण हे ॥ १ ॥ द्वितीयमिति ॥ दिक्पंचक नाम दूसरो प्रकरणनो

अष्टाविंशतिवृत्तंच तुर्यं यात्राभिधं स्मृतं पंचमं
स्थानकाख्यंच वृत्तैः षोडशभिर्भवेत् ३ बलि-
प्रकरणं षष्ठं वृत्तद्वादशकं स्मृतम् एवं प्रकर-
णैः षड्भिर्वृत्तानां नवतिः स्मृता ४ इतिव० शा०
शिवारुते बलिविधानप्रकरणं षष्ठम् ६ समा०

॥ टीका ॥

यं प्रकरणं नवभिर्वृत्तैः स्यात् स्वराष्टकं तृतीयंच त्रिगुणैः पंचभिः पंचदशभिर्वृत्तैः स्यात् २ अष्टाविंशतीति तुर्यं चतुर्थं यात्राभिधं प्रकरणं अष्टाविंशतिवृत्तं स्मृतं पंचमं स्थानकाख्यं च प्रकरणं षोडशभिर्वृत्तैर्भवेत् ३ बलिरिति षष्ठं बलिप्रकरणं वृत्तद्वादशकं वृत्तानांद्वादशं यत्र तत्तथा स्मृतं कथितं एवंपूर्वोक्तप्रकारेणषड्भिः प्रकरणैः वृत्तानां नवतिः ९० स्मृता प्रोक्ता ४ इतिश्रीवसंतराजशाकुने सदागमार्थशोभने समस्तसत्यकौतुके विचारितं शिवारुतं इति एकोनविंशतिमोवर्गः १९ इतिश्रीपातशाहश्री अकबरजल्लालदीनसूर्यसहस्रनामाध्यापक श्रीशत्रुंजयतीर्थकरमोचनाद्यनेक सुकृतविधायक महोपाध्यायश्रीभानुचंद्रगणिविरचितायां तच्छिष्याष्टोत्तरशतवधानसाधनप्रमुदितपादशाहश्री अकब्बरजल्लालदीनप्रदत्त खुश्फुहमापराभिधान महोपाध्यायश्रीसिद्धिचंद्रगणिनाविचार्य शोधितायां श्रीवसंतराजटीकायां एकोनविंशतिमोवर्गः १९ ॥ छ ॥

॥ भाषा ॥

श्लोकन करकें है तीसरो स्वराष्टक नाम प्रकरण तामें पंद्रह श्लोक हैं ॥ २ ॥ अष्टाविंशतीति ॥ चोथो यात्रा नाम प्रकरण तामें अठाईस श्लोक हैं पांचमो स्थानक नाम प्रकरण तामें सोलह श्लोक हैं ॥ ३ ॥ बलिरिति ॥ छठो बलिविधान नाम प्रकरण तामें बारह श्लोक हैं या प्रकार छे प्रकरण करकें निव्वे श्लोक जामें एसो ये उग

यदत्रवाच्यंसकलंयदुक्तंशास्त्रप्रभावंत्वधुनाभिद-
ध्मः प्रभावहीनंजनताजहाति महाप्रभावंतुयदभ्यु
पैति १ यदस्तिकिंचिज्जगतीहवस्तुस्मृतंश्रुतंस्पृष्टम
थापिदृष्टम् स्वप्नांतराद्यत्प्रतिपादितेतत्फलप्रद
त्वाच्छकुनं वदंति २

॥ टीका ॥

यदिति यत् अत्र अस्मिन् ग्रंथे वाच्यं वक्तव्यं तत्सकलं समस्तं उक्तम् कथितं अधुना शास्त्रप्रभावं ग्रंथस्य माहात्म्यं वयं अभिदध्मः ब्रूमः यद्यस्मात्कारणात् प्रभावहीनं महात्म्यवर्जितं जनता जनानां समूहो जहाति त्यजति महाप्रभावंशास्त्रंचाप्युपैति अंगीकुरुते १ यदिति इह जगती लोके यत् किंचित् वस्तु स्मृतं चिंतितंश्रुतंश्रवणविषयीकृतं स्पृष्टं स्पर्शविषयीकृतं दृष्टं दृग्गोचरीकृतं स्वप्नांतरात् यत्प्रतिपादितं तत् फलप्रदत्वात्सर्वं शाकुनं वदंति २ ॥छ॥

॥ भाषा ॥

नीसमो वर्ग कह्यो हे ॥४॥ इतिश्री वसंतराजभाषाटीकायां शिवारुतंनाम एकोनविं-
शातिमोवर्गः ॥१९॥ यदिति ॥ या ग्रंथमें जो कहवेके योग्य हे सो समस्त कह्यो अ-
बश्शस्त्रको प्रभाव ग्रंथको महात्म्य हम कहें हें या कारणतें कै प्रभावहीन ओर महा-
त्म्यहीन शास्त्रकूं जनसमूह त्यागकर देंहेंजो शास्त्र महान् प्रभाववान् होय जाको
माहात्म्य बोहोत होय वाकूं अंगीकार करेंहें ॥१॥ यदिति॥ या लोकमें जो कछू वस्तु
चिंतमन करवेमें आवेहे जो श्रवणमें आवे हे जो स्पर्शमें आवे हे जो दीखवेमें
आवेहे जो स्वप्नांतरसूं प्रतिपादन कियो जाय हे वो सब फल देवेवारो हे यातें
संपूर्ण शाकुन कहें हें ॥२॥ ॥छ॥

पुरांधकेभासुरसूदनादियात्रास्वपश्यत्भगवान्निजार्थे
जिगीषवेमून्शाकुनानशेषानुपादिशंस्तारकवैरिणेच
३ ददौ तथाजंभवधोद्यतायसुत्रामणेचित्रशिखंडिजं
न्मा सुधापहारोद्यमिनेपुरामीदत्तासुपर्णायचका
श्यपेन ४·

॥ टीका ॥

पुरेति पुरांधकेभास्करसूदनादियात्रासु भगवान् ईश्वरः निजार्थे आसक्ते शाकुनमपश्यत् पुनर्भगवान् तारकवैरिणे स्कंदाय अमून् शाकुनान् अशेषान् उपादिशत् उपदेशं कृतवान् कीदृशाय तारकवैरिणे जिगीषवे जेतुमिच्छतीति जिगीषुस्तस्मै जिगीषवे ३ ददाविति तथा चित्रशिखंडिजन्मा स्वामिकार्तिकेयो जंभवधोद्यताय सुत्रामणे इंद्राय ददौ सुत्रामागोत्रभिद्वज्री वासवोवृत्रहावृषेत्यमरः ततः इंद्रः कालांतरेण काश्यपाय दत्तवान् काश्यपेन पुनः पुरा अमी शाकुनाः सुपर्णायगरुडाय दत्ताः किंविशिष्टाय सुधापहारोद्यमिने सुधा अमृतं तस्यापहारः अपहरणं तत्र उद्यमवान् तस्मै एतत् कथानकं ग्रंथांतरादवसेयं नागांतकोविष्णुरथः सुपर्णः पन्नगाशनः इत्यमरः ४

॥ भाषा ॥

॥ पुरेति॥ पहलें शिवजीनें अंधकासुरकूं आदि ले दैत्यनके वधके लियें अपशकुन देखते हुये फिर शिवजी तारकासुरके वैरी जयकी इच्छा करत हे ऐसे स्वामीकार्तिकजीके अर्थ इन शाकुनकूं उपदेश करते हुये ॥३॥ ॥ददाविति॥ स्वामीकार्तिकजी जंभासुरके वधकरवेकूं उद्युक्त होय रह्यो इंद्र ताकूं देते हुयेत। पीछें इंद्र कालांतरमें कश्यपजीके अर्थ देतो हुयो और कश्यपजीनें पूर्व येशकुन अमृतके हरवेमें उद्युक्त ऐसे गरुडके अर्थ दीने ॥४॥

अतींद्रियज्ञानमिदंमुनींद्रैर्विज्ञायशिष्यार्थितयाप्रणी
तम् आप्तोपदेशात्तदवाप्यसम्यगस्माभिरभ्यस्य
यथावदुक्तं ५ महेश्वरंशाकुनशास्त्रसारंसारंसम
स्तंसहदेवशास्त्रात् सारंचवाचस्पतिगर्गशुक्रभृ
ग्वादिशास्त्रादिहसंग्रहीतं ६ न्यूनाधिकत्वंशकुने
षुमध्यात्कस्यापिकेनापि नभावनीयम्

॥ टीका ॥

अतींद्रियेति अतींद्रियज्ञानं इदं इंद्रियनिरपेक्षं ज्ञानं इदं मुनींद्रैः शि-
ष्यार्थितया विनयकार्यार्थितया विज्ञाय ज्ञात्वा प्रणीतं प्रतिपादितं अ
स्माभिरपि आप्तोपदेशात् तज्ज्ञानं अवाप्य ज्ञात्वा सम्यक् यथा भवति
तथा अभ्यस्य अभ्यासंकृत्वा यथावदुक्तं यथा गृहीतं तथाप्रकारेणप्र-
तिपादितामित्यर्थः आप्तप्रत्ययितौ समौ इत्यमरः ५ माहेश्वरमिति
इह शास्त्रे माहेश्वरं महेश्वरेण प्रणीतं शाकुनशास्त्रसारं तथा सह
देवशास्त्रात् समस्तं सारं तथा वाचस्पतिगर्गशुक्रभृग्वादयो मु
नयः तैः प्रणीतात् शास्त्रात् सारं तत्वं संग्रहीतामित्यर्थः ६ न्यू-
नाधिकत्वमिति केनापिपुंसेति शेषः शकुनेषु मध्यात् कस्यापिश-

॥ भाषा ॥

॥अतींद्रियेति॥ मुनींद्रनें शिष्यनकी प्रार्थनाकर ये अप्रत्यक्ष ज्ञान ताकूं जान कर-
कें प्रतिपादन करते हुये हमनेवी उपदेशसूं येज्ञान जानकरकें फिर अभ्यास करकें
जेसो कह्योहै जेसो ग्रहण कियो ता प्रकारकर प्रतिपादनकियो है ॥ ५॥ माहेश्व
रमिति ॥ याशास्त्रमें महादेवजीनें कह्यो जो शकुनशास्त्रको सार और सहदे
वके शास्त्रतें समस्त सार तेसें ही बृहस्पती गर्गसुक्र भृग्वादिक मुनी इननें करे
जेशास्त्रउनतें ये सार ग्रहण कियो है ॥ ६॥ न्यूनाधिकत्वमिति॥ शिवजीकूं
आदिले सहदेव बृहस्पति गर्ग सुक्र भृग्वादिक इननें कहें हें यातें शकुननके

महेश्वरादिप्रतिपादितत्वात्सर्वेपिसत्याः शकुनाय
तोमी ७ वेदाः प्रमाणंस्मृतयः प्रमाणं लोकेपुराणानि
यथाप्रमाणम् विशुद्धबोधाव्यभिचारिभा
वात्तथाप्रमाणंशाकुनागमोऽयम् ८ अपायरक्षा
सदुपायवृत्तीस्यातांसदाशिक्षितशाकुनस्य स्या
च्चैहिकामुष्मिकसारभूतात्रिवर्गवृद्धिः शकुनप्रभावात्
९

॥ टीका ॥

कुनस्यन्यूनाधिकत्वं नभावनीयं न विचारणीयं महेश्वरादिप्रतिपादितत्वान्महेश्वरो महादेवः आदौ येषां ते महेश्वरसहदेववाचस्पतिगर्गशुक्रभृग्वादयस्तैः प्रतिपादितत्वात् प्रोक्तत्वात् सर्वेपि अमी शकुनाः सत्याः अविसंवादिनइत्यर्थः ७ वेदाइति यथा लोके वेदाःप्रमाणं यथाअष्टादशस्मृतयःप्रमाणं यथा पुराणानि अष्टादशसंख्याकानिप्रमाणं विशुद्धबोधाव्यभिचारिभावात् विशुद्धः स्वस्थो यो बोधो ज्ञानं तस्मिन् अव्यभिचारित्वात् अविसंवादित्वात् इतियावत् तथाऽयंशाकुनागमः शकुनसिद्धांतोपिप्रमाणं ८ अपायेति शिक्षितशाकुनस्यपुंसः सदा अपायरक्षासदुपायवृत्तीस्यातां भवेतां अपायः कष्टंतस्मात् रक्षात्राणं सच्छोभनोपायांवृत्तिः आजीविका एतयोर्द्वंद्वः तथा ऐहिकामुष्मिकसारभूतात् इहलोकपरलोकसारभूतात् शकुनप्रभावात् त्रिवर्गवृद्धिःवासिद्धिःस्यात् तत्रत्रिवर्गः धर्मार्थकामाःतेषांसिद्धिःप्राप्तिःस्यादित्यर्थः ९

॥ भाषा ॥

मध्यमेंसूं कोई शकुनवी न्यून अधिक नहीं विचारणो योग्य हे संपूर्ण ही येशकुन सत्य हें ॥७॥ वेदाइति ॥ लोकमें जैसें वेदप्रमाण हे जैसें अठारे स्मृती प्रमाण हें जैसें अठारे पुराण प्रमाण हें तेसेंही ये शकुन शास्त्र शकुनसिद्धांत प्रमाण हे ॥८॥ अपायेति ॥ शकुनशास्त्रकूं जाने ता पुरुषके सदां कष्टसूं रक्षा सुंदर उपाय

आसीदिदंचास्तिभविष्यतीति प्रश्नत्रयंशाकुनिको
विभिन्नम् विधाय यो वेत्ति फलानि तेषां त्रिकालद-
र्शी जगतीह सस्यात् १० यस्यालये तिष्ठति शास्त्र
मेवश्रेयस्करं दुष्कृतनाशनं च विलेखितं दुःखद
रिद्रहारि निकेतनात्तस्य बिभेति मृत्युः ११

॥ टीका ॥

आसीदिति यः शाकुनिकः इदं आसीत् पूर्वमभूत् इदं अस्ति संप्रतिवर्तते इदं अग्रेभविष्यति संपत्स्यते इति प्रश्नत्रयं विभक्तं विभिन्नं विधाय कृत्वा तेषां फलानि योवेत्ति जानाति सइह जगति त्रिकालदर्शी भवति त्रिकालं अतीतवर्तमानभविष्यल्लक्षणं कालत्रयं पश्यति सत्रिकालदर्शीत्यर्थः १० यस्येति यस्यालये यस्य गृहे एतत् शास्त्रं विलेखितं तिष्ठति आस्ते तस्यनिकेतनात् भवनात् मृत्युर्यमो बिभेति कीदृशमेतच्छास्त्रं श्रेयस्करं कल्याणकारकं पुनः कीदृशं दुष्कृतनाशनं पापापहारकं पुनः कीदृशं दुःखदारिद्रहारि दुःखंच दरिद्रंच अनयोर्द्वन्द्वः ते हरतीत्येवंशीलं पुनः कीदृशं विलेखितं लिखितं लिखितमित्यर्थः ११

॥ भाषा ॥

आजीविका ये होंय यालोकपरलोकके सारभूत शकुनको प्रभाव तातें धर्म अर्थ काम इनकी वृद्धी होय वा प्राप्ती होय ॥९॥ आसीदिति ॥ जो शकुनी ये पहलें होतो हुयो येअब वर्ते है ये आगाडी होयगो इन तीनो प्रश्नकूं न्यारेन्यारे भेदकरकें इनके फल जो जाने वो या पृथ्वीमें त्रिकालदर्शी जाननो ॥१०॥ यस्येति ॥ जा पुरुषके घरमें कल्याणको करवेवारो पापनको दूरकरवेवालो दूख दारिद्र्यको हरवेवालो और लिखो हुयो होय एसो ये शकुनशास्त्र होय वाके स्थानतें यमराज भय मानो करे ॥११॥

दारिद्र्यविद्रावणनामधेयमधीयते यत्र गृहे सदैव हठेन हृत्वा विपदं वराकीं निराकुला तिष्ठति तत्र संपत् १२

प्रतिष्ठिते तिष्ठति लिप्स्यतेऽर्थं संगच्छते यच्छति युध्यतेच इत्यादि यद्यच्छकुनेनकुर्यात्ततस्ततोनस्खलति स्वकार्यात् १३

॥ टीका ॥

दारिद्र्येति दारिद्र्यविद्रावणनामधेयमिदंशास्त्रं यत्रगृहे सदैव अधीयते पठ्यते तत्र वराकीं शोचनीयां आपदं हठेन हृत्वा संपत् निराकुला निश्चला तिष्ठति वराकः शोचनीयः स्यादिति विश्वः १२ प्रतिष्ठितेइति यः पुमान् प्रतिष्ठिते स्थिरतां प्राप्ते शकुने तिष्ठति तथा सस्पृहे शकुने अर्थं लिप्स्यते तथा संगच्छते गमनायोद्यते शकुने गच्छति इतस्ततः प्रयाति तथा युद्धोद्यते शकुने युध्यति युद्धं करोति इत्यादि पूर्वोक्तं यद्यद्वस्तु शकुनेनसमं कुर्यात् सपुमान् ततस्ततः स्वकार्यात् न स्खलति न भ्रंशं प्राप्नोतीत्यर्थः १३ ॥छ॥

॥ भाषा ॥

॥दारिद्र्येति॥ दारिद्र्यविद्रावणनाम ये ग्रंथ है जो याये अध्ययन करे जाके घरमें सदां स्थित रहे ता घरमें शोकके योग्य आपदाकूं हठसूं दूरकरकें निश्चल संपदा करै ॥ १२॥ प्रतिष्ठितेइति ॥ जो पुरुष स्थिरभावकूं प्राप्त होय शकुन स्थिर होय वांछासहित शकुन होय गमनके लियें उद्युक्त होय रह्यो होय युद्धके लियें उद्युक्त होय वा युद्ध करे इनकूं आदि ले जोजो वस्तु कार्य शकुनसूं ही करे तो वो पुरुष ताता कार्यतें भ्रष्ट नहीं होय ॥ १३॥

उत्साहाध्यवसायधैर्यजनकं राज्याप्तिसंसूचकं
युद्धद्यूतविवाददिव्यजयदं लक्ष्मीप्रदं क्षेमदम् ॥

॥ टीका ॥

उत्सीहेति मया महाशाकुने प्रकृष्टशकुनशास्त्रं प्रोक्तं कीदृशम् उत्साहाध्यवसायधैर्यजनकं चेतसः उत्साहाध्यवसायन धैर्यवशरवंशुभशकुनावलोकनेन मनसेः उत्साहः प्रमोदो भवति ततः धैर्यम् स्यादित्यर्थः पुनः कीदृशं राज्याप्तिसंसूचकं तथाविधशकुनावलोकनेन दरिद्रोपद्रुतस्यापि राज्यप्राप्तिः संसूच्यते पुनः किंविशिष्टम् युद्धद्यूतविवाददिव्यजयदं युद्धं संपरायः द्यूतं दुरोदरं विवादः परस्परं वाग्व्यापारः दिव्यं अग्नितप्तघृतादौ हस्तप्रक्षेपादिकं एतेषां द्वंद्वः एतेषु स्थानेषु जयदम् जयप्रदम् यद्वा दिव्यजयदम् अद्भुतंजयप्रदमित्यर्थः पुनः कीदृशं लक्ष्मीप्रदं द्रव्यप्रदं पुनः किंविशिष्टम् क्षेमदं कल्याणप्रदं शकुनानुयायिनां सर्वदा कल्याणकारकम् पुनः कीदृशं यात्रामन्त्ररसायनौषधविधौ सिद्धिप्रदम् तत्र यात्रा अन्यत्र जनपदादौ गमनं मन्त्रो रहस्यालोचः अथवा मंत्रो देवताराधनाक्षरात्मकः प्र-

॥ भाषा ॥

॥उत्साहेति॥ चित्तकूं उत्साह प्रमोद धैर्य इनकूं प्रगट करवेवालो राज्यकी प्राप्ती की सूचनका करे शकुनके देखवेकरकें दरिद्री होय वाकूं राज्यकी प्राप्तीको कहवेवारो और युद्ध जूआ विवाद दिव्यकर्म इन स्थाननमें जयको देवेवारो अथवा अद्भुत जय देवे और लक्ष्मीको देवेवारो कल्याणको करवेवारो यात्रा मंत्र रसायन औषध रोगकूं दूर करवेवालो द्रव्य, इनकी विधीमें सिद्धीको करवेवालो जो उत्तम शकुन देखकर प्रारंभ करे तो अवश्य सिद्धी होय पूर्व जन्ममें जो संचय कियो शुभ अशुभ कर्मको फल सुखदूखको भोगनो ताको सूचन करवेवालो एसो महाशाकुनमें श्रेष्ठ शाकुनशास्त्र सो मेनें कह्यो हे ॥१४॥

यात्रामन्त्ररसायनौषधविधौ सिद्धिप्रसिद्ध्यावहं
प्राग्जन्मार्ज्जितकर्मपाकपिशुनं प्रोक्तं महाशाकुनं १४ .

॥ टीका ॥ इतिव॰शा॰विंशतिमोवर्गः २०

सिद्धः रसायनं पारदक्रिया औषधं आमयोपशामकद्रव्यम् एतेषाम् द्वंद्वस्तेषां विधिर्विधानं तस्मिन् सिद्धिप्रदं कार्यनिष्पत्तिहेतुः सिद्धिदायकं सच्छकुनैरेतेषां प्रारंभे अवश्यं सिद्धिः स्यात् पुनर्विशिनष्टि प्राग्जन्मार्ज्जितकर्मपाकपिशुनं पूर्वजन्मनि यदर्जितं शुभाशुभम् कर्म तस्य यः पाकः सुखदुःखानुभवः तस्य पिशुनं सूचकं स्तोकैः एवदिनैर्ममसुखंदुःखं भविष्यतीति शकुनाज्ज्ञानं स्यादित्यर्थः १४ इति वसंतराजशाकुने समस्तसत्यकौतुके सदागमार्थशोभने कृतं प्रभावकीर्तनं १ पूर्वव्याख्यातविशेषणविशिष्टे वसंतराजशाकुने ग्रंथस्य प्रभावकीर्तनंकृतं इति विंशतिमो वर्गः २० इतिश्रीपातशाहश्री अकब्बरजल्लालदीनसूर्यसहस्रनामाध्यापकः श्रीशत्रुंजयतीर्थकरमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचंद्रगणिविरचितायां तच्छिष्याष्टोत्तरशतवेमध साधनप्रमुदितपातशाहश्री अकब्बरजल्लालदीनप्रदत्तखुश्फहमापराभिधानमहोपाध्यायश्रीसिद्धिचद्रगणिना विचार्य शोधितायां वसंतराजटीकायां विंशतिमो वर्गः २० समाप्तोऽयं ग्रंथः श्रीर्जयतु.

॥ भाषा ॥

इति श्रीवसंतराजव्याख्यायां दध्यङ्कुलोत्पन्नजटाशंकरात्मजश्रीधरकृतायां मनोरंजिन्यभिधायां शास्त्रप्रभाववर्णनं नाम विंशतिमो वर्गः ॥२०॥

इदं पुस्तकं १८०५ परिमिते शालीवाहनशाके तथा १९४० परिमिते विक्रमसंवत्सरे कार्तिकशुक्लसप्तम्यां सौम्यवासरे मुंबापुर्यां जगदीश्वराख्यशिलायंत्रे सवाईजयपूरनामकराजधानीनिवासिना दध्यङ्कुलोत्पन्नेन ज्योतिर्विदा विद्वद्वर्यजटाशंकरात्मजेन श्रीधरसंज्ञकेन भाषाश्यं प्रणीतं ॥ मूलग्रंथसंख्या २५०० टीकाग्रंथसंख्या ५०० भाषाग्रंथसं॰ ६०००